क्त्वा मतंगोपि संप्राप्तः स्थानमुत्तमं २६ एवमेतत्परं स्थानं ब्राह्मण्यं नाम भारत तच्च दुष्प्रापमिह वै महेंद्रवचनं यथा २७ इति
दानधर्मे इंद्रमतंगसंवादः २९ ॥

षः १८ दैवं प्राक्कर्म यत्यतः एतां अब्राह्मणत्वरूपां १९ एतत्परं एतस्माद्देवतामावात्पुंस्त्रीषु तपसा देवभावोपि लभ्यः शक्यो न तु विप्रता २७ मतंगाध्यायप्रकाशः १८ पाम० ९९

श्रुतंमे ६ तस्यशर्यातेरन्ववायेवत्सस्यपुत्रौहैहयराजानाविति योजना १० वीतहव्यदायादैर्हैहयैसेवनामांतरंवीतहव्यइतितत्पुत्रैः ११ वत्सानांवत्सवंशपानांराज्ञां १७॥॥

युधिष्ठिरउवाच श्रुतंमेमहदाख्यानमेतत्कुरुकुलोद्वह सुदुःप्रापंप्रब्रवीषित्वंब्राह्मण्यंवदतांवर १ विश्वामित्रेणाचपुराब्राह्मण्यंप्राप्तमित्युत श्रूयते
वदसेतच्चदुष्प्रापमितितिसत्तम २ वीतहव्यस्तुनृपतिःश्रुतोमेविप्रतांगतः तदेवतावद्गांगेयश्रोतुमिच्छाम्यहंविभो ३ सकेनकर्म्मणाप्राप्तोब्राह्मण्यंराज
सत्तमः वरेणतपसावापितन्मेव्याख्यातुमर्हसि ४ भीष्मउ० शृणुराजन्यथाराजावीतहव्योमहायशाः राजर्षिर्दुर्ल्लभंप्राप्तोब्राह्मण्यंलोकस
त्कृतं ५ मनोर्म्महात्मनस्तातप्रजाधर्म्मेणशासतः बभूवपुत्रोधर्म्मात्माशर्य्यातिरितिविश्रुतः ६ तस्यान्ववायेद्वौराजन्राजानौसंबभूवतुः हैहै
यस्तालजंघश्चवत्सस्यजयतांवरः ७ हैहयस्यतुराजेंद्रदशस्त्रीषुभारत शतंबभूवपुत्राणांशूराणामनिवर्त्तिनां ८ तुल्यरूपप्रभावानांव
लिनांयुद्धशालिनां धनुर्वेदेचवेदेचसर्वत्रैवकृतश्रमाः ९ काशिष्वपिनृपोराजन्दिवोदासपितामहः हर्यश्वइतिविख्यातोबभूवजयतांवरः १०
सवीतहव्यदायादैरागत्यपुरुषर्षभः गंगायमुनयोर्मध्येसंग्रामेविनिपातितः ११ तंतुहत्वानरपतिंहैहयास्तेमहारथाः प्रतिजग्मुःपुरींरम्यांवत्साना
मकुतोभयाः १२ हर्यश्वस्यचदायादःकाशिराजोभ्यषिच्यत सुदेवोदेवसंकाशःसाक्षाद्धर्मइवापरः १३ सपालयामासमहींधर्म्मात्माका
शिनंदनः तैर्वीतहव्यैरागत्ययुधिसर्वैर्विनिर्ज्जितः १४ तमथाजौविनिर्ज्जित्यप्रतिजग्मुर्यथागतं सौदेवस्त्वथकाशीशोदिवोदासोभ्यषिच्यत
१५ दिवोदासस्तुविज्ञायवीर्य्यंतेषांयतात्मनां वाराणसींमहातेजानिर्म्ममेशक्रशासनात् १६ विप्रक्षत्रियसंबाधांवैश्यशूद्रसमाकुलां नैक
द्रव्योच्चयवतींसमृद्धविपणापणां १७ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा० १०० वप्रांतेतटसमीपे वप्रः स्थानेपुमानस्त्रीरेणुक्षेत्रचयेकेतरेइतिमेदिनी २० दशतीर्दशसहस्राणिसर्पःषष्टिसप्ततिशब्दोपिदशगुणितान्तःशब्देषे २५ परिघूनःसर्वतोनिरस्तः ३०

गंगायाउत्तरेकूलेवप्रांतेराजसत्तम गोमत्यादक्षिणेकूलेशक्रस्येवामरावती १८ तत्रतंराजशार्दूलंनिवसंतंमहीपतिं आगत्यहैहयाभ्य
यःपर्य्यधावन्तभारत १९ सनिष्क्रम्यददौयुद्धंतेभ्योराजामहाबलः देवासुरसमंघोरंदिवोदासोमहाद्युतिः २० सतुयुद्धेमहाराजदिनानांद
शतीर्दश हतवाहनभूयिष्ठस्ततोदैन्यमुपागमत् हतयोधस्ततोराजन्क्षीणकोषश्चभूमिपः दिवोदासःपुरींत्यक्त्वापलायनपरोभवत् २२
गत्वाश्रमपदंरम्यंभरद्वाजस्यधीमतः जगामशरणंराजाकृतांजलिरिंदम २३ तमुवाचभरद्वाजोज्येष्ठःपुत्रोबृहस्पतेः पुरोधाःशीलसंपन्नो
दिवोदासंमहीपतिं २४ किमागमनकृत्यंतेसर्वंमेब्रूहिमेनृपः यत्तेप्रियंतत्करिष्येनमेत्रास्तिविचारणा २५ राजोवाच भगवन्वैतहव्यै
र्मेयुद्धेवंशःप्रणाशितः अहमेकःपरिद्यूनोभवंतंशरणंगतः २६ शिष्यस्नेहेनभगवंस्त्वंमांरक्षितुमर्हसि एषशेषःकृतोवंशोममतैःपा
पकर्मभिः २७ तमुवाचमहाभागोभरद्वाजःप्रतापवान् नभेतव्यंनभेतव्यंसौदेवव्येतुतेभयं २८ अहमिष्टिंकरिष्यामिपुत्रार्थंतेविशांपते
वीतहव्यसहस्राणियेनत्वंप्रहरिष्यसि २९ ततइष्टिंचकारर्षिस्तस्यवैपुत्रकामिकां अथास्यतनयोजज्ञेप्रतर्द्दनइतिस्मृतः ३० सजातमात्रो
ववृधेसमाःसद्यस्त्रयोदश वेदंचाप्यजगौकृत्स्नंधनुर्वेदंचभारत ३१ योगेनचसमाविष्टोभरद्वाजेनधीमता तेजोलौकंससंगृह्यतस्मिन्देशे
समाविशत् ३२॥

सद्योववृधेत्रयोदशवार्षिकोभूत्सद्यश्चवेदानजगौ ३१ योगेनयोगबलेनलौकंलोकेषुविद्यमानंतस्मिन्देशेप्रतर्दने समाविशतसमावेशितवान् ३२ ३२ ॥ रामं० १००

© Dharmartha Trust J&K. Digitized By eGangotri

४६ तस्यतंप्रतिमांआगतंआवक्षतकथयत ४१ ४९ ॥ ॥

ततःसकवचीधन्वीस्तूयमानःसुरर्षिभिः वंदिभिर्वर्धमानश्चवभौसूर्य्यइवोदितः ३३ सरथीवद्धनिस्त्रिंशोवभौदीप्तइवा
नलः प्रययौसधनुर्धृत्वनखड्गीचर्मीशरासनी ३४ तदृष्ट्वापरमंहर्षंसुदेवतनयोययौ मेनेचमनसादग्धान्वैतहव्यान्सपार्थि
वः ३५ ततोसौयोवराज्येचस्थाप्यप्रतर्दनं कृतकृत्यंतदात्मानंसराजाअभ्यनंदत ३६ ततस्तुवैतहव्यानांवधायसमहीपतिः
पुत्रंप्रस्थापयामासप्रतर्दनमरिंदमं ३७ सरथःसतुसंतीर्य्यगंगामाशुपराक्रमी प्रययौवीतहव्यानांपुरीपरपुरंजयः ३८
वैतहव्यास्तुसंश्रुत्यरथघोषंसमुद्धतं निर्ययुर्नगराकारैरथैःपररथारुजैः ३९ निष्क्रम्यतेनरव्याघ्रादंशितास्त्रि
त्रयोधिनः प्रतर्दनंसमाजग्मुःशरवर्षैरुदायुधाः ४० शस्त्रैश्चविविधाकारैरथौघैश्चयुधिष्ठिर अभ्यवर्षतराजानंहिम
वंतमिवांबुदाः ४१ अस्त्रैरस्त्राणिसंवार्य्यतेषांराजाप्रतर्दनः जघानतान्महातेजावज्रानलसमैःशरैः ४२ कृत्तोत्त
मांगास्तेराजन्भल्लैःशतसहस्रशः अपतन्रुधिरार्द्रांगानिकृत्ताइवकिंशुकाः ४३ हतेषुतेषुसर्वेषुवीतहव्यसुतेष्वथप्रा
द्रवन्नगरंहित्वाभृगोराश्रममप्युत ४४ ययौभृगुंचशरणंवीतहव्योनराधिपः अभयंचददौतस्मैराजन्भृगुस्तदा
४५ अथानुपदमेवाशुतत्रागच्छत्प्रतर्दनः संप्राप्यचाश्रमपदंदिवोदासात्मजोब्रवीत ४६ भोभोःकेत्राश्रमेसंतिभृगोः
शिष्यामहात्मनः द्रष्टुमिच्छेमुनिमहंतस्याचक्ष्वतमामिति ४७ सतंविदित्वातुभृगुःनिश्चक्रामाश्रमात्तदा पूजयामास
चततोविधिनान्यपसत्तमं ४८ उवाचचैनंराजेंद्रकिंकार्यंब्रूहिपार्थिव सचोवाचनृपस्तस्मैयदागमनकारणं ४९ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शा०
१०१

५६ आख्यापिकानाम यथाहं भृगोरिति ५८ श्रुतिः तद्गुत्समतेन वेगृत्समदः सप्रियंचामोयेपायेमादिका ६६ ॥ ॥ ७ ॥

राजोवाच अयंब्रह्मन्वृतोराजावीतहव्योविसर्जितः तस्यपुत्रैर्हिमेकृत्स्नोब्रह्मन्वंशःप्रणाशितः ५० उत्सादितस्तथाविषयःका
शीनांरत्नसंचयः एतस्यवीर्यदृप्तस्यहतंपुत्रशतंमया ५१ अस्येदानींवधाद्ब्रह्मन्भविष्याम्यनृणःपितुः तमुवाचकृपाविष्टोभृगुर्धर्म
भृतांवरः ५२ नेहास्तिक्षत्रियःकश्चित्सर्वेहीमेद्विजातयः एतत्तुवचनंश्रुत्वाभृगोस्तथ्यंप्रतर्दनः ५३ पादावुपस्पृश्यशनैःप्रहृष्टो
वाक्यमब्रवीत् एवमप्यस्मिभगवन्कृतकृत्योनसंशयः ५४ यदेषराजावीर्येणस्वजातिंत्याजितोमया अनुजानीहिमांब्रह्मन्
ध्यायस्वचशिवेनमां ५५ त्याजितोहिमयाजातिमेषराजाभृगूद्वह ततस्तेनाभ्यनुज्ञातोययौराजाप्रतर्दनः ५६ यथागतंमहारा
जमुक्त्वाविषमिवोरगः भृगोर्वचनमात्रेणसचब्रह्मर्षितांगतः ५७ वीतहव्योमहाराजब्रह्मवादित्वमेवच तस्यगृत्समदःपु
त्रोरूपेणेंद्रइवापरः ५८ शक्रस्त्वमितियोदैत्यैर्निगृहीतःकिलाभवत् ऋग्वेदेवर्त्ततेचाग्र्याश्रुतिर्यस्यमहात्मनः ५९ य
त्रगृत्समदोब्रह्मन्ब्राह्मणैःसमहीयते सब्रह्मचारीविप्रर्षिःश्रीमान्गृत्समदोभवत् ६० पुत्रोगृत्समदस्यापिसुचेताअभवत्
द्विजः वर्चाःसुतेजसःपुत्रोविहव्यस्तस्यचात्मजः ६१ विहव्यस्यतुपुत्रस्तुवितत्यस्तस्यचात्मजः वितत्यस्यसुतःसत्यःसंतः
सत्यस्यचात्मजः ६२ श्रवास्तस्यसुतश्चर्षिःश्रवसश्चाभवत्तमः तमसश्चप्रकाशोभूत्तनयोद्विजसत्तमः प्रकाशस्यचवागिं
द्रोबभूवजपतांवरः ६३ तस्यात्मजश्चप्रमतिर्वेदवेदांगपारगः घृताच्यांतस्यपुत्रस्तुरुरुर्नामोदपद्यत प्रमद्वरायांतुरुरोःपुत्रः
समुदपद्यत शुनकोनामविप्रर्षिर्यस्यपुत्रोथशौनकः एवंविप्रत्वमगमद्वीतहव्योनराधिपः भृगोःप्रसादाद्राजेंद्रक्षत्रियःक्षत्रिय
र्षभः ६६ ॥ राम०
१०१

© Dharmartha Trust J&K. Digitized By eGangotri

६७ अध्याये केपूज्याइति ब्राह्मणएषसद्भुग्राप्यत्वं विप्रानुग्रहेकत्वमनंतं वोक्ता पूज्यत्वहेतुसाधारणानसाधारणांश्चधर्मानाहानेनाध्यायेन ३ तेषुमानवेषुवहुमानपरः
सन्कांनमस्यसीतियोजः ७ महार्हान्महान्अर्हःपूजायेषां अतिपूज्यानित्यर्थः ८ अविकत्थनाःश्लाघाहीनाः ९ सत्यंधर्मंचयजंतिपूजयंक्षितिं

तथैवकथितोवंशोमयागार्त्स्यमदस्तव विस्तरेणमहाराजकिमन्यदनुपृच्छसि ६७ इतिदानधर्म्मेवीतहव्योपाख्यानं ३६ युधि
ष्ठिरउ० केपूज्यावैत्रिलोकेस्मिन्मानवाभरतर्षभ विस्तरेणतदाचक्ष्वनहितृप्यामिकथ्यतः १ भीष्मउ० अत्राप्युदाहरंतीममि
तिहासंपुरातनं नारदस्यचसंवादंवासुदेवस्यचोभयोः २ नारदंप्रांजलिंदृष्ट्वापूजयानंद्विजर्षभान् केशवःपरिपप्रच्छभगवन्कान्न
मस्यसि बहुमानपरस्तेषुभगवन्कान्नमस्यसि शक्यंचेच्छ्रोतुमस्माभिर्ब्रूह्येतद्धर्म्मवित्तम ४ नारदउ० शृणुगोविंदयानेतान्पूज
याम्यरिमर्दन त्वत्तोन्यःकःपुमांल्लोकेश्रोतुमेतदिहार्हति ५ वरुणंवायुमादित्यंपर्जन्यंजातवेदसं स्थाणुंस्कंदंतथालक्ष्मींवि
ष्णुंब्राह्मणमेवच ६ वाचस्पतिंचंद्रमसमपःपृथ्वींसरस्वतीं सततंयेनमस्यंतितान्नमस्याम्यहंविभो तपोधनान्वेदविदोनित्यं
वेदपरायणान् महार्हान्वृष्णिशार्दूलसदासंपूजयाम्यहं ८ अभुक्त्वादेवकार्याणिकुर्वतेयेऽविकत्थनाः संतुष्टाश्चक्ष
मायुक्तास्तान्नमस्याम्यहंविभो ९ सम्यग्यजंतियेचेष्टीः क्षांतादांताजितेंद्रियाः सत्यंधर्मंक्षितिंगाश्चतान्नमस्यामियादव
१० येवैतपसिवर्त्तंतेवनेमूलफलाशनाः असंचयाःक्रियावंतःतान्नमस्यामियादव ११ येभृत्यभरणेशक्ताःसततंचाति
थिव्रताः भुंजतेदेवशेषाणितान्नमस्यामियादव १२ येवेदंप्राप्यदुर्द्धर्षावाग्मिनोब्रह्मचारिणः याजनेध्यापनेयुक्तानित्यंता
न्पूजयाम्यहं १३

गाश्चयजंति ब्राह्मणोभ्यःप्रयच्छति यत्तुदेवपूजासंगतिकारणाद्दानेषुएतेयोयथासंभवमिहग्राह्याः १३ ॥

द्वा० आपृष्टतापात्पावन्मध्याह्नस्वाध्यायेब्रह्ममत्तेमंत्रजपेवा १९ निद्रीकाःदिगंबराः कौपीनमात्रमपिपरिग्रहंनकुर्वंतीत्यर्थः १६ कपोतवृत्तयः कणा
१०२ शश्चादपपर्येसंग्रहंनकुर्वतीत्यर्थः २० त्रिवर्गोधर्मार्थकामः कृतेषुकर्तव्येषुयोगेषुकर्मसुवर्तंतेउत्तममध्यमाधमभावेनेत्यर्थः २१ अलोलुपाइत्य

प्रसन्न[illegible]हृदयाश्चैवसर्वसत्वेषुनित्यशः आपृष्टतापान्स्वाध्यायेयुक्तास्तान्पूजयाम्यहं १४ गुरुप्रसादेस्वाध्यायेयतं
तोयेस्थिरव्रताः शुश्रूषवोनसूयंतस्तान्नमस्यामियादव १५ सुव्रताःमुनयोयेचब्राह्मणाःसत्यसंगराः वोढारोहव्यकव्यानां
तान्नमस्यामियादव १६ भैक्ष्यचर्यासुनिरताः कृशागुरुकुलाश्रयाः निःसुखानिर्धनायेतुतान्नमस्यामियादव १७ निर्ममानिः
प्रतिद्वंद्वानिर्ह्रीकानिःप्रयोजनाः येवेदंप्राप्यदुर्द्धर्षावाग्मिनोब्रह्मवादिनः १८ अहिंसानिरतायेचयेचसत्यव्रतानराः दांताःश
मपराश्चैवतान्नमस्यामिकेशव १९ देवतातिथिपूजायांयुक्तायेगृहमेधिनः कपोतवृत्तयोनित्यंतान्नमस्यामियादव २० ये
षांत्रिवर्गःकृतेषुवर्त्ततेनोपहीयते शिष्टाचारप्रवृत्ताश्चतान्नमस्याम्यहंसदा व्रतैश्चविविधैर्युक्तास्तान्नमस्यामिमाधव २३
अयोनीनग्नियोनींश्चब्रह्मयोनींस्तथैवच सर्वभूतात्मयोनींश्चतान्नमस्याम्यहंसदा २४ नित्यमेतान्नमस्यामिकृष्णलोकक
रान्ऋषीन् लोकज्येष्ठान्कुलज्येष्ठांस्तमोघ्नान्लोकभास्करान् २५ तस्मात्त्वमपिवार्ष्णेयद्विजान्पूजयनित्यदा पूजिताःपूज
नार्हाहिसुखंदास्यंतितेनघ २७ अस्मिँल्लोकेसदाह्येतेपरत्रचसुखप्रदाः चरंतेमान्यमानावैप्रदास्यंतिसुखंतव २८ ॥

नेनधर्ममपेक्ष्यअर्थानादरउक्तः पुरापशीलादूरूपेनेनधर्मव्यतिरिक्तकामपरिहारउक्तः ऋतौभार्यामुपेयादित्येतावानेवकामोधर्ममयोनान्यः २२ सुधावै
श्चदेवशेषः २३ अयोनीन्अकृतदारान् अग्नियोनीनदाराग्निहोत्रयुतानाब्रह्मणोवेदस्ययोनीनआश्रयभूतान् २८ ॥ ॥ ॥ ॥ राम० १०२

२९ सर्वानितिस्वाध्यायेसर्वेयज्ञाश्चांतर्भवंतीर्यः ३० भिक्षुश्चेतिर्येर्महौभ्योकोपुनःपाडेपक्षिणौ ३६ अध्यायः ३० पितामहेत्यादेरध्यायस्यपक्षिमात्रस्यापि

येसर्वातिथयोनित्यंगोषुचब्राह्मणेषुच नित्यंसत्येचाभिरतादुर्गाण्यतितरंतिते २८ नित्यंशमपरायेचतथायेचानसूयकाः नित्य
स्वाध्यायिनोयेचदुर्गाण्यतितरंतिते २९ सर्वान्देवान्नमस्यंतियेचैकंवेदमाश्रिताः श्रद्दधानाश्चदांताश्चदुर्गाण्यतितरंतिते ३० तथैव
वविप्रप्रवरान्नमस्कृत्यपतव्रताः भवंतियेदानरतादुर्गाण्यतितरंतिते ३१ तपस्विनश्चयेनित्यंकौमारब्रह्मचारिणः तपसाभावितात्मा
नोदुर्गाण्यतितरंतिते ३२ देवतातिथिभृत्यानांपितृणांचार्चनेरताः शिष्टान्नभोजिनोयेचदुर्गाण्यतितरंतिते ३३ अग्निमाधाय
विधिवत्प्राणताधारयंतिये प्राप्ताःसोमाहुतिंचैवदुर्गाण्यतितरंतिते ३४ मातापित्रोर्गुरुषुचसम्यक्वर्ततियेसदा यथात्वंकुरुशि
शार्दूलेत्युक्त्वैवंविरराम सः ३५ तस्मात्त्वमपिकौंतेयपितृदेवद्विजातिथीन् सम्यक्पूजयसेनित्यंगतिमिष्टामवाप्स्यसि ३६ इतिदा
नधर्मेकृत्स्ननारदसंवादे ३७ युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद त्वत्तोहंश्रोतुमिच्छामिधर्मंभरतसत्तम १
शरणागतंयेरक्षंतिभूतग्रामंचतुर्विधंकिंतस्यभरतश्रेष्ठफलंभवतितत्त्वतः २ भीष्मउ० इदंश्रृणुमहाप्राज्ञधर्मपुत्रमहायशाः इति
हासंपुरावृत्तंशरणार्थंमहाफलं ३ प्रपात्यमानःश्येनेनकपोतःप्रियदर्शनः वृषदर्भंमहाभागंनरेंद्रंशरणंगतः ४ सतंदृष्ट्वावि
शुद्धात्मात्रासादंकमुपागतं आश्वास्याश्वसिहीत्याहनतेस्तिभयमंडज ५ भयंतेसुमहत्कस्मात्कुत्रकिंवाकृतंत्वया येनत्वमिहसं
स्वशरीरदानेनरक्षणंकार्यंकिमुतपूर्वोक्तानांपूज्यानामर्थादिनेतितात्पर्यं ३ प्रपात्यमानःआकाशादितिशेषः वृषदर्भं ६ प्राप्तोविसंज्ञोभ्रांतचेतनः ६
औशीनरंशिबिं ६ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा०
१०३

नवनीलंचपद्मुत्पलंतस्त्रापीडालंकारभूतस्त्वाहवर्णोयस्य ९ अतिक्रांतंनष्टप्रायंजीवितं १० अस्यमदन्नस्याग्रतोतरायभूतोमाभव ११ तृष्णीरस्तदुधिरपि

नवनीलोत्पलापीडचारुवर्णसुदर्शनं दाडिमाशोकपुष्पाक्षमात्रसस्त्वाभयंतव मत्सकाशमनुप्राप्तंनत्वांकश्चित्समुत्सहेतम
नसाग्रहणांकर्तुंरक्षाध्यक्षपुरस्कृते ८ काशिराज्यंतदद्यैवंत्वदर्थंजीवितंतथा त्यजेयंभवविस्रब्धः कपोतनभयंतव ९ श्ये
न उ० ममैतद्विहितंभक्ष्यंनराजंस्त्रातुमर्हसि अतिक्रांतंचप्राप्तंचप्रयत्नाच्चोपपादितं १० मांसंचरुधिरंचास्यमज्जामेदश्च
मेहितं परितोषकरोह्येषममनास्याग्रतोभव ११ तृष्णामेवाधतेस्युग्राक्षुधानिर्दहतीवमां मुंचैनंनहिशक्ष्यामिराजन्मंदयितुं
क्षुधां १२ मयाह्यतुस्त्तोह्येषमत्पक्षनखविक्षतः किंचिदुच्छ्वासनिश्वासंनराजन्गोप्तुमर्हसि १३ यदिस्वविषयेराजन्प्रभु
स्त्वंरक्षणेनृणां खेचरस्यतृषार्त्तस्यनत्वंप्रभुरथोत्तम १४ यदिवैरिषुभृत्येषुस्वजनव्यवहारयोः विषयेष्विंद्रियाणांचआकाशेमा
पराक्रम १५ प्रभुत्वंहिपराक्रम्यसम्यक्पक्षहरेषुते यदित्वमिहधर्मार्थीमामपिद्रष्टुमर्हसि १६ भीष्म उ० श्रुत्वाश्येनस्यतद्वाक्यं
राजर्षिर्विस्मयंगतः संभाव्यचैनंतद्वाक्यंतदर्थीप्रत्यभाषत १७ राजोवाच गोवृषोवावराहोवामृगोवामहिषोपिवा त्वदर्थमद्यक्रि
यतांक्षुधाप्रशमनायते १८ शरणागतंनत्यजेयमितिमेव्रतमाहितं नमुंचतिममांगानिद्विजोयंपश्यवैद्विज १९ ॥ ॥ ॥

पासा १४ यदिवैर्यादिषुपराक्रमसेतद्युक्तंनत्वाकाशे आकाशचारिषु १५ पक्षहरेषुअस्मान्मदिषुमां अशत्रुमपिजीवनहरणेनवधमानस्यतवधर्मार्थिनोप्यधर्मोभवि
ष्यतीतिभावः १६ एनंश्येनंतद्वाक्यंचसंभाव्यस्तुत्वातदर्थीकपोतार्थी १९

दान०
१०३

२२ अशनैशीघ्रं २८ मांसक्षयंमांसालयंशरीरं ३० नृत्तःनृत्तेनतोषितःउपगीतः ३४ साधुवृत्तःसुशीलःसद्वृत्तःशिष्टाचारःस्वव्याजेनसुजरांनिष्कपटेन ३५

श्येनउ॰ नवाहंनचोक्षाणंनचान्यान्विविधान्द्विजान् भक्षयामिमहाराजकिमन्नाद्येनतेनमे १० यस्तुमेविहितोभक्ष्यःस्वयंदेवैः
सनातनः श्येनाःकपोतान्खादंतिस्थितिरेषासनातनी ११ उशीनरकपोतेतुयदिस्नेहस्तवानघ ततस्त्वंमेप्रयच्छाद्यस्वमांसंतु
लयाधृतं १२ राजोवाच महाननुग्रहोमेद्ययस्त्वमेवमिहात्थमां बाढमेवंकरिष्यामीत्युक्त्वासौराजसत्तमः १३ उत्कृत्योत्कृ
त्यमांसानितुलयासमतोलयत् अंतःपुरेततस्तस्यस्त्रियोरत्नविभूषिताः १४ हाहाभूताविनिष्क्रांताःश्रुत्वापरमदुःखिताः
तासांरुदितशब्देनमंत्रिभृत्यजनस्यच १५ बभूवसुमहान्नादोमेघगंभीरनिस्वनः निरुद्धंगगनंसर्वंशुभ्रंमेघैःसमंततः १६
महीप्रचलितासीत्तस्यसत्येनकर्मणा सराजापार्श्वतश्चैवबाहुभ्यामूरुतस्तथा १७ तानिमांसानिसंछिद्यतुलांपूरयतेश
नैः तथापिनसमस्तेनकपोतेनबभूवह १८ अस्थिभूतोयदाराजानिर्मांसोरुधिरस्रवः तुलांततःसमारूढःस्वमांसक्षयमु
त्सृजन् १९ ततःसेंद्रास्त्रयोलोकास्तंनरेंद्रमुपस्थिताः भेर्यश्चाकाशगैस्तत्रवादितादेवदुंदुभिः ३० अमृतेनावसिक्तश्चवृषदर्भो
नरेश्वरः दिव्यैश्चसुसुखैर्माल्यैरभिवृष्टःपुनःपुनः ३० देवगंधर्वसंघातैरप्सरोभिश्चसर्वतः नृत्तश्चैवोपगीतश्चपितामहइवप्र
भुः ३१ हेमप्रासादसंबाधंमणिकांचनतोरणं सवैडूर्यमणिस्तंभंविमानंसमधिष्ठितः ३२ सराजर्षिर्गतःस्वर्गंकर्मणातेनशाश्वतं
शरणागतेषुचैवंत्वंकुरुसर्वंयुधिष्ठिर ३३ भक्तानामनुरक्तानामाश्रितानांचरक्षिता दयावान्सर्वभूतेषुपरत्रसुखमेधते ३४
साधुवृत्तोहियोराजासद्वृत्तमनुतिष्ठति किंनप्राप्नुंभवेत्तेनस्वव्याजेनेहकर्मणा ३५ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

द्रा० १०४ ३६ असां कण्यायां विधेयमाहृयोयीति ३८ अध्यायः किंराज्ञइत्यध्यायस्य तात्पर्यमाह २ अनुष्ठानं आराधनं ७ एषां ब्राह्मणानां मध्ये ५ वासवेय
ज्जीमे ६ अभिचारैः श्येनादिभिः उपायैः कौलिकशास्त्रप्रसिद्धैः तेजसा संकल्पमात्रेण ७ अंतेनाशकारं दृश्यध्वेषां न अपावृताः सर्वत्राकुंठितागतिः

सराजर्षिर्विशुद्धात्माधीरः सत्यपराक्रमः काशीनामीश्वरः ख्यातस्त्रिषुलोकेषुकर्म्मणा ३६ योप्यमः कारयेदेवंशरणागतरक्ष
णं सोपिगच्छेत्तमेवगतिंभरतसत्तम ३७ इदंवृत्तंहिराजर्षेर्वृषदर्भस्यकीर्त्तयन् -- पूतात्मावैभवेल्लोकेशृणुयाद्यश्चनित्यशः ३८
इतिदानधर्मेषुश्येनकपोतीयं ३२ युधिष्ठिरउ० किंराज्ञः सर्वकृत्यानांगरीयः स्यात्पितामह कुर्वन्किंकर्म्मनृपतिरुभौलोकौसमश्नु
ते १ भीष्मउ० एतद्राज्ञः कृत्यतममभिषिक्तस्यभारत ब्राह्मणानामनुष्ठानमत्यंतंसुखमिच्छता २ कर्त्तव्यंपार्थिवेंद्रेणतथैवभरतर्ष
भ श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ३ पौरजानपदांश्चापिब्राह्मणांश्चबहुश्रुतान् सांत्वेनभोगदानेननमस्का
रैस्तथार्चयेत् ४ एतत्कृत्यतमंराज्ञोनित्यमेवोपलक्षयेत् यथात्मानंयथापुत्रांस्तथैतान्प्रतिपालयेत् ५ येचाप्येषांपूज्यतमा
स्तान्दृढंप्रतिपूजयेत् तेषुशांतेषुतद्राष्ट्रंसर्वमेवविराजते ६ तेपूज्यास्तेनमस्कार्यामान्यास्तेपितरोयथा तेष्वेवयात्रालोकानां
भूतानामिववासवे ७ अभिचारैरुपायैश्चदहेयुरपितेजसा निःशेषंकुपिताः कुर्युरुग्राः सत्यपराक्रमाः ८ नान्तमेषांप्रपश्यामि
नदिशश्चाप्यपावृताः कुपिताः समुदीक्षंतेदावेष्वग्निशिखाइव बिभ्यत्येषांसाहसिकागुणास्तेषामतीवहि कूपाइवतृणच्छन्ना
विशुद्धाद्यौरिवापरे ९ प्रसह्यकारिणः केचित्कार्प्पासमृदवोपरे संतिचैषामतिशठास्तथैवान्येतपस्विनः १० ॥ ॥ ॥ ॥ १०४
षामित्यर्थः अग्निरस्त्वाइव इहतः ८ एषां सम्यः साहसिकार्यकारिणोपि बिभ्यति किमुत विवेकिनः छन्नाः केचिज्जडभरतादयः अपरे वसिष्ठादयः ९ प्रसह्य
कारिणः दुर्वासः प्रभृतयः मृदवो गौतमादयः येषां चोरापि हिंसाभयोत्पादयोरे वा क्षिचक्रुरित्स्याक्षपादस्तेंगताः अतिशठा अगस्त्यादयः वातापित्वरपितुंतां राम० १०४

कृषिंकुर्वतः उद्दालकगुर्वादयः गोरक्षंगुरोरेवउपमन्युप्रभृतयः भैक्ष्यंदत्तात्रेयादयः चोराः वाल्मीकिविश्वामित्रादयः अन्नताः कलहप्रियाः नारदादयः नटनर्त्तकाः भरतादयः ११ सर्वकर्मसहाः समुद्रेशोषणादावपिसमर्थाः १२ नानेति स्वस्वप्रकादनार्थलोकरक्षार्थंलोकरक्षार्थंवानिषिद्ध

कृषिगोरक्ष्यमप्येकेभैक्ष्यमन्येप्यनुष्ठिताः चौराश्चान्येन्नताश्चान्येतथान्येनटनर्त्तकाः ११ सर्वकर्म्मसहाश्चान्येपार्थिवेषि
तरेषुच विविधाकारयुक्ताश्चब्राह्मणाभरतर्षभ १२ नानाकर्म्मसुरक्तानांवहुकर्म्मोपजीविनां धर्म्मज्ञानांसतांतेषांनित्यमेवा
नुकीर्त्तयेत् १३ पितृणांदेवतानांचमनुष्योरगरक्षसां पुरएतेमहाभागाब्राह्मणावैजनाधिप १४ नैतेदेवैर्नपितृभिर्नगंधर्वै
र्नराक्षसैः नासुरैर्नपि----पिशाचैश्चशक्याजेतुंद्विजातयः १५ अदैवंदैवतंकुर्युर्दैवतंचाप्यदैवतं यमिच्छेयुःसराजास्याद्योनेष्टः
सपराभवेत् १६ परिवादंचयेकुर्युर्ब्राह्मणानामचेतसः सत्यंब्रवीमितेराजन्विनश्येयुर्नसंशयः १७ निंदाप्रशंसाकुशलाकीर्त्तकी
र्त्तिपरायणाः परिकुप्यंतितेराजन्सततंद्विषतांद्विजाः १८ ब्राह्मणायंप्रशंसंतिपुरुषःसप्रवर्द्धते ब्राह्मणैर्यःपराकृष्टःपराभूया
त्क्षणाद्धिसः १९ शकायवनकांबोजास्तास्ताःक्षत्रियजातयः वृषलत्वंपरिगताब्राह्मणानामदर्शनात् द्राविडाश्चकलिंगाश्च
पुलिंदाश्चाप्युशीनराः कोलिसर्प्पामहिषकास्तास्ताःक्षत्रियजातयः २१ वृषलत्वंपरिगताब्राह्मणानामदर्शनात् श्रेयान्परा
जयस्तेभ्योनजयोजयतांवर २२ यस्तुसर्वमिदंहन्यात्ब्राह्मणंचननत्समं ब्रह्मवध्यामहान्दोषइत्याहुःपरमर्षयः परिवादोद्विजा
तीनांनश्रोतव्यः कथंचन आसीताधोमुखस्तूष्णींसमुत्थायव्रजेच्चवा २३ नसजातोजनिष्यद्वापृथिव्यामिहकश्चन योब्राह्मणविरोधे
न सुखंजीवितुमुत्सहेत् दुर्ग्राह्योमुष्टिनावायुर्दुःस्पर्शः
पाणिनाशशी दुर्धरापृथिवीराजन्दुर्जयाब्राह्मणाभुवि २४
इतिदानधर्म्मेब्राह्मणप्रशंसा ३१

नापिकर्मणावर्त्तमानाः वस्तुतस्तुधर्मज्ञास्तेषांनराणन्वनित्यमेवानुकीर्त्तयेत् १३ एतेपूज्याइतिशेषः यतोमहाभागाः १५ यायगाःहेतवः १७ अदर्शनात्
अनुग्रहात् २४ ब्राह्मणप्रशंसाप्रकाशः ३१

© Dharmartha Trust J&K. Digitized by eGangotri

दा०
१०५

ब्राह्मणानिन्स्यापश्चायत्रयेणादानपात्रत्वंब्राह्मणानामुच्यतेसोमोराजायेषांतेसोमराजानः १ किमिछसीतिप्रश्नपूर्वकंयत्नादिष्टंदीयतेतत्किमिछकं २ तेपिदातारोपितरत्नप्रदेयं

भीष्मउवाच ब्राह्मणानेवसततंभृशंसंपरिपूजयेत् एतेहिसोमराजानईश्वराः सुखदुःखयोः १ एतेभोगैरलंकारैरन्यैश्चैवकिमिछकैः सदापूज्यानम
स्कारैरक्ष्याश्चपितृवन्नृपैः २ ततोराष्ट्रस्यशांतिर्हिभूतानामिववासवात् जायतांब्रह्मवर्चस्वीराष्ट्रेवैब्राह्मणःशुचिः ३ महारथश्चराजन्यएष्टव्यः शत्रु
तापनः ब्राह्मणंजातिसम्पन्नंधर्मज्ञंसंशितव्रतं ४ वासयेतगृहेराजन्नतस्मात्परमस्तिवै ब्राह्मणेभ्योहविर्दत्तंप्रतिगृह्णंतिदेवताः ५ पितरः सर्वभू
तानांनैतेभ्योविद्यतेपरं आदित्यश्चंद्रमावायुरापोभूरंबरंदिशः ६ सर्वेब्राह्मणमाविश्यसदान्नमुपभुंजते नतस्याश्नंतिपितरोयस्यविप्रानभु
ञ्जते ७ देवाश्चाप्यस्यनाश्नंतिपापस्यब्राह्मणद्विषः ब्राह्मणेषुतुतुष्टेषुप्रीयंतेपितरःसदा ८ तथैवदेवताराजन्नात्रकार्याविचारणा त
थैवतेपिप्रीयंतेयेषांभवतितद्धविः ९ नचप्रेत्यविनश्यंतिगछंतिचपरांगतिं येनयेनैवहविषाब्राह्मणांस्तर्पयेन्नरः १० तेनतेनैवप्रीयं
तेपितरोदेवतास्तथा ब्राह्मणादेवतन्नूतंप्रभवंतियतःप्रजाः ११ यतश्चायंप्रभवतिप्रेत्ययत्रचगछति वेदैषमार्गं स्वर्गस्यतथैवनरकस्यच
१२ आगतानागतेचोभेब्राह्मणोद्विपदांवरः ब्राह्मणोभरतश्रेष्ठस्वधर्मंचैववेदयः १३ येचैनमनुवर्त्तंतेतेनयांतिपराभवं नतेप्रेत्य
विनश्यंतिगछंतिनपराभवं १४ यद्ब्राह्मणमुखात्प्राप्तंप्रतिगृह्णंतिवैवचः कृतात्मानोमहात्मानस्तेनयांतिपराभवं १५ क्षत्रियाणां
प्रतपतांतेजसाचबलेनच ब्राह्मणेष्ववशाम्यंतितेजांसिचबलानिच १६ भृगवस्तालजंघांश्चनीपानांगिरसोजयन् भरद्वाजोवैत
हव्यानैलांश्चभरतर्षभ १७ चित्रायुधांश्चाप्यजयन्नेतेकृष्णाजिनध्वजाः प्रक्षिप्याथचकुंभार्थ्यपारगामिनमारभेत् १८ ॥ ॥

द्रव्यं १० ततपश्चादिकंमृतमुत्पन्नं आग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः १४ कृतात्मानःकृतंप्राप्तंवशीकृतेत्रा

दान०
१०५

यत्किंचिदतीतमतीतानागतमव्यवहितस्थूलसूक्ष्मं ब्राह्मणेषु हार्दाकाशाख्यब्रह्मविदिकाश्याग्निवध्यानेनिर्मथनादभिव्यज्यते इत्यर्थः २१ रजः ध्यानेनतरायभूतो विक्षेपः भूतिरैश्वर्यं बुद्धिरज्ञानं सार्द्धश्लोकः २३ अपरेब्राह्मणाः सर्वभूतपरक्षेदित्यादुरितिविपरिणामेनानुषंगः २४ क्रुष्टः क्रोशतिकर्त्तरिक्तः २५ सीतानेष्टुलांगलपद्धतिंगतः

यत्किंचित्कथ्यते लोके श्रूयते पश्यतेपि वा सर्वंतद्ब्राह्मणेष्वेव गूढोग्निरिवदारुषु १९ अत्राप्युदाहरंतीममितिहासंपुरातनं संवादं वासुदेवस्य पृथ्व्याश्च भरतर्षभ २० वासुदेवउ० मातरं सर्वभूतानां पृच्छेत्वां संशयं शुभे केनस्वित्कर्म्मणापापं व्यपोहति नरोगृही २१ पृथिव्युवाच ब्राह्मणानेवसेवेतपवित्रंह्येतदुत्तमं ब्राह्मणान्सेवमानस्य रजः सर्वंप्रणश्यति २२ अतोभूतिरतः कीर्त्तिरतोबुद्धिः प्रजायते महारथश्च राजन्यः पृथ्व्यावः शत्रुतापनः २३ इतिमांनारदः प्राह सततंसर्वभूतये ब्राह्मणांजातिसंपन्नंधर्मज्ञं संशितंशुचिं २४ अपरेषांपरेषांच परेभ्यश्चैव येपरे ब्राह्मणायंप्रशंसंतिसमनुष्यः प्रवर्द्धते २५ अथयोब्राह्मणान्क्रुष्टः पराभवतिसोचिरात् यथामहार्णवेक्षिप्तो सीताने ष्टुर्विनश्यति २६ तथा दुश्चरितं सर्वं पराभावाय कल्पते पश्यचंद्रे कृतं लक्ष्म समुद्रो लवणोदकः २७ तथाभगसहस्रेण महेंद्रं परिचिह्नितः तेषामेवप्रभावेन सहस्रनयनोह्यसौ २८ शतक्रतुः समभवत्पश्यमाधवयादृशं इच्छन्कीर्त्तिंचभूतिंचलोकांश्चमधुसूदन ब्राह्मणानुमतेतिष्ठेत्पुरुषः शुचिरात्मवान् २९ भीष्मउ० इत्येतद्वचनंश्रुत्वा मेदिन्या मधुसूदनः साधुसाध्वितिकौरव्यमेदिनींप्रत्यपूजयत् ३० एतांश्रुत्वोपमांपार्थप्रयतो ब्राह्मणर्षभान् सततंपूजयेथास्त्वं ततः श्रेयोभिपत्स्यसे ३१ इत्यनुशासनिकेपर्वणि दानधर्मे पृथिवीवासुदेवसंवादः ३३॥ ॥

पांसुपिंडः लोष्टोलेष्टारातिकोशकारः अंतस्थादितिमंशवत्पठंतः तस्थुरितं ब्राह्मणाद्रोहः २८ विधेयमाहब्राह्मणेस्पर्द्धेन ३१ अध्यायः ३३ ॥॥ ॥

© Dharmartha Trust J&K Digitized By eGangotri

दा० १०६ जन्मनैवसंस्कारप्रभावेपिब्राह्मणोनमस्यएव प्रश्निंतंप्रस्तंपक्कमन्नंतस्यास्येभोक्तुमर्हः प्रसृताग्रभुक् सर्वेत्रर्पीः धर्मोदयोयेभ्यस्ते सुमनसांदेवानांसुख
मिवभूतास्सुमनोमुखाः २ नोस्माकंद्विषतःशत्रून् तैरपूजिताः ब्राह्मणाः दारुणयुक्ताभिः तवशत्रवेवानशपंसिस्यादिभिर्गीर्भिः अभिध्यायंतुअभिहन्तु

भीष्मउवाच जन्मनैवमहाभागोब्राह्मणोनामजायते नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् १ सर्वेषांसुहृदस्तातब्राह्मणाः
सुमनोमुखाः गीर्भिर्मंगलयुक्ताभिरनुध्यायंतिपूजिताः २ सर्वान्नोद्विषतंतात ब्राह्मणाजातमन्यवः गीर्भिर्दारुणयुक्ताभिरभिध्यास्य
रपूजिताः ३ अत्रगाथाः पुरागीताः कीर्त्तयंतिपुराविदः सृष्ट्वाद्विजातीन्धातादियथापूर्वंसमादधत् नचान्यदिहकर्त्तव्यंकिंचि
दूर्ध्वंयथाविधि गुप्तोगोपायतेब्रह्मश्रेयोवस्तेनशोभनं ५ स्वयमेवकुर्वतांकर्म्मश्रीर्वोब्राह्मीभविष्यति प्रमाणांसर्वभूतानांप्र
ग्रहाश्चभविष्यथ ६ नशौद्रंकर्म्मकर्त्तव्यंब्राह्मणेनविपश्चिता शौद्रंहिकुर्वतः कर्म्मधर्म्मः समुपरुध्यते ७ श्रीश्चबुद्धिश्चतेजश्च
श्वविभूतिश्चप्रतापिनी स्वाध्यायेचैवमाहात्म्यंविपुलंप्रतिपत्स्यते ८ हुत्वाचाहवनीयस्थंमहाभाग्येप्रतिष्ठिता अग्रभोज्याः प्रसू
तीनांश्रियाब्राह्म्यानुकल्पिताः ९ श्रद्धयापरयायुक्ताह्यनभिद्रोहलब्धया दमस्वाध्यायनिरताः सर्वान्कामानवाप्स्यथ १० यच्चैवमा
नुषेलोकेयच्चदेवेषुकिंचन सर्वंतुतपसासाध्यंज्ञानेनविनयेनच ११ इत्येवंब्रह्मगीतास्तेसमाख्यातामयानघ विप्राणामनुकंपार्थंतेन
प्रोक्तंहिधीमता १२

रितिसप्तार्थः पाठः ३ समादधत्समाधिं नियमंकृतवान् ४ वृत्तब्राह्मणाःवः शोभनेश्रेयसेनैव ५ स्वंकर्मब्राह्मणागोपनं प्रग्रहाद्मनक्षमारञ्जनश्च ६
शौद्रंकर्मसेवा कर्त्तव्यंकारपित्वमकुर्वतः कारयतः ७ श्रीश्चत्यादि श्रियमितिसार्धः ८ अहवनीयस्थंदेवतागणाप्रसूतेनाशिष्युभोप्यग्रेभोज्यमेषांतेब्राह्म्या

© (c) Dharmartha Trust J&K. Digitized by eGangotri

नृपइतिवंडत्वादिदोषवंतोपिपूज्याएवेत्यर्थः १७ अमर्षणात्ब्राह्मकोपासहनात् २२ तेभ्योरक्ष्यंस्वकुलमितिशेषः २३ अध्यायः अत्रापीत्यध्यायस्तात्पर्यंअसुराणा

मप्यन्येषांवलंमन्येयथाराजंस्तपस्विनः दुरासदाश्चचंडाश्चरभसाःक्षिप्रकारिणः १३ संत्येषांसिंहसत्वाश्चव्याघ्रसत्वास्तथापरे
वराहमृगसत्वाश्चजलसत्वास्तथापरे १४ सर्पस्पर्शसमाःकेचित्तथान्येमकरस्पृशाः विभाष्यघातिनःकेचित्तथाचक्षु
र्हणोपरे १५ संतिचाशीविषसमाःसंतिमंदास्तथापरे विविधानीहवृत्तानिब्राह्मणानांयुधिष्ठिर १६ मेकलाद्राविडालाटाः
पौंड्राःकोन्वशिरास्तथा शौंडिकाःदरदाःदर्वाश्चौराःशवरवर्बराः १७ किरातायवनाश्चैवतास्ताःक्षत्रियजातयः वृषलत्व
मनुप्राप्ताब्राह्मणानाममर्षणात् १८ ब्राह्मणानांपरिभवादसुराःसलिलेशयाः ब्राह्मणानांप्रसादाच्चदेवाःस्वर्गनिवासि
नः १९ अशक्यंस्प्रष्टुमाकाशमचाल्योहिमवान्गिरिः अधार्यासेतुनागंगादुर्जयाब्राह्मणाभुवि २० नब्राह्मणविरोधेनश
क्याशास्तुंवसुंधरा ब्राह्मणाहिमहात्मानोदेवानामपिदेवताः २१ तान्पूजयस्वसततंदानेनपरिचर्यया यदीच्छसिमहीं
भोक्तुमिमांसागरमेखलां २२ प्रतिग्रहेणतेजोहिविप्राणांशाम्यतेनघ प्रतिग्रहंयेनेच्छेयुस्तेभ्योरक्ष्यंत्वयानघ २३ इतिदानध
र्मेब्राह्मणप्रशंसायांब्राह्मगीता २४ भीष्मउ० अत्राप्युदाहरंतीममितिहासंपुरातनं शक्रशंवरसंवादंतन्निवोधयुधिष्ठिर
१ शक्रोह्यज्ञातरूपेणजटीभूत्वारजोरुणः विरूपंरथमास्थायप्रश्नमपृच्छशंवरं २ शक्रउ० केनशंवरवृत्तेनस्वजात्यानधि
तपिश्रीर्ब्राह्मणप्रसादाल्लभेयेति ४ ॥ ॥ ॥ ॥ तिष्ठसि श्रेष्ठंत्वांकेनमन्यंतेतन्मेब्रूहितत्वतः ३ शंवरउ० नासूयामिपदाविप्रान्

ब्राह्मणेनवचसेममतं शास्त्राणिशिवरत्नोविप्रान्समनामिषप्पा
सुखं ४

मांसमपिमधु अस्मत्तुल्याविद्यांसमासिंचंति क्षौद्रं मधुपटलं मक्षिकामक्षिवेत्पायोऽस्मं ७ समाधिंब्राह्मणेषुनिष्ठां ८ वागग्रेति कारणंमिष्टं विवाम्सेतेयेषांयेषांब्राह्मणा
नांरसानांमुक्तास्वधानां १३ ब्राह्मणः वेदार्थाः दुर्धसतीः गुरुकुलवासक्लेशात् अपिअपिवासमिति वैराग्येकइतिः स्यात्नैष्ठिकब्रह्मचर्यात्पारिव्राड्यमेवकुर्यादिमर्थः १४

कृत्वाचनावज्ञानामिनापराधामिकर्हिचित् अभ्यर्च्याम्यनुपृच्छामिपादौगृह्णामिधीमतां ५ तेविश्रब्धाः प्रभाषंतेसंपृच्छन्तेचमांसदा
प्रमत्तेष्वप्रमत्तोस्मिसदासुप्तेषुजागृमि ६ तेमांशास्त्रपथेयुक्तंब्रह्मण्यमनुसूयकं समासिंचंतिशास्तारः क्षौद्रंमधिवमक्षिकाः ७ यच्च
भाषंतिसंतुष्टास्तच्च गृह्णामिमेधया समाधिमात्मनोनित्यमतुलोममचिंतयं ८ सोहंवागग्रमिष्टानांरसानामवलेहकः स्वज्ञात्यानधितिष्ठामिनक्षत्राणीवचंद्रमाः ९ एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमं यद्ब्राह्मणमुखाच्छास्त्रमिहश्रुत्वाप्रवर्त्तते १० एतत्कारणमाज्ञायदृष्ट्वा
दैवासुरंपुरा युद्धंपितामेहृष्टात्माविस्मितःसमपद्यत ११ दृष्ट्वाचब्राह्मणानांतुमहिमानंमहात्मनां पर्यपृच्छत्कथमिमेमासिद्धा इतिनिशाकरं १२
सोमउ० ब्राह्मणास्तपसासेवमिध्यंतेवाग्बलासदा भुजवीर्याश्चराजानोवाक्शस्त्राश्चद्विजातयः १३ प्रवसेद्वाप्यधीयीतब्राह्मीदुर्वसतीर्वसन्
निर्मन्युरपिनिर्वीणोयतिःस्यात्समदर्शनः १४ अपिचज्ञानसंपन्नःसर्वान्वेदान्पितुर्गृहे श्लाघमानइवाधीयाद्ग्राम्यइत्येवतंविदुः १५ भूमिरेतौ
निगिरतिसर्पोबिलशयानिव राजानंचाप्ययोद्धारंब्राह्मणंचाप्रवासिनं १६ अभिमानःश्रियंहंतिपुरुषस्याल्पमेधसः गर्भेणदुष्यतेकन्या
गृहवासेनचद्विजः १७ इत्येतन्मेपिताश्रुत्वासोमादद्भुतदर्शनात् ब्राह्मणान्पूजयामासतथैवाहंमहाव्रतान् १८ भीष्मउ० श्रुत्वैतद्वचनं
शक्रोदानवेंद्रमुखाच्च्युतं द्विजान्संपूजयामासमहेंद्रत्वमवाप्यच १९ इतिदानधर्मेब्राह्मणप्रशंसायामिंद्रशंवरसंवादः ३५ ॥

पितुर्गृहेवेदाध्ययनंचनिंदतिअपिचेत् १५ अप्रवासिनंमोवात्सेयानतेवेदार्थग्रामांतरेवासमकुर्वाणाः १६ अध्यायः ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

अपूर्वं वेत्यध्यायः ब्राह्मणेष्वपि पात्रविशेषपरीक्षार्थः १ तत्र अपूर्वं चिरोषितो दूरादागतश्च पात्रं तेषां मध्ये कश्चिद्यज्ञार्थं कश्चिद्गुरुदक्षिणार्थं कश्चित्कुटुंबभरणार्थ
मिति एवंरूपा क्रिया केषांचित्पात्रत्वे प्रधानं भवति केषांचिदुपांशुव्रतं मौनं पारिव्राज्यमिति तथा क्रियामौनयोस्तारतम्यादेषां तारतम्येन स्वरूपत इत्याह क्रियेति द्वा
मः इदामह इत्येव वक्तव्यं न त्वेतेषु कंचित्प्रत्याचक्षीतेत्यर्थः ४ दत्तं प्रदेयवस्त्वभिमानिनी देवता न संतपेत् यथा तादृशाय देयं नान्यस्मै स्मयते हि नष्टशौचे व्रतभ्रष्टे वि

युधिष्ठिर उ० अपूर्वं वा भवेत्पात्रमथवापि चिरोषितः दूरादभ्यागतं चापि किं पात्रं स्यात्पितामह १ भीष्म उवाच क्रिया भवति केषांचि
दुपांशुव्रतमुत्तमं यो यो याचेत यत्किंचित्सर्वं दद्याम इत्यपि २ अपीडयन्भृत्यवर्गमित्येवमनुशुश्रुम पीडयन्भृत्यवर्गं हि आत्मानम
पकर्षति ३ अपूर्वं भावयेत्पात्रं यच्चापि स्याच्चिरोषितं दूरादभ्यागतं चापि तत्पात्रं च विदुर्बुधाः ४ युधिष्ठिर उ० अपीडया च भूतानां ध
र्मस्याहिंसया तथा पात्रं विद्यात्तु तत्त्वेन यस्मै दत्तं न संतपेत् ५ भीष्म उ० ऋत्विक्पुरोहिताचार्याः शिष्यसंबंधिबांधवाः सर्वे पूज्या
श्च मान्याश्च श्रुतवंतोऽनसूयकाः ६ अतोऽन्यथा वर्तमानाः सर्वे नार्हंति सत्क्रियां तस्मान्नित्यं परीक्षेत पुरुषान्प्रणिधाय वै ७ अ
क्रोधः सत्यवचनमहिंसा दम आर्जवं अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा दमः शमः ८ यस्मिन्नेतानि दृश्यंते न चाकार्याणि भा
रत स्वभावतो निविष्टानि तत्पात्रं मानमर्हति ९ तथा चिरोषितं चापि संप्रत्यागतमेव च अपूर्वं चैव पूर्वं च तत्पात्रं मानमर्हति --
- १० अप्रामाण्यं च वेदानां शास्त्राणां चाभिलंघनं अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः ११ ॥ ॥ ॥ ॥

प्रे वेदविवर्जिते दीयमानं दत्तं सत्रं किं मया दुष्कृतं कृतमिति अतः कस्मादृश इति भावः ५ मुख्यं पात्रविशेषणं श्रुतवंतोऽनसूयका इति ६ तथा अक्रोधादिगु
णविशिष्टः १० अपात्रतावानमाह अप्रामाण्यमिति आत्मनः पात्रतापाय इति शेषः ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

दा०
१०८

निरर्थिकाश्रुतिविरोधित्वेनमोक्षानुपयोगिनी १२ हेतुवादान्ब्रुवन्युक्त्यांजयन्काश्चगोष्ठीः कुर्वन्नपिअहेतुवादिकःशास्त्रोक्तहेतुवादविरोधात् १३ बोद्धव्यः अस्पृश्य
त्वेनेतिशेषः तत्रहेतुमाहश्वानंहितंविदुःशिष्टाइतिशेषः एतदेवोपपादयतियथेति १५ लोकयात्राशिष्टाचारादिव्यवहारः धर्मः श्रुतिस्मृत्युक्तः आत्महितानिश
मदमादीनि १६ देवानामृणंयज्ञेन ऋषीणांवेदाधिगमेन पितॄणांप्रजोत्पादनेन विप्राणांदानमानेन विप्राणांदानमानेनअतिथीनांवैश्वदेवान्ते आग
तानांसम्मानातिथ्येनच उन्मुच्य अपाकृत्य कर्माणिकुर्वन्नित्यन्तेनान्वयः १७ पर्यायेणयथाक्रमेणसुशिक्षितेन नकर्मणापञ्चकर्माणियज्ञादीनि १८

भवेत्पंडितमानीयोब्राह्मणोवेदनिंदकः आन्वीक्षिकींतर्कविद्यामनुरक्तोनिरर्थिकां १२ हेतुवादान्ब्रुवन्सत्सुविजेताहेतुवादिकः
आक्रोष्टाचातिवक्ताचब्राह्मणानांसदैवहि १३ सर्वाभिशंकीमूढश्चबालः कटुकवागपि बोद्धव्यस्तादृशस्तातनरश्वानंहितंविदुः १४ यथा
श्वाभषितुंचैवहंतुंचैवावसृज्यते एवंसम्भाषणार्थायसर्वशास्त्रवधायच १५ लोकयात्राचद्रष्टव्याधर्मश्चात्महितानिच एवंनरोव
र्तमानः शाश्वतीर्वर्द्धतेसमाः १६ ऋणमुन्मुच्यदेवानामृषीणांचतथैवच पितॄणामथविप्राणामतिथीनांचपंचमं १७ पर्याये
णविशुद्धेनसुविनीतेनकर्मणा एवंगृहस्थः कर्माणिकुर्वन्धर्मान्नहीयते १८ इतिदानधर्मेपात्रपरीक्षा ३६ युधिष्ठिर
उवाच स्त्रीणांस्वभावमिच्छामिश्रोतुंभरतसत्तम स्त्रियोहिमूलंदोषाणांलघुचित्ताहिताःस्मृताः १ भीष्मउवाच अत्राप्युदा
हरंतीममितिहासंपुरातनं नारदस्यचसंवादंपुंश्चल्यापंचचूडया २ लोकाननुचरन्सर्वान्देवर्षिर्नारदःपुरा ददर्शाप्सरसंब्राह्मींपंच
चूडामनिंदितां ३

पात्रपरीक्षाप्रकाशः स्त्रीणामिति पूर्वंमेघवाहनपर्वणि वेधंवक्तृत्वंतेष्वदत्तंधर्मबलादेवभवतीतियत्सौदीर्धर्मोवक्तव्यः सचकामप्रकारविहितदारपरिग्रहाधीन
इत्यष्टावक्रदिक्संवादेप्रदर्शितंतत्रवापित्र्याग्निगार्हस्थ्याधनगायामुद्धृत्य सचतुष्टयंतस्याग्निहोत्रेस्वर्गायनरकायतत्रसचेतिस्मृतेर्यत्सांगभूताआत्मशुद्धि
स्त्रीवैरूप्यशुद्धिष्वतीर्थिब्राह्मणानामान्याभ्यांउक्तात्रयत्स्त्रीशुद्धिर्दुर्लभसुशुद्धिश्चमहताप्रयत्नेनप्रसूयते तत्रतावद्दर्शयतिस्त्रीणामित्यादिनालघुचित्ताः
वायुवच्चलचित्ताः २ ब्राह्मींब्रह्मलोकस्थां ३ राम०
१०८

© Dharmartha Trust J&K Digitized By eGangotri

४ विषयेवक्तुंमोऽपन्वे ९ कृतमतिःवक्ष्यामीतिकृतनिश्चयाभवत् १९

तांदृष्ट्वाचारुसर्वांगींपप्रच्छाप्सरसंमुनिः संशयोहृदिकश्चिन्मेब्रूहितन्मेसुमध्यमे ४ भीष्मउ० एवमुक्ताथसाविप्रंप्रत्युवाचाथना
रदं विषयेसतिवक्ष्यामिसमर्थांमन्यसेचमां ५ नारदउ० नत्वामविषयेभद्रेनियोक्ष्यामिकथंचन स्त्रीणांस्वभावमिच्छामित्वत्तःश्रोतुंव
रानने ६ भीष्मउ० एतच्छ्रुत्वावचस्तस्यदेवर्षेरप्सरोत्तमा प्रत्युवाचनशक्ष्यामिस्त्रीसतीनिंदितुंस्त्रियः ७ विदितास्तेस्त्रियोयाश्चयादृ
शाश्चस्वभावतः नमामर्हसिदेवर्षेनियोक्तुंकार्यईदृशं ८ तामुवाचसदेवर्षिःसत्यंवदसुमध्यमे मृषावादेभवेद्दोषःसत्येदोषोनविद्यते
९ इत्युक्तासाकृतमतिरभवच्चारुहासिनी स्त्रीदोषान्शाश्वतान्सत्यान्भाषितुंसंप्रचक्रमे १० पंचचूडोवाच कुलीनारूपवत्यश्चनाथ
वत्यश्चयोषितः मर्यादासुनतिष्ठंतिसदोषःस्त्रीषुनारद ११ नस्त्रीभ्यःकिंचिदन्यद्वैपापीयस्तरमस्तिवैस्त्रियोहिमूलंदोषाणां
तथात्वमपिवेत्थह १२ समाज्ञातानृद्धिमतःप्रतिरूपान्वशेस्थितान् पतीनंतरमासाद्यनालंनार्यःप्रतीक्षितुं १३ असद्धर्म
स्त्वयंस्त्रीणामस्माकंभवतिप्रभो पापीयसोनरान्यद्वैलज्जांत्यक्त्वाभजामहे १४ स्त्रियंहियःप्रार्थयतेसन्निकर्षंचगच्छति
ईषच्चकुरुतेसेवांतमेवेच्छंतियोषितः १५ अनर्थित्वान्मनुष्याणांभयात्परिजनस्यच मर्यादायाममर्यादाःस्त्रियस्तिष्ठंतिभ
र्तृषु १६ नासांकश्चिदगम्योस्तिनासांवयसिनिश्चयः विरूपंरूपवंतंवापुमानित्येवभुंजते १७ नभयान्नाप्यनुक्रोशान्नार्थ
हेतोःकथंचन नज्ञातिकुलसंबंधात्स्त्रियस्तिष्ठंतिभर्तृषु १८ यौवनेवर्त्तमानानांमृष्टाभरणवाससां नारीणांस्वैरवृ
त्तीनांस्पृहयंतिकुलस्त्रियः १९ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा० १०९ २१ गतिः प्राप्तिः अन्योन्यमकृत्रिमालिंगधारिणोऽधःत्वामे पुनार्थ्यप्रवर्त्तंते एतच्चलोकप्रसिद्धं भर्त्तृषु दूरस्थेषु इतिशेषः नहितिष्ठंतिधैर्य्ये इतिशेषः २३ त्वं चलस्वभावासाला
हकाणां हृदयान्यैनिति श्रुतेर्यथावृकविशेषाः अतएहंनवनवंमांसमिछंति घासलनंरमंतएवं स्त्रियः पुरुषमित्यर्थः २७ काष्टानांकाष्टैः १८ अंतकादिवत्संयोना

याश्चवशत्वदहुमतारक्ष्यंतेदर्पितेः स्त्रियः अपिताः संप्रसज्जंतेकुब्जांधजडवामनैः २० पंगुष्वथचदेवर्षेयेचान्येकुत्सितानराः स्त्री
णामगम्योलोकेस्मिन्नास्तिकश्चिन्महामुने २१ यदिपुंसांगतिर्ब्रह्मन्कथंचिन्नोपपद्यते अप्यन्योन्यंप्रवर्त्तंतेनहितिष्ठंतिभर्त्तृषु
२२ अलाभात्पुरुषाणांहिभयात्परिजनस्यच वधबंधभयाच्चापिस्वयंगुप्ताभवंतिताः २३ चलस्वभावादुःसेव्यादुर्ग्राह्याभवतस्तथा
प्राज्ञस्यपुरुषस्येहयथावाचस्तथास्त्रियः २४ नाग्निस्तृप्यतिकाष्टनांनापगानांमहोदधिः नांतकः सर्वभूतानांनपुंसांवामलोचनाः
२५ इदमन्यच्चदेवर्षेरहस्यंसर्वयोषितां दृष्ट्वैवपुरुषंहृद्यंयोनिः प्रक्लिद्यतेस्त्रियः २६ कामानामपिदातारंकर्त्तारंमनसांत्वयोः रक्षिता
रंनमृष्यंतिस्वभर्त्तारमलंस्त्रियः २७ नकामभोगान्विपुलान्नालंकारान्नसंश्रयान् तथैवबहुमन्यंतेयथारत्यामनुग्रहं २८ अंत
कः पवनोमृत्युः पातालवडवामुखं क्षुरधाराविषंसर्पोवह्निरित्येकतः स्त्रियः २९ यतश्चभूतानिमहांतिपंचयतश्चलोकाविहिताविधात्रा यतः
पुमांसः प्रमदाश्चनिर्म्मितास्तदैवदोषाः प्रमदासुनारद ३ इतिदानधर्म्मेपंचचूडानारदसंवादः ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शकाइत्यर्थः २९ यतइतिवह्न्योस्मवत्स्वाभाविकाएतेस्त्रीणांदोषाइत्यर्थः यथोक्तं नीतौ अनृतंसाहसंमायामूर्खत्वमतिलोभिताअशौचंनिर्दयत्वंचस्त्रीणांदोषाःस्व
भावजाइतिकामस्याष्टगुणाः स्मृताइतिच ३० अध्यायः ३१ ॥ राम० १०९

CC-0. Dharmarth Trust J&K. Digitized By eGangotri

इमेवै एवंस्वभावदुष्टा अपिस्त्रियः परेभ्योदुःसंरक्ष्या इत्याख्यापिकातात्पर्यं ९ स्त्रीणामिति स्त्रीबुद्धिमनुसृत्यैव वृद्धकृसप्तादिभिर्वचनाशास्त्रंप्रवर्त्तितमित्य

युधिष्ठिर उ० इमेवैमानवालोकेस्त्रीषुसज्जंत्यभीक्ष्णशः मोहेनपरमाविष्टादैवसृष्टेनपार्थिव १ स्त्रियश्चपुरुषेष्वेवप्रत्यक्षंलोकसा
क्षिकं अत्रमेसंशयस्तीव्रोहृदिसंपरिवर्त्तते २ कथमासांनराःसंगंकुर्वंतेकुरुनंदन स्त्रियोवाकेषुरज्यंतेविरज्यंतेचताःपुनः ३ इ
तिताःपुरुषव्याघ्रकथंशक्यास्तुरक्षितुं प्रमदाःपुरुषेणेहतन्मेव्याख्यातुमर्हसि ४ एताहिममायामास्तुवंचयंतीहमानवान् नचासांमु
च्यतेकश्चित्पुरुषोहस्तमागतः ५ गावोनवतृणानीवगृह्णंत्येतानवंनवं शंबरस्यचमायायामायायानमुचेरपि ६ बलेःकुंभीनसेश्चै
वसर्वास्तायोषितोविदुः हसंतंप्रहसंत्येतारुदंतंप्ररुदंतिच ७ अप्रियंप्रियवाक्यैश्चगृह्णंतेकालयोगतः उशनावेदयच्छास्त्रंयच्च
वेदबृहस्पतिः ८ स्त्रीबुद्ध्यानविशिष्येतेतास्तुरक्ष्याःकथंनरैः अनृतंसत्यमित्याहुःसत्यंचापितथानृतं ९ इतियास्ताःकथंवी
रसंरक्ष्याःपुरुषैरिह स्त्रीणांबुध्यर्थनिष्कर्षादर्थशास्त्राणिशत्रुहन् १० बृहस्पतिप्रभृतिभिर्मन्येसद्भिःकृतानिवै संपूज्यमानाः
पुरुषैर्विकुर्वंतिमनोनृषु ११ अपास्ताश्चतथाराजन्विकुर्वंतिमनःस्त्रियः इमाःप्रजामहाबाहोधार्मिकाइतिनःश्रुतं १२ सत्कृता
सत्कृताश्चापिविकुर्वंतिमनःसदा कस्ताःशक्तोरक्षितुंस्यादितिमेसंशयोमहान् १३ तथाब्रूहिमहाभागकुरूणांवंशवर्द्धन यदिश
क्याकुरुश्रेष्ठरक्षातासांकदाचन कर्तुंवाकृतपूर्वावातन्मेव्याख्यातुमर्हसि १४ दानधर्मेविपुलेपाख्याने ३८ ॥ ॥ ॥

नुक्तिः १० एताःप्रजेताधिकृतावातुल्यवद्धिकारंजनयंतीत्यर्थः ११ एतादेवाहमाइतिरमाःस्त्रीरूपाःधार्मिक्यइतिश्रुतिमात्रंसावित्र्यादिषुदृष्टंअनुभवस्तुनतथेत्याह
सत्कृतेति १४ मष्टाध्यायः ३८ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा० एवमेवेत्यध्यायसमाप्तावर्पितानारूपेभ्योविदेह्योयोगवलेनैवंस्वभावचपलाःस्त्रियःसंक्षितुंशक्यानान्यथेति १६ ॥ ॥
११०

भीष्म उ० एवमेवमहावाहोनात्रमिथ्यास्तिकिंचन यथाब्रवीषिकौरव्यनारीप्रतिजनाधिप १ अत्रतेवर्णयिष्यामिइतिहासंपुरातनं
यथारक्षाकृतापूर्वंविपुलेनमहात्मना २ प्रमदाश्चयथासृष्टाब्रह्मणाभरतर्षभ यदर्थंतच्चतेतातप्रवक्ष्यामिनराधिप ३ नहिस्त्रीभ्यः
परंपुत्रपापीयःकिंचिदस्तिवै अग्निर्हिप्रमदादीप्तोमायाश्चमयजाविभो ४ क्षुरधाराविषंसर्पोवह्निरित्येकतःस्त्रियः प्रजाइ
मामहावाहोधार्म्मिकाइतिनःश्रुतं ५ स्वयंगच्छंतिदेवत्वंततोदेवानियाद्भयं अथाभ्यगच्छन्देवास्तेपितामहमरिंदमः ६ नि
वेद्यमानसंचापितूष्णीमासन्नधोमुखाः तेषामंतर्गतंज्ञात्वादेवानांसपितामहः ७ मानवानांप्रमोहार्थंकृत्यानार्योसृजत्प्रभुः
पूर्वसर्गेतुकौन्तेयसाध्व्योनार्य्यइहाभवन् ८ असाध्व्यस्तुसमुत्पन्नाःकृत्यासर्गात्प्रजापतेः ताभ्यःकामान्यथाकामंप्रादाद्धिस
पितामहः ९ ताःकामलुब्धाःप्रमदाःप्रबाधंतेनरान्सदा क्रोधंकामस्यदेवेशःसहायंचासृजत्प्रभुः १० असज्जंतप्रजाःस
र्वाःकामक्रोधवशंगताः नचस्त्रीणांक्रियाकाचिदितिधर्म्मोव्यवस्थितः ११ निरिंद्रियाह्यमंत्राश्चस्त्रियोनृतमितिश्रुतिः
शय्यासनमलंकारमन्नपानमनार्य्यतां १२ दुर्वाग्भावंरतिंचैवददौस्त्रीभ्यःप्रजापतिः नतासांरक्षणंशक्यंकर्त्तुंपुंसाकथंचन
१३ अपिविश्वकृतातातकुतस्तुपुरुषैरिह वाचावावधबंधैर्वाक्लेशैर्वाविविधैस्तथा १४ नशक्यारक्षितुंनार्य्यस्ताहिनित्य
मसंयताः इदंतुपुरुषव्याघ्रपुरस्तात्कृतवानहं १५ यथारक्षाकृतापूर्वंविपुलेनगुरुस्त्रियः ऋषिरासीन्महाभागोदेवशर्म्मेति राम०
विश्रुतः १६ ॥ ११०

तस्यभार्यारुचिर्नामरूपेणासदृशीभुवि यस्यारूपेणसंमत्तादेवगंधर्वदानवाः १७ विशेषेणतुराजेंद्रवृत्रहापाकशासनः नारीणांचरितज्ञश्चदेव
शर्मामहामुनिः १८ यथाशक्तियथोत्साहंभार्यांतामभ्यरक्षत पुरंदरंचजानीतेपरस्त्रीकामचारिणं तस्माद्यत्नेनभार्यायारक्षणंसचकारह
१९ सकदाचिदृषिस्तातयज्ञंकर्तुमनास्तदा भार्यासंरक्षणंकार्यंकथंस्यादित्यचिंतयत् २० रक्षाविधानंमनसासतमचिंत्यमहातपाः
आहूयदयितंशिष्यंविपुलंप्राहभार्गवं २१ देवशर्मोवाच यज्ञकारोगमिष्यामिरुचिंचेमांसुरेश्वरः यतःप्रार्थयतेनित्यंतांरक्षस्वयथाबलं
२२ अप्रमत्तेनतेभाव्यंसदाप्रतिपुरंदरं सहिरूपाणिकुरुतेविविधानिभृगूत्तम २३ भीष्मउ० इत्युक्तोविपुलस्तेनतपस्वीनियतेंद्रियः स
दैवोग्रतपाराजन्नग्न्यर्कसदृशद्युतिः २४ धर्मज्ञःसत्यवादीचतथेतिप्रत्यभाषत पुनश्चेदंमहाराजपप्रच्छप्रस्थितंगुरुं २५ विपुलउ०
कानिरूपाणिशक्रस्यभवंत्यागच्छतोमुने वपुस्तेजश्चकीदृग्वैतन्मेव्याख्यातुमर्हसि २६ भीष्मउ० ततस्सभगवांस्तस्मैविपुलायम
हात्मने आचचक्षेयथातत्वंमायांशक्रस्यभारत २७ देवशर्मोवाच बहुमायःसविप्रर्षेभगवान्पाकशासनः तांस्तान्विकुरुतेभावा
न्बहूनथमुहुर्मुहुः २८ किरीटीवज्रभृद्धन्वीमुकुटीबद्धकुंडलः भवत्यथमुहूर्तेनचंडालसमदर्शनः २९ शिखीजटीचीरवासाःपुन
र्भवतिपुत्रक बृहच्छरीरश्चपुनश्चीरवासाःपुनःकृशः ३० गौरंश्यामंचकृष्णंचवर्णंविकुरुतेपुनः विरूपोरूपवांश्चैवयुवावृद्धस्तथैव
च ३१ प्रतिलोमानुलोमश्चभवत्यथशतक्रतुः शुकवायसरूपीचहंसकोकिलरूपवान् ३२ सिंहव्याघ्रगजानांचरूपंधारयतेपुनः
दैवंदैत्यमथोराज्ञांवपुर्धारयतेपिच ३३ अकृशोवायुभग्नांगः शकुनिर्विकृतस्तथा चतुष्पाद्बहुरूपश्चपुनर्भवतिबालिशः ३४ मक्षि

© (P) Dharmartha Trust J&K Digitized By eGangotri

दा० १११ कामशकादीनां वपुष्यूरिपतेपि च नशक्यमस्यग्रहणं कर्त्तुं विपुलकेनचित् ३५ अपि विश्वकृता तात येन सृष्टमिदं जगत् पुनरन्तर्हितः श
क्रो हि दृश्यते ज्ञानचक्षुषा ३६ वायुभूतश्च स पुनर्देवराजो भवत्युत एवं रूपाणि सततं कुरुते पाकशासनः ३७ तस्माद्विपुल यत्नेन रक्षेयं तनु
मध्यमा यथा रुचिं नावलिहेद्देवेन्द्रो भृगुसत्तम ऋतावुपहितं न्यस्तं हविः श्ववदुरात्मवान् ३८ एवमाख्याय स मुनिर्यष्टकारो गमत्तदा
देवशर्मा महाभागस्ततो भरतसत्तम ३९ विपुलस्तु वचः श्रुत्वा गुरोस्तत्तामुपेयिवान् रक्षां च परमां चक्रे देवराजान्महाबलात् ४० किं
नु शक्यं मया कर्त्तुं गुरुदाराभिरक्षणे मायावी हि सुरेन्द्रोसौ दुर्धर्षश्चापि वीर्यवान् ४१ नापिधायाश्रमं शक्यो रक्षितुं पाकशासनः ३२
उटजं वा तथा ह्यस्य नानाविधस्वरूपता ४२ वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् तस्मादिमां संप्रविश्य रुचिं स्थास्येहमद्य वै ४३
अथवा पौरुषेणेयं न शक्या रक्षितुं मया बहुरूपो हि भगवाञ्छ्रूयते पाकशासनः ४४ सोहं योगबलादेनां रक्षिष्ये पाकशासनात्
गात्राणि गात्रैरस्याहं संप्रवेक्ष्ये हि रक्षितुं ४५ यद्युच्छिष्टामिमां पत्नीमद्य पश्यति मे गुरुः शप्स्यत्यसंशयं कोपाद्दिव्यज्ञानो महातपाः
४६ न चेयं रक्षितुं शक्या यथान्या प्रमदा नृभिः मायावी हि सुरेन्द्रोसावहो प्राप्तोस्मि संशयं ४७ अवश्यकरणीयं हि गुरोरिह हि शा
सनं यदि त्वेतदहं कुर्यामाश्चर्यं स्यात्कृतं मया ४८ योगेनानुप्रवेशो हि गुरुपत्न्याः कलेवरे असक्तः पद्मपत्रस्थो जलबिन्दुर्यथाचलः

४९ ॥ ॥ रा०म० १११

४१

अध्यायः ३९ ततःकदाचित् १ २ ३ ४ ५ ६ ७ ८

म

निर्मुक्तस्तरजोरूपस्त्वापराधोभवेन्मम यथाहिशून्यांपथिकःसभामध्यावसेत्पथि ५० तथाध्यावासयि
ष्यामिगुरुपत्न्याःकलेवरं एवमेवशरीरेस्यानिवत्स्यामिसमाहितः ५१ इत्येवंधर्म्ममालोक्यवेदवेदांश्चसर्व्वशः त
पश्चविपुलंदृष्ट्वागुरुरात्मानमेवच ५२ इतिनिश्चित्यमनसारक्षांप्रतिसभार्गवः अन्वतिष्ठत्परंयत्नंयथात
च्छृणुपार्थिव ५३ गुरुपत्नींसमासीनोविपुलःसमहातपाः उपासीनामनिंद्यांगींयथार्थैःसमलोभयत् ५४
नेत्राभ्यांनेत्रयोरस्यारश्मिंसंयोज्यरश्मिभिः विवेशविपुलःकायमाकाशंपवनोयथा ५५ लक्षणंलक्षणे
नैववदनंवदनेनच अविचेष्टन्नतिष्ठद्वैछायेवांतर्हितोमुनिः ५६ ततोविष्टभ्यविपुलोगुरुपत्न्याःकलेवरं उवासरक्षणेयुक्तो
नचसातमबुध्यत ५७ यंकालंनागतोराजनगुरुस्तस्यमहात्मनः क्रतुंसमाप्यस्वगृहंतंकालंसोभ्यरक्षत ५८ इतिदानध
र्मेविपुलोपाख्याने ३९ भीष्मउ० ततःकदाचिद्देवेंद्रोदिव्यरूपवपुर्धरः इदमंतरमित्येवमभ्यागात्तमथाश्रमं १ रूपमप्रतिमंकृत्वा
लोभनीयंजनाधिप दर्शनीयतमोभूत्वाप्रविवेशतमाश्रमं २ सददर्शतमासीनंवि-पुलस्यकलेवरं निश्चेष्टंस्तब्धनयनंयथा
लेख्यगतंयथा ३ रुचिरंचरुचिरापांगींपीनश्रोणिपयोधरां पद्मपत्रविशालाक्षींसंपूर्णेंदुनिभाननां ४ सातमालोक्यसहसाप्र
त्युत्थातुमियेषह रूपेणविस्मिताकोसीत्यथवक्तुमिवेच्छती ५ उत्थातुकामातुसतीविष्टब्धाविपुलेनसा निगृहीतामनुष्येंद्रनश
शाकविचेष्टितुं ६ तामाबभाषेदेवेंद्रःसाम्नापरमवल्गुना त्वदर्थमागतंविद्धिदेवेंद्रंमांशुचिस्मिते ७ क्लिश्यमानमनंगेनत्वत्संकल्पभवेव

नवै ॥ तत्प्राप्नुहिसुश्रोणिपुराकालोतिवर्त्तते ॥ ८

तमेववादिनं शक्रं सुश्राव विपुलो मुनिः गुरुपत्न्याः शरीरस्थो ददर्श त्रिदशाधिपं ९ न शशाक च सा राजन्प्रत्युत्थातुमनिंदिता वक्तुं च ना
शकद्राजन्विष्टब्धा विपुलेन सा १० आकारं गुरुपत्न्यास्तु स विज्ञाय भृगूद्वहः निजग्राह महातेजा योगेन बलवत्प्रभो ११ बबंध योगबंधैश्च
तस्याः सर्वेंद्रियाणि सः तां निर्विकारां दृष्ट्वा तु पुनरेव शचीपतिः १२ उवाच व्रीडितो राजंस्तां योगबलमोहितां एह्येहीति ततः सा तु प्रतिवक्तुमिये
षतं १३ स तां वाचं गुरोः पत्न्या विपुलः पर्यवर्तयत भोः किमागमने कृत्यमिति तस्यास्तु निःसृता १४ वक्त्राच्छशांकसदृशाद्वाणी संस्का
रभूषणा व्रीडिता सा तु तद्वाक्यमुक्त्वा परवशा तदा १५ पुरंदरश्च तत्रस्थो बभूव विमना भृशं स तद्वैकृतमालक्ष्य देवराजो विशांपते १६
अवैक्षत सहस्राक्षस्तदा दिव्येन चक्षुषा स ददर्श मुनिं तस्याः शरीरांतरगोचरं १७ प्रतिबिंबमिवादर्शे गुरुपत्न्याः शरीरगं स तं घोरेण तपसा
युक्तं दृष्ट्वा पुरंदरः १८ प्रावेपत सुसंत्रस्तः शापभीतस्तदा विभो विमुच्य गुरुपत्नीं तु विपुलः सुमहातपाः स्वकलेवरमाविश्य शक्रं भीत
मथाब्रवीत् १९ विपुल उवाच अजितेंद्रिय दुर्बुद्धे पापात्मक पुरंदर न चिरं पूजयिष्यंति देवास्त्वां मानुषास्तथा २० किं नु तद्विस्मृतं श
क्र न तत्ते मनसि स्थितं गौतमेनासि यन्मुक्तो भगांकपरिचिह्नितः २१ जाने त्वां बालिशमतिमकृतात्मानमस्थिरं मयेयं रक्ष्यते मू
ढ गच्छ पाप यथागतं २२ नाहं त्वामद्य मूढात्मन्दहेयं हि स्वतेजसा कृपायमानस्तु न ते दग्धुमिच्छामि वासव २३ स च घोरतमो धीमान्
गुरुस्त्वां पापचेतसं दृष्ट्वा त्वां निर्दहेदद्य क्रोधदीप्तेन चक्षुषा २४ नैवं तु शक्र कर्त्तव्यं पुनर्मान्याश्च ते द्विजाः मा गमः सनुतामात्यो ऽत्ययं
ब्रह्मबलार्दितः २५ ॥ ॥ ॥

३६ अध्यायः ४० विपुलस्त्विन्यध्यायद्वयस्यतात्पर्यंयिथाग्निपत्रावुबहसंगस्यापियोगिनोमातुरपिस्पर्शमात्रात्दोषोभवतीति गुरावप्युमनपिकर्म्मानिवेघन

अपरोस्मीतियच्चुद्धिंसमास्थायपवर्त्तसे मावमंस्थाननपसामसाध्यंनामकिंचन २६ भीष्मउ० नच्छ्रुत्वावचनंशक्रोविपुलस्य
महात्मनः अकिंचिदुक्त्वाव्रीडार्त्तस्तत्रैवान्तरधीयत २७ मुहूर्त्तेयातेतस्मिंस्तुदेवशर्म्मामहातपाः कृत्वायज्ञयथाकाममाज
गामस्वमाश्रमं २८ आगतेथगुरौराजन्विपुलःप्रियकर्म्मकृत् रक्षितांगुरवेभार्यांन्यवेदयदनिंदितां २९ अभिवाद्यचशां
तात्मासगुरुंगुरुवत्सलः विपुलःपर्य्युपातिष्ठद्यथापूर्व्वमशंकितः ३० विश्रांतायततस्तस्मैसहासीनायभार्यया निवेदयामा
सतदाविपुलःशक्रकर्म्मतत् ३१ तच्छ्रुत्वासमुनिश्रेष्ठोविपुलस्यप्रतापवान् बभूवशीलवृत्ताभ्यांतपसानियमेनच ३२
विपुलस्यगुरौवृत्तिंभक्तिमात्मनितत्प्रभुः धर्म्मेचस्थिरतांदृष्ट्वासाधुसाध्वित्यभाषत ३३ प्रतिलभ्यचधर्म्मात्माशिष्यंधर्म्म
परायणं वरेणच्छंदयामासदेवशर्म्मामहामतिः ३४ स्थितिंचधर्म्मेजग्राहसतस्माद्गुरुवत्सलः अनुज्ञातश्चगुरुणाचचा
रानुत्तमंतपः ३५ तथैवदेवशर्म्मापिसभार्य्यःसमहातपाः निर्भयोबलवृत्राघ्नाच्चचारविजनेवने ३६ इतिदानधर्मेविपुलोपा
ख्याने ४० भीष्मउवाच विपुलस्त्वकरोत्तीव्रंतपःकृत्वागुरोर्वचः तपोयुक्तमथात्मानममन्यतसवीर्य्यवान् १ सतेनकर्म्म
णास्पर्द्धन्पृथिवींपृथिवीपते चचारगतभीःप्रीतोलब्धकीर्त्तिर्वरोनृप २ उभौलोकौजितौचापितथैवामन्यतप्रभुः कर्म्मणा
तेनकौरव्यतपसाविपुलेनच ३ अथकालेव्यतिक्रांतेकस्मिंश्चित्कुरुनंदन रुच्याभगिन्याआदानंप्रभूतंधनधान्यवत् ४ ए
तस्मिन्नेवकालेतुदिव्याकाचिद्वरांगना बिभ्रतीपरमंरूपंजगामाथविहायसा ५ तस्याःशरीरात्पुष्पाणिपतितानिमहीतले तस्या श्रमस्याविदूरेहिदिव्यगंधानिभारत ६
स्यात्पत्यामितिच २ आदीयतेऽस्मिन्वांचवैर्दत्तंउपायनादिकंसआदानंविवाहाद्युत्सवःप्रभूतंबहुधनादिकंयत्र ६ ॥ ॥ ॥ ॥

रा० ११३ निमंत्रकः आकरणार्थंदूतः ६ चोद्यामासमदर्थमप्येतानिपुष्पाणिआनायपेतिप्रेरितवती १६ परिवर्त्तनमितिपुंस्त्वंतद्भावस्त्वार्थः १७ तस्मदेहतरस्यप
देयासुषुवक्ते आकर्षणेनविवर्त्तयन्विषमत्वंनयन् १८ नेतिनेतिअन्योन्यवचनंदूषयंतौविमर्षः अयंभावःमिथुनस्यैऽकेशीघ्रंगच्छंतीरात्रिंत्र

तामगच्छत्ततोराजन्नुचिन्मीलितलोचना तदानिमंत्रकस्तस्याअंगेभ्यःक्षिप्रमागमत् ७ तस्याहिभगिनीतातज्येष्ठानाम्नाप्रभा
वतीभामिनीचित्ररम्यसायवभूवांगेश्वरस्यवै ८ पिनद्धानिपुष्पाणिकेशेषुवरवर्णिनी आमंत्रितातततोगच्छद्रुचिंगयतेर्गृहं
९ पुष्पाणितानिदृष्ट्वातुतदांगेंद्रवरांगना भगिनीचोदयामासपुष्पार्थेचारुलोचना १० साभर्त्रेसर्वमाचष्टरुचिःसुरुचिरानना
भगिन्याभावितंसर्वमभिषिसत्वाभ्यनंदत ११ ततोविपुलमानाय्यदेवशर्मामहातपाः पुष्पार्थेचोदयामासगच्छगच्छेतिभारत १२ विपुल
स्तुगुरोर्वाक्यमविचार्यमहातपाः सतथेत्यब्रवीद्राजंस्तंचदेशंजगामह १३ यस्मिन्देशेतुतान्यासन्पतितानिनभस्तलात् अम्ला
नान्यपितत्रासन्कुसुमान्यपराण्यपि १४ सततस्तानिजग्राहदिव्यानिरुचिराणिच प्राप्तानिस्वेनतपसादिव्यगंधानिभारत १५ सं
प्राप्यतानिप्रीतात्मागुरोर्वचनकारकः तदाजगामतूर्णंचचंपांचंपकमालिनीं १६ सवनेनिर्जनेतातददर्शमिथुनंन्नृणां चक्रव
त्परिवर्त्ततंगृहीत्वापाणिनाकरं १७ तत्रैकस्तूर्णमगमत्तत्पदेचविवर्त्तमत् एकस्तानततदाराजंश्चक्रतुःकलहंततः १८ त्वंशीघ्रं
गच्छसीत्येकोब्रवीन्नेतितथापरः नेतिनेतिचतौराजन्परस्परमथोचतुः १९ ॥

हेदेविताशीघ्रंगच्छसीतिलोकद्वस्यापर्यनुयुंक्तेरात्रिस्तुस्वभावेनैवाहंगच्छामिनशीघ्रमितिपरिहरति एवंउभावपिसमयादिनोनानृतंशपथंचक्रतुरिति
१९ राम० ११३

अयंमिथुनस्यपरिश्रमः कष्टस्तत्वयः गतिरनिष्टेतिसार्द्धः २४ षडृतवो दीव्यमानान् अन्योन्यंडंतुमिच्छंतः वसंतादयोहिहषादीन्मारशीनभिसंधायायंमदी
योयंमदीयइतिविवदंते तेपिमतभेदान्नान्तवादिनः मीनादिर्वसंतइतिपक्षेहिहषोग्रीष्मांतर्गतः मेषादिपक्षेवसंतांतर्गतइति २८ रुच्याः गुरुभार्यायाः २९

तयोर्विसर्ज्जितोरेवंशपथ्योयममक्तदा सहसोद्दिश्यविपुलंततोवाक्यमथोचतुः २० आवयोरनृतंप्राहयस्तस्याभूद्द्विजस्यवै विपुलस्य
परेलोकेयागतिः साभवेदिति २१ एतच्छ्रुत्वातुविपुलोविषण्णवदनोभवत् एवंतीव्रतपाश्चाहंकष्टश्चायंपरिश्रमः २२ मिथुनस्यास्य
किंमेस्यात्कृतंपापंययागतिः अनिष्टासर्वभूतानांकीर्त्तितानेनमेद्यवै २३ एवंसंचिंतयन्नेवविपुलोराजसत्तम अवाङ्मुखोदी
नमनादध्यौदुष्कृतमात्मनः २४ ततः षडन्यान्पुरुषानक्षैः कांचनराजतैः अपश्यद्दीव्यमानान्वैलोभहर्षान्वितांस्तथा २५
कुर्वतः शपथंतेनयः कृतोमिथुनेनतु विपुलंवैसमुद्दिश्यतेपिवाक्यमथाब्रुवन् २६ लोभमास्थाययोस्माकंविषमंकर्त्तु
मुत्सहेत् विपुलस्यपरेलोकेयागतिस्तामवाप्नुयात् २७ एतच्छ्रुत्वातुविपुलोनापश्यद्धर्मसंकरं जन्मप्रभृतिकौरव्यकृ
तपूर्वमथात्मनः २८ संप्रदध्यौतथाराजन्नग्नावग्निरिवाहितः दह्यमानेनमनसाशापंश्रुत्वातथाविधं २९ तस्यचिंतयत
स्तातबह्व्योदिननिशाययुः इदमासीन्मनसिचरुच्यारक्षणकारितं ३० लक्षणंलक्षणेनैववदनंवदनेनच विधाय
नमयाचोक्तंसत्यमेतद्गुरोस्तथा ३१ एतदात्मनिकौरव्यदुष्कृतंविपुलस्तदा अमन्यतमहाभागतथातच्चनसंशयः ३२ स
चंपांनगरीमेत्यपुष्पाणिगुरवेददौ पूजयामासचगुरुंविधिवत्सगुरुप्रियः ३३ इतिदानधर्मेविपुलोपाख्याने ४१॥

लक्षणंस्त्रीपुंसयोरसाधारणंचिह्नं विधायस्कीकृत्यपिधायेतिपाठेपिसएवार्थः ३१ विपुलोपाख्याने २ ४१ ॥ ॥ ॥ ॥ ४१ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized by eGangotri

द्रा०
११४

तमागतमभिप्रेक्ष्येन पूर्वोक्ता मुनिवरागर्वकं आख्यायिका धर्ममुपसंहरति १ ते त्वया १० हर्षस्मितं हर्षेणागर्वितं ११ तेनैव च अनाख्यानेनैव १२ अ

भीष्म उ० तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत् देवशर्म्मा महातेजा यत्तच्छृणु जनाधिप १ देवशर्म्मा उ० किं ते विपुल दृष्टं वै तस्मिन् शिष्य महावने ते त्वां जानंति विपुल आत्मा च रुचिरेव च २ विपुल उ० ब्रह्मर्षे मिथुनं किं तत् के च ते पुरुषा विभो ये मां जानंति तत्त्वेन यन्मां त्वं परिपृच्छसि — — — ३ देवशर्म्मोवाच यद्वै तन्मिथुनं ब्रह्मन्नहोरात्रं हि विद्धि तत् चक्रवत्परिवर्त्तेत तत्ते जानाति दुष्कृतं ४ ये च ते पुरुषा विप्र अक्षैर्दीव्यंति हृष्टवत् ऋतूंस्तानभिजानीहि ते ते जानंति दुष्कृतं ५ न मां कश्चिद्विजानीत इति कृत्वा न विश्वसेत् नरो रहसि पापात्मा पापकं कर्म्म वै द्विज ६ कुर्वाणं हि नरं कर्म्म पापं रहसि सर्वदा पश्यंति ऋतवश्चापि तथा दिव निशे पुनः ७ ते पि वहि भवेयुस्ते लोकाः पापकृतो यथा कृत्वा नाचक्षतः कर्म्म मम तच्च यथा कृतं ८ ते त्वां हर्षस्मितं दृष्ट्वा गुरोः कर्म्मानिवेदकं स्मारयंतस्तथा प्राहुस्ते यथा श्रुतवानभवान् ९ अहोरात्रं विजानाति ऋतवश्चापि नित्यशः पुरुषे पापकं कर्म्म शुभं वा शुभकर्म्मिणः — — — १० तत्त्वया मम यत्कर्म्म व्यभिचारात्तभयात्मकं नाख्यातमिति जानंतस्ते त्वामाहुस्तथा द्विज ११ ते नैव हि भवेयुस्ते लोकाः पापकृतो यथा कृत्वा नाचक्षतः कर्म्म मम यच्च त्वया कृतं १२ तथा शक्या च दुर्वृत्ता रक्षितुं मम स्त्री द्विज न च त्वं कृतवान् किंचिदतः प्रीतोस्मि तेन ते १३ यदि त्वहं त्वां दुर्वृत्तमद्राक्षं द्विजसत्तम शपेयं त्वामहं क्रोधान्न मे त्रास्ति विचारणा १४ सज्जंति पुरुषे नार्यः पुंसां सोर्थश्च पुष्कलः अन्यथा रक्षतः शापो भविष्यत्तेमतिश्च मे १५ ॥ ॥ ॥ ॥

शकुंतिच्छेदः श्रीरामजयजय श्रीकृष्णजय ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम०
११४

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

रु रूपैः

पाणिपादोरेखादिभिः २१ यः संगमेतिसर्व्वप्रियोन्यः प्रियोनामनास्तीतियोजना २३ कृत्याः प्रराग्राहि देवतारूपाः कार्मी कृताश्चपूर्व्वमेकेनकृताः स्त्री
कृताअपिपश्चादन्येनापिकर्त्तुंयोग्याः व्यभिचारिणयः प्राणग्राहिण्यश्वेत्यर्थः २७ खेदमास्थायअप्रीत्याविष्टोग्लहीतवतमुनौतनतुप्रीत्याधर्मेकृतनुका

रक्षिताचत्वयापुत्रममचापिनिवेदिता अहंतेप्रीतिमांस्तातस्वस्थः स्वर्गंगमिष्यसि १६ इत्युक्त्वाविपुलंप्रीतोदेवशर्मामह
र्षिः मुमोदस्वर्गमास्थायसहभार्यः सशिष्यकः १७ इदमाख्यातवांश्चापिममाख्यानंमहामुनिः मार्कंडेयः पुराराजन्गंगा
कूलेकथांतरे १८ तस्माद्ब्रवीमिपार्थत्वांस्त्रियः सर्व्वाःसदैवच उभयंदृश्यतेतासु सततंसाध्वसाधुच १९ स्त्रियः साध्व्योमहा
भागाः समंताल्लोकमातरः धारयंतिमहींराजन्निमांसवनकाननां २० असाध्व्यश्चापिदुर्वृत्ताः कुलघ्नाः पापनिश्चयाः विज्ञेयाल
क्षणैर्दुष्टैः स्वगात्रसहजैर्नृप २१ एवमेताः सुरक्ष्यावैशक्याः कर्त्तुंमहात्मभिः अन्यथाराजशार्दूलनशक्यारक्षितुंस्त्रियः २२
एताहिमनुजव्याघ्रतीक्ष्णास्तीक्ष्णपराक्रमाः नासामस्तिप्रियोनाममैथुनेसंगमेतियः २३ एताः कृत्याश्चकार्याश्चकृताश्चभर
तर्षभ नचैकस्मिन्नमंत्येताः पुरुषेपांडुनंदन २४ नासांस्नेहोनरैःकार्य्यस्तथैवेर्ष्याजनेश्वर खेदमास्थायभुंजीतधर्म्ममास्था
यचैवह २५ निघ्नन्नाद्यन्यथाकुर्वन्नरः कौरवनंदन सर्वथाराजशार्दूलयुक्तिः सर्व्वत्रपूज्यते २६ तेनैकेनतुरक्षावैविपुलेन
कृतास्त्रियः नान्यः शक्तस्त्रिलोकेस्मिन्रक्षितुंनृपयोषितं २७ इत्यनुशासनिकेपर्व्वणिदानधर्म्मेविपुलोपाख्यानंसमाप्तं ॥

तातुरेखं २५ निघ्नन्नातवधप्रासुघातमुक्तिः अनासक्तिः युक्तिरितिपाठेसमाधिः २७ अध्यायः ४२ ॥ छ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा० यन्मूलं २ योनिं भ्रान्ततः पितृतस्त्वमुष्टि अत्र ब्राह्मइत्यनेनार्षदैवयोरपि ग्रहणं ब्राह्मणायोग्यायैतेविवाहः परहामस्वलायनः अलंकृत्यकन्यामुदक
११५ पूर्वीदद्यादेषब्राह्मोविवाहः आर्त्विजेतविततेकर्म्मणिदद्यादलंकृत्यसदैवः गोमिथुनेदत्वापयच्छेत सआर्षइति ३ एवउक्तगुणवंतआवाह्यविवाहयो
ग्यंआवहेदाकारयेततत्त्वअनुकूलतः धनदानादिनाअभिमुखीकृतायदद्यात् अयंचतुर्थः प्राजापत्यः ब्राह्मणानांक्षत्रियाणांचप्रशस्ततरो

युधिष्ठिरउ० यन्मूलंसर्वधर्म्माणांस्वजनस्यगृहस्यच पितृदेवातिथीनांचतन्मेब्रूहिपितामह १ अयंहिसर्वधर्म्माणांधर्म्म
श्चिंत्यतमोमतः कीदृशस्यप्रदेयास्यात्कन्येतिवसुधाधिप २ भीष्मउ० शीलवृत्तेसमाज्ञायविद्यांयोनिंचकर्म्मच सद्भिरेवं
प्रदातव्याकन्यागुणयुतेवरे ब्राह्मणानांसतामेषप्रोक्तोधर्म्मोयुधिष्ठिर ३ आवाह्यमावहेदेवंयोदद्यादनुकूलतः शिष्टानां
क्षत्रियाणांचधर्म्मएषःसनातनः ४ आत्माभिप्रेतमुत्सृज्यकन्याभिप्रेतएववः अभिप्रेताचयायस्यतस्मैदेयायुधि
ष्ठिर ५ गांधर्वमितितंधर्म्मंप्राहुर्वेदविदोजनाः धनेनबहुधाक्रीत्वासंप्रलोभ्यचबांधवान् ६ असुराणांन्पैतंवैधर्म्म
माहुर्मनीषिणः हत्वाछित्वाचशीर्षाणिरुदतांरुदतींगृहात् ७ प्रसह्यहरणंतातराक्षसोविधिरुच्यते पंचानांतुत्रयोध
र्म्याद्वावधर्म्मौयुधिष्ठिर ॥ ८ ॥

द्वितीयत्वेनात्रगणयेत्ते ४ वरस्त्रीयोरन्योन्यप्रसंयोविवाहःसगांधर्वस्तृतीयः सार्द्धश्लोकः ५ आसुरंवतुर्थमाहधनेनेति ६ हत्वेतिराक्षसः दा०
पंचमः अत्रैवप्रमत्तानांवधूनांकन्याहरणात्पशाचोहरणासोमान्यादंतर्भवति ७ त्रयः ब्राह्मक्षात्रेगांधर्वीःद्वौआसुरराक्षसौतत्रापिआसु ११५
रःस्वरूपराक्षसांतर्गतःपैशाचश्चात्यंतंवकर्त्तव्यो अर्थातराक्षसःकर्त्तव्यःक्षत्रियाणामित्यर्थः ८

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

दमयंतीस्वयंवरेब्राह्मक्षात्रयोर्मिश्रत्वंरुक्मिणीविवाहेराक्षसगांधर्वमिश्रः सुभद्रायांक्षात्रराक्षसमिश्रइत्याद्यूह्यं ९ तिस्रइतिसर्वेषांशूद्राव
र्ज्याइतरयोःतुस्ववर्णाचवर्ज्येतिज्ञेयं १० वैश्यस्यत्वेकैवभार्येतिसैवज्येष्ठा उक्ताभ्योऽधिकाशूद्रापिचतुर्णामपिस्यात्सा च रत्यर्थमेव न तु धर्मप्रजार्थं अप
रेयाज्ञवल्क्यादयोनेत्याहुः यथाह यदुच्यते द्विजातीनांशूद्राद्दारोपसंग्रहः नैतन्ममंमतंयस्मात्तत्रात्माजायतेस्फुटमितितदुक्तेः १२ स्वमतंतिस्र

पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचन ब्राह्मः क्षात्रोऽथ गांधर्वः एते धर्म्या नरर्षभ ९ पृथग्वा यदि वा मिश्राः कर्तव्या नात्र संश
यः तिस्रो भार्या ब्राह्मणस्य द्वे भार्ये क्षत्रियस्य तु १० वैश्यः स्वजात्यां विंदेत तास्वपत्यं समं भवेत् ब्राह्मणी तु भवेज्ज्येष्ठा क्षत्रिया क्ष
त्रियस्य तु ११ रत्यर्थमपि शूद्रा स्यान्नेत्याहुरपरे जनाः अपत्यजन्म शूद्रायां न प्रशंसंति साधवः १२ शूद्रायां जनयन्विप्रः प्रायश्चित्ती
विधीयते त्रिंशद्वर्षो दशवर्षां भार्यां विंदेत नग्निकां १३ एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् यस्यास्तु न भवेद्भ्राता पिता
वा भरतर्षभ १४ नोपयच्छेत तां जातु पुत्रिकाधर्मिणी हि सा त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती १५ चतुर्थे त्वथ
संप्राप्ते स्वयं भर्तारमर्जयेत् प्रजा न हीयते तस्या रतिश्च भरतर्षभ अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः १६ ॥ ॥

इत्यत्रसूचितंस्फुटीकरोतिअपत्येति १२ नग्निकाएकवासासंत्रजातास्त्रीव्यंजनामितियावत्अप्रःसादेकवासाइतिस्मृतिः यस्यादशमेपिवर्षेकुचो
द्भेदस्तत्प्रतिषेधार्थमेतद्विशेषणं १३ पुत्रिकाधर्मिणीहिस्वाइत्यत्रपुत्रिकाधर्मशंकयेतिमनुः पपाठयस्याःपितास्यमेवदुहितामम पुत्रस्यानेहस्याभि
प्रायवानत्रचेतिनस्यामेततांचोपयच्छेदितितद्योतारः १५ वाच्यानिंद्याभवेत् १६ ॥

रवा १

© (O) Dharmartha Trust J&K. Digitized By eGangotri

दा०
११६

असपिंडेति अत्र चकारद्वयादुभयमुभयत्रानुषज्य व्याचक्षते या मातुरसपिंडा असगोत्रा चेति केचित् अन्ये तु एकत्वं सा गता भर्त्तुः पिंडगोत्रे च सूतके इति
वचनात् मातुर्गोत्रांतराभावात् या मातुरसपिंडा इत्येव ग्राह्यं न त्वत्रापि असगोत्रेति विशेषणं योज्यमिति अन्ये तु यस्याः माता स्वपित्रा पुत्रत्वेन कल्पिता तत्
स्यां मातुरसगोत्रत्वविवक्षया एतद्व्याख्यानमिति तत्र सापिंड्यनिवृत्तिसंग्रहश्लोकः वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः पंचमी चेत्तयोर्माता तत्सा ४
पिंड्यं निवर्त्तत इति असगोत्रामित्यत्र असमानार्षगोत्रामिति द्रष्टव्यं असमानार्षगोत्रजामिति स्मृतेः आर्षविषये प्रतिप्रसवश्च स्मर्यते पंचानां त्रिषु
सामान्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति अनुगच्छेत विवाहमनु मैथुनाय एतामेव गच्छेत् एतेनास्य श्लोकस्य मनुपाठ
त उक्तः राईसा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति तद्व्याख्यातं अत्र मातापित्रोर्व्यवधानस्य वरीचदारकर्मणि यता दोमैथुने च प्रशस्ता एव सति

असपिंडा च या मातुरसगोत्रा च या पितुः इत्येतामनुगच्छेत तं धर्म्मं मनुरब्रवीत् १७ युधिष्ठिर उ० शुल्कमन्येन दत्तं स्याद्ददा
मीत्याह चापरः बलादन्यः प्रभाषेत धनमन्यः प्रदर्शयेत् १८ पाणिगृहीता चान्यः स्यात्कस्य भार्या पितामह तत्त्वं जिज्ञासमाना
नां चक्षुर्भवतु नो भवान् १९ भीष्म उ० यत्किंचित्कर्म्म मानुष्यं संस्थानाय प्रदृश्यते मंत्रवन्मंत्रितं तस्य मृषावादस्तु पातकः २०

पुनर्मैथुनग्रहणं स्मृत्यंतरे दृष्टार्थत्वान्मैथुने स्मृतं सर्वासां साधारणं निवर्त्तितुं मैथुनेपि यत्नाद्दाविचसवर्णोविमुख्यानंतु तस्याइतरस्यावारणमिति
एतदेवाभिसंधायात्रोक्तं इत्येतामनुगच्छेतेति यत्तु मिथुनस्य पृथग्ग्रहणात् दारकर्मपरेन तद्व्यतिरिक्ते पश्चाद्दावेव सवर्णायाः प्राधान्यं मैथुने त्वितर
साधारणमिति व्याचक्षते तदनेन विरुध्यते [illegible] हीनवर्णायां जातस्यात्मनोपि हीनत्वापत्तेः स्वतत्रात्मा जायते स्वयमिति वचनात् १७ शु
ल्कमिति पंचानां प्रश्नानामुपन्यासः १९ तत्र तत्रापि चतुर्थे दाने दोषा वृद्धोवितु पेक्ष्या द्वितीये भार्यात्वानुसन्निवक्तुर्दोषमात्रं चाह यत्किंचिदिति
मानुष्यं मानुषाणां हितं सांवधिकं संस्थिना पद्यमसभार्यत्वादिष्यवस्थापि मंत्रवन्मंत्रितं विचारवद्भिः सर्वैरंगीकृतं मंत्रितत्वमसंसेदं घोति विचा

रम०
११६

मृषोक्तेतवाहंभार्येत्याशुक्तापराह्णेनौदंडंप्रायश्चित्तं २१ तत्रनेतिपक्षंनिंदन्नस्यागमंगीकरोतिनहीति २२ नेतिप्रथमचरमपक्षयोर्यथोहं
एकेनेतरबाधेपिनदोषोस्तीत्यर्थः धर्मतःपाणिग्रहणविधितः प्रयच्छंतीति अबाधवाइतिशेषः तस्याहरणे नाधर्मस्तत्रदोषः नपिगृह्णीतशुल्का
याइत्यर्थः २३ तत्राद्यमुपपादयति बंधुभिरितीतिकान्तायाःहरणेदोषाभावमग्रेवक्ष्यति २४ उभयसन्निपातेसिद्धांतमाहयस्त्विति

भार्यापत्योर्ऋत्विगाचार्यः शिष्योपाध्यायएवच मृषोक्तेदंडमर्हंतीतिनेत्याहुरपरेजनाः २१ नह्यकामेनसंवासंमनुरेवंप्रशंस
ति अयशस्यमधर्म्यंचयन्मृषाधर्मकोपनं २२ नैकान्तेदोषएकस्मिंस्तदाकेनोपपद्यते धर्मतोयांप्रयच्छंतियांचक्रीणं
तिभारत २३ बंधुभिःसमनुज्ञातेमंत्रहोमौप्रयोजयेत् तथासिध्यंतितेमंत्रानादत्तायाःकथंचन २४ यस्त्वत्रमंत्रसमयोभा
र्यापत्योर्मिथःकृतः तमेवाहुर्गरीयांसंयश्चासौज्ञातिभिःकृतः २५ देवदत्तांपतिर्भार्यांवेत्तिधर्मस्यशासनात् सदैवीमा
नुषीवाचमनृतांपर्युदस्यति २६ युधिष्ठिरउ० कन्यायांप्राप्तशुल्कायांज्यायांश्चेदावजेद्वरः धर्मकामार्थसम्पन्नोवाच्य
मत्रानृतंनवा २७ तस्मिन्नुभयतोदोषेकुर्वन्श्रेयःसमाचरेत् अयंनःसर्वधर्माणांधर्मश्चिंत्यतमोमतः २८ तत्त्वंजिज्ञा
समानानांचक्षुर्भवतुनोभवान् तदेतत्सर्वमाचक्ष्वनहितृप्यामिकथ्यता २९ ॥

यश्चासौज्ञातिभिःकृतःसमयोगुरुतरइत्यर्थः २५ अत्रागमंमानमाहदेवेति देवःप्राक्कर्मईश्वरोवावेत्तिलभते २६ अथयज्येदोषेशिष्टाति
क्रमात्बंधुसंमानपूर्वकविक्रयातिक्रमाच्चदोषेसतिकुर्वन्कृतीश्रेयःप्रशस्ततरंकिंसमाचरेदित्यध्याहृत्ययोज्यंचिंत्यतमःसंदिग्धत्वेनविचा
र्यतमः २८ आचक्ष्वयतोनहितृप्यामितस्मात्कथ्यतामित्यादरसूचनार्थापुनरुक्तिः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

समयोगुरुतरणापिमंत्रपूर्वः २

CC-0. Dharmartha Trust J&K. Digitized By eGangotri

दा० ११७ नैवेति तेन कन्याशुल्कं भीष्मेण निष्ठाकारः स्त्रीत्वनिश्चयकरमिति ज्ञात्वा न आहृतं किंतु क्रयार्पणक्रयमात्रेण भार्यात्वं सिध्यतीत्यर्थः नापि शुल्कपराः ददा
ति दानं कुर्वन्ति आपत्तविक्रीणंति तत्स्याघाट्टिके स्मिन् क्रयविक्रयव्यवहारे कन्यापहारजो दोषो नास्तीत्यर्थः गुणैर्वेमाधिकत्वादिभिः ३० कन्याप्य
लंकारग्रहणेन दोषो नास्त्याह सोऽर्थेन अलंकृतेति ३१ यद्यपि पूर्वं दास्यामीत्याहुः ये च न दास्यामीत्याहुः ये च अवश्यं दास्यामीति वदंति तत्सर्वं न भाषि

भीष्म उ० नैव निष्ठाकरं शुल्कं ज्ञात्वासीत्तेन नाहृतं न हि शुल्कपराः संतः कन्यां ददति कर्हिचित् ३० अन्यैर्गुणैरुपेतं तु शुल्कं याचं
ति बांधवाः अलंकृत्वा वहस्वेति यो दद्यादनुकूलतः ३१ यच्च तां च ददत्येवं न शुल्कं विक्रयो न सः प्रतिगृह्य भवेद्देयमेष धर्मः सना
तनः ३२ दास्यामि भवते कन्यामिति पूर्वं न भाषितं ये चाहुर्ये च नाहुर्ये ये चावश्यं वदंत्युत ३३ तस्मादाग्रहणात्पाणेर्याचयंति पर
स्परं कन्यावरः पुरा दत्तो मरुद्भिरिति नः श्रुतं ३४ नानिष्टाय प्रदातव्या कन्या इत्यृषिचोदितं तन्मूलं काममूलस्य प्रजनस्ये
ति मे मतिः ३५ समीक्ष्य च बहून्दोषान्संवासाद्विद्विषाणयोः यथा निष्ठाकरं शुल्कं न जात्वासीत्तथा शृणु ३६ अहं वि
चित्रवीर्यस्य द्वे कन्ये समुदावहं जित्वा च मागधान्सर्वान्काशानथ च कोशलान् ३७ ॥

तं न्यनुक्तवदेवेत्यर्थः ३३ यस्मादेवं तस्मात् आपाणिग्रहणात् कन्यां याचेतेति मरुतां वरस्तेन ततः पूर्वविशिष्टपरार्थमपहारेपि न दोष इति भावः
यथोक्तं दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेदिति ३४ ततः कन्याकामो मूलं यस्य तस्मादुत्तमदौहित्रार्थिना श्रेयसे कन्या प्रदेयेति भावः ३५
संवासात् विपरिचयात् पाणायोः क्रयविक्रययो ३६ वीर्यमपि शुल्कं भवतीत्यभिप्रायेणाह अहमिति अंबिकांबालिके परे कन्ये वि सम०
वक्ष्यतो ह्रस्वमुक्तं ३७॥ ११७

© Dharmartha Trust J&K. Digitized By eGangotri

वै०

प्राप्तशुल्कवीर्यरागनिर्जितापिकन्यागृहीता अप्राप्तपाणिग्रहादयं अत्र वा विसर्ज्या उत्सृष्टुं योग्या इतिपिता वाह्लीकः अब्रवीदित्युत्तरेणान्वयः ३८ अनुपप्रष्ठ अनुष्टवानहं हे शकमानेइतिचिंतयात्यारोक्ष्ममभिसंधायउत्तमपुरुषप्रयोगः बहुजगादकिलाहंतस्यमन्नापुरस्तादितिवत् ४१ यदीति प्राप्तशुल्कयेनपाठांतरेसस्याः सस्या वाकन्यापिताकन्यावलाजांतरं वरात्तरंउपासीतयूतिपास्मृतिस्तर्हिवाध्येतेत्यध्याहृत्ययोजना लाजाः विधंते

गृहीतपाणिरेकासीत्प्राप्तशुल्का पराभवत् कन्यागृहीता तत्रैव विसर्ज्या इति मे पिता अब्रवीदितरां कन्यामावहेति स कौरवः ३८ अथान्यानन्नुपप्रष्ठ शंकमानः पितुर्वचः अतीवह्यस्य धर्मेप्सा पितुर्मेभ्यधिकाभवत् ३९ ततोहमब्रुवं राजन्नाचारेप्सुरिदं वचः आचारं तत्वतो वेत्तुमिच्छामि च पुनः पुनः ४० ततो मयैवमुक्ते तु वाक्ये धर्मभृतां वर पिता मम महाराज वाह्लीको वाक्यमब्रवीत् ४१ यदि वः शुल्कतो निष्ठा न पाणिग्रहणात्तथा लाजांतरमुपासीत प्राप्तशुल्कामिति स्मृतं ४२ नहि धर्मविदः प्राहुः प्रमाणं वाक्यतः स्मृतं येषां वै शुल्कतो निष्ठा न पाणिग्रहणात्तथा ४३ प्रसिद्धं भाषितं दाने नेषां प्रत्यायनं पुनः येमन्यंते त्रयं शुल्कं न ते धर्मविदो नराः ४४ न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा नह्येव भार्या क्रेतव्या न विक्रय्या कथंचन ४५ ये च क्रीणंति दासींच विक्रीणंति तथैव च भवेत्तेषां तथानिष्ठा लुब्धानां पापचेतसां ४६ अस्मिन्नर्थे सत्यवंतं पर्यपृछंत वै जनाः कन्यायाः प्राप्तशुल्काया शुल्कदः प्रशमेततः ४७

होमद्रव्यमस इति लाजशब्देश आघचप्रत्ययांतः ४२ येषां शुल्कतो निष्ठा तेषां वाक्यतः वाक्यं प्रमाणं स्मृतमिति धर्मविदो नहि आहुरित्यन्वयः ४३ एवं बाधकमस्त्वं साधकाभावं चोक्त्वा लोकविरोधमप्याह प्रसिद्धमिति कन्यायादानं इत्येवोच्यते न तु क्रयो भवति एवं शुल्कवादिनो प्रत्यायकं भीयां तस्यापकं किमपि नास्ति परिणयनादेव भार्या भवति न शुल्कमात्रदिति लोकव्यवहारस्य स्पष्टत्वादित्यर्थः एतदेवोपपादयति यइति

७ [illegible]

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

श्री

दा० ११८ ष्टः जीवतइत्यनादरे षष्ठी जीवंतमपि मुक्त्वा इत्यनादृत्याशेषोप्यसवं यथेष्टदानं कुर्वत इत्यर्थः ५० देवरमिति युगांतरधर्मः कलौ देवरात्सुतोत्पत्तेर्निषेधात् ५१ लिखंतीति
केषांचिन्मते देवरादयः अलिखितां भार्यां लिखंतेस्य वस्तुतः नयोज्ञपयंत्येव अपरेषां मते शनैर्मध्यएव यं प्रवृत्तिः ऐच्छिकी नतु वैधीत्यर्थः ५२ अस्मिन्पक्षद्वयेनिश्चयमाहतदि
ति सर्वाणि मंगलानि हरिद्रास्नानादीनि मंत्राश्च प्राक्पाणिग्रहणोपायत्वान्निष्पन्नास्तां दर्शनपर्यंतरं कालेव्यवधानं यत्र वर्त्तते तत्रैव पूर्वोक्तो नियमविकल्पः प्रवर्त्तते नतेन तु
पाणिग्रहणादूर्ध्वं तत्र संकल्पपूर्वकं दत्ता या अपि कन्यायोऽपहारस्तु न्यायमृषावादः पातको भवति दातुर्न तु तावन्मात्रेण तस्या भार्यात्वमुत्पन्नमित्यर्थः ५३ कदातर्हितत

पाणिग्रहीता चान्यः स्याद्यत्रनोधर्मसंशयः तंतमिच्छंति मनुष्याः प्राज्ञास्तं हि वै प्राज्ञसंमतः ४८ तत्वं जिज्ञासमानानां चक्षुर्भवतु नोभ
वान् तानेवंब्रुवतः सर्वान्मतस्य वान्यवाक्यमब्रवीत् ४९ यन्नेष्टं तत्र देयास्मान्नात्र कार्या विचारणा कुर्वते जीवतोप्येवं मृते नैवास्ति संश
यः ५० देवरं प्रविशेत्कन्यातप्येद्वापि तपः पुनः तमेवानुव्रता भूत्वा पाणिग्राहस्य काम्यया ५१ लिखंत्येवतु केषांचिदपरेषां शनैरपि
इति ये मे वदंत्यत्र त एवं निश्चयं विदुः ५२ तत्पाणिग्रहणात्पूर्वमंतरं यत्र वर्त्तते सर्वमंगलमंत्राणां मृषावादस्तु पातकः ५३ पाणि
ग्रहणमंत्राणां निष्ठा स्यात्सप्तमे पदे पाणिग्राहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते ५४ इति देयं वदंत्यत्र त एवं निश्चयं विदुः
अनुकूलामनुवंशां भ्रात्रा दत्तामुपाग्निकां परिक्रम्य यथान्यायं भार्यां विंदेद्द्विजोत्तमः ५५ इति दानधर्मे विवाहेषु० ॥

दुर्लघयेतत आह पाणीति यत्रानुदानादूर्ध्वं सप्तमपदात्प्राक् भर्त्तुर्मरणं सगोत्रत्वादिर्ज्ञानं वा ज्ञातं तत्राप्यसतवे मृषावाददोषोपि नास्तीत्यर्थः ५४ देयं दान स्तंत
स्यार्णां तमेवाह अनुकूलामिति। अनुवंशां स्ववंशानुरूपां यभावः यथाऽधानपवमानेष्टिर्भ्यां समुद्धिताभ्यामग्न्यपत्यर्घंते न त्वेकेकेन एवं दानपाणिग्रहाभ्यां भार्यात्वं
मुत्पन्नाद्यभावे चौर्येण गृहजायाः न धर्मपत्नीत्वं परस्याभावेतु तस्या दासीत्वान्नकर्मसंबंध इति ५५ इति दानधर्मेषु वैवाहिके ७३ ॥ ॥ ॥ ॥ दान० ११८

म्र२ म्र२

© Dharmartha Trust J&K. Digitized By eGangotri

कन्यायाः शुल्के दत्ते प्रोषितः तस्य पादस्पर्शश्च न वर्त्तते तदा तत्पित्रा किं कर्त्तव्यमिति प्रश्नार्थः १ या कन्या पितुः प्रतिपन्ना पित्ता च प्रदित्तशुल्कं वरं प्रतीक्षीयेभः परा हृत्य नद्यात्तत
हिता कन्या शुल्कप्रदस्यैव स्त्रेयानतु पितुस्तस्या अन्यस्मै दातुं अधिकारोस्तीत्यर्थः २ तस्य शुल्कदस्यार्थे न्यायेन उत्तमात्तरेतस्सः क्षेपो शापुत्रे देहे तस्य चासापुत्रस्य शुल्कद
स्य चोपकाराय भवति नतु तस्मात् शुल्कदादन्यः कश्चित्तस्मं त्रवत्कामीविधितः तस्याः पाणिग्रहणं कुर्वीत ३ स्वयं प्राप्तशुल्कायाः कर्त्तव्यमुल्का या सा दर्शयाः काग
तिरित्यत आह स्वयमिति पित्राऽश्राप्तसम्प्रसत्ती स्वयं तेनैव भर्त्रा योगं प्राप्तपद्यत एतच्च श्रुते धर्मज्ञान पुशंसन्ति ४ तत्र हेतुः सतत्तु नायो ऽज्ञातु चक्रुरिति अपरे पुनः शि

युधिष्ठिर उ० कन्यायाः प्राप्तशुल्कायाः पतिश्चेन्नास्ति कश्चन तत्र का प्रतिपत्तिः स्यात्तन्मे ब्रूहि पितामह १ भीष्म उ० या पुत्रकस्याऽऋद्धस्य प्र
तिपाल्या तदा भवेत् अथ चेन्नाहरेच्छुल्कं क्रीता शुल्कप्रदस्य सा २ तस्यार्थेपत्यमीहेत येन न्यायेन शक्नुयात् न तस्मान्मंत्रवत्कार्यं कश्चित्कुर्वीत किं
चन ३ स्वयं वृत्तेन सावित्री पित्रा वै प्रत्यपद्यत तत्तस्यान्ये प्रशंसन्ति धर्मज्ञा नेतरे जनाः ४ एतत्तु नापरे चक्रुरपरे जातु साधवः साधूनां पुनराचारो
गरीयान् धर्मलक्षणः ५ अस्मिन्नेवं प्रकरणे सुक्रतुर्वाक्यमब्रवीत् नप्ता विदेहराजस्य जनकस्य महात्मनः ६ असदाचरिते मार्गे कथं स्या
दनुकीर्त्तनं अत्र प्रश्नः संशयो वा सतामिदमुपालभेत् ७ ॥ ॥ ॥ ॥ ॥

ष्टाचारत्वादिदमपि गरीय इत्याह ५ नेतरः इत्यस्मिन्पक्षे शिष्टाचारं प्रमाणयति अस्मिन्निति ६ न सन्निदाचरिते मार्गे स्थितिपितरि यत्कन्यावरमन्वेषयतीदं न च न स्त्री स्वातंत्र्यमर्हतीति
तिशास्त्रविरुद्धं कथमत्र शास्त्रार्थो विकल्पः प्रश्नः संशयो वा असंदिग्धत्वादस्यार्थस्य नायं संशयाऽउन्निष्ठतीत्यर्थः उपालभेत् उपालंभं कथं कुर्यादित्यर्थः ७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मस्त्रीणामस्वातंत्र्यलक्षणस्यधर्मस्यप्रदानेखंडनेपतत्सत्र्यासुरोधर्मः एतत्पश्चात्पूर्वेषुदृष्टेषुकर्मसुविवाहेषु ठ सल्लोद्दष्टसंधानस्यपः सूक्ष्मःशास्त्रेकगम्यः सचसंयोगोयस्मं
हारमंत्रैरेणानसिध्यतिअसःस्तंविनाकेवलात्संयोगपयाकर्याचिद्दारानेनोहेदित्सर्थः ९ पुंसोंपुरुषेःतस्यअपुत्रस्य १० अन्योभ्रात्रादिः एतद्यासन्यामातरिस्तेयं ११ मातु
रिति सतिअसतिवापुत्रेमातुर्मैतिकंप्पृथकृतंधनंजनित्रादिभिर्दत्तंविहकालेवानसेपतत्स्वसुरादिभिर्दत्तंभर्त्रीवानवेदमितिपृथकृदत्तंकन्नेनाधर्जितंवानत्सर्वेकु

असेदेवविधिधर्मस्यप्रदानेधर्मत्र्यासुरः नानुशुश्रुमजात्वेतामिनांपूर्वेषुकर्मसु ८ भार्यापत्योर्हिसंबंधः स्त्रीपुंसोस्वल्पएवतु रतिः
साधारणोधर्मइतिचाहसपार्थिव ९ युधिष्ठिरउ० अथकेनप्रमाणेनपुंसामादीयतेधनं पुत्रवद्धिपितुस्तस्यकन्याभवितुमर्हति १० भीष्म
उ० यथैवात्मातथापुत्रःपुत्रेणदुहितासमा तस्यामात्मनितिष्ठंत्यांकथमन्योधनंहरेत् ११ मातुश्चयौतकंतत्स्यात्कुमारीभागएवसः दौहि
त्रएवतद्रिक्थमपुत्रस्यपितुर्हरेत् १२ ददातिहिसपिंडान्वैपितुर्मातामहस्यच पुत्रदौहित्रयोरेवविशेषोनास्तिधर्मतः १३ अन्यत्रजाम
यासार्धंप्रजानांपुत्रईहते दुहितान्यत्रजातेनपुत्रेणापिविशिष्यते १४

मारीभागएवनपुत्राणामित्यर्थः। तद्रिक्थंतयोर्धनंपितुःमातामहस्य १२ अत्रहेतुमाह ददातीतिय:पिंडद:सरिक्थहारीत्यर्थः। पिंडार्थ्येइतिपाठेपिंडः अर्प्यतेस्मिन् तत्रप्त्राद्धे
१३ पुत्रेति अन्यत्रपुत्रभागेधनेविभजनीये जामयाकन्ययातामपेक्ष्येत्यर्थः यत्रकन्यापूर्वंपुत्रीकृतातत्तः पुत्रोपिजातस्तत्रपंचधाभक्तस्यधनस्यद्वौकन्याहतित्रीन्पु
त्रः ततश्चकन्यामपेक्ष्यपुत्रःसार्धंत्रीणांईहते अन्यत्रजातेनऔरसादन्येनदत्तकादिनास्वयंसंस्कृतेनपुत्रेणतमपेक्ष्यऔरसीकन्याविशिष्यतेअत्रापिपंचानामंशा
नांत्रीन्कन्याहरेत्द्वौपुत्रइत्यर्थः १४ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

अत्रच स्पमाणस्यलेकारणांनिमित्तं तदेवस्पष्टमाह विक्रीतास्विति अपमर्थः विक्रीतायाः कन्यायाः पुत्राः नौरसेविपुत्रेसतिनदायभागपवतीति १५ आसुरत्विवा
हात्कन्याक्रयपूर्वात् १६ अत्रासुरविवाहनिंदायां १७ १८ कालसीकपेकालसत्रारखे १९ २० अन्येषांवालात्कन्याहरणशीलानांराक्षसानां २१ एतानपि

दौहित्रकेणधर्म्मेण नात्रपश्पामिकारणं विक्रीतासुहियेपुत्राभवंतिपितुरेवतु १५ अस्पपवत्वधर्म्मिष्ठाः परस्वादापिनः शठाः आसुराद्वि
संभूताधर्म्माद्विषमवृत्तयः १६ अत्रगाथापापमोद्गीताः कीर्त्तयन्तिपुराविदः धर्म्मज्ञावर्म्मशास्त्रेषुनिवद्धाधर्म्मसेतुषु १७ योमनुष्यः
स्वकंपुत्रंविक्रीयधनमिच्छति कन्यांवाजीवितार्थायपः शुल्केनप्रयच्छति १८ सप्तावरेमहाघोरेनिरयेकालसाह्वये स्वेदंमूत्रंपुरीषंचतस्मि
न्मूढः समश्नुते १९ आर्षेगोमिथुनंशुल्कंकेचिदाहुर्मृषैवतत् अल्पोवाबहुवाराजन्विक्रयस्तावदेवसः २० यद्यप्याचरितः कैश्चिन्नैष
धर्म्मः सनातनः अन्येषामपिदृश्यंतेलोकतः संप्रवृत्तयः २१ वश्यांकुमारींबलतोयेतांसमुपभुंजते एतेपापस्यकर्तारस्तमस्यंधेचशेरते
२२ अन्योप्ययनविक्रेयोमनुष्यः किंपुनः प्रजाः अधर्म्ममूलैर्हिधनैस्तैर्नधर्मोथकश्चन २३ इतिदानधर्म्मविवाहधर्मेयनगाथा भीष्म
३० प्राचेतसस्यवचनंकीर्त्तयंतिपुराविदः यस्याः किंचिन्नाददतेज्ञातयोनसविक्रयः १ अर्हणंतत्कुमारीणामानृशंस्यतमंचतत्
सर्वंचप्रतिदेयंस्यात्कन्यायैतदशेषतः २

निदतिवश्यामिति बलतोवश्यांनतुस्वछंदतइत्यर्थः २२ अन्योपिपश्वपि २३ इतिदानधर्मेषुविवाहधर्मेऽध्यायः प्राचेतसाद्दक्षस्यज्ञातयः कन्यापक्षीयाः स्वयंना
ददतेऽपचकन्यालंकारायमिच्छंतिसविक्रमोनभवतीत्यर्थः १ ॥ ॥

दा०ध० ३ नरोचेज्जनकामयेत नप्रमोदयेत्कामुकंनकुर्यात्प्रजनः संततिः ७४ सुल्पः ईषदायासेनअपनेयः कौपीनोगुह्याच्छादनपटोयासं सद्योहार्याईत्यर्थः सुहृ
१२०

पितृभिर्भ्रातृभिश्चापिश्वशुरैरथदेवरैः पूज्यालंकर्तव्याश्चबहुकल्याणमीप्सुभिः ३ यदिवैस्त्रीनरोचेतपुमांसंनप्रमोदयेत् अ
प्रमोदात्पुनःपुंसःप्रजनोनप्रवर्धते ४ पूज्यालालयितव्याश्चस्त्रियोनित्यंजनाधिप स्त्रियोयत्रचपूज्यंतेरमंतेतत्रदेवताः ५ अ
पूजिताश्चयत्रैताः सर्वास्तत्राफलाःक्रियाः तदाचैतत्कुलंनास्तियदाशोचंतिजामयः ६ जामीशप्तानिगेहानिनिकृत्तानीव
कृत्यया नैवभांतिनवर्धंतेश्रियाहीनानिपार्थिव ७ स्त्रियः पुंसांपरिददेमनुर्जिगमिषुर्दिवं अबलास्वल्पकौपीनाःसुहृदःसत्य
जिष्णवः ८ ईर्ष्यवोमानकामाश्चचंडाश्चसुहृदोबुधाः स्त्रियस्तुमानमर्हंतितामानयतमानवाः ९ स्त्रीप्रत्ययोहिवोधर्मोरतिभो
गाश्चकेवलाः परिचर्यानमस्कारास्तदायत्ताभवंतुवः १० उत्पादनमपत्यस्यजातस्यपरिपालनं प्रीत्यर्थंलोकयात्रायाःपश्य
तस्त्रीनिबंधनं ११ संमान्यमानाश्चैताहिसर्वकार्याण्यवाप्स्यथ विदेहराजदुहिताचात्रश्लोकमगायत १२ नास्तियज्ञक्रि
याकाचित्रश्राद्धंनोपवासकं धर्मःस्वभर्तृशुश्रूषातयास्वर्गंजयत्युत १३ पितारक्षतिकौमारेभर्तारक्षतियौवने पुत्राश्चस्थावि
रेभावेनस्त्रीस्वातंत्र्यमर्हति १४ श्रियएताःस्त्रियोनामसत्कार्याभूतिमिच्छता पालितानिगृहीताचश्रीःस्त्रीभवतिभारत १५
इतिदानधर्मेविवाहधर्मेषु युधिष्ठिरउ० सर्वशास्त्रविधानज्ञराजधर्मार्थवित्तम अतीवसंशयछेत्ताभवान्वैप्रथितःक्षितौ १

दः सौहार्दयुक्तान्बुध्यंतस्यबुधाः ८ स्त्रीप्रत्ययःस्त्रीहेतुकः ९ १३ अत्रस्त्रीधर्मविषये १३ १६ अध्यायःसेवीति १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ अनु०
१२०

एवमपि त्रिवर्गात्मकस्त्रीशुश्रूषामुक्त्वा धनमूलधर्म्यं दायविभागं प्रस्तौति ३ तिमिच्छत एव विहितानन्तु धर्मं शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं अयत्नं जनयित्वा स्यां ब्राह्मण्या
देवहा यत इति निंदास्मरणात् ४ ५ किं पत्रनारी ६ ७ दृष्टान्ततः शास्त्रतः ८ अविहितमप्यनिषिद्धं चेन्नात्राहं शूद्रामिति कूष्माण्डैर्जुहुयाद्यो ऽपूत इव मन्येत यथा स्तेनो यथा
भ्रूणहैवं स भवति यो ऽयोनौ रेतः सिंचतीति क्षत्रियायां वैश्यायां वोत्पन्नस्य साक्षाद्धाकोतियपपुरुषवधानादो ब्राह्मणपत्नीभोग्यदेश्येत इतितपारास्येयो नित्यं शूद्रायास्त

कश्चिन्नु संशयो मेऽस्ति तन्मे ब्रूहि पितामह जातेऽस्मिन्संशये राजन्नान्यं पृच्छेम कंचन २ यथा नरेण कर्तव्यं धर्ममार्गानुवर्तिना एतत्सर्वं म
हाबाहो भवानाख्यातुमर्हति २ चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ४ तत्र जातेषु पुत्रेषु सर्वा
सां कुरुसत्तम आनुपूर्व्येण कस्तेषां पित्र्यं दायाद्यमर्हति ५ केन वा किं ततो हार्यं पितृवित्तात्पितामह एतदिच्छामि कथितं विभागस्तेषु यः स्मृतः ६
भीष्म उ० ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ७ वैषम्यादथवा लोभात्कामाद्वापि परंतप ब्राह्म
णस्य भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ८ शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा ९ तत्र जातेष्वपत्येषु
द्विगुणं स्याद्युधिष्ठिर अपपद्यमानं कुरुश्रेष्ठ संप्रवक्ष्यामि भारत १० लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत् ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितु
र्धनात् ११ शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर तत्र तेनैव हर्तव्याश्चत्वारोंऽशाः पितुर्धनात् १२ क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः
स तु मातुर्विशेषेण त्रीनंशान्हर्तुमर्हति १३ ॥ ॥

तथा वाऽयोनित्वं तत्तस्यां रेतःसेके प्रायश्चित्तीभवत्येव कूष्माण्डैः यद्देवा देवहेलनमिति यजुर्वेदप्रसिद्धैर्मन्त्रविशेषैः अनेनैव विधिना वेदेन दृष्टेन कर्मणा प्रायश्चित्तमात्म
न इच्छति प्रायश्चित्तीयते अन्यथाऽधोगतिं यातीत्यर्थः ९ द्विगुणं प्रायश्चित्तं १० एकांशं मुख्यांश ११ तेनैव ब्राह्मणीपुत्रेण १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

१७ नित्यंसर्वपात्रदेयधनमसमसनित्यादेयधनः अथापित्र्यल्पएकोंशः १५ १६ अब्राह्मणंत्विति दीर्घतमसः पुत्रेषुशूद्रायांजातेषुकाक्षीवदादिषुब्राह्मणदर्शी
नादितिभावः एवंचतत्सत्रमंत्रकाःसंस्कारास्त्रपिभवंति त्रिषुक्षत्रियादिषुएतद्वदापार्थंअत्रचधन्वार्थश्लोकेविभातवैश्यायांशूद्रायांचजातस्समानजातीयवत्व
सवक्षमीणत्वात् १७ १९ समुत्पन्नंत्वानृशंस्य २० यद्यपीति एतेनवंधुषुअमुत्रात्सपुत्रोधिकंभागमर्हतीतिसूच्यते २१ दृष्यायज्ञादिप्रयोजनंविनातस्मा

वर्णेतृतीयेजातस्तुवैश्यायांब्राह्मणादपि द्विरंशस्तेनहर्त्तव्योब्राह्मणस्वायुधिष्ठिर १७ शूद्रायांब्राह्मणाज्जातोनित्यादेयधनःस्मृतः अल्पंचापि
प्रदातव्यंशूद्रापुत्रायभारत १५ दशधाप्रविभक्तस्यधनस्यैषभवेत्क्रमः सवर्णासुतुजातानांसमान्भागान्प्रकल्पयेत् १६ अब्राह्मणंतुमन्यंतेशूद्रापु
त्रमनैपुणात् त्रिषुवर्णेषुजातोहिब्राह्मणाद्ब्राह्मणोभवेत् १७ स्मृतास्तुवर्णाश्चत्वारःपंचमोनाधिगम्यते हरेत्तुदशमंभागंशूद्रापुत्रःपितुर्ध
नात् १८ तत्तुदत्तंहरेत्पित्रानादत्तंहर्त्तुमर्हति अवश्यंहिधनंदेयंशूद्रापुत्रायभारत १९ आनृशंस्यपरोधर्मइतितस्मैप्रदीयते यत्र
तत्रसमुत्पन्नेगुणायैवोपपद्यते २० यद्यप्येषसपुत्रस्यादपुत्रोयदिवाभवेत् नाधिकंदशमाद्दद्याच्छूद्रापुत्रायभारत २१ त्रैवार्षिकाद्यदा
भक्तादधिकंस्याद्द्विजस्यतु यजेततेनद्रव्येणनवृथासाधयेद्धनं २२ त्रिसहस्रःपरोदायःस्त्रियैदेयोधनस्यवै भर्त्रातच्चधनंदत्तंयथार्हंभोक्तु
मर्हति २३ स्त्रीणांतुपतिदायाद्यमुपभोगफलंस्मृतं नापहारंस्त्रियःकुर्युःपतिवित्तात्कथंचन २४ स्त्रियास्तुयद्भवेद्वित्तंपित्रादत्तंयुधि
ष्ठिर ब्राह्मण्यास्तद्धरेत्कन्यायथापुत्रस्तथाहिसा साहिपुत्रसमाराजन्विहिताकुरुनंदन २५ एवमेवसमुद्दिष्टोधर्मोवैभरतर्षभ एतंध
र्ममनुस्मृत्यनवृथासाधयेद्धनं २६॥

वृथेतप्रतिग्रहादिनावादायहरणेनवानलिप्सेत २१ त्रीति सहस्रत्रयादूर्ध्वंबहुवित्तवत्तापिस्त्रियाधिकोदायोनदेयइत्यर्थः तदपिपतिदत्तंचेत्भर्त्रीभोक्तुंश
क्नोतिनत्वस्यते २२ कुर्युःपुत्रायुक्तिशेषः पतिवित्तात्पत्यादत्तान्नाविवक्तात् २४ २५ धर्मोविभागप्रकारः वृथाअन्यायेनसाधितेद्रव्यैःकृतमपियागादिनि

© Dharmartha Trust J&K. Digitized By eGangotri

अग्र्यामिति तत्सम्प्राप्नुक्तं निमोर्देयधनत्वात्तद्वानंतरोक्तदशमांशदानविधिना विरुद्धमित्यर्थः २७ यदाऽस्मिन्सवर्णामपुत्रा ब्राह्मणी पूर्ववत्तदा किमर्थमेषां भागवैषम्यमिति
द्वितीय आक्षेपः २८ २९ आदियंतो त्रिवर्णाधिभिरिति दारपदप्रवृत्तिनिमित्तं आदरः स च भोगार्थायां शूद्रायामप्यस्तीत्यत स्तत्पुत्रोपि दायमर्हतीति यतस्तु भर्तुर्गृदरस्ता
भिर्वर्णक्रमेण यथायोग्यं तारतम्यक्रमेण त्रिपत इति तत्पुत्राणां भागवैषम्यं वा स्त्रीत्वाभिप्रायवानाहां प्रोक्तेनैवेति। नामनिर्वचनमयेऽक्षैवायं विशेषस्तीत्यर्थः ३०

युधिष्ठिर उवाच शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनः स्मृतः केन प्रतिविशेषेण दशमोऽप्यस्य दीयते २७ ब्राह्मण्यां ब्राह्मणाज्जातो
ब्राह्मणः स्यान्न संशयः क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि २८ कस्मात्तु विषमं भागं भजेरन्नृपसत्तम यदा सर्वे त्रयो वर्णास्त्वयो
क्ता ब्राह्मणा इति २९ भीष्म उ० दारा इत्युच्यते लोके नाम्नैकेन परंतप प्रोक्तेन चैव नाम्नायं विशेषः सुमहान्भवेत् ३० तिस्रः कृत्वा पु
रो भार्याः पश्चाद्विन्देत ब्राह्मणीं सा ज्येष्ठा सा च पूज्या स्यात्सा च भार्या गरीयसी ३१ स्नानं प्रसाधनं भर्तुर्दन्तधावनमंजनं हव्यं कव्यं च यच्चा
न्यद्धर्म्मयुक्तं गृहे भवेत् ३२ न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ब्राह्मणी त्वेव कुर्याद्वा ब्राह्मणस्य युधिष्ठिर ३३ अन्नं पानं च
माल्यं च वासांस्याभरणानि च ब्राह्मण्यै तानि देयानि भर्तुः सा हि गरीयसी ३४ मनुनाभिहितं शास्त्रं यच्चापि कुरुनंदन तत्राप्येष म
हाराज दृष्टो धर्म्मः सनातनः ३५ अथ चेदन्यथा कुर्याद्यदि कामात् युधिष्ठिर यथा ब्राह्मणचांडालः पूर्वदृष्टस्तथैव सः ३६ ॥ ॥

विशेषमेवाह तिस्र इति। पश्चात्परिणीतापि वयसा कनिष्ठापि पितृगौरवाद्ब्राह्मणीमेव सर्वेषु लौकिकैर्वैदिकेषु कार्येष्वाद्रियेतेत्यर्थः ३१ ३५ ब्राह्मणचंडालः
ब्राह्मणक्षेत्रे शूद्राज्जातः पूर्वोक्तो मातंगस्तद्वत्स तेन कर्मणा स्तेय इत्यर्थः। कर्मणा जायते स्तातिभेगीनस्तापते कृतमिति न्यायात् ३६ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

३८ भूयोन्येपि त्वधिकमधिकं संहार्यः संविभजनीयः ३९ ४० उक्तां दायविभागादिनियमं दायविभागो अत्रापि क्षत्रियभूयसो द्वौ वैश्यस्य त्रेधावधनं विभ
ज्यैकैकांशहीनाइतरभागा उक्तविशेषोस्तीति भवतु रभिप्रायः ४६ क्षत्रियाणां क्षत्रियपत्नी शाप एषएव क्रमो भर्तुः स्नानादिप्रदानेन तत्सांसवर्णापासंस्पोहीनवा

ब्राह्मण्याः सदृशः पुत्रः क्षत्रियायाश्च योभवेत् राजन्विशेषोपस्त्वत्र वर्णयोरुभयोरपि ३७ नत्वजात्यासमालोके ब्राह्मण्याः
क्षत्रियाभवेत् ब्राह्मण्याः प्रथमः पुत्रो भूयान्स्याद्राजसत्तम ३८ भूयोभूयोपि संहार्यः पितृवित्ताद्युधिष्ठिर यथानसदृशीजा
तुब्राह्मण्याः क्षत्रियाभवेत् ३९ क्षत्रियायास्तथावैश्यानजातुसदृशीभवेत् श्रीस्तुराज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर ४०
विहितं दृश्यते राजन्सागरांता च मेदिनी क्षत्रियोहि स्वधर्मेण श्रियं प्राप्नोति भूयसीं ४१ राजदंडधरो राजन्रक्षा नान्य
त्र क्षत्रियात् ब्राह्मणा हि महाभाग देवानामपि दैवतं ४२ तेषु राजन्प्रवर्तेत पूजया विधिपूर्वकं प्रणीतमृषिभिर्ज्ञात्वा धर्मं शा
श्वतमव्ययं ४३ लुप्यमानं स्वधर्मेण क्षत्रियो ह्येष रक्षति दस्युभिर्हियमाणं च धनं दाराश्च सर्वशः ४४ सर्वेषामेव वर्णानां
त्राता भवति पार्थिवः भूयान्स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ४५ भूयस्तेनापि हर्तव्यं पितृवित्ताद्युधिष्ठिर युधि
ष्ठिरउ० उक्तं ते विधिवद्राजन्ब्राह्मणस्य पितामह इतरेषां तु वर्णानां कथं वै नियमो भवेत् ४६ भीष्मउ० क्षत्रियस्यापि
भार्ये द्वे विहिते कुरुनंदन तृतीया च भवेच्छूद्रा न तु दृष्टांततः स्मृता ४७ एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर अष्टधा तु
भवेत्कार्यं क्षत्रियस्वं जनाधिप ४८ क्षत्रियाया हरेत्पुत्रश्चतुरोंशान्पितुर्धनात् युद्धावहारिकं यच्च पितुः स्यात्स हरेत्तु तत् ४९

गीविनिन्नकुर्यादित्यर्थः ४८ युद्धे वह्निपतेत द्रव्यगजायुधकवचादिकं युद्धावहारिकं ४९ ॥ ॥ ॥ ॥ ॥ ॥

५४ शूद्रस्यैदेयधनत्वेहेतुस्त्रिभिर्वर्णैर्जाताइति ५५ ६० दानधर्मेषुरिक्थविभागः ५७ एवमनुलोमजातिजानांपुत्राणांतमत्तम्यमुक्त्वाविलोमजातिजाना
मपितदाहय्यधायेनत्रयीदिति लोभात्कामाद्वाउत्तमवर्णास्त्रीहीनवर्णानुगामवतीतिप्रसिद्धं तेनगर्भोत्पत्तिसंभवात् वर्णानांनिश्चयेनजायतेतेननुकर्मणाजायतेजा

वैश्यापुत्रस्तुभागांस्त्रीनच्छूद्रापुत्रस्तुपाष्टमं सोपिदत्तंहरेत्पित्रानादत्तंहर्तुमर्हति ५० एकैवहिभवेद्भार्यावैश्यस्यकुरुनंदन द्वितीया
तुभवेच्छूद्रानतुदृष्टांततःस्मृता ५१ वैश्यस्यवर्त्तमानस्यवैश्यायांभरतर्षभ शूद्रायांचापिकौंतेयतयोर्विनियमःस्मृतः ५२ पंचधातुभवे
त्कार्यंवैश्यस्वंभरतर्षभ तयोरपत्येवक्ष्यामिविभागंचजनाधिप ५३ वैश्यापुत्रेणहर्त्तव्याश्चत्वारोंशाःपितुर्धनात् पंचमस्तुस्मृतोभागः
शूद्रापुत्रायभारत ५४ सोपिदत्तंहरेत्पित्रानादत्तंहर्तुमर्हति त्रिभिर्वर्णैःसदाजातःशूद्रोदेयधनोभवेत् ५५ शूद्रस्यस्यात्सवर्णैवभा
र्यानान्याकथंचन समभागाश्चपुत्राःस्युर्यदिपुत्रशतंभवेत् ५६ जातानांसमवर्णायाःपुत्राणामविशेषतः सर्वेषामेववर्णानां
समभागोभवेत्स्मृतः ५७ ज्येष्ठस्यभागोज्येष्ठःस्यादेकांशोयःप्रधानतः एषदायविधिःपार्थपूर्वमुक्तःस्वयंभुवा ५८ समवर्णासु
जातानांविशेषोस्त्यपरोनृप विवाहवैशिष्ट्यकृतःपूर्वःपूर्वोविशिष्यते ५९ हरेज्ज्येष्ठःप्रधानांशमेकंतुल्यासुतेष्वपि मध्यमोमध्यमं
चैवकनीयांस्तुकनीयसं ६० एवंजातिषुसर्वासुसवर्णाःश्रेष्ठतांगताः महर्षिरपिचैतद्वैमारीचःकाश्यपोब्रवीत् ६१ इतिदानधर्मेवि
वाहधर्मेरिक्थविभागः ५६ युधिष्ठिरउवाच अर्थाश्रयाद्वाकामाद्वावर्णानांचाप्यनिश्चयात् अज्ञानाद्वापिवर्णानांजायतेव

तिरितभिप्रुक्तेरुच्यतएवानिषेककालेदुर्मुहूर्त्तदृष्टवस्तुस्मरणादिनापिमिनिमित्तेनसम्यग्मतउत्पत्तिसंभवात् प्रच्छन्नविलोमजोष्यपिक्व॥ र्णसंकरः १
विसदाचारदर्शनेनवर्णानामज्ञानाद्यावशंवर्णसंकरोभवतीत्यर्थः १॥ ॥ ॥

दा०टी एतेनउक्तेनविधिनाप्रकारेण १ तत्रप्रथमंचत्वारएववर्णाः प्रजापतिसृष्टास्तत्रक्षत्रस्यक्षत्रियाणप्रजापतित्वंनतुसाक्षात् तस्माच्छूद्रोपन्नोऽनवकृप्तइतिश्रुतेः
१२३ आत्माब्राह्मणस्यैवंक्षत्रियायामपिजायतइत्यर्थः एवंकिंचित्रीवः पदाहमनः स्त्रीष्वनंतरजातासुद्विजैरुत्पादितान्सुतान् सदृशानेवतानाहुर्मातृदो
षविगर्हितानितिमातृजात्यौवैश्यायांवैश्योऽम्बष्ठोनामशूद्रायांशूद्रोनिषादोनामपारशवाख्योभवति मनुब्राह्मणाद्वैश्यकन्यायामंबष्ठोनामजायते

तेषामेतेनविधिनाजातानांवर्णसंकरे कोधर्म्मः कानिकर्माणितन्मेब्रूहिपितामह १ भीष्मउ० चातुर्वर्ण्यस्यकर्म्माणिचातुर्वर्ण्यंच
केवलं असृजत्सहियज्ञार्थंपूर्वमेवप्रजापतिः २ भार्याश्चतस्रोविप्रस्यद्वयोरात्माप्रजायते आनुपूर्व्याद्द्वयोर्हीनौमातृजात्यौप्र
सूयतः ४ परंशवाद्ब्राह्मणस्यैषपुत्रः शूद्रापुत्रंपारशवंतमाहुः शुश्रूषकःस्वस्यकुलस्यसस्यात्स्वंचारित्रंनित्यमथोनजह्यात् स
र्वानुपायानथसंप्रधार्यसमुद्धरेत्स्वस्यकुलस्यतंतुं ज्येष्ठोयवीयानपियोद्विजस्यशुश्रूषयादानपरायणःस्यात् ६ तिस्रः क्ष
त्रियसंबंधाद्द्वयोरात्मास्यजायते हीनवर्णास्तृतीयायांशूद्राउग्राइतिस्मृतिः ७ द्वेचापिभार्येवैश्यस्यद्वयोरात्मास्यजायते शू
द्राशूद्रस्यचाप्येकाशूद्रमेवप्रजायते ७ अतोविशिष्टस्त्वधमोगुरुदारप्रधर्षकः बाह्यंवर्णंजनयतिचातुर्वर्ण्यविगर्हितं ८ ॥

निषादः शूद्रकन्यायांयः पारशवउच्यतइति ४ एतस्माच्चश्रेष्ठिणामिताशवात्पयुवाएतच्छ्मशानंयच्छूद्रइतिश्रुतेः। शवस्यानंतरत्वात्शूद्रात्परंउत्कृष्टं
पश्रांसुतंयुंपादस्युक्तेजंगमंश्मशानंशूद्रइत्यर्थः ४ तत्रउपकरणं यथासाज्येष्ठोपिपूर्वःसर्वोद्विजस्त्रिवर्णाजस्यकनीयानेवेतिसंबंधः ५ वैश्यायामपिक्ष
त्रियायांक्षत्रियएवभवतीत्याहद्वयोरिति उग्राः शूद्रीविशेषाः ६ वैश्यात्शूद्रायामपिवैश्यएवभवतीत्याहद्वेइति ७ अतःस्वपितेरविशिष्टानधिकः सन्नधमः दान०
शूद्रगुरूणांब्राह्मणादीनांदारप्रधर्षकस्त्वत् बाह्यंचंडालादि ८ ९ १२३

© (P) Dharmartha Trust J&K Digitized By eGangotri

विघायामिति सूतः सारथिः जातितः कर्मतश्च सूतानामश्वसारथ्यमित्युक्तेः स्तोमक्रियास्तोत्रकरणं च राजादीनां पथ्यो नंस्तौतः पौराणिका मता इति मौद्गल्यं स्त्री
कार्यं अतः पुररक्षणादितत्कारित्वं वैदेहिकानां स्त्रीकार्यमित्युक्तेः अपवर्तितं संस्कारेण हि ९ वध्यानां चौरादीनां शिरश्छेदादिकार्यकारिणां वधघ्नं १० वैदी
ति मागधानां वणिक्कार्यम् इति मनुः वाक्प्रशस्तावसदृशी उक्तिप्रभृति निषादः क्षत्ता नामायदाह मनुः शूद्रादायोगवः क्षत्ता चंडालश्चाधमो नृणां वैश्यरा
जन्यविप्रासु जायन्ते वर्णसंकरा इति अस्य वृत्तिं मनुरन्यामाह क्षत्तृउग्रपुल्कसानां तु बिलौकोवधबंधनमिति अत्र मनुना निषादोऽनुलोमजेषु क्षत्ता च प्रति

विप्रायां क्षत्रियो वा ह्युत्सूतं स्तोमक्रियापरं वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितं ९ शूद्रश्चांडालमत्युग्रं वध्यघ्नं बाह्यवासिनं
ब्राह्मण्यां संप्रजायन्ते इत्येते कुलपांसवाः एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो १० वैदीत्तु जायते वैश्यान्मागधो वाक्यजीवनः
शूद्रान्निषादो मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात् १० शूद्रादायोगवश्चापि वैश्यायां ग्राममधर्मिणः ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्वध
नजीवनः ११ एतेपि सदृशान्वर्णान्जनयंति स्वयोनिषु मातृजात्यां प्रसूयंते ह्यवरा हीनयोनिषु १२ यथा चतुर्षु वर्णेषु द्वयोरा
त्मास्य जायते आनंतर्यात्प्रजायंते तथा बाह्याः प्रधानतः १३॥

लोमजेषूक्तः व्यासेन तु विपरीतमुक्तं विदुरे क्षत्तृशब्दं तत्रात्र प्रयुंजानेन अत एव शूद्रस्यां निषादो जातः पारशवोपि वा क्षत्रियायां मागधं वैश्यात् शूद्रात् क्षत्तारमे
व वेति याज्ञवल्क्य उभयत्र वा शब्दं पठन् अनयोर्निषादत्वक्षत्तृत्वे स्मृत्वपतिते न विप्रात् शूद्रायां क्षत्ता प्रद्रात् क्षत्रियायां निषादस्तत्रापि साधु १० ग्राममधर्मिणः ग्रा
मधर्मे मैथुने तं हंत तक्षा वर्द्धकिः ११ एते नव चत्वारश्च पारशवोग्राः सूतवैदेहकचंडालाः मागधनिषादायोगवाना नव तेषां स्वयोनौ अनंतरयोनौ व स्वात्मैव जा
यते पूर्ववत् व्यवहितनीचयोनौ तु मातृजातीया इति श्लोकद्वयार्थः १३॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

दा०टी० तेचापिसंकरसंकराज्ञात्र्यपिविगर्हितानत्रधमाद्धमापोऽन्नमारधमायांवाज्ञातांवष्टादिवहिर्गर्हितातेवन्ननयंतीत्यर्थः ॥ श्री २
१२४ ह्यानामित्यादिना मागधेषुसैरंध्रामित्यनेदेनान्वयः सैरंध्रकर्मव्याचष्टेप्रसाधनेति प्रसाधनंराजादीनांपुंसांत्र्यलंकरणांपुरुषैःसैरंध्रैःराज्ञस्त्रीणांवसैरंध्री
तिःउपचारःतेषादिष्वांगरागाघर्षणोनवादिनाचसंतोषणं तदभिस्तत्रदासमिंसामान्येनपुंसकं १७ अतःअत्रमागधविशेषेसैरंध्रयोनौत्र्यायोगवंत्र्यायोगव
सैवापत्यंसैरंध्रंनामसूतेपीदायोगस्व सैरंध्रंवागुरात्तिनिमितिमनुःतस्मानेवमागधंमैरेयकंनामतःमाधुकंमघकारंकर्मतत्स्वपुत्रंवैदेहःसूते १८ मद्गुरंमद्गुन

तेचापिसदृशंवर्णाजनयंतिस्वयोनिषु परस्परस्यदारेषुजनयंतिविगर्हितान् १७ यथास्त्रद्रोयिव्राह्मणापीजंतुवाह्यंमसूयते एवंवाह्यत
रणाद्यस्चातुर्वर्णापात्मजायते प्रतिलोमंतुवर्ततेवाह्याद्बाह्यतरान्पुनः १५ हीनाद्धेनाःप्रसूयंतेवर्णाःपंचदशैवतु अगम्यागमनाद्येवजा
यतेवर्णसंकरः १६ वाह्यानामनुजायंतेसैरंध्रंमागधेषुच प्रसाधनोपचारज्ञमदासंदासजीवनं १७ अतस्वायोगवंसूतेवागुरावं
षडीवनं मैरेयकंचवैदेहःसंप्रसूतेथमाधुकं १८ निषादोमद्गुरंसूतेदासंनावोपजीवनं मृतपंचापिचांडालःश्वपाकमितिवि
श्रुतं १९ चतुरोमागधीसूतेक्रूरान्मागोपजीविनः मांसस्वादुकरंक्षौद्रंसौगंधमितिविश्रुतं २० ॥ ॥ ॥

मीनविशेषानहंतिआदत्तेतमद्गुरंदासमामतःस्मृतपशमशानाषधिकारिणां १९ एतेमागधात्र्यायोगवादिभ्यःश्चतुर्भिःक्रमाज्जायंतेइत्युपसंहरतिचतु
रइति एतेचत्वारोवागुरादिनाजीवंतीतिमायोपजीविनःअन्येपिचत्वारोमागधाविश्रुताःसजातीमाऽस्यघंतेतेषांनामानिमासमित्यादि मांसंमां
सविक्रेतारं स्वादुकरंमांसस्यैवसंस्कारकं क्षौद्रंस्वदंष्ट्रमितिपाठत्र्यपेपिशपकायत्रपाककरं सौगंधंउक्तलक्षणंसैरध्रं एकस्यैवमागधस्यैतदु राम०
क्तिचतुष्टयमुक्तमितिसेयं २० ॥ १२४

आयोगव्यां वैदेहकाद्विमोक्तृतांस्त्रीन्मिदानाह सार्द्धेन वैदेहकादिति २२ क्षुद्र इति निषाद्यां वैदेहात्क्षुद्रो मेदः अंध्रश्च आरण्यपशुहिंसको
कारावरश्चर्मकारश्चेत्रयो भवतीत्यर्थः २३ चंडालात्तनिषाद्यामेव लववत्तारो वेणुः २४ आहिंडिक इति सार्द्धपद्येंल्लोको २५ २६ इतीति
अत्र मागध्यां अयोगव वैदेहक निषाद चंडालैस्चत्वारः तैरेवायोगव्यां स्त्रीपञ्चविंशतिस्त्रयः निषाद्यां चंडाल वैदेहाभ्यां द्वौ वैदेह्यां चंडाल निषादा

वैदेहकाच्च पापिष्ठं क्रूरं मायोपजीविनं निषादान्मल्लाभं च खरयानप्रयायिनं २१ चांडालात्पुल्कसं चापि खराश्व
गजभोजिनं मृतचैलप्रतिच्छन्नं भिन्नभाजनभोजिनं २२ अयोगवीषु जायंते हीनवर्णास्तु ते त्रयः क्षुद्रो वैदेहकादंध्रो
बहिर्ग्रामप्रतिश्रयः २३ कारावरो निषाद्यां तु चर्मकारः प्रसूयते चंडालात्पांडुसोपाकस्त्वक्सारव्यवहारवान् २४ आ
हिंडको निषादेन वैदेह्यां संप्रसूयते चंडालेन तु सोपाको चंडालसमवृत्तिमान् २५ निषादी चापि चांडालात्पुत्रं मंतेवसायि
नं श्मशानगोचरं सूते वाह्यैरपि वहिःकृतः २६ इत्येते संकराज्जाताः पितृमातृव्यतिक्रमात् प्रच्छन्ना वा प्रकाशा वा वेदितव्याः
स्वकर्मभिः २७ ॥

भ्यां द्वौ निषाद्यां चंडालाद्वैक इति द्वादश भेदा उक्ताः शूद्राज्जातो निषाद्यां तु वै कुक्कुटकः स्मृतः वैदेहिकेन संवष्टुरगमुत्पन्नो वेन उच्यत इति दोष्टिज्जात
यः सवर्णी संजनं पत्यप्रतांस्तथा तान् तान्सावित्रीपरिभ्रष्टान्व्रात्यानित्यभिनिर्दिशेदिति व्रात्याज्जातो पारकइत्येवं मन्वुक्तैः त्रिभिः सह पंचदश संक
चाताः व्रात्यस्यापि धर्मसांकर्यादेते घवगरान्मा प्रच्छन्ना अज्ञात यो न योपि पूर्वोक्तैः कर्मभिस्तोमुकयो न य इति वेदितव्याः २७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दी॰टी॰ चातुर्वर्ण्यस्यैव धर्माः शास्त्रे विहिताइतरेषां तु जातिभेदानां धर्मनियमस्य वक्ता च नास्ति तथाहि चतुर्भ्यो वर्णेभ्यः षडनुलोमजाः षड्विलोमजाश्चेति द्वा

१२५ दशतेभ्योपि षट्षष्टिरनुलोमजाः षट्षष्टिर्विलोमजाइति द्वात्रिंशदधिकं शतं तेभ्य एवं प्रतिलोमानुलोमगणानायोतेभ्यस्तेभ्यश्चैवमनंताः भेदा भवंति

चतुर्णामेव वर्णानां धर्मो नान्यस्य विद्यते वर्णानां धर्महीनेषु संख्या नास्तीह कस्यचित् २८ यदृच्छयोपसम्पन्नैर्यज्ञसाधुबहिष्कृतैः
बाह्या बाह्येस्तु जायंते यथावृत्ति यथाश्रयं २९ चतुःपथश्मशानानि शैलांश्चान्यान्वनस्पतीन् कार्ष्णायसमलंकारं परिगृह्य च नित्य
शः ३० वसेयुरेते विज्ञाता वर्त्तयंतः स्वकर्मभिः युंजतो वाप्यलंकारांस्तथोपकरणानि च ३१ गोब्राह्मणाय साहाय्यं कुर्वाणा वै न संश
यः आनृशंस्यमनुक्रोशः सत्यवाक्यं तथा क्षमाः ३२ स्वशरीरैरपि त्राणं बाह्यानां सिद्धिकारणं भवंति मनुजव्याघ्रास्तत्र मे ना
स्ति संशयः ३३ यथोपदेशं परिकीर्त्तितासु नरः प्रतीयेत विचार्य बुद्धिमान् निहीनयोनिर्हि सुतोवसादयेत्तितीर्षमाणो हि यथोप
लोजले ३४ अविद्वांसमलं लोके विद्वांसमपि वा पुनः नयंति ह्युपथं नार्यः कामक्रोधवशानुगं ३५ स्वभाव एव नारीणां
नराणामिह दूषणं अत्यर्थं न प्रसज्जंते प्रमदासु विपश्चितः ३६ ॥ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥

तिव सर्वे पिंचदशस्वेवांतर्भवंतीति न्नैव परिगणनं कृतमित्यर्थः २८ यदृच्छया ज्ञात्यनियमेनउपसंपन्नैर्मिथुनीभावं गतैः यज्ञेभ्यः साधुभ्यश्च बहिष्कृ
तैः यथावृत्ति यथाश्रयं जीविकां ज्ञातिविशेषं च यदृच्छयातत्तत्कर्मणाश्रयाद्इत्यर्थः २९ ३१ तेषां साधारणधर्मीनाह गोविति ३२ ३३ यथो रा॰म॰
तिनिहीनात्सुतेतः सेकं न कुर्यादिति भावः ३४ तदर्थमेव चौरेभ्यः स्त्रीभ्य आत्मानं रक्षेदित्याह द्वाभ्यां अविद्वांसमिति ३५ १२५

तावता

कलुषंयोनिजंसंकरयोनिजं आर्यगृहेजातत्वादार्यरूपमिवभासमानमपिउत्पत्तितोनार्यं ४० नानाभावैः आर्यैरस्पृष्टपरभूताभिश्चेष्टाभिः समन्वितं
नरंसंकरयोनिजंजानीयात् ४१ अनार्यत्वादिष्वेकैकमपिकलुषयोनित्वव्यंजकंकिमुतद्वित्रीणिसर्वाणिचेतिभावः ४२ प्रकृतिंयोनिंनियच्छति

युधिष्ठिरउवाच वर्णापेतमविज्ञातंनरंकलुषयोनिजं आर्यरूपमिवानार्यंकथंविद्यामहेवयं ४० भीष्मउवाच योनिसं
कलुषजातंनानाभावसमन्वितं कर्मभिःसज्जनाचीर्णैर्विज्ञेयायोनिशुद्धता ४१ अनार्यत्वमनाचारःक्रूरत्वंनिष्क्रियात्मता पुरु
षंव्यंजयंतीहलोकेकलुषयोनिजं ४२ पित्र्यंवाभजतेशीलंमातृजंवातथोभयं नकथंचनसंकीर्णःप्रकृतिंस्वांनियच्छति
४३ यथैवसदृशोरूपेमातापित्रोर्हिजायते व्याघ्रश्चित्रैस्तथायोनिंपुरुषःस्वांनियच्छति ४४ कुलेस्रोतसिसंछन्नेयस्यस्याद्यो
निसंकरः संश्रयत्येवतच्छीलंनरोल्पमथवाबहु ४५ ॥

गूहितुंशक्नोतीत्यर्थः ४३ व्याघ्रस्तुपलक्षणंवीतादेरपि यथातिर्यक्स्थावरादिकंबीजगुणाननतिक्रामत्येवंमनुष्योपीत्यर्थः ४४ संछन्नेस्रुगुप्तेपि
यस्यनमतीतिशेषःसतच्छीलंसंकरकर्तुःस्वभावं ४५

© Dharmartha Trust J&K. Digitized By eGangotri

स्वस्यशीलंस्वभावोनिश्चयेकार्यसनिश्चायां सुवर्णशोभनवर्णअन्यवर्णावापुरुषंशास्तिकथयति सुवर्णोबहिःक्रूरोपिकार्यकालेदयालुर्भवतिदुर्वर्णश्चनितं
मृदुरपिफलकादारुणोभवतीतिभावः ४६ सुश्लिष्टंशोभनवृत्तेननविरुध्यतेउपचितंवृत्तंविहायजन्मान्यथातिष्ठन्तीत्यर्थः ४७ नसंसंकरजस्यशरीरसत्वेनशा

आर्यरूपसमाचारंचरंतंकृतकेपथि सुवर्णमन्यवर्णवास्वशीलंशास्तिनिश्चये ४६ नानावृत्तेषुभूतेषुनानाकर्मरतेषुचजन्मवृत्तसमंलो
केसुश्लिष्टंनविरुध्यते ४७ शरीरमिहसत्वेनतस्यपरिकृष्यते ज्येष्ठमध्यावरंसत्वंतुल्यसत्वप्रमोदते ४८ ज्यायांसमपिशीलेनविही
नंनैवपूजयेत् अपिशूद्रंचधर्मज्ञंसद्वृत्तमभिपूजयेत् ४९ आत्मानमाख्यातिहिकर्मभिर्नरःसुशीलचारित्रकुलैःशुभाशुभैः प्रन
ष्टमप्यात्मकुलंतथानरःपुनःप्रकाशंकुरुतेस्वकर्मतः ५० योनिष्वेतासुसर्वासुसंकीर्णास्वितरासुच यत्रात्मानंनजनयेद्बुधस्तांपरि
वर्जयेत् ५१ इतिदानधर्मेषुविवाहधर्मसंकरोनाम ५० ॥ ॥

स्त्रीपवुध्यानपरिशिष्यतेननीचमार्गादपकृष्यते वीजगुणसप्रावल्यात्सत्वस्यकालभेदेनज्येष्ठत्वादिभावेपियत्तुल्यसत्वशरीरंभकं यत्सत्वंज्येष्ठाघन्यतं
मंतदेवप्रमोदत्तेअन्यतुउत्तमममपिसत्वंशारीरकाभ्रवल्लीयतइतिभावः ४८ दानधर्मसंकराध्यायप्रकाशः ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

ब्रूहीतिपूर्वं आन्विक्षमुद्दिष्टानार्यं अनार्यत्वमनाचारः क्रूरत्वंनिष्क्रियात्मतेतिसंकरजस्यलक्षणान्युक्तानि इदानीयन्मेमातामममादयप्यचारानतुव्रतंत
न्मेरेतःपितावृङ्क्तामितिमंत्रलिंगात् मीतामममादात्कामकाराद्यद्धनतुव्रतंप्रतिकूलंपरस्यरेतसाधारणंचचारक्षतवनीतेद्रेतःमेमतिताव्रङ्क्तांस्वीयंक
एतुपालनसत्कारादिकर्तृत्वात् यथाउत्पततःपक्षिणोमुखात्पतितंवीजंयरक्षेत्रेऽधिरूढंक्षेत्रपतेरेवमनुवीजपतेस्तद्ग्रहत् तथा अप्रमत्तारक्षततंतु

युधिष्ठिरउवाच ब्रूहितातकुरुश्रेष्ठवर्णानांत्वंपृथक्पृथक् कीदृश्यांकीदृशश्चापिपुत्राःकस्यचकेचते १ विप्रवादाः
सुबहवःश्रूयंतेपुत्रकारिताः अत्रनोमुह्यतांराजन्संशयंछेत्तुमर्हसि २ भीष्मउवाच आत्मापुत्रस्तुविज्ञेयस्तस्यानंतर
जश्चयः निरुक्तजश्चविज्ञेयःसुतःप्रसृतजस्तथा ३

मेतंमात्रःक्षेत्रेपरवीजान्निवापः जनपितुःपुत्रोभवतिसांपराये मोघंवेत्ताकुरुतेतन्तुमेनमिति द्वैविध्यशास्त्रश्रवणात्क्षेत्रजःपुत्रः संस्कार्योनवेतिसं
दिहानःपृच्छति १ विप्रवादाःविविधाःप्रवादाःपूर्वोक्ताएव २ अत्रोत्तरमाह आत्मेति अनंतरजः औरसः निरुक्तजः स्वक्षेत्रेऽन्यरेतःसेकार्यमुक्त
स्तज्जःप्रसृतः अनिरुक्तोपियोलौल्यात्परक्षेत्रेरेतःसिंचतितज्जःप्रसृतजः ३॥

९२

<unclear: marginal mark>

दा॰ तथापतितात्स्वभार्यायामेवजातः दत्तः पंचमः कृतः क्रीतः स्वयमुपायगम्योयाषष्ठः अध्यूढः यस्यमातागर्भवत्येवऊढातादृशः सप्तमः ४ षडपध्वंसजाः वक्ष्यमा
१२७ णाः कानीनः कन्यायांविवाहात्प्रागुत्पन्नश्चतुर्दशः अपसदाः वक्ष्यमाणाः षट् एतेविंशतिः तान्सर्वान्पुत्रानितिविजानीहि ५ परवर्णेषुअनुलोमजाः षट्अपध्वंसजाः विलोम
जाः अपसदाः ७ अपसदाः षट्इतिज्ञेयं १० मिथ्याकर्तुंएतेपुत्राःनभवंतीतिवक्तुंनशक्यतइत्यर्थः अयंभावः अप्रमत्तेतिस्मृतिरनौरसस्यापिश्राद्धेसुमात्रयाएयन्तेनेतिस्मृ

पतितस्यतुभार्यायांभर्त्रासुसमवेतया तथादत्तकृतौपुत्रावध्यूढश्चतथापरः ४ षडपध्वंसजाश्चापिकानीनापसदास्तथा इत्येतेवै
समाख्यातास्तान्विजानीहिभारत ५ युधिष्ठिरउवाच षडपध्वंसजाःकेस्युःकेवाप्यपसदास्तथा एतत्सर्वंयथातत्त्वंव्याख्यातुंमेत्वमर्हसि
६ भीष्मउवाच त्रिषुवर्णेषुयेपुत्राब्राह्मणस्ययुधिष्ठिर वर्णयोश्चद्वयोःस्यातांयौराजन्यस्यभारत ७ एकोविट्शूद्रएवात्रतथाऽत्रै
वोपलक्षितः षडपध्वंसजास्तेहितथैवापसदाञ्छृणु ८ चांडालोव्रात्यवैद्यौचब्राह्मण्यांक्षत्रियासुच वैश्यायांचैवशूद्रस्यलक्ष्यंतेप
सदास्त्रयः मागधोवामकश्चैववैश्यस्योपलक्षितौ ब्राह्मण्यांक्षत्रियायांचक्षत्रियस्यैकएवतु १० ब्राह्मण्यांलक्ष्यतेसूतइत्येते
पसदास्स्मृताः पुत्रास्त्वेतेनशक्यंतेमिथ्याकर्तुंनराधिप ११ युधिष्ठिरउ॰ क्षेत्रजंकेचिदेवाहुःसुतंकेचित्तुशुक्रजं तुल्यावेतौसुतौ
कस्यतन्मेब्रूहिपितामह १२

तित्स्तुअनौरसस्यापिपुत्रत्वंनेष्ठीत्येवंपरेतिनकश्चिद्विरोधः तथाचअनौरसेऔरसोवासुशीलःश्राद्धपरःपित्र्याःस्वर्गायभवतिविपरीतस्तुनरकायेति ११ कस्यद्वयोःपित्राः
क्षेत्रपतिनिषेक्रोर्मध्येकस्यायंपुत्रःउभयोःपितृत्वाविशेषादित्यर्थः १२ ॥ ॥ ॥ ॥ ॥ ॥ राम॰
१२७

© (P) Dharmartha Trust J&K. Digitized By eGangotri

रेतजः यस्य रेतोजः औरसः पुत्रः एवं क्षेत्रजोऽपि बीजदेन त्यक्तश्चेत्स्त्रीपस्यैव भवति एवमध्यूढोऽपि रेतः पतिना त्यक्तश्चेद्वोढुरेव अध्यूढोऽनूढावपि रेतः प्रद
स्यैव स्यात् १३ एतदेव प्रश्नोत्तराभ्यां व्याचष्टे रेतजमिति आगमः पुत्रत्वप्रापकं शास्त्रं कथं कीदृशं समयमेतदस्त्विति कथं समयमित्यर्थः १४ कारणांतरे त्वा

भीष्म उवाच रेतजो वा भवेत्पुत्रस्त्यक्तो वा क्षेत्रजो भवेत् अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे १३ युधिष्ठिर उ० रेतजं
विद्म वै पुत्रं क्षेत्रजः सागमः कथं अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथं १४ भीष्म उ० आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्का
रणांतरे न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् १५ पुत्रकामो हि पुत्रार्थे यां वृणीते विशांपते क्षेत्रजं तु प्रमाणं स्यान्न वै तत्
रात्मजः सुतः १६ अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ न ह्यात्मा शक्यते हंतुं दृष्टांतोपगतो ह्यसौ १७ कश्चिच्च कृ
तकः पुत्रः संग्रहादेव लक्ष्यते न तत्र रेतः क्षेत्रं वा यत्र लक्ष्येत भारत १८

कापवादादिभयेऽसति १५ आगममुक्त्वा समयभेदमाह पुत्रेति यो गर्भवतीं कन्यां वृणीते तत्र स पुत्रः वोढुरेव क्षेत्रतः न तु सेक्तुरात्मजः १६ अन्यत्रे
ति अत्र अनर्थकः परक्षेत्रे जातः पुत्रोऽमुकस्य सदृशोऽयमिति ततः दोषेण न लक्ष्यते हंतुं अपहितुं दृष्टांतं प्रत्यक्षमेवोपगतो ह्यसौ तातः दृश्यते चापि सारूप्यमिति
स्मृतेः एवं चाध्यूढः वोढुः पुत्रकाम्यानावेरेतः पत्युरेव भवतीत्युक्तं १८

दा० शुक्रक्षेत्रयोरन्यतरदपि यत्र पुत्रत्वे प्रमाणं न लक्ष्यं भवति स कृतकः पुत्रः कीदृश इत्यर्थः १८ तस्य यो पुपितुः पुत्रः सः तद्वर्णः पोषयितुर्वर्णः यो मातापितृवर्णः
१२८ २० कथं केन प्रकारेण कस्य वा न्ययनिति स्यात् व्यं कथं वा ऽस्य संस्कारः प्रयोक्तव्य इति प्रश्नः २१ सः स्वामिवद्वर्णं प्रपद्यते अतः स्वामी तस्यात्मवत्संस्कारक

युधिष्ठिर उवाच कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते शुक्रं क्षेत्रं प्रमाणं वा यत्र लक्ष्यं न भारत १८ भीष्म उवाच
मातापितृभ्यां यस्त्यक्तः पथि यस्तं प्रकल्पयेत् न चास्य मातापितरौ ज्ञायेते स हि कृत्रिमः १९ अस्वामिकस्य स्वामित्वं
यस्मिन्संप्रतिलक्षयेत् यो वर्णः पोषयेत्तं स तद्वर्णस्तस्य जायते २० युधिष्ठिर० कथमस्य प्रयोक्तव्यः संस्कारः कस्य
वा कथं देया कन्या कथं चेति तन्मे ब्रूहि पितामह २१ भीष्म उ० आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते २२ तद्गोत्रबंधुजं तस्य कुर्यात्संस्कारमच्युत अथ देया तु कन्या स्यात्तद्वर्णस्य युधिष्ठिर २३

रोति २२ ननु अन्यवर्णत्वशंकायां कथमेतत्स्यादित्याशंक्याह अन्यावर्णत्वनिश्चये तद्गोत्रं वर्णजे षु गोत्रादिर्योऽयमेव तस्य संस्कारं स्वामी कुर्यात्तत्र
निश्चये तु येन संस्कृतस्तस्यैव वर्णो गोत्रं च संस्कारसामर्थ्यात्स्वत्वनीत्यर्थः अन्यगोत्रोऽप्यनर्वर्णोऽपि संस्कर्तुरेव वर्णगोत्रे भजत इति भावः २३ ॥ राम० १२८

© Dharmartha Trust J&K. Digitized by eGangotri

२८ इतिदानधर्मेषुविवाहधर्मा: समाप्त: एवंयत्नांगानां स्त्रीधनविगात्मनां शुद्धिमुक्ताप्रस्तेदक्षिणात्वेनोपस्थितानांगवांमाहात्म्यंपृच्छति दर्शनेइति

संस्कर्तुवर्णगोत्रंचमात्स्वर्णाविनिश्चये कानीनाध्यूढजौचापिविज्ञेयौपुत्रकिल्बिषौ ---- २४ तावपिस्वाविवसुतौसंस्कार्या
वितिनिश्चय: क्षेत्रजोवाप्यपसदोयेध्योढास्तेषुचाप्यथ आत्मवद्वैप्रयुंजीरन्संस्कारान्ब्राह्मणादय: धर्मशास्त्रेषुवर्णानांनिश्चयो
यंप्रदृश्यते २६ एतत्तेसर्वमाख्यातंकिंभूय: श्रोतुमिच्छसि २७ इतिदानधर्मेषुविवाहधर्म युधिष्ठिरउवाच दर्शनेकीदृश:स्नेह:
संवासेचपितामह महाभाग्यंगवांचैवतन्मेव्याख्यातुमर्हसि १ भीष्मउ० हंततेकथयिष्यामिपुरावृत्तंमहाद्युते नहुषस्यचसंवा
दंमहर्षेश्च्यवनस्यच २ पुरामहर्षिश्च्यवनोभार्गवोभरतर्षभ उदवासकृतारंभोबभूवसमहाव्रत: ३ निहत्यमानंक्रोधंचप्रहर्षंशो
कमेवच वर्षाणिद्वादशमुनिर्जलवासेधृतव्रत: ४ आदधत्सर्वभूतेषुविश्रंभंपरमंशुभं जलचरेषुसर्वेषुशीतरश्मिरिवप्रभु: ५ ॥

पर्याजादर्शनेपरै: सहसंवासेचकीदृश: स्नेह: आनृशंस्यचकर्तव्यंगवांमाहात्म्यंचब्रूहीतिप्रश्नद्वयं १ तस्योत्तरंतत्रेणाहहंतइत्यादिना २ ३ ४ ५ ॥

© Dharmarth Trust J&K. Digitized By eGangotri.

(c) Dharmarth Trust. Digitized By eGangotri

दा०
१२९

६८ ऊर्ध्वोस्थितः उपविष्टः १० आसतः आसीनस्य १४ अभ्यकिरन् व्याप्तवंतः १९ शंखानां जलजंतुविशेषाणां नखैः २ ॥

स्थाणुभूतः शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च गंगायमुनयोर्मध्ये जलं संप्रविवेश ह ६ गंगायमुनयोर्वेगं सुभीमं भीमनिस्वनं प्रतिजग्राह
शिरसा वातवेगसमं जवे ७ गंगा च यमुना चैव सरितश्च सरांसि च प्रदक्षिणमृषिं चक्रुर्न चैनं पर्यपीडयन् ८ अंतर्जले स सुष्वाप का
ष्ठभूतो महामुनिः ततश्चोर्ध्वस्थितो धीमानभवद्भरतर्षभ ९ जलौकसां समस्तानां बभूव प्रियदर्शनः उपाजिघ्रंत च तदा तस्योष्ठं हृष्ट
मानसाः १० तत्र तस्यासतः कालः समतीतोभवन्महान् ततः कदाचित्समये कस्मिंश्चिन्मत्स्यजीविनः तं देशं समुपाजग्मुर्जालहस्ता
महाद्युते ११ निषादा बहवस्तत्र मत्स्योद्धरणनिश्चयाः व्यायता बलिनः शूराः सलिलेष्वनिवर्तिनः १२ अभ्याययुश्च तं देशं निश्चिता
जालकर्मणि जालं ते योजयामासुर्निःशेषेण जनाधिप १३ मत्स्योदकं समासाद्य तदा भरतसत्तम ततस्ते बहुभिर्योगैः कैवर्ता म
त्स्यकांक्षिणः गंगायमुनयोर्वारि जालैरभ्यकिरंस्ततः १५ जालं सुविततं तेषां नवसूत्रकृतं तथा विस्तारायामसंपन्नं यत्तत्र सलिले क्षिपन्
१६ ततस्ते सुमहच्चैव बलवच्च सुवर्तितं प्रकीर्य सर्वतः सर्वे जालं चकृषिरे तदा १७ अभीतरूपाः संहृष्टा अन्योन्यवशवर्तिनः बबंधुस्त
त्र मत्स्यांश्च तथान्यान् जलचारिणः १८ तथा मत्स्यैः परिवृतं च्यवनं भृगुनंदनं आकर्षयन्महाराज जालेनाथ यदृच्छया १९ नदी
शैवलदिग्धांगं हरिश्मश्रुजटाधरं लग्नैः शंखनखैर्गात्रैः क्रोडैश्चित्रैरिवार्पितं २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ दान०
१२९

(c) Dharmartha Trust J&K. Digitized by eGangotri

१० अध्यायः नहुषेतिसप्तर्षोध्यायः। छ

तंजालेनोद्धृतंदृष्ट्वातेतदाधीवरपारगं सर्वेप्रांजलयोदाशाः शिरोभिःप्रापतन्भुवि २१ परिखेदपरित्रासाज्जालस्याकर्षणेनच मत्स्या
बभूवुर्व्यापन्नास्थलसंस्पर्शनेनच २२ समुनिस्तत्रदाहृष्ट्वामत्स्यानांकदनंकृतं बभूवकृपयाविष्टोनिश्वसंश्चपुनःपुनः २३
निषादाऊचुः अज्ञानाद्यत्कृतंपापंप्रसादंतत्रनःकुरु करवामप्रियंकिंतेतन्नोब्रूहिमहामुने २४ इत्युक्तोमत्स्यमध्यस्थश्च्यवनोवा
क्यमब्रवीत् योमेद्यपरमःकामस्तंशृणुध्वंसमाहिताः २५ प्राणोत्सर्गंविक्रयंवामत्स्यैर्यास्याम्यहंसह संवासान्नोत्सहेत्यक्तुंसलिलेध्युषि
तानहं २६ इत्युक्तास्तेनिषादास्तुसुभृशंभयकंपिताः सर्वेविवर्णवदनानहुषायन्यवेदयन् २७ इतिदानधर्मेषुच्यवनोपाख्याने भी
ष्मउवाच नहुषस्तुततःश्रुत्वाच्यवनंतंतथागतं त्वरितःप्रययौतत्रसहामात्यपुरोहितः १ शौचंकृत्वायथान्यायंप्रांजलिःप्रयतो
नृपः आत्मानमाचचक्षेवैच्यवनायमहात्मने २ अर्चयामासतंचापितस्यराज्ञःपुरोहितः सत्यव्रतंमहात्मानंदेवकल्पंविशांपते
३ नहुषउवाच करवाणिप्रियंकिंतेतन्मेब्रूहिद्विजोत्तम सर्वंकर्तास्मिभगवन्यद्यपिस्यात्सुदुष्करं ४ च्यवनउवाच श्रमेणमहतायु
क्ताःकैवर्तामत्स्यजीविनः ममसूल्यंप्रयच्छैभ्योमत्स्यानांविक्रयैःसह ५ नहुषउवाच सहस्रंदीयतांमूल्यंनिषादेभ्यःपुरोहित निः
क्रयार्थंभगवतोयथाहभृगुनंदनः ६ च्यवनउवाच सहस्रंनाहमर्हामिकिंवात्वंमन्यसेनृप सदृशंदीयतांमूल्यंस्वबुद्ध्यानिश्चयंकुरु

© Dharmartha Trust J&K. Digitized by eGangotri

दा० नहुषउवाच सहस्राणांशतंविप्रनिषादेभ्यःप्रदीयतां स्यादिदंभगवन्मूल्यंकिंवान्यन्मन्यतेभवान् ८ च्यवनउवाच नाहंशतसहस्रेणानिमे
१३० पःपार्थिवर्षभ दीयतांसदृशंमूल्यममात्यैःसहचिंतय ९ नहुषउवाच कोटिःप्रदीयतांमूल्यंनिषादेभ्यःपुरोहित यदेतदपिनोमूल्यमतोभूयःप्रदी
यतां १० च्यवनउवाच राजन्नार्हाम्यहंकोटिंभूयोवापिमहाद्युते सदृशंदीयतांमूल्यंब्राह्मणैःसहचिंतय ११ नहुषउवाच अर्धंराज्यंसमम
ग्रंवानिषादेभ्यःप्रदीयतां एतन्मूल्यमहंमन्येकिंवान्यन्मन्यसेद्विज १२ च्यवनउवाच अर्धंराज्यंसमग्रंचमूल्यंनार्हामिपार्थिव सदृशंदी
यतांमूल्यमृषिभिःसहचिंत्यतां १३ भीष्मउ० महर्षेर्वचनंश्रुत्वानहुषोदुःखकर्षितः सचिंतयामासतदासहामात्यपुरोहितः १४ तत्रत्व
न्योवनचरःकश्चिन्मूलफलाशनः नहुषस्यसमीपस्थोगविजातोभवन्मुनिः १५ सतमाभाष्यराजानमब्रवीद्द्विजसत्तमः तोषयिष्याम्य
हंक्षिप्रंयथातुष्टोभविष्यति १६ नाहंमिथ्यावचोब्रूयांस्वैरेष्वपिकुतोन्यथा भवतोयदहंब्रूयांतत्कार्यमविशंकया १७ नहुषउवाच ब्र
वीतुभगवन्मूल्यंमहर्षेःसदृशंभृगोः परित्रायस्वमामस्माद्विषयंचकुलंचमे १८ हन्याद्धिभगवान्क्रुद्धस्त्रैलोक्यमपिकेवलं किंपु
नर्मांतपोहीनंबाहुवीर्यपरायणं १९ अगाधेंभसिमग्नस्यसामात्यस्यसहर्त्विजः प्लवोभवमहर्षेत्वंकुरुमूल्यविनिश्चयं २० भी
ष्मउवाच नहुषस्यवचःश्रुत्वागविजातःप्रतापवान् उवाचहर्षयन्सर्वानमात्यान्पार्थिवंचतं २१ ॥ ॥ ॥ ॥ राम०
१३०

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

अमूल्याः २२ २३ २४ ३० ३१ ३२ ३३

अनर्घेयामहाराजद्विजावर्णेषुचोत्तमाः गावश्चपुरुषव्याघ्रगौर्मूल्यंपरिकल्प्यतां २२ नहुषस्तुततःश्रुत्वामहर्षेर्वचनं
नृप हर्षेणामहतायुक्तःसहामात्यपुरोहितः २३ अभिगम्यभृगोःपुत्रंच्यवनंशंसितव्रतं इदंप्रोवाचनृपतेवाचासंतर्पय
न्निव २४ नहुषउवाच उत्तिष्ठोत्तिष्ठविप्रर्षेगवाक्रीतोसिभार्गव एतन्मूल्यमहंमन्येतवधर्मभृतांवर २५ च्यवनउवाच
उत्तिष्ठाम्येषराजेंद्रसम्यक्क्रीतोस्मितेनघ गोभिस्तुल्यंनपश्यामिधनंकिंचिदिहाच्युत २६ कीर्तनंश्रवणंदानंदर्शनंचा
पिपार्थिव गवांप्रशस्यतेवीरसर्वपापहरंशिवं २७ गावोलक्ष्म्याःसदामूलंगोषुपाप्मानविद्यते अन्नमेवसदागावोदेवा
नांपरमंहविः २८ स्वाहाकारवषट्कारौगोषुनित्यंप्रतिष्ठितौ गावोयज्ञस्यनेत्र्योवैतथायज्ञस्यतामुखं २९ अमृतंह्य
व्ययंदिव्यंक्षरंतिचवहंतिच अमृतायतनंचैताःसर्वलोकनमस्कृताः ३० तेजसावपुषाचैवगावोवह्निसमाभुवि गावो
हिसुमहत्तेजःप्राणिनांचसुखप्रदाः ३१ निविष्टंगोकुलंयत्रश्वासंमुंचतिनिर्भयं विराजयतितंदेशंपापंचास्यापकर्षति
३२ गावःस्वर्गस्यसोपानंगावःस्वर्गेपिपूजिताः गावःकामदुहोदेव्योनान्यत्किंचित्परंस्मृतं ३३ ॥ ॥ ॥ ॥ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

समग्रं ४२ उन्नमे ४३ ४४ ४५ ४५ ॥

दा०
१३१

इत्येतद्गोषुमेप्रोक्तंमाहात्म्यंभरतर्षभ गुणैकदेशवचनंशक्यंपापप्रणाशनम् ३४ निषादाऊचुः दर्शनंकथनंचैवसहास्मा
भिःकृतंमुने सप्तपदंमित्रंप्रसादंनःकुरुप्रभो ३५ हवींषिसर्वाणियथाह्युपभुंक्तेहुताशनः एवंत्वमपिधर्मात्मन्पुरु
षाग्निःप्रतापवान् ३६ प्रसादयामहेविद्वन्भवंतंप्रणतावयं अनुग्रहार्थमस्माकमियंगौःप्रतिगृह्यतां ३७ च्यवनउवाच
कृपणस्यचयच्चक्षुर्मुनेराशीविषस्यच नरंसमूलंदहतिकक्षमग्निरिवज्वलन् ३८ प्रतिगृह्णामिवोधेनुंकैवर्त्तामुक्तकि
ल्बिषाः दिवंगच्छतवैक्षिप्रंमत्स्यैःसहजलोद्भवैः ३९ भीष्मउवाच ततस्तस्यप्रभावात्तेमहर्षेर्भावितात्मनः निषादास्तेन
वाक्येनसहमत्स्यैर्दिवंययुः ४० ततःसराजानहुषोविस्मितःप्रेक्ष्यधीवरान् आरोहमाणांस्त्रिदिवंमत्स्यांश्चभरतर्षभ ४१ त
तस्तौगविजश्चैवच्यवनश्चभृगूद्वहः वराभ्यामनुरूपाभ्यांछंदयामासतुर्नृपं ४२ ततोराजामहावीर्योनहुषःपृथिवीपतिः पर
मित्यब्रवीत्प्रीतस्तदाभरतसत्तम ४३ ततोजग्राहधर्मेसस्थितिमिंद्रनिभोनृपः तथेतिचोदितःप्रीतस्तावृषीप्रत्यपूजयत् ४४
समाप्तदीक्षश्च्यवनस्ततोगच्छत्स्वमाश्रमं गविजश्चमहातेजाःस्वमाश्रमपदंययौ ४५ ॥

राम०
१३१

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

४८ अथापः संशयोमहत्यादिग्रंथस्यकुशिककन्ब्राह्मणाभक्तिमतोवंशोद्भवाब्राह्मणाउत्पन्नइति ९

निषादाश्चादिवंजग्मुस्तेचमत्स्याजनाधिप नहुषोपिवरंलब्ध्वाप्रविवेशस्वकंपुरं ४६ एतत्तेकथितंतात यन्मांत्वंपरिपृच्छसि
दर्शनेयादृशःस्नेहः संवासेवायुधिष्ठिर ४७ महाभागंगवांचैवतथाधर्मविनिश्चयं किंभूयःकथ्यतांवीरकिंतेहृदिविवक्षि
तं ४८ इतिदानधर्मेषुच्यवनोपाख्यानं युधिष्ठिरउवाच संशयोमेमहाप्राज्ञसुमहान्सागरोपमः तंमेशृणुमहाबाहोश्रु
त्वाचाख्यातुमर्हसि १ कौतूहलंमेसुमहज्जामदग्न्यंप्रतिप्रभो रामंधर्मभृतांश्रेष्ठंतन्मेव्याख्यातुमर्हसि २ कथमेषसमुत्प
न्नोरामःसत्यपराक्रमः कथंब्रह्मर्षिवंशोयंक्षत्रधर्माव्यजायत ३ तदस्यसंभवंराजन्निखिलेनानुकीर्त्तय कौशि
काच्चकथंवंशात्क्षत्राद्वैब्राह्मणोभवत् ४ अहोप्रभावःसुमहानासीद्वैसुमहात्मनः रामस्यचनरव्याघ्रविश्वामित्र
स्यचैवहि ५ कथंपुत्रानतिक्रम्यतेषांनप्तृष्वथाभवत् एषदोषःसुतान्हित्वातत्वंव्याख्यातुमर्हसि ६ भीष्मउवाच
अत्राप्युदाहरंतीममितिहासंपुरातनं च्यवनस्यचसंवादंकुशिकस्यचभारत एतंदोषंपुराद्दृष्ट्वाभार्गवश्च्यवनस्तदा
आगामिनंमहाबुद्धिःस्ववंशेमुनिसत्तमः ८ निश्चित्यमनसासर्वंगुणदोषंबलाबलं दग्धुकामःकुलंसर्वंकुशिकानां
तपोधनः ९ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

च्यवनःसमनुप्राप्यकुशिकंवाक्यमब्रवीत् वस्तुमिच्छासमुत्पन्नात्वयासहममानघ १० कुशिकउवाच भगवन्सहधर्मोयंपंडितैरिहधार्यते प्र
दानकालेकन्यानामुच्यतेचसदाबुधैः ११ यत्तुतावदतिक्रान्तंधर्मद्वारंतपोधन तत्कार्यंप्रकरिष्यामितदनुज्ञातुमर्हसि १२ भीष्मउवाच अथास
नमुपादायच्यवनस्यमहामुनेः कुशिकोभार्ययासार्धमाजगामयतोमुनिः १३ प्रगृह्यराजाभृंगारंपाद्यमस्मैन्यवेदयत् कारयामाससर्वाश्च
क्रियास्तस्यमहात्मनः १४ ततःसराजाच्यवनंमधुपर्कंयथाविधि ग्राहयामासचाव्यग्रोमहात्मानियतव्रतः १५ सत्कृत्यतंतथाविप्रमि
दंपुनरथाब्रवीत् भगवन्परवंतौचब्रूहिकिंकरवावहे १६ यदिराज्यंयदिधनंयदिगाःशंसितव्रत यज्ञदानानिचतथाब्रूहिसर्वंददामिते १७
इदंगृहमिदंराज्यमिदंधर्मासनंचते राजात्वमसिशाध्युर्वींयोहंसपरवांस्त्वयि १८ एवमुक्तेततोवाक्येच्यवनोभार्गवस्तदा कुशिकं
प्रत्युवाचेदंमुदापरमयायुतः १९ नराज्यंकामयेराजन्नधनंनचयोषितः नचगानचवैदेशान्नयज्ञंश्रूयतामिदं २० नियमंकिंचिदा
रप्स्येयुवयोर्यदिरोचते परिचर्योस्मियत्ताभ्यांयुवाभ्यामविशंकया २१ एवमुक्तेतदातेनदंपतीतौजहर्षतुः प्रत्यब्रूतांचतमृषिमेवम।
स्त्वितिभारत २२ अथतंकुशिकोहृष्टःप्रावेशयदनुत्तमं गृहोद्देशंततस्तस्यदर्शनीयमदर्शयत् २३ इयंशय्याभगवतोयथाकाम
मिहोष्यतां प्रयतिष्यावहेप्रीतिमाहर्तुंतेतपोधन २४ २४ ७

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

अभ्यसूयीति चक्रामते षां सेवदत्तां तथा अथार्षिश्चोदयामास पानमन्नं तथैव च २५ तमापृच्छत्ततो राजा कुशिकः प्रणतस्तदा किमन्नजातमिष्टं
ते किमुपस्थापयाम्यहं २६ ततः स परया प्रीत्या प्रत्युवाच नराधिपं औपपत्तिकमाहारं प्रयच्छस्वेति भारत २७ तद्वचः पूजयित्वा तु तथेत्याह स पा
र्थिवः यथोपपन्नमाहारं तस्मै प्रादाज्जनाधिप २८ ततः स भुक्त्वा भगवान्दंपती प्राह धर्मवित् स्वप्तुमिच्छाम्यहं निद्रा बाधते मामिति प्रभो २९
ततः शय्यागृहं प्राप्य भगवानृषिसत्तमः संविवेश नरोस्तु सपत्नीकः स्थितोऽभवत् ३० न प्रबोध्योऽस्मि संसुप्त इत्युवाचाथ भार्गवः संवाहि
तव्यौ मे पादौ जागर्तव्यं च वो निशं ३१ अविशंकस्तु कुशिकस्तथेत्येवाह धर्मवित् न प्राबोधयतां तौ च ततस्तं रजनीक्षये ३२ यथादेशं
महर्षेस्तु शुश्रूषापरमौ तदा बभूवतुर्महाराज प्रयतावथ दंपती ३३ ततः स भगवान्विप्रः समादिश्य नराधिपं सुष्वापैकेन पार्श्वेन दिव
सानेकविंशतिः ३४ स तु राजा निराहारः सभार्यः कुरुनंदन पर्युपासत तं हृष्टश्च्यवनाराधने रतः ३५ भार्गवस्तु समुत्तस्थौ स्व
यमेव तपोधनः अकिंचिदुक्त्वा तु गृहान्निश्चक्राम महातपाः ३६ तमन्वगच्छतां तौ च क्षुधितौ श्रमकर्षितौ भार्यापती मुनिश्रेष्ठस्ता
वेतौ नावलोकयत् ३७

© Dharmarth Trust J&K. Digitized By eGangotri

दा० २९ अध्याय १ २ ३ ४ ५ ६ ७ ८ ९ १० ॥ ७ ॥ ७ ७
१३३

तयोरुक्तोप्रेक्षतोरेवभार्गवानांकुलोद्वहः अंतर्हितोभूद्राजेंद्रततोराजापतत्स्थितौ २८ समुहूर्तंसमाध्यायसहदेव्यामहाद्युतिः पुनर
न्वेषणेयत्नमकरोत्परमंतदा २९ इतिदानधर्मेषुकुशिकच्यवनसंवादे युधिष्ठिरउवाच तस्मिन्नंतर्हितेविप्रेराजाकिमकरोत्तदा भार्याचा
स्यमहाभागातन्मेब्रूहिपितामह भीष्मउवाच अदृष्ट्वासमहीपालस्तमृषिंसहभार्यया परिश्रांतोनिववृतेव्रीडितोनष्टचेतनः १ सप्रवि
श्यपुरींदीनोनाभ्यभाषतकिंचन तदेवचिंतयामासच्यवनस्यविचेष्टितं ३ अथशून्येनमनसाप्रविश्यस्वगृहंनृपः ददर्शशयनेतस्मिंश्श
यानेभृगुनंदनं ४ विस्मितौतावृषिंदृष्ट्वातदाश्चर्यंविचिंत्यच दर्शनात्तस्यतुतदाविश्रांतौसंबभूवतुः ५ यथास्थानंतुतौस्थित्वाभूयस्तंसं
ववाहतुः अथापरेणपार्श्वेणसुष्वापसमहामुनिः ६ तेनैवचसकालेनप्रत्यबुध्यतवीर्यवान् नचतौचक्रतुःकंचिद्विकारंभयशंकि
तौ ७ प्रतिबुद्धस्तुसमुनिस्तौप्रोवाचविशांपते तैलाभ्यंगोदीयतांमेस्नास्येहमितिभारत ८ तौतथेतिप्रतिश्रुत्यक्षुधितौश्रमकर्षितौ श
तपाकेनतैलेनमहार्हेणोपतस्थतुः ९ ततःसुखासीनमृषिंवाग्यतौसंववाहतुः नचपर्याप्तमित्याहभार्गवःसुमहातपाः १० ॥ ७ शान०
१३३

यदा तौ निर्विकारौ तु लक्षयामास भार्गवः ततउत्थाय सहसा स्नानशालां विवेश ह ११ क्लृप्तमेव तु तत्रासीत्स्नानीयं पार्थिवोचितं असत्कृत्य च त
त्सर्वं तत्रैवांतरधीयत १२ स मुनिः पुनरेवाथ नृपतेः पश्यतस्तदा नासूयां चक्रतुस्तौ च दंपती भरतर्षभ १३ अथ स्नातः स भगवान्सिंहासनगतः
प्रभुः दर्शयामास कुशिकं सभार्यं कुरुनंदन १४ संहृष्टवदनो राजा सभार्यः कुशिको मुनिः सिद्धमन्नमिति प्रह्वो निर्विकारो न्यवेदयत १५ आनी
यतामिति मुनिस्तं चोवाच नराधिपं स राजा समुपाजह्रे तदन्नं सह भार्यया १६ मांसप्रकारान्विविधाञ्छाकानि विविधानि च वेशवारविकारांश्च
पानकानि लघूनि च १७ रसालापूपकांश्चित्रान्मोदकानथ खांडवान् रसान्नानाप्रकारांश्च वन्यं च मुनिभोजनं १८ फलानि च विचित्राणि
राजभोग्यानि भूरिशः बदरेंगुदकाश्मर्यभल्लातकफलानि च १९ गृहस्थानां च यद्भोज्यं यच्चापि वनवासिनां सर्वमाहारयामास राजा शा
पभयात्ततः २० अथ सर्वमुपन्यस्तमग्रतश्च्यवनस्य तत् ततः सर्वं समानीय तच्च शय्यासनं मुनिः २१ वस्त्रैः शुभैरवच्छाद्य भोजनोपस्क
रैः सह सर्वमादीपयामास च्यवनो भृगुनंदनः २२ न च तौ चक्रतुः क्रोधं दंपती सुमहामती तयोः संप्रेक्षतोरेव पुनरंतर्हितोऽभवत् २३ ॥ ॥

रा०
१३४

२४ स्नानद्रव्याणि २५ २६ २७ ३० ३१ ३२ ३५

तथैवचसराजर्षिस्तस्यैनांरजनींतदा सभार्योवाग्यतःश्रीमान्नकोपंसमाविशत् २४ नित्यंसंस्कृतमन्नंविविधंराजवेश्मनिशयना
निचमुख्यानिपरिषेकाश्चपुष्कलाः २५ वस्त्रंचविविधाकारमभवत्समुपार्जितं नशशाकततोद्रष्टुमंतरंच्यवनस्तदा २६ पुनरेवचवि
प्रर्षिःप्रोवाचकुशिकंनृपम् सभार्योमांरथेनाशुवहयत्रब्रवीम्यहं २७ तथेतिचप्राहनृपोनिर्विशंकस्तपोधनं क्रीडारथोस्तुभगवन्नुत
सांग्रामिकोरथः इत्युक्तःसमुनीराज्ञातेनहृष्टेनतद्वचः च्यवनःप्रत्युवाचेदंहृष्टःपरपुरंजयं सज्जीकुरुरथंक्षिप्रंयस्तेसांग्रामिकोरथः
२८ सायुधःसपताकश्चशक्तीकनकयष्टिमान् किंकिणीस्वननिर्घोषोयुक्तस्तोरणकल्पनैः २९ जांबूनदनिबद्धश्चपरमेषुशतान्वितः
ततःसतत्तथेत्युक्त्वाकल्पयित्वामहारथं ३० भार्यांवामेधुरितदाचात्मानंदक्षिणेतदा त्रिदंडंवज्रसूच्यग्रंप्रतोदंतत्रचादधत् ३१
सर्वमेतत्ततोदत्वानृपोवाक्यमथाब्रवीत् भगवन्क्करथोयातुब्रवीतुभृगुनंदन ३२ यत्रवक्ष्यसिविप्रर्षेतत्रयास्यतितेरथः एवमुक्त
स्तुभगवान्प्रत्युवाचाथतंनृपं ३३ इतःप्रभृतियातव्यंपदकंपदकंशनैः श्रमोममयथानस्यात्तथामेछंदचारिणौ ३४ सुसुखंचै
ववोढव्योऽहंजनःसर्वश्चपश्यतु नोत्सार्याःपथिकाःकेचित्तेभ्योदास्येवसुबह्वहं ब्राह्मणेभ्यश्चयेकामानर्थयिष्यंतितानपि ३५ ॥ राम०
१३४

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

सर्वान्दास्याम्यशेषेण धनं रत्नानि चैव हि क्षिपंतौ निखिलेनैतन्मा विचारय पार्थिव ३६ तस्मात्तद्वचनं श्रुत्वा राजा भृत्यानथाब्रवीत् यथा ब्रूयान्मु
निसत्तमस्तत्सर्वं देयमशं कितैः ३७ ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकं कृताकृतं च कनकं गजेन्द्रांश्चाचलोपमाः ३८ अन्वगच्छ
तस्तमृषिं राजामात्याश्च सर्वशः हाहाभूतं च तत्सर्वमासीन्नगरमार्त्तवत् ३९ तौ तीक्ष्णाग्रेण सहसा प्रतोदेन प्रतोदितौ पृष्ठे विद्धौ कटे चैव वनि
र्विकारौ तमूहतुः ४० वेपमानौ निराहारौ पंचाशद्रात्रिकर्षितौ कथंचिदूहतुर्वीरौ दंपती तौ रथोत्तमं ४१ बहुशो भृशविद्धौ तौ स्रवंतौ च क्षतोद्भ
वं ददृशाते महाराज पुष्पिताविव किंशुकौ ४२ तौ दृष्ट्वा पौरवर्गस्तु भृशं शोकसमाकुलः अभिशापभयत्रस्तो न च किंचिदुवाच ह ४३ द्वंद्वश
श्चाब्रुवन्सर्वे पश्यध्वं तपसो बलं क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं ते ह शक्नुमः ४४ अहो भगवतो वीर्यं महर्षेर्भावितात्मनः राज्ञश्चापि सभार्य
स्य धैर्यं पश्यत यादृशं ४५ श्रांतावपि हि कृच्छ्रेण रथमेतं समूहतुः न चैतयोर्विकारं वै ददर्श भृगुनंदनः ४६ भीष्म उवाच ततः स निर्विका
रौ तौ दृष्ट्वा भृगुकुलोद्वहः वसु विश्राणयामास यथा वैश्रवणस्तथा ४७ तत्रापि राजा प्रीतात्मा यथादिष्टमथाकरोत् ततोऽस्य भगवा
न्प्रीतो बभूव मुनिसत्तमः ४८ अवतीर्य रथश्रेष्ठाद्दंपती तौ मुमोच ह विमोच्य चैतौ विधिवत्ततो वाक्यमुवाच ह ४९ स्निग्धगंभीरया वा
चा भार्गवः सुप्रसन्नया ददानि वां वरं श्रेष्ठं तद्ब्रूतामिति भारत ५० सुकुमारौ च तौ विद्धौ कराभ्यां मुनिसत्तमः पस्पर्शामृतकल्पाभ्यां स्नेहा
द्भरतसत्तम ५१ अथाब्रवीन्नृपो वाक्यं श्रमो नास्त्यावयोरिह विश्रांतौ च प्रभावात्ते ऊचतुस्तौ तु भार्गवं ५२ अथ तौ भगवान्प्राह प्रहृष्ट
श्च्यवनस्तदा न वृथा व्याहृतं पूर्वं यन्मया तद्भविष्यति ५३ रमणीयः ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

दा० १३५ समुद्देशोगंगातीरमिदंशुभं किंचित्कालंव्रतपरोनिवत्स्यामीहपार्थिव ५४ गम्यतांस्वपुरंपुत्रविश्रांतःपुनरेष्यसि इहस्थंमांसभार्यस्त्वंद्रष्टासि
श्वोनराधिप ५५ नचमन्युस्त्वयाकार्यःश्रेयस्तेसमुपस्थितं यत्कांक्षितंहृदिस्थंतेतत्सर्वंहिभविष्यति ५६ इत्येवमुक्तःकुशिकःप्रहृष्टेनांतरात्म
ना प्रोवाचमुनिशार्दूलमिदंवचनमर्थवत् ५७ नमेमन्युर्महाभागपूतोस्मिभगवंस्त्वया संवृत्तौयौवनस्थौस्ववपुष्मंतौबलान्वितौ ५८ प्रतो
देनव्रणायेमेसभार्यस्यत्वयाकृताः तान्नपश्यामिगात्रेषुस्वस्थोस्मिसहभार्यया ५९ इमांचदेवींपश्यामिवपुषाप्सरसोपमां श्रियापरमयायुक्तां
यथादृष्टापुरामया ६० तवप्रसादसंवृत्तमिदंसर्वंमहामुने नैतच्चित्रंतुभगवंस्त्वयिसत्यपराक्रम ६१ इत्युक्तःप्रत्युवाचैनंकुशिकंच्यवनस्तदा
आगच्छेथाःसभार्यस्त्वमिहेतिनराधिप ६२ इत्युक्तःसमनुज्ञातोराजर्षिरभिवाद्यतं प्रययौवपुषायुक्तोनगरंदेवराजवत् ६३ ततएन
मुपाजग्मुरमात्याःसपुरोहिताः बलस्थागणिकायुक्ताःसर्वाःप्रकृतयस्तथा ६४ तैर्वृतःकुशिकोराजाश्रियापरमयाज्वलन् प्रविवेशपु
रंहृष्टःपूज्यमानोथबंदिभिः ६५ ततःप्रविश्यनगरंकृत्वापूर्वाह्णिकाःक्रियाः भुक्त्वासभार्योरजनीमुवाससमहाद्युतिः ६६ ततस्तुतौन
वमभिवीक्ष्ययौवनंपरस्परंविगतरुजाविवामरौ ननंदतुःशयनगतौवपुर्धरौश्रियायुतौद्विजवरदत्तयातदा ६७ अथाप्यृषिर्भृगुकुलकी
र्तिवर्धनस्तपोधनोवनमभिराममृद्धिमत् मनीषयाबहुविधरत्नभूषितंससर्जयन्नपुरिशतक्रतोरपि ६८ इतिदानधर्मेषुच्यवनकुशिक
संवादे भीष्मउवाच ततःसराजारात्र्यंतेप्रतिबुद्धोमहामनाः कृतपूर्वाह्णिकःप्रायात्सभार्यस्तद्वनंप्रति १ ततोददर्शनृपतिःप्रासादंसर्वकां
चनं मणिस्तंभसहस्राढ्यंगंध ॥ राम० १३५

र्वनगरोपमं २ तत्रदिव्यानभिप्रायान्ददर्शकुशिकस्तदा पर्वतान्रत्नसानूंश्चनलिनीश्चसपंकजाः ३ चित्रशालाश्चविविधास्तोरणानिचभा
रत शाद्वलोपचितांभूमिंतथाकांचनकुट्टिमां ४ सहकारान्प्रफुल्लांश्चकेतकोद्दालकान्धवान् अशोकान्सहकुंदांश्चफुल्लांश्चैवातिमुक्तका
न् ५ चंपकांस्तिलकान्भव्यान्पनसान्वंजुलानपि पुष्पितान्कर्णिकारांश्चतत्रतत्रददर्शह ६ श्यामान्वारणपुष्पांश्चतथाष्टपदिकालताः
तत्रतत्रपरिक्लृप्ताददर्शसमहीपतिः ७ वृक्षान्पद्मोत्पलधरान्सर्वर्तुकुसुमांस्तथा विमानप्रतिमांश्चापिप्रासादांछैलसन्निभान् ८ शीतला
निचतोयानिक्वचिदुष्णानिभारत आसनानिविचित्राणिशयनप्रवराणिच ९ पर्यंकान्रत्नसौवर्णान्परार्ध्यास्तरणावृतान् भक्ष्यभोज्यमनंतं
चतत्रतत्रोपकल्पितं १० वाणीवादांछुकांश्चैवसारिकान्भृंगराजकान् कोकिलाञ्छतपत्रांश्चसकोयष्टिककुक्कुभान् ११ मयूरान्कुक्कुटां
श्चापिदात्यूहान्जीवजीवकान् चकोरान्वानरान्हंसान्सारसांश्चक्रसाह्वयान् १२ समंततःप्रमुदितान्ददर्शसुमनोहरान् क्वचिदप्सरसांसंघा
न्गंधर्वाणांचपार्थिव १३ कांताभिरपरांस्तत्रपरिष्वक्तान्ददर्शह नददर्शचतान्भूयोददर्शचपुनर्नृपः १४ गीतध्वनिंसुमधुरंतथैवाध्यापनध्व
निं हंसान्सुमधुरांश्चापितत्रशुश्रावपार्थिवः १५ तंदृष्ट्वात्यद्भुतंराजामनसाचिंतयत्तदा स्वप्नोयंचित्तविभ्रंशउताहोसत्यमेवतु १६ अ
होसहशरीरेणप्राप्तोस्मिपरमांगतिं उत्तरान्वाकुरून्पुण्यानथवाप्यमरावतीं १७ किंचेदंमहदाश्चर्यंसंपश्यामीत्यचिंतयत् एवंसंचिंतयन्नेव
ददर्शमुनिपुंगवं १८ तस्मिन्विमानेसौवर्णेमणिस्तंभसमाकुले महार्हेशयनेदिव्येशयानंभृगुनंदनं १९ तमभ्ययात्प्रहर्षेणनरेंद्रःसहभार्यया
अंतर्हितस्ततोभूयश्च्यवनःशयनंचतत् २० ततोन्यस्मिन्वनोद्देशेपुनरेवददर्शतं कौश्यांबृस्यांसमासीनंजपमानंमहाव्रतं २१ एवंयोगब

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

दा० १३६ १३७ लाद्विप्रोमोहयामासपार्थिवं क्षणेनतद्वनंचैवतेचैवाप्सरसांगणाः गंधर्वाःपादपाश्चैवसर्वमंतरधीयत २२ निःशब्दमभवंचापिगंगाकूलं
पुनर्नृपं कुशवल्मीकभूयिष्ठंबभूवचयथापुरा २३ ततःसराजाकुशिकःसभार्यस्तेनकर्मणा विस्मयंपरमंप्राप्तस्तद्दृष्ट्वामहदद्भुतं २४
ततःप्रोवाचकुशिकोभार्यांहर्षसमन्वितः पश्यभद्रेयथाभावाश्चित्रादृष्टाःसुदुर्लभाः २५ प्रसादाद्भृगुमुख्यस्यकिमन्यत्रतपोबलात् तपसा
तदवाप्यंहियत्तुशक्यंमनोरथैः २६ त्रैलोक्यराज्यादपिहितपएवविशिष्यते तपसाहिसुतप्तेनशक्योमोक्षस्तपोबलात् २७ अहोप्रभावोब्रह्म
र्षेश्च्यवनस्यमहात्मनः इच्छयैषतपोवीर्यादन्यांल्लोकान्सृजेदपि २८ ब्राह्मणाएवजायेरन्पुण्यवाग्बुद्धिकर्मिणः उत्सहेदिहकृत्वैवको
न्योवैच्यवनादृते २९ ब्राह्मण्यंदुर्लभंलोकेराज्यंहिसुलभंनरैः ब्राह्मणस्यप्रभावाद्धिरथेयुक्तौस्वधुर्यवत् ३० इत्येवंचिंतयानस्सविदि
तश्च्यवनस्यवै संप्रेक्ष्योवाचनृपतिंक्षिप्रमागम्यतामिति ३१ इत्युक्तःसहभार्यस्तुसोभ्यगच्छन्महामुनिं शिरसावंदनीयंतमवंदतचपार्थिवः
३२ तस्याशिषःप्रयुज्याथसमुनिस्तंनराधिपं निषीदेत्यब्रवीद्धीमान्सांत्वयन्पुरुषर्षभ ३३ ततःसकृतिमापन्नोभार्गवोनृपतेर्नृप उवाचश्ल
क्ष्णयावाचातर्पयन्निवभारत ३४ राजन्सम्यग्जितानीहपंचमंवसुयंनरत्वया मनःषष्ठानीन्द्रियाणिकृच्छ्रान्मुक्तोसितेनवै ३५ सम्यगारा
धितःपुत्रत्वयाप्रवदतांवर नहितेवृजिनंकिंचित्सुसूक्ष्ममपिविद्यते ३६ अनुजानीहिमांराजन्गमिष्यामियथागतं प्रीतोस्मितेवराजेंद्रवरश्च
प्रतिगृह्यतां ३७ कुशिकउवाच अग्निमध्यगतेनैवभगवन्सन्निधौमया वर्तितंभृगुशार्दूलयन्नदग्धोस्मितत ॥ ॥ ७ ॥ दान० १३६ १३७

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

वह ३८ एषएववरोमुख्यःप्राप्तोमेभृगुनंदन यत्प्रीतोसिमयाब्रह्मन्कुलंत्रातंचमेनघ ३९ एषमेनुग्रहोविप्रजीवितेचप्रयोजनं एतद्राज्य
फलंचैवतपसश्चफलंमम ४० यदित्वंप्रीतिमान्विप्रममपिवैभृगुनंदन अस्तिमेसंशयःकश्चित्तन्मेव्याख्यातुमर्हसि ४१ इतिशांतौदानधर्मेषु
च्यवनकुशिकसंवादे च्यवनउवाच वरश्चगृह्यतांमत्तोयश्चतेसंशयोहृदि तंचब्रूहिनरश्रेष्ठसर्वंसंपादयामिते १ कुशिकउवाच यदिप्रीतो
स्मिभगवंस्ततोमेवदभार्गव कारणंश्रोतुमिच्छामिमद्गृहेवासकारितं २ शयनेचैकपार्श्वेनदिवसानेकविंशति अकिंचिदुक्त्वागमनंबहिश्च
मुनिपुंगव ३ अंतर्धानमकस्माच्चपुनरेवचदर्शनं पुनश्चशयनंविप्रदिवसानेकविंशति ४ तैलाभ्यक्तस्यगमनंभोजनंचगृहेमम समुपा
नीयविविधंयद्दग्धंजातवेदसा ५ निर्याणंचरथेनाशुसहसायत्कृतंत्वया धनानांचविसर्गस्यवनस्यापिचदर्शनं ६ प्रासादानांबहूनांचकां
चनानांमहामुने मणिविद्रुमपादानांपर्यंकानांचदर्शनं ७ पुनश्चादर्शनंतस्यश्रोतुमिच्छामिकारणं अतीवह्यत्रमुह्यामिचिंतयानोभृगूद्व
ह ८ नचैवात्राधिगच्छामिसर्वस्यास्यविनिश्चयं एतदिच्छामिकार्त्स्न्येनसत्यंश्रोतुंतपोधन ९ च्यवनउवाच शृणुसर्वमशेषेणयदिदंयेनहे
तुना नहिशक्यमनाख्यातुमेवंपृष्टेनपार्थिव १० पितामहस्यवदतःपुरादेवसमागमे श्रुतवानस्मियद्राजंस्तन्मेनिगदतःशृणु ११ ब्रह्म
क्षत्रविरोधेनभविताकुलसंकरः पौत्रस्तेभविताराजंस्तेजोवीर्यसमन्वितः १२ ततस्तेकुलनाशार्थमहंत्वासमुपागतः चिकीर्षन्कुशिको
च्छेदंसंदिधक्षुःकुलंतव १३ ततोहमागम्यपुरेत्वामवोचंमहीपते नियमंकंचिदारप्स्येशुश्रूषाक्रियतामिति १४ नचतेदुष्कृतंकिंचिदहमासा
द्यंगृहे तेनजीवसिराजर्षेनभवेयान्यथा एवंबुद्धिंसमास्थायदिवसानेकविंशति सुप्तोस्मियदिमांकश्चिद्बोधयेदितिपार्थिव १५ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

यदात्वयासभार्येणसंसुप्तेनप्रवोधितः अहंतदैवतेप्रीतिमनसाराजसत्तम १७ उत्थायचास्मिनिष्क्रांतोयदिमांत्वंमहीपते पृच्छेःक्वयास्यासी
त्येवंशयेयंत्वामितिप्रभो १८ अंतर्हितःपुनस्तस्मिन्पुनरेवचतेगृहे योगमास्थायसंसुप्तोदिवसानेकविंशति १९ क्षुधितोमामसूयेथाः
श्रमाद्वातिनराधिप एवंवुद्धिंसमास्थायकर्षितौवांक्षुधामया २० नचतेभूत्सुसूक्ष्मोपिमन्युर्मनसिपार्थिव सभार्यस्यनरश्रेष्ठतेनतेप्रीतिमा
नहं २१ भोजनंचसमानाय्ययत्तदादीपितंमया क्रुद्धेनयदिमात्सर्यादितितन्मर्षितंचमे २२ ततोहंरथमारुह्यत्वामवोचंनराधिप सभा
र्योमांवहस्वेतितच्चत्वंकृतवांस्तथा २३ अविशंकोनरपतेप्रीतोहंचापितेनह धनोत्सर्गेपिचकृतेनत्वांक्रोधःप्रधर्षयत् २४ ततःप्रीते
नतेराजन्पुनरेतत्कृतंतव सभार्यस्यवनंभूयस्तद्विद्धिमनुजाधिप २५ प्रीत्यर्थंतववैचेतन्मेस्वर्गसंदर्शनंकृतं यत्तेवनेस्मिन्नृपतेदृष्टंदिव्यंनि
दर्शनं २६ स्वर्गोद्देशस्त्वयाराजन्सशरीरेणपार्थिव मुहूर्तमनुभूतोसौसभार्येणनृपोत्तम २७ निदर्शनार्थंतपसोधर्मस्यचनराधिप तव
चासीत्स्पृहाराजंस्तच्चापिविदितंमया २८ ब्राह्मण्यंकांक्षसेहित्वंतपश्चपृथिवीपते अवमन्यनरेंद्रत्वंदेवेंद्रत्वंचपार्थिव २९ एवमेतद्य
थात्थत्वंब्राह्मण्यंतातदुर्लभंब्राह्मण्येसतिचर्षित्वमृषित्वेचतपस्विता ३० भविष्यत्येषतेकामःकुशिकात्कौशिकोद्विजः तृतीयंपुरुषं
तुभ्यंब्राह्मणत्वंगमिष्यति ३१ ॥

३७ अध्यायः अवश्यकथनीयंमइत्यध्यायोनिगदव्याख्यातइत्यर्थः १ २ ३ ४ ५ ६ ८ ॥ ७

वंशस्तेपार्थिवश्रेष्ठभृगूणामेवतेजसा पौत्रस्तेभवितावित्रतपस्वीपावकद्युतिः ३२ यःसदेवमनुष्याणांभयमुत्पादयिष्यति त्रया
णामेवलोकानांसत्यमेतद्ब्रवीमिते ३३ वरंगृहाणराजर्षेयत्तेमनसिवर्त्तते तीर्थयात्रांगमिष्यामिपुराकालोभिवर्त्तते ३४ कु
शिकउवाचएषएववरोमेद्ययत्त्वंप्रीतोमहामुने भवत्वेतद्यथात्थत्वंभवेत्पौत्रोममानघ ३५ ब्राह्मण्यंमेकुलस्यास्तुभगवन्नेषमे
वरः पुनश्चाख्यातुमिच्छामिभगवन्विस्तरेणवै ३६ कथमेष्यतिविप्रत्वंकुलंमेभृगुनंदन कश्चासौभवितावंधुर्मेमकश्चापिस
म्मतः ३७ इतिदानधर्मेषु च्यवनकुशिकसंवादे च्यवनउवाच अवश्यकथनीयंमेतवैतन्नरपुंगव यदर्थंत्वाहमुच्छेत्तुंस
म्प्राप्तोमनुजाधिप १ भृगूणांक्षत्रियायाज्यानित्यमेवजनाधिप तेचभेदंगमिष्यंतिदैवयुक्तेनहेतुना २ क्षत्रियाश्चभृगून्सर्वा
न्वधिष्यंतिनराधिप आगर्भादनुकृंतंतोदैवदंडनिपीडिताः ३ ततउत्पत्स्यतेस्माकंकुलेगोत्रविवर्द्धनः ऊर्वोनाममहातेजाज्व
लनार्कसमद्युतिः ४ सत्रैलोक्यविनाशायकोपाग्निंजनयिष्यतिमहींसपर्वतवनांयःकरिष्यतिभस्मसात् ५ कंचित्कालंतुवह्निं
चसएवशमयिष्यति समुद्रेवडवावक्त्रेप्राक्षिप्यमुनिसत्तमः ६ पुत्रंतस्यमहाभागमृचीकंभृगुनंदनं साक्षात्कृत्स्नोधनुर्वेदःस
मुपस्थास्यतेनघ ७ क्षत्रियाणामभावायदैवयुक्तेनहेतुना सतुतंप्रतिगृह्यैवपुत्रेसंक्रामयिष्यति ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© (C) Dhaarmartha Trust J&K Digitized By eGangotri

दा०
१३९

जमदग्नौमहाभागेतपसाभावितात्मनि सचापिभृगुशार्दूलक्षात्रंवेदंधारयिष्यति ९ कुलात्तुतवधर्मात्मन्कन्यांसोधिगमिष्यति उत्सादनार्थं
भवतोवंशस्यभरतर्षभ १० गाधेर्दुहितरंप्राप्यपौत्रींतवमहातपाः ब्राह्मणंक्षत्रधर्माणंपुत्रमुत्पादयिष्यति ११ क्षत्रियंविप्रकर्माणंबृहस्
पतिमिवौजसा विश्वामित्रंतवकुलेगाधेःपुत्रंसुधार्मिकं तपसामहतायुक्तंप्रदास्यतिमहाद्युते १२ स्त्रियौतुकारणंतत्रपरिवर्त्तेभविष्यतः
पितामहनियोगाद्वैनान्यथैतद्भविष्यति १३ तृतीयेपुरुषेतुभ्यंब्राह्मणत्वमुपैष्यति भवितात्वंचसंबंधीभृगूणांभावितात्मनां १४ भीष्मउवाच
कुशिकस्तुमुनेर्वाक्यंच्यवनस्यमहात्मनः श्रुत्वाहृष्टोभवद्राजावाक्यंचेदमुवाचह १५ एवमस्त्वितिधर्मात्मातदाभरतसत्तम च्यवनस्तुमहा
तेजाःपुनरेवनराधिपं १६ वरार्थेनोदयामासतमुवाचसपार्थिवः बाढमेवंकरिष्यामिकामंत्वत्तोमहामुने १७ ब्रह्मभूतंकुलंमेस्तुधर्मेचा
स्यमनोभवेत् एवमुक्तस्तथेत्येवंप्रत्युक्त्वाच्यवनोमुनिः अभ्यनुज्ञाप्यनृपतिंतीर्थयात्रांययौतदा १९ एतत्तेकथितंसर्वमशेषेणमयानृ
पभृगूणांकुशिकानांचअतिसंबंधकारणं २० ॥ ॥ ॥ ॥

राम०
१३९

आख्यायिकातात्पर्यं संगृह्णाति यथोक्तमिति ब्राह्मणस्यापि रामस्य क्रौर्यं क्षत्रियस्यापि विश्वामित्रस्य ब्राह्मण्यमिति विपरीतं प्राकृतं आर्षिसंकल्पात्तु सासंदेवन ८१
त्वन्यथा स्वभावविपर्ययोऽस्तीति भावः २१ अध्यायः ५६ एवं ब्राह्मणस्यापि तिग्रश्रेष्ठत्वेपि दौर्लभ्यं क्षत्रियधर्मस्य हि स्त्रेत्वेवान्वानः शंकते मुह्यामीत्यादिना त्वदुक्तिं निशम्य

यथोक्तमृषिणा चापि तदा तदभवन्नृप जन्म रामस्य च मुनेर्विश्वामित्रस्य चैव हि २१ इति दानधर्मेषु च्यवनकुशिकसंवादः युधिष्ठि
रउवाच मुह्यामीव निशम्याद्य चिंतयानः पुनः पुनः हीनां पार्थिवसंघातैः श्रीमद्भिः पृथिवीमिमां १ प्राप्य राज्यानि शतशो महीं जित्वा
च भारत कोटिशः पुरुषान्हत्वा परितप्ये पितामह २ का नु तासां वरस्त्रीणां समवस्था भविष्यति या हीनाः पतिभिः पुत्रैर्मातुलैर्भ्रातृ
भिस्तथा ३ वयं हि तान्कुरून्हत्वा ज्ञातींश्च सुहृदोपि वा अवाक्छीर्षाः पतिष्यामो नरके नात्र संशयः ४ शरीरं योक्तुमिच्छामि तप
सोग्रेण भारत उपदिष्टमिहेच्छामि तत्त्वतोहं विशांपते ५ वैशं० युधिष्ठिरस्य तद्वाक्यं श्रुत्वा भीष्मो महात्मनः परीक्ष्य निपुणं बुध्या युधि
ष्ठिरमभाषत ६ रहस्यमद्भुतं चैव शृणु वक्ष्यामि यत्त्वयि या गतिः प्राप्यते येन प्रेत्यभावे विशांपते तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः
आयुः प्रकर्षो भोगाश्च लभ्यंते तपसा विभो ७ ज्ञानविज्ञानमारोग्यं रूपं संपत्तथैव च सौभाग्यं चैव तपसा प्राप्यते भरतर्षभ ८ ॥

तस्य तात्पर्यं चिंतयानः १९ वीरधर्मस्य श्रेष्ठत्वं विवक्षुस्तपआदीनां तावत्प्राशस्त्यं दर्शयति भीष्म उवाच रहस्यमित्यादिना । का गतिः फलं येन साधनेन प्रेत्यभावे मरणा
नंतरं ६८

© Dharmartha Trust J&K. Digitized By eGangotri

मौनेनज्ञगदाज्ञाकारीभवतीत्यर्थः जीवितं आयुः ११ क्रतुंप्रजापतिं मारणायामैः प्रजापतिलोकंप्राप्नोतीत्यर्थः १२ दक्षोपिप्रजापतिविशेषः मरुंअनुदकं अ

धनंप्राप्नोतितपसामौनेनाज्ञांप्रयच्छति उपभोगस्तुदानेनब्रह्मचर्येणजीवितं ९ अहिंसायाः फलंरूपंदीक्षायाजन्मवैकुले
फलमूलाशिनाराज्यंस्वर्गःपर्णाशिनांभवेत् १० पयोभक्षोदिवंयातिदानेनद्रविणाधिकः गुरुशुश्रूषयाविद्यानित्यश्राद्धेनसं
ततिः ११ गवाद्यःशाकदीक्षाभिःस्वर्गमाहुस्तृणाशिनां स्त्रियस्त्रिषवणंस्नात्वावायुंपीत्वाक्रतुंलभेत् १२ नित्यस्नायीभवे
द्दृक्षः संध्येतुद्वेजपन्द्विजः मरुंसाधयतोराज्यंनाकपृष्ठमनाशके १३ स्थंडिलेशयमानानांगृहाणिशयनानिच चीरव
ल्कलवासोभिर्वासांस्याभरणानिच १४ शय्यासनानियानानियोगयुक्तेतपोधने अग्निप्रवेशेनियतंब्रह्मलोकेमहीयते १५
रसानांप्रतिसंहारात्सौभाग्यमिहविंदति आमिषप्रतिसंहारात्प्रजास्यायुष्मतीभवेत् १६ उदवासंवसेद्यस्तुसनाकाधिपति
भवेत् सत्यवादीनरश्रेष्ठदैवतैःसहमोदते १७

नाशकंअनाहारः १३ प्रतिसंहारात्त्यागात् १४ १५ १६ १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

२२ उपवासः सर्वभोगत्यागः दीक्षाजपादिनियमस्वीकारः अभिषेकः त्रिषवणस्नानं त्रयाणां समुच्चयः २३ शिवं वधविच्छेदहेतुस्नानं फलपुष्पादिनापरमेश्वरा

कीर्तिर्भवति दानेन तथारोग्यमहिंसया द्विजशुश्रूषया राज्यं द्विजत्वं चापि पुष्कलं १८ पानीयस्य प्रदानेन कीर्तिर्भवति शाश्वती अ
न्नस्य तु प्रदानेन तृप्यते काम भोगतः १९ सांत्वदः सर्वभूतानां सर्वशोकैर्विमुच्यते देवशुश्रूषया राज्यं दिव्यं रूपं नियच्छति २० दीपालो
कप्रदानेन चक्षुष्मान्भवते नरः प्रेक्षणीयप्रदानेन स्मृतिं मेधां च विंदति २१ गंधमाल्यप्रदानेन कीर्तिर्भवति पुष्कला केशश्मश्रु धा
रयतामग्र्या भवति संततिः २२ उपवासं च दीक्षां च अभिषेकं च पार्थिव कृत्वा द्वादश वर्षाणि वीरस्थानाद्विशिष्यते २३ दासीदासमलं
काराक्षेत्राणि च गृहाणि च ब्रह्मदेयां सुतां दत्वा प्राप्नोति मनुजर्षभ २४ क्रतुभिश्चोपवासैश्च त्रिदिवं याति भारत लभते च शिवं स्नानं फ
लपुष्पप्रदो नरः २५ सुवर्णशृंगैस्तु विराजितानां गवां सहस्रस्य नरः प्रदानात् प्राप्नोति पुण्यं दिवि देवलोकमित्येवमाहुर्दिवि देवसंघाः २६
प्रयच्छते यः कपिलां सवत्सां कांस्योपदोहां कनकाग्रशृंगीं तैस्तैर्गुणैः कामदुहास्य भूत्वा नरं प्रदातारमुपैति सा गौः २७ यावंति रोमाणि भवंति
धेन्वास्तावत्फलं प्राप्य स गोप्रदाता पुत्रांश्च पौत्रांश्च कुलं च सर्वमासप्तमं तारयते परत्र सदक्षिणां कांचनचारुशृंगीं कांस्योपदोहां द्रविणोत्तरी
यां धेनुं तिलानां ददतो द्विजाय लोका वसूनां सुलभा भवंति २८ स्वकर्मभिर्मानवं संनिरुद्धं तीव्रांधकारे नरके पतंतं महार्णवे नौरिव वायुयु
क्ता दानं गवां तारयते परत्र ३० यो ब्रह्मदेयां तु ददाति कन्यां भूमिप्रदानं च करोति विप्रे ददाति चान्नं विधिवच्च यश्च स लोकमाप्नोति पुरं
दरस्य ॥

रावणात्राप्यते ऽसर्पः २४ ॥ ७ ७ ॥ ० ॥ ७

दा०
१७१

नैवेशिकंगृहोपस्करंशय्यादि ३३ उपानहौसंदंततंमार्ग ३७ अधिष्ठानवरंभ्रवपदं ३८ पक्षवतीमहाकुलोत्पन्नां ३९ तात्पर्यविषयमाहीपितामहस्येति अनचरःसमानः

नैवेशिकंसर्वगुणोपपन्नंददातिवैयस्तुनरोद्विजाय स्वाध्यायचारित्र्यगुणान्वितायतस्यापिलोकाःकुरुपूत्तरेषु ३२ धुर्यप्रदानेनगवांतथावैलोकानवा
प्नोतिनरोवसूनां स्वर्गायचाहुस्तुहिरण्यदानंततोविशिष्टंकनकप्रदानं ३३ छत्रप्रदानेनगृहंवरिष्ठंयानंतथोपानहसंप्रदाने वस्त्रप्रदानेन
फलंसुरूपंगंधप्रदानात्सुरभिर्नरःस्यात् ३४ पुष्पोपगंवाथफलोपगंवायःपादपंस्पर्शयतेद्विजाय सस्त्रीसमृद्धंबहुरत्नपूर्णंलभत्ययत्नोपगतंगृहं
वै ३५ भक्ष्यान्नपानीयरसप्रदातासर्वान्समाप्नोतिरसान्प्रकामं प्रतिश्रयाच्छादनसंप्रदाताप्राप्नोतितान्येवनसंशयोत्र ३६ स्रग्धूपगंधान्यनुलेपना
निस्नानानिमाल्यानिचमानवोयः दद्याद्द्विजेभ्यःसभवेदरोगस्तथाभिरूपश्चनरेंद्रलोके ३७ बीजैरशून्यंशयनैरुपेतंदद्याद्गृहंयःशयनंद्विजा
यपुण्याभिरामंबहुरत्नपूर्णंलभत्यधिष्ठानवरंसराजन् सुगंधिचित्रास्तरणोपधानंदद्यान्नरोयःशयनंद्विजाय रूपान्वितांपक्षवतींमनोज्ञांभार्यम
यत्नोपगतांलभेत्सः पितामहस्यानचरोवीरशायीभवेन्नरः नाधिकंविद्यतेयस्मादित्याहुःपरमर्षयः ३८ वैशंपायनउवाच तस्यतद्वचनंश्रु
त्वाप्रीतात्माकुरुनंदनः नाश्रमेरोचयद्वासंवीरमार्गाभिकांक्षया ३९ ततोयुधिष्ठिरःप्राहपांडवान्पुरुषर्षभ पितामहस्ययद्वाक्यंतद्वोरोचत्विति
प्रभुः ४२ ततस्तुपांडवाःसर्वेद्रौपदीचयशस्विनी युधिष्ठिरस्यतद्वाक्यंबाढमित्यभ्यपूजयन् ४३ इतिदानधर्मेषुउत्तमानुशासने ॥ ॥

यस्मात्पितामहात् ४० तस्येति यद्वादिद्वयस्यचवीरमार्गेचापेक्षांलेभेइत्यर्थः ४३ इतिदानधर्मेषु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
१७१

एवंविशोकीकृतः स्वस्य श्वपाणा सर्ववर्णसाधारणान्धनसाधानधर्मान्सान्वक्ष्यति आरामाणामिति १ बलवती बहुसस्योत्पादिका २ औदकानि खातानि तडा

युधिष्ठिर उवाच आरामाणां तडागानां यत्फलं कुरुपुंगव तदहं श्रोतुमिच्छामि त्वत्तोद्य भरतर्षभ १ भीष्म उवाच सुप्रदर्शा बलवती
चित्राधातुविभूषिता उपेता सर्वभूतैश्च श्रेष्ठा भूमिरिहोच्यते २ तस्याः क्षेत्रविशेषश्च तडागानां च बंधनं औदकानि च सर्वाणि प्रवक्ष्या
म्यनुपूर्वशः ३ तडागानां च वक्ष्यामि कृतानां चापि ये गुणाः त्रिषु लोकेषु सर्वत्र पूजनीयस्तडागवान् ४ अथवा मित्रसदनं मैत्रं मित्र
विवर्द्धनं कीर्तिसंजननं श्रेष्ठं तडागानां निवेशनम् धर्मस्यार्थस्य कामस्य फलमाहुर्मनीषिणः तडागं सुकृतं देशे क्षेत्रमेकं महाश्रयं ६ च
तुर्विधानां भूतानां तडागमुपलक्षयेत् तडागानि च सर्वाणि दिशंति श्रियमुत्तमां ७ देवा मनुष्या गंधर्वाः पितरोरगराक्षसाः स्थावरा
णि च भूतानि संश्रयंति जलाश्रयं ८ तस्मात्तांस्ते प्रवक्ष्यामि तडागे ये गुणाः स्मृताः या च तत्र फलावाप्तिरृषिभिः समुदाहृताः ९ व
र्षाकाले तडागे तु सलिलं यस्य तिष्ठति अग्निहोत्रफलं तस्य फलमाहुर्मनीषिणः १० शरत्काले तु सलिलं तडागे यस्य तिष्ठति गोस
हस्रस्य संप्रेत्य लभेत फलमुत्तमं ११ हेमंतकाले सलिलं तडागे यस्य तिष्ठति स वै बहुसुवर्णस्य यज्ञस्य लभते फलं १२ यस्य वै शिशिरे काले
तडागे सलिलं भवेत् तस्याग्निष्टोमयज्ञस्य फलमाहुर्मनीषिणः १३ तडागं सुकृतं यस्य वसंते तु महाश्रयं अतिरात्रस्य यज्ञस्य फलं स समुपा
श्नुते १४

गानि ३ त्रिषु पृथिव्यन्तरिक्षस्वर्गेषु तडागवान् तडागकृत् ४ मित्राणां सदनमिवोपकारकं सस्योत्पादनादिना मैत्रं मित्रसूर्यस्येदं प्रीतिकरं मित्राणां देवानां विवर्धनं यो
षकं ५ क्षेत्रवृद्धिहेतुत्वात् तडागं महाश्रयमित्युत्तरेणापि संबंधः १४ ॥ ८१

© Dharmartha Trust J&K. Digitized By eGangotri

दा० १७२

२२ वृक्षाः वटादयः गुल्माः कुशस्तंबादयः लताः वृक्षाग्रमारूढाः पारल्यादयः वल्ल्यः भूम्यांप्रतताः कूष्मांडादयः वक्षराः वेणवादयः तृणाजातयः उलपादयः २९

निदाघकालेपानीयंतडागेयस्यतिष्ठति वाजिमेधफलंतस्यफलंवैमुनयोविदुः १५ सकुलंतारयेत्सर्वंयस्यखातेजलाशये गावःपिबंतिसलिलं
साधवश्चनराःसदा १६ तडागेयस्यगावस्तुपिबंतितृषिताजलं मृगपक्षिमनुष्याश्चसोश्वमेधफलंलभेत् १७ यत्पिबंतिजलंतत्रस्नायंतेविश्रमंति
चतडागदस्यतत्सर्वंप्रेत्यानंत्यायकल्पते १८ दुर्लभंसलिलंतातविशेषेणपरत्रवै पानीयस्यप्रदानेनप्रीतिर्भवतिशाश्वती १९ तिलान्ददतपानीयं
दीपान्ददतजाग्रतः ज्ञातिभिःसहमोदध्वमेतत्प्रेत्यसुदुर्लभं २० सर्वदानैर्गुरुतरंसर्वदानैर्विशिष्यते पानीयंनरशार्दूलतस्माद्दातव्यमेवहि २१ एवमेतत्त
डागस्यकीर्तितंफलमुत्तमं अतऊर्ध्वंप्रवक्ष्यामिवृक्षाणामवरोपणं २२ स्थावराणांचभूतानांजातयःषट्प्रकीर्तिताः वृक्षगुल्मलतावल्यस्त्वक्सार
स्तृणजातयः २३ एताजात्यस्तुवृक्षाणांतेषांरोपेगुणास्त्विमे कीर्तिश्चमानुषेलोकेप्रेत्यचैवफलंशुभं २४ लभतेनामलोकेचपितृभिश्चमही
यते देवलोकेगतस्यापिनामतस्यननश्यति २५ अतीतानागतेचोभेपितृवंशंचभारत तारयेद्वृक्षरोपीचतस्माद्वृक्षांश्चरोपयेत् २६ तस्यपुत्राभवंत्ये
तेपादपानात्रसंशयः परलोकगतःस्वर्गंलोकांश्चाप्नोतिसोव्ययान् २७ पुष्पैःसुरगणान्वृक्षाःफलैश्चापितथापितॄन् छाययाचातिथिंतातपू
जयंतिमहीरुहाः २८ किन्नरोरगरक्षांसिदेवगंधर्वमानवाः तथाऋषिगणाश्चैवसंश्रयंतिमहीरुहान् २९ ॥ ॥ ॥ ॥ ॥

राम० १८२

© Dharmartha Trust J&K. Digitized By eGangotri

३० पुत्रास्ते धर्मतः स्मृताः इत्यपुत्रेणावश्यं पुत्रकलार्थिना तडागा आरामाश्च कर्त्तव्या इति दर्शितं ३३ अथायः दातारं कथं दानमन्वेतीति पृच्छति यानीति दातृप्रतिग्र
हीत्रोः परलोके संबंधाभावादिति भावः १२ अभयमिति यथा स्वयं कस्मैचिदभयं दीयते व्यसने वानुग्रहः क्रियते स पुनः काले सति सामर्थ्ये आन्यापार्थस्वस्मै त्र

पुष्पिताः फलवंतश्च तर्पयंतीह मानवान् वृक्षदं पुत्रवद्वृक्षास्तारयंति परत्र तु ३० तस्मात्तडागे सद्वृक्षा रोप्याः श्रेयोर्थिना सदा पुत्रवत्परि
पाल्याश्च पुत्रास्ते धर्मतः स्मृताः ३१ तडागकृद्वृक्षरोपी इष्टयज्ञश्च यो द्विजः एते स्वर्गे महीयंते ये चान्ये सत्यवादिनः ३२ तस्मात्तडागं कुर्वीत
आरामांश्चैव रोपयेत् यजेच्च विविधैर्यज्ञैः सत्यं च सततं वदेत् ३३ इति दानधर्मेषु आरामतडागवर्णनं युधिष्ठिर उवाच यानीमानि बहिर्वे
द्यां दानानि परिचक्षते तेभ्यो विशिष्टं किं दानं मतं ते कुरुपुंगव १ कौतूहलं हि परमं तत्र मे विद्यते प्रभो दातारं दत्तमन्वेति यद्दानं तत्प्रचक्ष्व मे
२ भीष्म उवाच अभयं सर्वभूतेभ्यो व्यसने चाप्यनुग्रहः यच्चाभिलषितं दद्यात्तृषितायाभियाचते ३ दत्तं मन्येत यद्दत्वा तद्दानं श्रेष्ठमुच्यते
दत्तं दातारमन्वेति यद्दानं भरतर्षभ ४ हिरण्यदानं गोदानं पृथिवीदानमेव च एतानि वै पवित्राणि तारयंत्यपि दुष्कृतम् ५ एतानि पुरुषव्या
घ्र साधुभ्यो देहि नित्यदा दानानि हि नरं पापान्मोक्षयंति न संशयः ६ यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे तत्तद्गुणवते देयं तदेवाक्षय
मिच्छता ७ प्रियाणि लभते नित्यं प्रियदः प्रियकृत्तथा प्रियो भवति भूतानामिह चैव परत्र च ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भयं दानमनुग्रहं च करोति एवं परत्रापीत्यर्थः ३ यद्दत्वा दत्तं मन्येत न त्विदं मदीयं दानमिति न मन्येत स आस्तिकः श्रद्धावान् दानफलं लभत इत्यर्थः ४८ ॥ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

अमीनानात् अतिसमर्थोपि यन्नित्यमभिमानं स्वमनस्येव कृत्वा पावमानं १० कृशायेत्यादि स्वितु योषस्थेयं ११ क्रियानियमितान् स्वधर्मयंत्रितान् १२ येनार्थदेवादीनां तर्प
तेभ्य आत्मानं रक्षस्वेत्युक्तं तत्र रक्षाणां प्रकारमाह तानिति वुक्तैर्घोरैः मुक्तैरिति पाठे निसृष्टैर्नरैः उपजिज्ञास्यानिमंत्रयेथा इति संबंधः १४ आवसथैः आवसथादिसमर्प

याचमानममीनानाद्नासक्तमकिंचनं योनार्चति यथाशक्ति सनृशंसो युधिष्ठिर ९ अमित्रमपि चेद्दीनं शरणैषिणमागतम् व्यसने योनुगृ
ह्णाति सवै पुरुषसत्तमः १० कृशाय कृतविद्याय वृत्तिक्षीणाय सीदते अपहन्यात् क्षुधां यस्तु न तेन पुरुषः समः ११ क्रियानियमितान् साधू
न्पुत्रदारैश्च कर्षितान् अयाचमानान् कौंतेय सर्वोपायैर्निमंत्रयेत् १२ आशिषं येन देवेषु न च मर्त्येषु कुर्वते अर्हंतो नित्यसंतुष्टास्तथा लब्धो
पजीविनः १३ आशीविषसमेभ्यश्च तेभ्यो रक्षस्व भारत तान्युक्तैरुपजिज्ञास्य तथा द्विजवरोत्तमान् १४ कृतैरावसथैर्नित्यं सप्रेष्यैः सपरिच्छदैः
निमंत्रयेथाः कौरव्य सर्वकामसुखावहैः १५ यदि ते प्रतिगृह्णीयुः श्रद्धापूतं युधिष्ठिर कार्यमित्येव मन्वाना धार्मिकाः पुण्यकर्मिणः १६ वि
द्वांस्नातास्नातव्रतास्नातो यव्ययाश्रित्यजीविनः गूढः स्वाध्यायतपसो ब्राह्मणाः संशितव्रताः १७ तेषु शुद्धेषु दांतेषु स्वदारपरितोषिषु यत्करिष्यसि क
ल्याणं तत्त्वे लोके युधांपते १८ यथाग्निहोत्रं सुहुतं सायंप्रातर्द्विजातिना तथा दत्तं द्विजातिभ्यो भवत्यथ यतात्मसु १९ एष ते विततो यज्ञः श्रद्धापूतः
सदक्षिणः विशिष्टः सर्वयज्ञेभ्यो ददतस्तात वर्त्ततां २० ॥ ॥

रोन १५ कार्यमित्ति धर्मायैवं धर्मं कुर्वंति न तु फलांतरार्थमिति भावः १६ व्याया श्रित्यप्रभौ राश्रय मकृत्वा जीवितुं स्वभावाः १९ ददतः दातुस्तावदवनं तां सर्वदास्तु
॥ २०॥

© Dharmartha Trust J&K. Digitized By eGangotri

मन्त्रविशेषेणांनिवापादानसलिलइतिनिवापः पितृतर्पणंतद्देवदानादिर्यस्मिन्सत्तथा तादृशेषुनिवसन्ततानाश्रितस्थितःसन्नत्राऽन्नशपदेवादीनांनिवापोदानमद्
शइतिपीठदानंमहाद्युम्ने २२ एतेदातारवहुनमन्यतेनिस्पृहत्वात्तेभ्योतमोस्तुतथानयमस्कृतयोभयमिति पाठेतेभ्यस्तुभ्यंमोरुहेभयंस्वउभयंस्वर्गेनरकश्चभवतीति

निवापदानसलिलस्थादेशेषु युधिष्ठिर निवसन्पृष्ठ यंश्चैवतेषान्नाणीनि यच्छति २१ यस्त्वनैवकुप्यंतिनलुभ्यंतिर्स्तोऽपि तस्त्वनःपूज्यतमाये
चापिप्रियवादिनः २२ एतेनवहुमन्यंतेनप्रवर्तंतिचापरे पुत्रवत्परिपाल्यास्तेनमस्तेभ्यस्तथोभयम् २३ आत्विक्पुरोहिताचार्यामृदुब्रह्मधराहिते
क्षात्रेणापिहिसंसृष्टंतेजःशाम्यतिवैद्विजः २४ अस्तिमेवलवानस्मिराजास्मीतियुधिष्ठिर ब्राह्मणान्मास्मपर्यश्रीर्वासोभिरशनेनच २५ पुष्टो
भार्थ्यवलार्थ्यंवाविन्नमस्तितवानघ तेनतेब्राह्मणाःपूज्याः स्वधर्ममनुतिष्ठता २६ नमस्कार्यास्तथाविप्रावर्त्तमानायथातथं यथासुखंयथो
त्साहंनमंतुत्वपिपुत्रवत् २७ कोह्यक्षयप्रसादानांसुहृदामल्पतोषिणाम् वृत्तिमर्हत्यवक्षेप्तुंत्वदन्यःकुरुसत्तम २८ यथापत्याश्रयोधर्मः
स्त्रीणांलोकेसनातनः सदैवसागतिर्नान्यातथास्माकंद्विजातयः २९ यदिनोब्राह्मणास्तातसत्यजेयुरपूजिताः पश्यंतोदारुणांकर्मसततं
क्षत्रियेस्थितं ३० अवेदानामयज्ञानामलोकानामवर्त्तिनांकस्तेषांजीवितेनार्थस्त्वांविनाब्राह्मणाश्रयम् ३१ अत्रतेवर्त्तयिष्यामियथ
थावर्मसनातनं राजन्योब्राह्मणान्राजन्पुरापरिचचारह ३२ ॥

शेषः २३ मृदवःशिष्येषुस्नेहवत्वात्तेचतेब्रह्मधराश्चवेदधराःक्षात्रेणासंसृष्टमपिब्राह्मतेजःशाम्यतिशांतेद्विजेदीप्यमानंअस्मेवेत्तर्पः २४ मापर्यश्रीःपरिसज्ज
ममुक्ते २५ तेत्वया २६ नमंतुरमंतां २७ अवक्षेप्तुंसमर्पयितुं ३० आवर्त्तिनांअन्यानांआर्षेगुणाः अकार्तिनामितिपाठेब्रीह्यादिनादिनिःअकीर्तिमतां ३१
पुरापूर्वं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

४१ अधायः यौचचरणेनाचरणेन १ अयाचतःश्रेयमाहुहाम्यांश्रेयइति २ अनर्थनात्रमांच्या ३ ॥ ॥ छ

वैश्योराजन्यमित्येवंशूद्रोवैश्यमितिश्रुतिः दूराच्छूद्रेणोपचर्योब्राह्मणोग्निरिवज्वलन् ३३ संस्पृश्यपरिचर्यस्तुवैश्येनक्षत्रियेणाच मृदु
भावान्सत्यशीलान्सत्यधर्मानुपालनात् ३४ आशीविषानिवक्रुद्धांस्तानुपाचरतद्विजान् अपरेषांपरेषांचपरेभ्यश्चापियेपरे ३५ क्षत्रिया
णांप्रतपतांतेजसाचबलेनच ब्राह्मणेष्वेवशाम्यंतितेजांसिचतपांसिच ३६ नमेपितात्प्रियतरोनत्वंतातत्तथाप्रियः नमेपितुःपिताराजन्न
चात्मानचजीवितम् ३७ त्वत्तश्चमेप्रियतरःपृथिव्यांनास्तिकश्चनत्वत्तोपिमेप्रियतराब्राह्मणाभरतर्षभ ३८ ब्रवीमिसत्यमेतच्चयथाहंपांडु
नंदनतेनसत्येनगच्छेयंलोकान्यत्रचशंतनुः ३९ पश्येयंचसतांल्लोकानशुचीन्ब्रह्मपुरस्कृतान् तत्रमेतातगंतव्यमह्नायचचिरायच ४०
सोहमेतादृशान्लोकान्दृष्ट्वाभरतसत्तम यन्मेकृतंब्राह्मणेषुनतप्येतेनपार्थिव ४१ इतिदानधर्मेषुयुधिष्ठिरउवाच यौ
चस्यातामाचरणेनोपपन्नौयौविद्ययासदृशौजन्मनाचताभ्यांदानंकतमस्मैविशिष्टमयाचमानायचयाचतेच १ भीष्मउवाच श्रेयोवैया
चतःपार्थदानमाहुरयाचते अर्हत्तमोवैधृतिमान्कृपणादधृतात्मनः २ क्षत्रियोरक्षणाधृतिर्ब्राह्मणोनर्थनाधृतिः ब्राह्मणोधृतिमानवि
द्वान्देवान्प्रीणातितुष्टिमान् ३ ॥

माच्यं याचनारूपं कर्म अनीशस्य दरिद्रस्य अभिहारं तिरस्कारमाहुः यदा मत्तः याचमाना निभृतानि स्तम्भितदस्युवत् लोकान् उद्वेजयंति ६ राष्ट्रान्तरादू ९ दद्भिरित्यर्थः अयाचतां अयाचमानानां उपागच्छन् समीपमुपसर्पन् दाया धनादीन् ददत् दाता भवेतिशेषः १४ अपीति सोद्धरणान् स्वामिनि आगते दास्यामीति याचमाने

माच्यमाहुरनीशस्य अभिहारं च भारत उद्वेजयंति याचंतियदा भूतानि दस्युवत् ४ म्रियते याचमानो वै न जातु म्रियते ददत् ददत्संजीवयत्येव मात्मानं च युधिष्ठिर ५ आनृशंस्यं परो धर्मो याचते यत्प्रदीयते अयाचतः सीदमानान्सर्वोपायैर्निमंत्रयेत् ६ यदि वैतादृशा राष्ट्रान्वसेयुस्ते द्विजोत्तमाः भस्मछन्नानिवाग्नीस्तान्बुध्येथास्त्वं प्रयत्नतः ७ तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि अपूज्यमानाः कौरव्य पूजार्हा हि स्तथाविधाः ८ पूज्या हि ज्ञानविज्ञानतपोयोगसमन्विताः तेभ्यः पूजां प्रयुंजीथा ब्राह्मणेभ्यः परंतप ९ ददद्बहुविधान्दायानुपागच्छन्नयाचताम् यदग्निहोत्रे सुहुते सायंप्रातर्भवेत्फलं विद्यावेदव्रतवति तद्दानफलमुच्यते ११ विद्यावेदव्रतस्नातानव्यपाश्रयजीविनः गूढस्वाध्यायतपसो ब्राह्मणान्संशितव्रतान् १२ कृतैरावसथैर्हृद्यैः सप्रेष्यैः सपरिच्छदैः निमंत्रयेथाः कौंतेय कामैश्चान्यैर्द्विजोत्तमान् १३ अपि ते प्रतिगृह्णीयुः श्रद्धेयं ते युधिष्ठिर कार्यमित्येव मन्वाना धर्मज्ञाः सूक्ष्मदर्शिनः १४ अपि ते ब्राह्मणा भुक्ता गताः सोद्धरणान्गृहान् येषां दाराः प्रतीक्षंते पर्जन्यमिव कर्षकाः १५ अन्नानि प्रातःसवने नियता ब्रह्मचारिणः ब्राह्मणास्तात भुंजानास्त्रेताग्नीन्प्रीणयंत्युत माध्यंदिने ते सवनं ददतस्तात वर्त्तताम् गोहिरण्यानि वासांसि तेनेंद्रः प्रियतां तव १७ ॥ ॥ ॥ ॥ ॥ ॥

सोवालकेभ्यः आशाप्रदर्शनं उद्धरणं तत्सहितान् अतः सवदा स्तेषां प्रतीक्षंत इत्युक्तं १५ सषेते वितनोयज्ञ इति प्रागुक्तं पञ्चं सवनत्रयं व्याचष्टे अन्नानीत्यादिना १७॥

दा०
१७५

३० अध्यायःयज्ञः क्रियेत्येकं यज्ञरूपा क्रिया येत्यर्थः कीदृशोभ्योदानं कथं यज्ञक्रियेति कदेत्युभयत्र संबंधः १ आनृशंस्यतो वर्हिर्विघादीनं ३४ यज्ञाद्दानस्याधिकं

तृतीयं सवनं तेवैवैश्वदेवं युधिष्ठिर यद्देवेभ्यः पितृभ्यश्च विप्रेभ्यश्च प्रयच्छति १८ अहिंसा सर्वभूतेभ्यः संविभागश्च भागशः दमस्त्यागो धृ
तिः सत्यं भवत्यवभृथाय ते १९ एष ते वितते यज्ञः श्रद्धापूतः सदक्षिणः विशिष्टः सर्वयज्ञानां नित्यं तात प्रवर्त्तताम् २० इति दानधर्मेषु उत्त
मानुशासने युधिष्ठिर उवाच दानं यज्ञः क्रिया चेह किंस्वित्प्रेत्य महाफलं कस्य ज्यायः फलं प्रोक्तं कीदृशेभ्यः कथं कदा १ एतदिच्छामि वि
ज्ञातुं यथातथ्येन भारत विद्वन् जिज्ञासमानाय दानधर्मानिहचस्वमे २ अंतर्वेद्यां च यद्दत्तं श्रद्धया चानृशंस्यतः किंस्विन्निःश्रेयसं तात
तन्मे ब्रूहि पितामह ३ भीष्म उवाच रौद्रं कर्म क्षत्रियस्य सततं तात वर्त्तते तस्य वैतानिकं कर्म दानं चैवेह पावनं ४ न तु पापकृतां रा
ज्ञां प्रतिगृह्णंति साधवः एतस्मात्कारणाद्यज्ञैर्यजेद्राजा सदक्षिणैः ५ अथ चेत्प्रतिगृह्णीयुर्दद्यादहरहर्नृपः श्रद्धामास्थाय प
रमां पावनं ह्येतदुत्तमं ६ ब्राह्मणांस्तर्पयन्द्रव्यैस्ततो यज्ञे यतव्रतः मैत्रान्साधून्वेदविदः शीलवृत्ततपोर्चितान् ७ यन्नेते न करिष्यं
ति कृतं तेन भविष्यति यज्ञान्साधय साधुभ्यः स्वाद्वन्नान्दक्षिणावतः ॥ ८

वर्णीयतिनलिलितिह्यमां ५ एतत्तदानं ६ तपोर्चितान्संधिरार्षः ७ यत्यदित्त ब्राह्मणाः तेन त्वन करिष्यंति प्रतिग्रहमिति शेषः तर्हि कृतं सुकृतं तेन त्वन भविष्य राम०
ति तदा सुकृतोमत्स्यर्थं यज्ञान्साधय ८ १७५

© (C) Dharmartha Trust J&K Digitized By eGangotri

इष्टमिति दानेयज्ञादिकं अंतर्भवतियाज्ञिकेभ्योदत्तंतंन्कृतमप्युक्तमपुत्रेयोशंसत्वापिभविष्यतीतिनयज्ञार्थमनुष्यकोभ्यरितर्थः ९ जनयिताप्रजापतिः १० धर्मान्
पंच विस्तरएवमोक्षेइत्यादीन्येयेसंतःसंवर्धयंतितेमनस्वेभर्तव्याःराज्ञा। तस्माज्ञस्तेषुंतःवहुकारिणः अत्यंतंतउपकर्त्तारोभवंति १३ देयाःदानानि ॥

इष्टंदत्तंचमन्येथा आत्मानंदानकर्मणा॥ पूज्येयापायपजुकांस्त्वाप्यंशोभवेयथा ९ प्रजावंतोभरेथाश्चब्राह्मणान्बहुकारिणः प्रजा
वांस्तेनभवतियथाजनपितातथा १० यावंतःसाधुधर्मान्वैसंतःसंवर्द्धयंत्युत सर्वस्वैश्चापिभर्त्तव्यानराएयेवहुकारिणः ११ समृद्धःसंप्र
यच्छत्वंब्राह्मणेभ्योयुधिष्ठिर धेनूरनडुहोन्नानिछत्रंवासांस्युपानहौ १२ आज्यानियजमानेभ्यस्तथान्नानिचभारत अश्ववंतिचया
नानिवेश्मानिशयनानिच १३ एतेदेयाव्युष्टिमंतोलघूपायाश्चभारत अजुगुप्सांचविज्ञायब्राह्मणान्वृत्तिकर्षितान् १४ उपच्छन्न
प्रकाशंवावृत्त्यातान्प्रतिपालयेत् राजसूयाश्वमेधाभ्यां श्रेयस्तत्क्षत्रियान्प्रति १५ एवंपापैर्विनिर्मुक्तस्त्वंपूतःस्वर्गमाप्स्यसि संचयि
त्वापुनःकोशंयद्राष्ट्रंपालयिष्यसि १६ तेनत्वंब्रह्मभूयत्वमवाप्स्यसिधनानिच आत्मनश्चपरेषांचवृत्तिंसंरक्षभारत १७ पुत्रवच्चापिभृत्या
न्स्वान्प्रजाश्चपरिपालय योगक्षेमश्चतेनित्यंब्राह्मणेष्वस्तुभारत १८ तदर्थंजीवितंतेस्तुमातेभ्योप्रतिपालनं अनर्थोब्राह्मणस्यैषयद्वि
त्तनिचयोमहान् १९ ॥

व्युष्टिःसमृद्धिः १६ ब्रह्मणोभूयंभावोस्यास्तिसब्राह्मणोब्रह्मभूयः तस्यभावोब्रह्मभूयत्वंब्राह्मणत्वं १७ १८ १९ ॥ ॥ ॥ ॥ ॥

रा०
१४६

२० यस्तिपुग्गंयोराजारक्षिष्य: संग्रहपरोभोधनंदत्वायज्ञेयज्ञार्थधनमानयध्वमितिब्रुवन्राष्ट्रंविलुंपति २१ यश्चासीततधनिभि: भीतंभयपुक्तंपपासान्त्वपादत्तंप्रजाभ्य
आदाय दारुणंयपासान्त्वपायज्ञेत्तंयज्ञेनप्रशंसंति २२ उद्यम:प्रजापीडनात्प्रकोतिपत्न: निहितोप्रजानांनितरांहितोराजायदाप्रजाभि:प्रोद्रिक्ताभिनिषि

ध्रियायाख्यभीक्ष्णांसंवासोदर्पयेत्त्वंभमोहयेत् त्वालरोषुप्रमूढेषुधर्मोविप्रान्नशेद्ध्रुवं धर्मप्रणाशेभूतानामभाव: स्यान्नसंशय: २० यो
रक्षिष्य: संप्रदायराजाराष्ट्रंविलुंपतियज्ञेराष्ट्राद्धनंतत्स्मादानयध्वमितिब्रुवन् २१ यश्चादायतद्दाज्ञप्ते भीतंदत्तंसुदारुणांयज्ञेद्राजानतंय
ज्ञेप्रशंसंत्यसाधव: २२ अपीडिता:सुसंवृद्धायेदद्युस्तनुकूलत: तादृशेनाप्युपायेनयष्टव्यंनोद्यमाहृतै: २३ यदापरिनिषेवितानि
हितोवैयथाविधि तदाराजामहायज्ञैर्यजेतबहुदक्षिणै: २४ वृद्धबालधनंरक्ष्यमंधस्यकृपणस्यच नखातपूर्वंकुर्वीतनरुदंतीधनं
हरेत् २५ हृतंकृपणवित्तंहिराष्ट्रंहंतिनृपश्रियं दद्याच्चमहतोभोगानक्षुद्भयंप्रणुदेत्सतां २६ येषांस्वादूनिभोज्यानिसमवेक्ष्यंतिबाल
का: नाश्नंतिविधिवत्तानिकिंनुपापतरंतत: २७ यदितेतादृशोराष्ट्रेविद्वान्सीदेत्क्षुधाद्विज: भ्रूणहत्यांचगच्छेथा: कृत्वापापमिवोत्तमं
२८ धिकृत्तस्यजीवितंराज्ञोराष्ट्रेयस्यावसीदति द्विजोन्योवामनुष्योपिशिबिराहवचोयथा २९ ॥ ॥ ॥ ॥ ॥ ॥

श्चेतधनैरभिषिच्यते २४ खातपूर्वंधनंकुर्वीतअनावृष्टौकूपोदकनिषादितैर्धान्यैर्जीवती। धनंस्वाधानंनकुर्वीतत्पर्य: २५ २५ ७ ॥ ७ ॥ रा०म०
१४६

सहस्रगपतराजकंराजसमृद्धंप्रतिपक्षभूतंविंदते २७ सर्वपापंप्रशमिएज्ञानं २८ अध्याप:बहुदेया:बहुकुटुंबा: २ कामानेवावाहेदोग्ध्रीमिति ७ ॥ ॥ ॥

यस्यस्मविषयेराज्ञ:स्नातक:सीदतिक्षुधा अवृद्धिमेतितद्राष्ट्रंविंदतेसहराजकं ३० क्रोशंत्योयस्यवैराष्ट्राद्ध्रियंतेतरसास्त्रिय: क्रोशतांपतिपु
त्राणांम्रतोसौनचजीवति ३१ अरक्षितारंहर्त्तारंविलोप्तारमदायकं तंवैराजकलिंहन्यु:प्रजा:सन्नह्यनिर्घृणं ३२ अहंवोरक्षितेत्युक्त्वा
योनरक्षतिभूमिप: ससंहत्यनिहंतव्य:श्वेवसोन्मादआतुर: ३३ पापंकुर्वंतियत्किंचित्प्रजाराज्ञाह्यरक्षिता: चतुर्थंतस्यपापस्यराजाविंद
तिभारत ३४ अथाहु:सर्वमेवेतिभूयोर्द्धमितिनिश्चय: चतुर्थंमतमस्माकंमनो:श्रुत्वानुशासनं ३५ शुभंवायत्प्रकुर्वंतिप्रजाराज्ञासुर
क्षिता: चतुर्थंतस्यपुण्यस्यराजाचाप्नोतिभारत ३६ जीवंतंत्वानुजीवंतुप्रजा: सर्वायुधिष्ठिर पर्जन्यमिवभूतानिमहाद्रुममिवांडजा:
३७ कुवेरमिवरक्षांसिशतक्रतुमिवामरा: ज्ञातयस्त्वानुजीवंतुसुहृदश्चपरंतप ३८ इतिदानधर्मेषु युधिष्ठिरउ० इदंदेयमिदंदेयमि
तीयंश्रुतिमादरात् बहुदेयाश्चराजान:किंस्विद्दानमनुत्तमं १ भीष्मउवाच अतिदानानिसर्वाणिपृथिवीदानमुच्यते अचलाह्यक्ष
याभूमिर्दोग्ध्रीकामानिहोत्तमान् २ दोग्ध्रीवासांसिरत्नानिपशून्व्रीहियवांस्तथा भूमिद: सर्वभूतेषुशाश्वतीरेधतेसमा: ३ ॥ ॥

© (c) Dharmartha Trust J&K Digitized By eGangotri

दा० १४७ ४५ श्रियंसत्पतिंदत्तेदेवाहरंति ७१ श्रियेरास्त्रियापपवादत्तेनेनिपमे नमाः दानंआदानंवाकुर्वन्श्रियरक्षायाआसाः श्रियोभवतीत्यर्थः नामेतिनामार्थडभयरूप्त

यावद्भूमेरायुरिहतावद्भूमिदएधते नभूमिदानादस्तीहपरंकिंचिद्युधिष्ठिर ४ अप्यल्पंप्रददुः सर्वेपृथिव्याइतिनःश्रुतं भूमिमेवददुःस
र्वेभूमिंतेभुंजतेजनाः ५ स्वकर्मैवोपजीवंतिनराइहपरत्रच भूमिर्भूतिर्महादेवीदातारंकुरुतेप्रियं ६ यएतांदक्षिणांदद्यादक्षयांराजसत्तम
पुनर्नरत्वंसंप्राप्यभवेत्सपृथिवीपतिः ७ यथादानंतथाभोगइतिधर्मेषुनिश्चयः संग्रामेवातनुंजह्याद्दद्याद्वापृथिवीमिमां ८ इत्येतत्क्षत्र
वंधूनांवदंतिपरमांश्रियं पुनातिदत्तापृथिवीदातारमितिनःश्रुतम ९ अपिपापसमाचारंब्रह्मघ्नमपिचानृतं सैवपापंप्लावयतिसैवपापात्
प्रमोचयेत् १० अपिपापकृतांराज्ञांप्रतिगृह्णंतिसाधवः पृथिवीनान्यदिच्छंतिपावनंजननीयथा ११ नामास्याःप्रियदत्तेतिगुह्यंदेव्याःसना
तनं दानंवाप्यथवादानंनामास्याःप्रथमंप्रियं १२ यएतांविदुषेदद्यात्पृथिवींपृथिवीपतिः पृथिव्यामेतदिष्टंसराजाराज्यमितोव्रजेत् १३ पुन
श्चासौजननंप्राप्यराजवत्स्यान्नसंशयः तस्मात्प्राप्यैवपृथिवींदद्याद्विप्रायपार्थिवः १४ नाभूमिपतिनाभूमिरधिष्ठेयाकथंचननचापात्रेणवा
ग्राह्यादत्तदानेनचाचरेत् १५ ॥ ॥

ध्येते १२ एतत्पृथिवीदानं १४ दत्तेदानेदत्तेर्देशोनवाचोरेच्चसंचरेत्नागेहेदंतधीनंनवाचरेदितिपाठेतुभूमिदानेँनांतरकत्रगूहनीयंकिंतुप्रख्यापयेद्देवस्माहनवेति १५ दा० १४७
६१

२ शंसंति अमुकदत्तेयं देहेतिहासमहति क्रयपंक्ति १८ सप्तहस्तेन दंडेन त्रिंशद्दंडा निवर्तनं दशतान्येव गोचर्म दत्वा स्वर्गे महीयते २१ अपीति दानांतरवद्भूमिदा

येचान्ये भूमिमिच्छेयुः कुर्युरेवन संशयः यः साधो भूमिमादत्ते न भूमिं विंदते तु सः १६ भूमिं दत्वा तु साधुभ्यो विंदते भूमिमुत्तमां प्रेत्य चेह च ध
र्मात्मा संप्राप्नोति महद्यशः १७ यस्य विप्राः प्रशंसंति साधो भूमिं सदैव हि न तस्य शत्रवो राजन्प्रशंसंति वसुंधरां १८ यत्किंचित्पुरुषः पापं
कुरुते वृत्तिकर्षितः अपि गोचर्ममात्रेण भूमिदानेन पूयते १९ येपि संकीर्णकर्माणो राजानो रौद्रकर्मिणः तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमं
२० अल्पांतरमिदं शश्वत्पुराणा मेनिरे जनाः यो यजेताश्वमेधेन दद्याद्वा साधवे महीं २१ अपि चेत्सुकृतं कृत्वा शंकेरन्नपि पंडिताः अश
क्यमेकमेवैतद्भूमिदानमनुत्तमं २२ सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च सर्वमेतन्महाप्राज्ञो ददाति वसुधां ददत् २३ तपो यज्ञः श्रुतं शी
लमलोभः सत्यसंधता गुरुदैवतपूजा च एतावर्तंति भूमिदं २४ भर्तुर्निःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ब्रह्मलोकगताः सिद्धा नातिक्रा
मंति भूमिदं २५ यथा जनित्री स्वं पुत्रं क्षीरेण भरते सदा अनुगृह्णाति दातारं तथा सर्वरसैर्मही २६ मृत्युर्वैकिंकरो दंडस्तमो वह्निः सुदा
रुणाः घोराश्च दारुणाः पाशा नोपसर्पंति भूमिदं २७

नैपुणेपन्नो शंकैव नास्तत्पर्यः २३ एतावता निलापोडोदेशः वर्तंतित्यनुसरति २६ वैकिंकरः विपरीतं किंचित्करोतीति विकिंकरः कालस्तस्यं वधीकालस्तु रिसर्पः

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

रा० १४८ सत्रीसत्ववत् २० उद्दीर्णमहत्शरणांगृहं २५ बलमूर्पंवहत्वंफलमितिपावत्गछतिप्राप्नोति २६ कृत्यानांमंत्रमपीनांमरणार्थपशक्तानांअधिशस्तानोमवला

पितृंश्चपितृलोकस्थानदेवलोकाच्चदेवताः संतर्पयंतिशांतात्मायोददातिवसुंधरां २८ कृशायक्रियमाणायवृत्तिग्लानायसीदते
भूमिंवृत्तिकरींदत्वासत्रीभवतिमानवः २९ यथाधावतिगौर्वत्संस्त्रवंतीवत्सलापयः एवमेवमहाभागभूमिर्भवतिभूमिदं ३० का
लकृष्टांमहींदत्वासबीजांसफलामपि उद्दीर्णांवापिशरणांतथाभवतिकामदः ३१ ब्राह्मणांवृत्तसंपन्नमाहिताग्निंशुचिव्रतं नरःप्र
तिग्राह्यमहींनयातिपरमापदं ३२ यथाचंद्रमसोवृद्धिरहन्यहनिजायते तथाभूमिकृतेदानेसस्येसस्येविवर्द्धते ३३ अत्रगाथाभूमि
गीताःकीर्त्तयंतिपुराविदः याःश्रुत्वाजामदग्न्येनदत्ताभूःकाश्यपायवै ३४ मामेवाददत्मांदत्तमांदत्वामामवाप्स्यथ अस्मिंल्लोकेपरे
चैवतद्दत्तंजायतेपुनः ३५ यइमांव्याहृतिंवेदब्राह्मणोवेदसंमितां श्राद्धस्यक्रियमाणस्यब्रह्मभूयंसगछति ३६ कृत्यानामधिशस्ता
नामरिष्टशमनंमहत् प्रायश्चित्तमहंकृत्वापुनात्युभयतोदश ३७ पुनातियइदंवेदवेदवादंतथैवच प्रकृतिःसर्वभूतानांभूमिर्वैभ्वा
नरीमता ३८ अभिषिच्यैवनृपतिंश्रावयेदिममागमं यथाश्रुत्वामहींदद्यान्नाद्द्यात्साधुतस्तुतां ३९ ॥ ॥ ॥ ॥ ॥

नांसंवंवियदरिष्टंतथ्यमंत्रं३७ इदंभूमिदानंयोवेदवादंइदंभूनिवाक्यंवेदसो ३८ पिपुनातिदशपुरुषानितिशेषः ३८ ॥ ॥ ॥ ॥ ॥ ॥ रा० १४८

भूमिलक्षणांऐश्वर्यसूचकं ४० ४१ ४२ ४४ ४७ ॥

ख्व२

सोयंकृतस्नोब्राह्मणार्थेराजार्षर्यश्चाप्यसंशयः राजाहिधर्मकुशलःप्रथमंभूतिलक्षणं ४० अथयेषामधर्मज्ञोराजाभवति
नास्तिकः नतेसुखंप्रबुध्यंतिनसुखंप्राप्नुवंतिच ४१ सदाभवंतिचोद्विग्नास्तस्यदुश्चरितैर्नराः योगक्षेमाहिबहवोराष्ट्रंनास्या
विशंतितत् ४२ अथयेषांपुनःप्राज्ञोराजाभवतिधार्मिकः सुखंतेप्रतिबुध्यंतेसुसुखंप्रस्वपंति – च ४३ तस्यराज्ञःशुभैःकार्यैः
कर्मभिर्निर्वृतानराः योगक्षेमेणवृष्ट्याचविवर्द्धंतेस्वकर्मभिः ४४ सकुलीनःसपुरुषःसंबंधुःसचपुण्यकृत् सदातासचवि
क्रांतोयोददातिवसुंधरां ४५ आदित्याइवदीप्यंतेतेजसामुविमानवाः ददंतिवसुधांस्फीतांयेवेदविदुषिद्विजे ४६ यथासस्या
निरोहंतिप्रकीर्णानिमहीतले तथाकामाःप्ररोहंतिभूमिदानसमार्जिताः ४७ आदित्योवरुणोविष्णुर्ब्रह्मासोमोहुताशनः शू
लपाणिश्चभगवान्प्रतिनंदंतिभूमिदं ४८ भूमौजायंतिपुरुषाभूमौनिष्ठांव्रजंतिच चतुर्विधोहिलोकोयंयोयंभूमिगुणात्मकः
४९ एषामातापिताचैवजगतःपृथिवीपते नानयासदृशंभूतंकिंचिदस्तिजनाधिप ५० अत्राप्युदाहरंतीममितिहासंपु
रातनं बृहस्पतेश्चसंवादमिंद्रस्यचयुधिष्ठिर ५१ इष्ट्वाक्रतुशतेनाथमहतादक्षिणावता मघवावाग्विदांश्रेष्ठःपप्रच्छेदंबृह
स्पतिं ५२

© Dharmartha Trust J&K. Digitized by eGangotri

दा०
१४९

मघवाउवाच भगवन्केनदानेनस्वर्गतः सुखमेधते यदक्षयंमहर्घंचतन्मेब्रूहिवदतांवर ५३ भीष्मउवाच इत्युक्तःससुरेंद्रेणाततोदेवपुरो
हितः बृहस्पतिर्महातेजाः प्रत्युवाचशतक्रतुं ५४ बृहस्पतिरुवाच सुवर्णदानंगोदानंभूमिदानंचवृत्रहन् ददतेतान्महाप्राज्ञः सर्वपापैः
प्रमुच्यते ५५ नभूमिदानाद्देवेंद्रपरंकिंचिदितिप्रभो विशिष्टमितिमन्यामियथाप्राहुर्मनीषिणः ५६ येशूरानिहतायुद्धेस्वर्यातारणगृद्धि
नः सर्वेतेविबुधश्रेष्ठनातिक्रामंतिभूमिदं ५७ पंचपूर्वाहिपुरुषाःषडन्येवसुधांगताः एकादशददद्भूमिंपरित्रातीहमानवः ५८ रत्नो
पकीर्णांवसुधांयोददातिपुरंदर समुक्तःसर्वकलुषैःस्वर्गलोकेमहीयते ५९ महींस्फीतांददद्राजन्सर्वकामगुणान्वितां राजाधिराजोभ
वतितद्धिदानमनुत्तमं ६० सर्वकामसमायुक्तांकाश्यपींयःप्रयच्छति सर्वभूतानिमन्यंतेमांददातीतिवासवः ६१ सर्वकामदुघांधेनुंसर्व
कामगुणान्वितां ददातियःसहस्राक्षस्वर्गंयातिसमानवः ६२ मधुसर्पिप्रवाहिण्यःपयोदधिवहास्तथा सरितस्तर्पयंतीहसुरेंद्रवसु
धाप्रदं ६३ भूमिप्रदानान्नृपतिर्मुच्यतेसर्वकिल्बिषात् नहिभूमिप्रदानेनदानमन्यद्विशिष्यते ६४ ददातियःसमुद्रांतांपृथिवींशस्त्रनि
र्जितां तंजनाःकथयंतीहयावद्धरतिगौरियं ६५ ६५

राम०
१४९

© Dharmartha Trust J&K. Digitized By eGangotri

७२ क्षिपनहरन ७६ स्पर्शितांदत्तां ७७ ७८ ॥ ॥ ७ ७ ७

पुरापामक्षिरसांभूमिंपोददातिपुरंदर नतस्पलोकाःक्षीयंतेभूमिदानगुणान्विताः ६६ सर्वदापार्थिवेनेहंसततंभूतिमिछता भूईपाविधि
वछकपात्रेसुखमभीप्सुना ६७ अपिकृत्वानरःपापंभूमिंदत्वाद्विजातये समुत्सृजतितत्पापंजीर्णांत्वचमिवोरगः ६८ सागरान्सरितःशै
लान्काननानिचसर्वशः सर्वमेतन्नरःशक्रददातिवसुधांददत् ६९ तडागान्युदपानानिस्रोतांसिचसरांसिच स्नेहान्सर्वरसांश्चैवददा
तिवसुधांददत् ७० ओषधीर्वीर्यसंपन्नानगान्पुष्पफलान्वितान् काननोपलशैलांश्चददातिवसुधांददत् ७१ अग्निष्टोमप्रभृतिभि
रिष्टवानस्वाप्तदक्षिणैः नतत्फलमवाप्नोतिभूमिदानाघदश्नुते ७२ दातादशानुगृह्णातिदशहंतितथाक्षिपन् पूर्वदत्तांहरन्भूमिंनर
कायोपगछति ७३ नदातिप्रतिश्रुत्यदत्वावापिहरेत्तुपः सवद्धोवारुणैःपाशैस्तप्यतेमृत्युशासनात् ७४ आहिताग्निंसदायज्वंत्कृश
वृत्तिंप्रियातिथिं येभजंतिद्विजश्रेष्ठंनोपसर्पंतितेयमं ७५ ब्राह्मणेष्वृणीभूतःपार्थिवःस्यात्पुरंदर इतरेषांतुवर्णानांतारयेत्कृशदुर्बलान्
७६ नाछिंद्यात्स्पर्शितांभूमिंपरेणात्रिदशाधिप ब्राह्मणास्यसुरश्रेष्ठकृशवृत्तेःकदाचन ७७ यथाश्रुपतितंतेषांदीनानामप्यसीदतां ब्रा
ह्मणानांहृतेक्षेत्रेहन्यात्त्रिपुरुषंकुलं ७८ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा० भूमिपालं च्युतं राष्ट्राद्यस्तु संस्थापयेन्नरः तस्य वासः सहस्राक्ष नाकपृष्ठे महीपते ७९ इक्षुभिः संततां भूमिं यवगोधूमशालिनीं गोश्ववाहन
१५० पूर्णां वा बाहुवीर्यादुपार्जितां ८० निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदां अक्षयांल्लभते लोकान्नित्यं सत्रेहितस्य तत्र ८१ विधूय कलुषं स
र्वं विरजाः संमतः सतां लोके महीयते सम्यग्यो ददाति वसुंधरां ८२ यथाप्सु पतितः शक्र तैलबिंदुर्विसर्पति तथा भूमिकृतं दानं सस्ये सस्ये
विवर्द्धते ८३ ये रणाग्रे महीपालाः शूराः समितिशोभनाः वध्यंते भिमुखाः शक्र ब्रह्मलोकं व्रजंति ते ८४ नृत्यगीतपरा नार्यो दिव्यमाल्य
विभूषिताः उपतिष्ठंति देवेंद्र तथा भूमिप्रदं दिवि ८५ मोदते च सुखं स्वर्गे देवगंधर्वपूजितः यो ददाति महीं सम्यग्विधिनेह द्विजातये ॥
८६ शतमप्सरसश्चैव दिव्यमाल्यविभूषिताः उपतिष्ठंति देवेंद्र ब्रह्मलोके धराप्रदं ८७ उपतिष्ठंति पुण्यानि सदा भूमिप्रदं नरं शंखं भद्रास
नं छत्रं वराश्वा वरवाहनं ८८ भूमिप्रदानात्पुष्पाणि हिरण्यनिचयास्तथा आज्ञा सदाप्रतिहता जयशब्दो वसूनि च ८९ भूमिदान
स्य पुण्यानि फलं स्वर्गः पुरंदर हिरण्यपुष्पाश्चौषध्यः कुशकांचनशाद्वलाः ९० अमृतप्रसवां भूमिं प्राप्नोति पुरुषो ददत् नास्ति भूमिसमं
दानं नास्ति मातृसमो गुरुः नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ९१ ९१ ९१ राम०
१५०

© Dharmartha Trust J&K. Digitized By eGangotri

९१ अध्यायः कानि ४ संज्ञाः कुँडपः ५ ६ ७ ८ ९ ॥ ७ ७ ७ ॥७

एतद्दांगिरसां श्रुत्वा वासवो वसुधामिमां वसुरत्नसमाकीर्णां ददावंगिरसे तदा ९२ यइदं श्रावयेच्छ्राद्धे भूमिदानस्य संभवं न तस्य रक्षसां भा
गो नासुराणां भवत्युत ९३ अक्षयं च भवेद्दत्तं पितृभ्यस्तन्न संशयः तस्माच्छ्राद्धेष्विदं विद्वान्भुंजतः श्रावयेद्द्विजान् ९४ इत्येतत्सर्वदानानां
श्रेष्ठमुक्तं तवानघ मया भरतशार्दूल किं भूयः श्रोतुमिच्छसि ९५ इति दानधर्मेषु इंद्रबृहस्पतिसंवादः युधिष्ठिर उवाच कानि दानानि लोकेस्मि
न्दातुकामो महीपतिः गुणाधिकेभ्यो विप्रेभ्यो दद्याद्भरतसत्तम १ केन तुष्यंति ते सद्यः किं तुष्टाः प्रदिशंति च शंस मे तन्महाबाहो फलं पुण्य
कृतं महत् २ दत्तं किं फलवद्राजन्निह लोके परत्र च भवतः श्रोतुमिच्छामि तन्मे विस्तरतो वद ३ भीष्म उवाच इदमर्थं पुरा पृष्टो नारदो
देवदर्शनः यदुक्तवानसौ वाक्यं तन्मे निगदतः शृणु ४ नारद उवाच अन्नमेव प्रशंसंति देवा ऋषिगणास्तथा लोकतंत्रं हि संज्ञाश्च
सर्वमन्ने प्रतिष्ठितं ५ अन्नेन सदृशं दानं न भूतं न भविष्यति तस्मादन्नं विशेषेण दातुमिच्छंति मानवाः ६ अन्नमूर्जस्करं लोके प्राणाश्चा
न्ने प्रतिष्ठिताः अन्नेन धार्यते सर्वं विश्वं जगदिदं प्रभो ७ अन्नादृहस्था लोकेस्मिन्भिक्षवस्तापसास्तथा अन्नाद्भवंति वै प्राणाः प्रत्य
क्षं नात्र संशयः ८ कुटुंबं पीडयित्वा तु ब्राह्मणाय महात्मने दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता ९ ॥ ॥ ॥ ॥ ॥ ॥

© Dhamma Trust & Digitized by eGangotri

दा° १५१ ब्राह्मणायाभिरूपाय योदद्यादन्नमर्थिने विदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः १० श्रान्तमध्वनि वर्त्तन्तं वृद्धमर्हमुपस्थितं --- अर्च
येद्भूतिमन्विछन्गृहस्थो गृहमागतं ११ क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः अन्नदः प्राप्नुते राजन्दिवि चेह च यत्सुखं १२ नावमन्येद
भिगतं न प्रणुद्यात्कदाचन अपि श्वपाके शुनि वा न दानं विप्रणश्यति १३ योदद्यादपरिक्लिष्टमन्नमध्वनि वर्त्तते श्रान्तायादृष्टपूर्वाय स
महद्धर्ममाप्नुयात् १४ पितॄन्देवानृषीन्विप्रानतिथींश्च जनाधिप यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् १५ कृत्वातिपातकं कर्म यो
दद्यादन्नमर्थिने ब्राह्मणाय विशेषेण न स पापेन मुह्यते १६ ब्राह्मणेष्वक्षयं दानमन्नं शूद्रे महाफलं अन्नदानं हि शूद्रे च ब्राह्मणे च वि
शिष्यते १७ न पृछ्छेद्गोत्रँन्नपतेर्नात्र संशयः १९ आशंसन्ते हि पितरः सुवृष्टिमिव कर्षकाः अस्माकमपि पुत्रो वा पौत्रो वान्नं प्रदास्यति २० गो ५
ब्राह्मणो हि महद्भूतं स्वयं देहीति याचति --- अकामो वा सकामो वा दत्त्वा पुण्यमवाप्नुयात् २१ ब्राह्मणः सर्वभूतानामतिथिः प्रसृताग्रभुक् ना ३
विप्रा यदधिगच्छन्ति भिक्षमाणा गृहं सदा २२ सत्कृताश्च निवर्त्तन्ते तदतीव प्रवर्धते महाभोगे कुले प्रेत्य जन्म चाप्नोति भारत २३ दत्त्वान्न
न्नं नरो लोके यथा स्थानमनुत्तमं नित्यं मिष्टान्नदायी तु स्वर्गे वसति सत्कृतः २४ अन्नं प्राणा नराणां हि सर्वमन्ने प्रतिष्ठितं अन्नदः पशु
मान्पुत्री धनवान्भोगवानपि २५ ॥ दा° १५१

चरणं स्वाध्यायं देशमेव च भिक्षितो ब्राह्मणो नेह दद्यादन्नं च पार्थिवेन्द्र १८ अन्नदस्यान्नवृक्षाश्च सर्वकामफलप्रदाः भवन्ति चेह वामुत्र ४x

प्राणवांश्चापि भवति रूपवांश्च तथान्नप अन्नदः प्राणदो लोके सर्वदः प्रोच्यते तु सः २६ अन्नं हि दत्वातिथये ब्राह्मणाय यथाविधि प्रदाता
सुखमाप्नोति दैवतैश्चापि पूज्यते २७ ब्राह्मणो हि महद्भूतं क्षेत्रभूतं युधिष्ठिर उप्यते यत्र यद्बीजं तद्धि पुण्यफलं महत् २८ प्रत्यक्षं प्रीतिज
ननं भोक्तुर्दातुर्भवत्युत सर्वाण्यन्यानि दानानि परोक्षफलवंत्युत २९ अन्नाद्धि प्रसवं यांति रतिरन्नाद्धि भारत धर्मार्थावन्नतो विद्धि रोग
नाशं तथान्नतः ३० अन्नं ह्यमृतमित्याह पुराकल्पे प्रजापतिः अन्नं भुवं दिवं खं च सर्वमन्ने प्रतिष्ठितं ३१ अन्नप्रणाशे भिद्यंते शरीरे
पंच धातवः बलं बलवतोपीह प्रणश्यत्यन्नहानितः ३२ आवाहाश्च विवाहाश्च यज्ञाश्चान्नमृते तथा निवर्त्तंते नरश्रेष्ठ ब्रह्म चात्र प्रली
यते ३३ अन्नतः सर्वमेतद्धि यत्किंचित्स्थाणुजंगमं त्रिषु लोकेषु धर्मार्थमन्नं देयमतो बुधैः ३४ अन्नदस्य मनुष्यस्य बलमोजो यशां
सि च कीर्त्तिश्च वर्द्धते शश्वत्त्रिषु लोकेषु पार्थिव ३५ मेघेषूर्ध्वं सन्निधत्ते प्राणानां पवनः पतिः तच्च मेघगतं वारि शक्रो वर्षति भा
रत ३६ आदत्ते च रसान्भौमानादित्यः स्वगभस्तिभिः वायुरादित्यतस्तांश्च रसान्देवः प्रवर्षति ३७ तद्यदा मेघतो वारि पतितं भवति क्षि
तौ तदा वसुमती देवी स्निग्धा भवति भारत ३८ ततः सस्यानि रोहंति येन वर्त्तयते जगत् मांसमेदोस्थिशुक्राणां प्रादुर्भावस्ततः पुनः ३९
संभवंति ततः शुक्रात्प्राणिनः पृथिवीपते अग्नीषोमौ हि तच्छुक्रं सृजतः पुष्यतश्च ह ४० ॥ ॥ ॥ ॥ ॥ ॥ छ ॥ छ ॥

© Dhaarmartha Trust J&K. Digitized by eGangotri

एवमन्नाद्विसर्पंश्च पवनःशुक्रमेवच एकएवस्मृतोराशिस्ततोभूतानिजज्ञिरे ४१ प्राणान्ददातिभूतानांतेजश्चभरतर्षभ गृह
मभ्यागतायाथयोदद्यादन्नमर्थिने ४२ भीष्मउवाच नारदेनैवमुक्तोहमदामन्नंसदानृप अनसूयुस्त्वमप्यन्नंतस्माद्देहिगतज्व
रः ४३ दत्वान्नंविधिवद्राजन्विप्रेभ्यस्त्वमपिप्रभो यथावदनुरूपेभ्यस्ततःस्वर्गमवाप्स्यसि ४४ अन्नदानांहियेलोकास्तांस्त्वं
शृणुजनाधिप भवनानिप्रकाशंतेदिवितेषांमहात्मनां ४५ तारासंस्थानरूपाणिनानास्तंभान्वितानिच चंद्रमंडलशुभ्राणि
किंकिणीजालवंतिच ४६ तरुणादित्यवर्णानिस्थावराणिचराणिच अनेकशतभौमानिसांतर्जलचराणिच ४७ वैडु
र्यार्कप्रकाशानिरौप्यरुक्ममयानिच सर्वकामफलाश्चापिवृक्षाभवनसंस्थिताः ४८ वाप्योवीथ्यःसभाःकूपादीर्घिकाश्चैवस
र्वशः घोषवंतिचयानानियुक्तान्यथसहस्रशः ४९ भक्ष्यभोज्यमयाःशैलावासांस्याभरणानिच क्षीरंस्रवंतिसरितस्तथाचै
वान्नपर्वताः ५० प्रासादाःपांडुराभ्राभाःशय्याश्चकनकोज्वलाः तानन्नदाःप्रपद्यंतेतस्मादन्नप्रदोभव ५१ एतेलोकाःपु
ण्यकृतामन्नदानांमहात्मनां तस्मादन्नंप्रयत्नेनदातव्यंमानवैर्भुवि ५२ इतिदानधर्मेषु युधिष्ठिरउवाच श्रुतंमेभवतोवा
क्यमन्नदानस्ययोविधिः नक्षत्रयोगस्येदानींदानकल्पंब्रवीहिमे १॥ ७ ॥ ७ ७ ॥ ॥ राम०

© (h) Dharmartha Trust J&K Digitized By eGangotri

५ मार्गैर्मृगसंबंधिभिः ८ पूपान्पिष्टमयान्घृतपाचितपिंडान् ९ अनालोकेषु आलोकांतरवर्जितेषु तमःप्रकाशेष्वित्यर्थः १२

भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं देवक्याश्चैव संवादं महर्षेर्नारदस्य च २ द्वारकामनुसंप्राप्तं नारदं देवदर्शनं
पप्रच्छैवं वचः प्रश्नं देवकी धर्मदर्शनं ३ तस्याः संपृच्छमानाया देवर्षिर्नारदस्ततः आचष्ट विधिवत्सर्वं तच्छृणुष्व विशांपते ४ नार
द उवाच कृत्तिकासु महाभागे पायसेन ससर्पिषा संतर्प्य ब्राह्मणान्साधून्लोकानाप्नोत्यनुत्तमान् ५ रोहिण्यां प्रसृतैर्मार्गै
र्मांसैरन्नेन सर्पिषा पयोन्नदानं दातव्यमनृणार्थं द्विजातये ६ दोग्ध्रीं दत्वा सवत्सां तु नक्षत्रे सोमदैवते गच्छंति मानुषाल्लोकात्
स्वर्गलोकमनुत्तमं ७ आर्द्रायां कृशरं दत्वा तिलमिश्रमुपोषितः नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ८ सूपान्पुनर्वसौ
दत्वा तथैवान्नानि शोभने यशस्वी रूपसंपन्नो बह्वन्ने जायते कुले ९ पुष्ये तु कनकं दत्वा कृतं वाकृतमेव च अनालोकेषु लो
केषु सोमवत्स विराजते १० आश्लेषायां तु यो रूप्यमृषभं वा प्रयच्छति स सर्वभयनिर्मुक्तः संभवानधितिष्ठति ११ मघासु ति
लपूर्णानि वर्द्धमानानि मानवः प्रदाय पुत्रपशुमानिह प्रेत्य च मोदते १२ ॥

फाणितंगोरसविकारः १८ प्रासंगोधान्यादिपिधानपोगपंचतुरस्रं २० २१ २७ २५

फाल्गुनीपूर्वसमयेब्राह्मणानामुपोषितः भक्ष्यान्फाणितसंयुक्तान्दत्वासौभाग्यमृच्छति २३ घृतक्षीरसमायुक्तंविधिवत्षष्टिकौदनं
उत्तराविषयेदत्वास्वर्गलोकेमहीयते १४ यद्यत्प्रदीयतेदानमुत्तराविषयेनरैः महाफलमनंतंतत्भवतीतिविनिश्चयः २५ हस्तेहस्ति
रथंदत्वाचतुर्युक्तमुपोषितः प्राप्नोतिपरमाल्लोकान्पुण्यकामसमन्वितान् १६ चित्रायांवृषभंदत्वापुण्यगंधांश्चभारत चरंत्यप्स
रसांलोकेरमतेनंदनेतथा २७ स्वात्यामथधनंदत्वायदिष्टतममात्मनः प्राप्नोतिलोकान्सशुभानिहचैवमहद्यशः १८ विशाखायामन
ड्वाहंधेनुंदत्वाचदुग्धदां सप्रासंगंचशकटंसधान्यंवस्त्रसंयुतं १९ पितॄन्देवांश्चप्रीणातिप्रेत्यचानंत्यमश्नुते नचदुर्गाण्यवाप्नोति
स्वर्गलोकंचगच्छति २० दत्वायथोक्तंविप्रेभ्योवृत्तिमिष्टांसविंदति नरकादींश्चसंक्लेशान्नाप्नोतीतिविनिश्चयः २१ अनुराधा
सुप्रावारंवस्त्रान्नंसमुपोषितः दत्वायुगशतंचापिनरःस्वर्गेमहीयते २२ कालशाकंतुविप्रेभ्योदत्वामर्त्यःसमूलकं ज्येष्ठायामृद्धि
मिष्टांवैगतिमिष्टांसगच्छति २३ मूलेमूलफलंदत्वाब्राह्मणेभ्यःसमाहितः पितॄन्प्रीणयतेचापिगतिमिष्टांचगच्छति २४ अथपू
र्वास्वषाढासुदधिपात्राण्युपोषितः कुलवृत्तोपसंपन्नेब्राह्मणेवेदपारगे पुरुषोजायतेप्रेत्यकुलेसुबहुगोधने २५ ॥ ॥ ॥

उदमंथंउदकुंभयुक्तंसक्तुविकारः ३१ उरभ्रःपशुविशेषः अजोवा ३६ इतिअध्यायःसर्वात् १

उदमंथंससर्पिष्कंप्रभूतमधिफाणितं दत्वोत्तराषाढास्सर्वकामानवाप्नुयात् २६ दुग्धंत्वभिजितेयोगेदत्वामधुघृतप्लुतं धर्मनित्यो
मनीषिभ्यःस्वर्गलोकेमहीयते २७ श्रवणेकंबलंदत्वावस्त्रांतरितमेववा श्वेतेनयातियानेनसर्वलोकान्संवृतान् २८ गोप्रयु
क्तंधनिष्ठासुयानंदत्वासमाहितः वस्त्ररश्मिधनंसद्यःप्रेत्यराज्यंप्रपद्यते २९ गंधाञ्छतभिषायोगेदत्वासागुरुचंदनान् प्राप्नोत्य
प्सरसांसंघान्प्रेत्यगंधांश्चशाश्वतान् ३० पूर्वभाद्रपदायोगेराजमाषान्प्रदापयेत् सर्वभक्षफलोपेतःसवैप्रेत्यसुखीभवेत् ३१
औरभ्रमुत्तरायोगेयस्तुमांसंप्रयच्छति सपितॄन्प्रीणयतिवैप्रेत्यचानंत्यमश्नुते ३२ कांस्योपदोहनांधेनुंरेवत्यांयःप्रयच्छति सा
प्रेत्यकामानादायदातारमुपतिष्ठति ३३ रथमश्वसमायुक्तंदत्वाश्विन्यांनरोत्तम हस्त्यश्वरथसंपन्नेवर्चस्वीजायतेकुले ३४
भरणीषुद्विजातिभ्यस्तिलधेनुंप्रदायवै गाःसुप्रभूताःप्राप्नोतिनरःप्रेत्ययशस्तथा ३५ भीष्मउवाच इत्येषलक्षणोद्देशःप्रोक्तो
नक्षत्रयोगतः देवक्यानारदेनेहसास्नुषाभ्योऽब्रवीदिति ३६ इतिदानधर्मेषुनक्षत्रयोगदानं भीष्मउवाच सर्वान्कामान्प्रयच्छ
तियेप्रयच्छंतिकांचनं इत्येवंभगवानत्रिःपितामहसुतोऽब्रवीत् १ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा० १५४

११ सोपच्छंदः सोपकरणाः करकान्पात्रविशेषान् १२ अग्रं दत्तिक्षेत्रादित दर्पउत्कोचं विना उपस्पर्शनं दानं १४

पवित्रमथ वापुण्यं पितॄणामक्षयं चतत् सुवर्णमनुजे ज्येष्ठं हरिश्चंद्रेणाकीर्तितं २ पानीयं परमं दानं दानानां मनुरब्रवीत् तस्मा
त्कूपांश्च वापीश्च तडागानि च खानयेत् ३ अर्द्धं पापस्य हरति पुरुषस्येह कर्मणः कूपः प्रवृत्तपानीयः सुप्रवृत्तश्च नित्यशः
४ सर्वं तारयते वंशं यस्य खाते जलाशये गावः पिबंति विप्राश्च साधवश्च नराः सदा ५ निदाघकाले पानीयं यस्य तिष्ठत्यवा
रितं सदुर्गं विषमं कृत्स्नं न कदाचिदवाप्नुते ६ बृहस्पतेर्भगवतः पूषणश्चैव भगस्य च अश्विनोश्चैव वह्नेश्च प्रीतिर्भवति सर्पिषा
७ परमं भेषजं ह्येतद्यज्ञानामेतदुत्तमं रसानामुत्तमं चैतत्फलानां चैतदुत्तमं ८ फलकामो यशस्कामः पुष्टिकामश्च नित्यदा घृतं द
द्यात् द्विजातिभ्यः पुरुषः शुचिरात्मवान् ९ घृतं मासे आश्वयुजि विप्रेभ्यो यः प्रयच्छति तस्मै प्रयच्छतो रूपं प्रीतौ देवाविहाश्विनौ १०
पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति गृहं तस्य न रक्षांसि धर्षयंति कदाचन ११ पिपासया न म्रियते सोपच्छंदश्च जायते
न प्राप्नुयाच्च व्यसनं करकान्यः प्रयच्छति १२ प्रयतो ब्राह्मणाग्रेभ्यः श्रद्धया परया युतः उपस्पर्शनषड्भागं लभते पुरुषः सदा
१३ यः साधनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति प्रयतापनार्थं राजेंद्र वृत्तवन्भ्यः सदा नरः १४ ॥ ॥ ॥ ॥

राम० १५४

सिंधांतर्पणः सदा तस्य कार्याणि विविधानि च उपर्युपरि शत्रूणां वपुषा दीप्यते च सः १५ भगवांश्चापि संप्रीतो वह्निर्भवति नित्यशः न तं
घ्नंति पशवः संग्रामे च जयत्यपि १६ मुत्रा नश्यति पंचलभते यश्छत्रं संप्रयच्छति न चक्षुर्व्याधिं लभते यज्ञभागमथाश्नुते १७ निदाघकाले
वर्षे वा यश्छत्रं संप्रयच्छति नास्य कश्चिन्मनोदाहः कदाचिदपि जायते १८ कृछ्रात्स विषमाच्चैव क्षिप्रं मोक्षमवाप्नुते प्रदानं सर्वदा
नानां शकटस्य विशांपते एवमाह महाभागः शांडिल्यो भगवानृषिः १९ इति दानधर्मेषु युधिष्ठिर उवाच दह्यमानाय विप्राय यः प्रय
च्छत्युपानहौ यत्फलं तस्य भवति तन्मे ब्रूहि पितामह १ भीष्म उवाच उपानहौ प्रयच्छेद्यो ब्राह्मणेभ्यः समाहितः मर्दते कंटकान्सर्वा
न्विषमान्निस्तरत्यपि २ स शत्रूणामुपरि च संतिष्ठति युधिष्ठिर यानं चाश्वतरीयुक्तं तस्य शुभ्रं विशांपते ३ उपतिष्ठति कौंतेय रौ
प्यकांचनभूषितं शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ४ युधिष्ठिर उवाच यत्फलं तिलदाने च भूमिदाने च कीर्तितं गोदाने चान्न
दाने च भूयस्तद्ब्रूहि कौरव ५ भीष्म उवाच शृणुष्व मम कौंतेय तिलदानस्य यत्फलं निशम्य च यथान्यायमयच्छ कुरुसत्तम ६
पितॄणां परमं भोज्यं तिलाः सृष्टाः स्वयंभुवा तिलदानेन वै तस्मात्पितृपक्षः प्रमोदते ७ ॥ ॥ ॥ छ ॥ छ ॥

© Dhamma Trust & K Digitized By eGangotri

दा०
१५५

माघमासेतिलान्यस्तुब्राह्मणेभ्यः प्रयच्छति सर्वसत्वसमाकीर्णंनरकंसनपश्यति ८ सर्वसत्रैश्चयजतेयस्तिलैर्यजतेपितॄन् नचाकामे
नदातव्यंतिलश्राद्धंकदाचन ९ महर्षेःकश्यपस्यैतेगात्रेभ्यः प्रसृतास्तिलाः ततोदिव्यंगताभावंप्रदानेषुतिलाः प्रभो १० पौष्टिकारू
पदाश्चैवतथापापविनाशनाः तस्मात्सर्वप्रदानेभ्यस्तिलदानंविशिष्यते ११ आपस्तंवश्चमेधावीशंखश्चलिखितः तथामहर्षिर्गौ
तमश्चापितिलदानैर्दिवंगताः १२ तिलहोमराताविप्राःसर्वेसंयतमैथुनाः समागव्येनहविषाप्रवृत्तिषुचसंस्थिताः १३ सर्वेषामति
दानानांतिलदानंविशिष्यते अक्षयंसर्वदानानांतिलदानमिहोच्यते १४ उच्छन्नेतुपुराहव्येकुशिकर्षिःपरंतप तिलैरग्नित्रयंहु
त्वाप्राप्तवान्गतिमुत्तमां १५ इतिप्रोक्तंकुरुश्रेष्ठतिलदानमनुत्तमं विधानंयेनविधिनातिलानामिहशस्यते १६ अतऊर्ध्वंनिवोधेदं
देवानांयष्टुमिच्छतां समागमंमहाराजब्रह्मणावैस्वयंभुवा १७ देवाःसमेत्यब्रह्माणंभूमिभागेयियक्षवः शुभंदेशमयाचंतयजेमइति
पार्थिव १८ देवाऊचुः भगवंस्त्वंप्रभुर्भूमेःसर्वस्यत्रिदिवस्यच यजेमहिमहाभागयज्ञंभवदनुज्ञया १९ नाननुज्ञातभूमिर्हियज्ञ
स्यफलमश्नुते त्वंहिसर्वस्यजगतःस्थावरस्यचरस्यच प्रभुर्भवतितस्मात्त्वंसमनुज्ञातुमर्हसि २० ॥ छ ॥ ॥ ॥ छ

राम०
१५५

© Dharmartha Trust J&K. Digitized by eGangotri

२१ इमंहिमवन्संनिहितं प्रदर्शितं २७ हिमवतिहिमवत्समीपेकुरुक्षेत्रेतेषांकुरुक्षेत्रेवेदिरण्हीदितिस्मृतेः गंगाद्वारेवा २७ प्रतिश्रयोवासार्थस्थलं २८

ब्रह्मोवाच ददानिमेदितीभागंभवन्द्योहंसुरर्षभाः यस्मिन्देशेकरिष्यध्वंयज्ञान्काश्यपनंदनाः ३१ देवाऊचुः भगवन्कृतकार्या
स्मयक्ष्महेस्वाप्तदक्षिणैः इमंतुदेशंमुनयःपर्युपासंतिनित्यदा ३२ ततोगस्त्यश्चकण्वश्चभृगुरत्रिर्वृषाकपिः असितोदेवलश्चैव
देवयज्ञमुपागमन् ३३ ततोदेवामहात्मानईजिरेयज्ञमच्युत तथासमापयामासुर्यथाकालंसुरर्षभाः ३४ तइष्टयज्ञास्त्रिदशा
हिमवत्यचलोत्तमे षष्ठमंशंक्रतोस्तस्यभूमिदानंप्रचक्रिरे ३५ प्रादेशमात्रंभूमेस्तुयोदद्यादनुपस्कृतां नसीदतिसकृच्छ्रेषुनचदुर्गा
ण्यवाप्नुते ३६ शीतवातातपसहांगृहभूमिंसुसंस्कृतां प्रदायसुरलोकस्थःपुण्यांतेपिनचाल्यते ३७ मुदितोवसतिप्राज्ञः शक्रेण
सहपार्थिव प्रतिश्रयप्रदानाच्चसोपिस्वर्गेमहीयते ३८ अध्यापककुलेजातःश्रोत्रियोनियतेंद्रियः गृहेयस्यवसेत्तुष्टःप्रधानंलोक
मश्नुते ३९ तथागवार्थेशरणंशीतवर्षसहंदृढं आसप्तमंतारयतिकुलंभरतसत्तम ४० क्षेत्रभूमिंददल्लोकेशुभांश्रियमवाप्नुयात
रत्नभूमिंप्रदद्यात्तुकुलवंशःप्रवर्द्धये ३१ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

दा० ३२ तन्भूमिंपारकीयां हमिंवायोनिर्वयेतपितृभिःपित्र्यैर्यदद्यात्तर्हितत्श्राद्धंतन्भूदानारब्धंकर्मचउभयंविहन्यतेवृथाभवति ३३ तस्मात्क्रीतायां ४३ ॥
१५६

नचोरवरांननिर्दग्धांमहींदद्यात्कथंचन नश्मशानपरीतांचनचपापनिषेवितां ३२ पारकेभूमिदेशेतुपितृणांनिर्वपेन्नृपः तन्भू
मिंवापिपितृभिःश्राद्धकर्मविहन्यते ३३ तस्मात्क्रीत्वामहींदद्यात्स्वल्पामपिविचक्षणाः पिंडःपितृभ्योदत्तोवैतस्यांभवतिशा
श्वतः ३४ अटवीपर्वताश्चैवनदस्तीर्थानियानिच सर्वाण्यस्वामिकान्याहुर्नहितत्रपरिग्रहः ३५ इत्येतन्भूमिदानस्यफलमुक्तं
विशांपते अतःपरंतुगोदानंकीर्तयिष्यामितेनघ ३६ गावोधिकास्तपस्विभ्योयस्मात्सर्वेभ्यएवच तस्मान्महेश्वरोदेवस्तपसाभिः
सहास्थितः ३७ ब्रह्मलोकेवसंत्येताःसोमेनसहभारत यांतांब्रह्मर्षयःसिद्धाःप्रार्थयंतिपरांगतिं ३८ पयसाहविषादध्नाश
कृताचाथचर्मणा अस्थिभिश्चोपकुर्वंतिशृंगैर्वालैश्चभारत ३९ नासांशीतातपौस्यातांसदैताःकर्मकुर्वते नवर्षविषयंवा
पिदुःखमासांभवत्युत ४० ब्राह्मणैःसहितायांतितस्मात्पारमकंपदं एकंगोब्राह्मणांतस्मात्प्रवदंतिमनीषिणः ४१ रंतिदेव
स्ययज्ञेताःपशुत्वेनोपकल्पिताः अतश्चर्मण्वतीराजन्गोचर्मभ्यःप्रवर्तिता ४२ पशुत्वाच्चविनिर्मुक्ताःप्रदानायोपकल्पिताः
ताइमाविप्रमुख्येभ्योयोददातिमहीपते निस्तरेदापदंकृच्छ्रांविषमस्थोपिपार्थिवः ४३ ॥ ॥ ७ ७ ॥ राम० १५६

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

५४ प्रदानंप्रकृष्टंदानं ५५ ५६ ५७ ॥॥

ति ४

गवांसहस्रदः प्रेत्यनरकंनप्रपद्यते सर्वत्रविजयंचापिलभतेमनुजाधिप अमृतंवैगवांक्षीरमित्याहत्रिदशाधिपः तस्माद्ददातियो
धेनुममृतंसंप्रयच्छति ४५ अग्नीनामव्ययंह्येतद्धौम्यंवेदविदोविदुः तस्माद्ददातियोधेनुंसहौम्यंसंप्रयच्छति ४६ स्वर्गोवैमूर्त्ति
मानेषवृषभंयोगवांपतिं विप्रेगुणयुतेदद्यात्सवैस्वर्गेमहीयते ४७ प्राणावैप्राणिनामेतेप्रोच्यन्तेभरतर्षभ तस्माद्ददातियोधेनुंप्रा
णानेषप्रयच्छति ४८ गावःशरणंभूतानामितिवेदविदोविदुः तस्माद्ददातियोधेनुंशरणंसंप्रयच्छति ४९ नवधार्थप्रदातव्यान
कीनाशेननास्तिके गोजीविनेनदातव्यातथागौर्भरतर्षभ ५० ददत्सतादृशानांवैनरोगांपापकर्मणां अक्षयंनरकंयातीत्येवमा
हुर्महर्षयः ५१ नकृशांनापवत्सांवावंध्यांरोगान्वितांतथा नव्यंगांनपरिश्रान्तांदद्याद्गांब्राह्मणायवै ५२ दशगोसहस्रदोहि
शक्रेणसहमोदते अक्षयांल्लभतेलोकान्नरःशतसहस्रशः ५३ इत्येतद्गोप्रदानंचतिलदानंचकीर्त्तितं तथाभूमिप्रदानंचशृणु
ष्वान्नेचभारत ५४ अन्नदानंप्रदानंहिकौन्तेयपरिचक्षते अन्नस्यहिप्रदानेननरंतिदेवोदिवंगतः ५५ श्रान्तायक्षुधितायान्नंयः
प्रयच्छतिभूमिप स्वायंभुवंमहत्स्थानंसगच्छतिनराधिप ५६ नहिरण्यैर्नवासोभिर्नान्यदानेनभारत प्राप्नुवंतिनराःश्रेयोयथाह्य
न्नप्रदःप्रभो ५७

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

६० कौमुदे कार्त्तिके ६४ अध्यायः श्रुतं १ २ ३ ४ ६ ॥ ७ ॥ ७

अन्नं वै प्रथमं द्रव्यमन्नं श्रीश्च परा मता अन्नात्प्राणाः प्रभवन्ति तेजो वीर्यं बलं तथा ५८ सद्यो ददाति यश्चान्नं सदैकाग्रमना नरः
न स दुर्गाण्यवाप्नोतीत्येवमाह पराशरः ५९ अर्चयित्वा यथान्यायं देवेभ्योऽन्नं निवेदयेत् यदन्ना हि नरा राजंस्तदन्नास्तस्य देवताः
६० कौमुद्यां शुक्लपक्षे तु योऽन्नदानं करोत्युत स संतरति दुर्गाणि प्रेत्य चानन्त्यमश्नुते ६१ अभुक्त्वातिथये चान्नं प्रयच्छेद्यः समा
हितः स वै ब्रह्मविदां लोकान्प्राप्नुयान्नरर्षभ ६२ सुकृच्छ्रामापदं प्राप्तश्चान्नदः पुरुषस्तरेत् पापं तरति चैवेह दुष्कृतं चापक
र्षति ६३ इत्येतदन्नदानस्य तिलदानस्य चैव ह भूमिदानस्य च फलं गोदानस्य च कीर्तितं ६४ इति दानधर्मे पुऊन्नमानुशासने यु
धिष्ठिर उवाच श्रुतं दानफलं तात यत्त्वया परिकीर्तितं अन्नदानं विशेषेण प्रशस्तमिह भारत १ पानीयदानमेवैतत्कथं चेह म
हाफलं इत्येतच्छ्रोतुमिच्छामि विस्तरेण पितामह २ भीष्म उवाच हंत ते वर्तयिष्यामि यथावद्भरतर्षभ गदतस्तन्ममाद्येह शृणु
सत्यपराक्रम ३ पानीयदानात्प्रभृति सर्वं वक्ष्यामि तेऽनघ यदन्नं यच्च पानीयं संप्रदायाश्नुते नरः ४ न तस्मात्परमं दानं किंचिद
स्तीति मे मतिः अन्नात्प्राणभृतस्तात प्रवर्तन्ते हि सर्वशः ५ तस्मादन्नं परं लोके सर्वलोकेषु कथ्यते अन्नाद्बलं च तेजश्च प्राणि
नां वर्द्धते सदा ६

© Dharmartha Trust J&K. Digitized By eGangotri

११ नीरजातेनतलोमस्वेनथ्यानादिना १९ अध्यायःतिलानां १

अन्नदानमतस्तस्माच्छ्रेष्ठमाहप्रजापतिः सावित्र्यापिचकौंतेयश्रुतंतेवचनंशुभं यतश्चयघथाचैवदेवसत्रेमहामते अन्नेदत्तेनरेणेह
प्राणादत्ताभवंत्युत ८ प्राणदानाद्धिपरमंनदानमिहविद्यते श्रुतंहितेमहाबाहोलोमशस्यापितद्वचः ९ प्राणान्दत्वाकपोतायय
त्प्राप्तंशिविनापुरा तांगतिंलभतेदत्वाद्विजस्यान्नंविशांपते १० तस्माद्विशिष्टांगच्छंतिप्राणदाइतिनःश्रुतं अन्नंचापिप्रभवतिपा
नीयात्कुरुसत्तम ११ नीरजातेनहिविनानकिंचित्संप्रवर्त्तते नीरजातश्चभगवान्सोमोग्रहगणेश्वरः १२ अमृतंचसुधाचैवसुधाचै
वामृतंतथा अन्नौषध्योमहाराजवीरुधश्चजलोद्भवाः १३ यतःप्राणभृतांप्राणाःसंभवंतिविशांपते देवानाममृतंह्यन्नंनागानां
वसुधातथा १४ पितॄणांचस्वधाप्रोक्तापशूनांचापिवीरुधः अन्नमेवमनुष्याणांप्राणानाहुर्मनीषिणः १५ तच्चसर्वंनरव्याघ्रपा
नीयात्संप्रवर्त्तते तस्मात्पानीयदानाद्वैनपरंविद्यतेक्वचित् १६ तच्चदद्यान्नरोनित्यंयदीच्छेद्भूतिमात्मनः धन्यंयशस्यमायुष्यंजलदा
नमिहोच्यते तोयदोमनुजव्याघ्रस्वर्गंगत्वामहाद्युते अक्षयान्समवाप्नोतिलोकानित्यब्रवीन्मनुः १९ इतिदानधर्मेषुउत्तमानु
शासने युधिष्ठिरउवाच तिलानांकीदृशंदानमथदीपस्यचैवहि अन्नानांवाससांचैवभूयएवब्रवीहिमे १॥ ॥ ॥

दा० ११८ ११ इहयमलोके १२ कालस्यविहितंप्राप्तुःसमाशांनप्राप्नोमिनजानामि। कालेनाप्रवर्तितं [illegible] त्वामिहस्थापयितुंशक्नोमीत्सर्पः १३

व

भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं ब्राह्मणस्यचसंवादंयमस्यचयुधिष्ठिर २ मध्यदेशेमहान्ग्रामोब्राह्मणानांभ
वह गंगायमुनयोर्मध्येयामुनस्यगिरेरधः ३ पर्णशालेतिविख्यातोरमणीयोनराधिप विद्वांसस्तत्रभूयिष्ठाब्राह्मणाश्चावसंस्तथा
४ अथप्राहयमःकंचित्पुरुषंकृष्णवाससं रक्ताक्षमूर्ध्वरोमाणंकाकजंघाक्षिनासिकं ५ गच्छत्वंब्राह्मणग्रामंततोगत्वातमा
नय अगस्त्यंगोत्रतश्चापिनामतश्चापिशर्मिणं ६ शमनिविष्टंचविद्वांसमध्यापकमनावृतं माचान्यमानयेथास्त्वंसगोत्रंत
स्यपार्श्वतः ७ सहितादृग्गुणास्तेनतुल्योध्ययनजन्मना अपत्येषुतथावृत्तेसमस्तेनैवधीमता ८ तमानययथोद्दिष्टंपूजाका
र्योहितस्यवै सगत्वाप्रतिकूलंतच्चकारयमशासनं ९ तमाक्रम्यानयामासप्रतिषिद्धोयमेनयः तस्मैयमःसमुत्थायपूजांकृत्वा
चवीर्यवान् १० प्रोवाचनीयतामेषसोन्यआनीयतामिति एवमुक्तेतुवचनेधर्मराजेनसद्विजः ११ उवाचधर्मराजानंनिर्विण्णोध्ययने
नवै योमेकालोभवेच्छेषस्तंवसेयमिहाच्युत १२ यमउवाच नाहंकालस्यविहितंप्राप्नोमीहकथंचन योहिधर्मंचरतिवैतंतुजा दान० १५८
नामिकेवलं १३॥

ब्रूहिदृष्ट १६ निर्वर्तयंति साधयंति १८ आलंभनं सर्वतः स्पर्शनं उद्वर्तनमित्यर्थः १९ २० २१

गच्छ विप्र त्वमद्यैव आलयं स्वं महामुने ब्रूहि सर्वं यथा सर्वं करवाणि किमच्युत १४ ब्राह्मण उवाच यत्त्वत्र कृत्वा सुमहत्पुण्यं स्यात्त
द्ब्रवीहि मे सर्वस्य हि प्रमाणं त्वं त्रैलोक्यस्यापि सत्तम १५ यम उवाच शृणु तत्त्वेन विप्रर्षे प्रदानविधिमुत्तमं तिलाः परमकं दानं पुण्यं
चैवेह शाश्वतं १६ तिलाश्च संप्रदातव्या यथाशक्ति द्विजर्षभ नित्यदानात्सर्वकामांस्तिला निर्वर्तयंत्युत १७ तिलाः श्राद्धे प्रशंसंति दान
मेतद्ध्यनुत्तमं तांस्त्वं प्रयच्छस्व विप्रेभ्यो विधिदृष्टेन कर्मणा १८ वैशाख्यां पौर्णमास्यां तु तिलान्दद्याद्द्विजातिषु तिला भक्षयितव्याश्च सदा
त्वालंभनं चैतैः १९ कार्यं सततमिच्छद्भिः श्रेयः सर्वात्मना गृहे तथापः सर्वदा देयाः पेयाश्चैव न संशयः २० पुष्करिण्यस्तडागानि कूपांश्चैवात्र
खानयेत् एतत्सुदुर्लभतरमिह लोके द्विजोत्तम २१ आपो नित्यं प्रदेयास्ते पुण्यं ह्येतदनुत्तमं प्रपाश्च कार्या दानार्थं नित्यं ते द्विजसत्तम भुक्तेप्य
न्नं प्रदेयं तु पानीयं वै विशेषतः २२ भीष्म उवाच इत्युक्ते स तदा तेन यमदूतेन वै गृहान् नीतश्च कारयामास सर्वं तद्यमशासनं २३ नीत्वा
तं यमदूतोपि गृहीत्वा शर्मिणं तदा ययौ स धर्मराजाय न्यवेदयत चापि तं २४ तं धर्मराजो धर्मज्ञः पूजयित्वा प्रतापवान् कृत्वा च संविदं तेन विसस
र्ज यथागतं २५ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

दा०
१५९

रत्नेति तस्मै रत्नदानं कर्त्तव्यं यस्मात् तानि विक्रीय यज्ञं करोति एतद्द्विजस्याभयंकरं प्रतिग्रहविक्रयजदोषहरं ३४ अध्यायः श्लो० पः १

तस्यापि च यमः सर्वमुपदेशं चकार ह प्रेतेभ्यश्च ततः सर्वं चकारैकं यमेन तत् २६ तथा प्रशंसते दीपान्यमः पितृहितेप्सया तस्माद्दीपप्रदो नित्यं संता
रयति वै पितॄन् २७ दातव्याः सततं दीपास्तस्माद्भरतसत्तम देवतानां पितॄणां च चक्षुष्यं चात्मनो विभो २८ रत्नदानं च सुमहत्पुण्यमुक्तं जना
धिप यस्तान्विक्रीय यजते ब्राह्मणो ह्यभयंकरं २९ यद्वै ददाति विप्रेभ्यो ब्राह्मणः प्रतिगृह्य वै उभयोः स्यात्तदक्षय्यं दातुरादातुरेव च ३०
यो ददाति स्थितः स्थित्यां तादृशाय प्रतिग्रहं उभयोरक्षयं धर्मं तं मनुः प्राह धर्मवित् ३१ वाससां संप्रदानेन स्वदारनिरतो नरः सुवर्णस्त्रसु
वेशश्च भवतीत्यनुशुश्रुम ३२ गावः सुवर्णं च तथा तिलाश्चैवानुवर्णिताः बहुशः पुरुषव्याघ्र वेदप्रामाण्यदर्शनात् ३३ विवाहांश्चै
व कुर्वीत पुत्रानुत्पादयेत च पुत्रलाभो हि कौरव्य सर्वलाभाद्विशिष्यते ३४ इति दानधर्मेषु उत्तमानुशासने युधिष्ठिर उवाच भूय ए
व कुरुश्रेष्ठ दानानां विधिमुत्तमं कथयस्व महाप्राज्ञ भूमिदानं विशेषतः १॥ ॥ ॥ ॥

राम०
१५९

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

इष्टिकर्मिणो याज्ञिकाय ३ तुल्यनामानि गोपदवाच्यानि ५ देयं दानयोग्यं परं श्रेष्ठं ८ प्रचोदनमिति गवां बलीवर्दानां कर्मस्कयज्ञाद्येर्थेषु हलाद्यर्थेषु कर्षणादिषु वर्तनं तां प्रचोदनं प्रतो
दनं प्रेरणं दैवैः कृतमिति न तत्र दोष इति भावः तथापि पूर्वं यज्ञार्थमेव चोदनं अक्षरं श्रेयस्करं अन्यत्र हलाद्यर्थं तु ततः परं वैदिककर्षणमनुप्रवृत्तं अभिधेयं वाच्यं निंद्यमित्यर्थः तेन गोद्रोह

पृथिवीं क्षत्रियो दद्याद्ब्राह्मणायेष्टिकर्मिणे विधिवत्प्रतिगृह्णीयान्नत्वन्यो दातुमर्हति २ सर्ववर्णैस्तु यच्छक्यं प्रदातुं फलकांक्षिभिः
वेदे वा यत्समाख्यातं तन्मे व्याख्यातुमर्हसि ३ भीष्म उवाच तुल्यनामानि देयानि त्रीणि तुल्यफलानि च सर्वकामफलानीह गावः पृ
थ्वी सरस्वती ४ यो ब्रूयाच्चापि शिष्याय धर्म्यां ब्राह्मीं सरस्वतीं पृथिवीगोप्रदानाभ्यां तुल्यं स फलमश्नुते ५ तथैव गाः प्रशंसंति
न तु देयं ततः परं सन्निकृष्टफलास्ता हि लघ्वर्थाश्च युधिष्ठिर ६ मातरः सर्वभूतानां गावः सर्वसुखप्रदाः वृद्धिमाकांक्षता नित्यं
गावः कार्याः प्रदक्षिणाः ७ संताड्या न तु पादेन गवां मध्ये न च व्रजेत् मंगलायतनं देव्यस्तस्मात्पूज्याः सदैव हि ८ प्रचोदनं देवकृ
तं गवां कर्मसु वर्तते पूर्वमेवाक्षरं चान्यदभिधेयं ततः परं ९ ॥ ॥ ॥ ॥ ॥

कारित्वात्कृष्यर्थं कर्षणं दोषावहमित्यर्थः तथा च स्मृतिः हत्वा तत्र ब्रह्मवर्चसमिति ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Dharmartha Trust J&K. Digitized By eGangotri

प्रचारेपत्तापनेनिपातकठिनोपवेशने अभिवीक्ष्यंत्तोजलमलभमानाः ११ आहारंतआद्याहरणमकृत्वा १९ वेदांतनिष्ठस्याहृत्तिंसज्जतेतस्तुत्तेरणान्वेपः ॥॥

प्रचारेवानिवातेवाबुधोनोद्विजेयतगाः तृषिताह्यभिवीक्षंत्योनरंहन्युःसबांधवं १० पितृसद्मानिसततंदेवतायतनानिच पूयंतेशकृता
यासांपूतंकिमधिकंततः ११ ग्रासमुष्टिंपरगवेदद्यात्संवत्सरंतुयः अकृत्वास्वयमाहारंव्रतंतत्सार्वकामिकं १२ सहिपुत्रान्यशोर्थंच
श्रियंचाप्यधिगच्छति नाशयत्यशुभंचैवदुःस्वप्नंचाप्यपोहति १३ युधिष्ठिरउवाच देयाःकिंलक्षणागावःकास्वापिपरिवर्ज्ज
येत् कीदृशायप्रदातव्यानदेयाःकीदृशायच १४ भीष्मउवाच असद्वृत्तायपापायलुब्धायानृतवादिने हव्यकव्यव्यपेता
यनदेयागौःकथंचन १५ भिक्षवेबहुपुत्रायश्रोत्रियायाहिताग्नये दत्वादशगवांदातालोकानाप्नोत्यनुत्तमान् १६ यश्चैवध
र्मंकुरुतेतस्यधर्मफलंचयत् सर्वस्यैवांशभाग्दातातन्निमित्तंप्रवृत्तयः १७ यश्चैनमुत्पादयतेयश्चैनंत्रायतेभयात् यश्चास्य
कुरुतेवृत्तिंसर्वेतेपितरस्त्रयः १८ कल्मषंगुरुशुश्रूषाहंतिमानोमहद्यशः अपुत्रतांत्रयःपुत्राअवृत्तिंदशधेनवः १९ वेदांत
निष्ठस्यबहुश्रुतस्यप्रज्ञानतृप्तस्यजितेंद्रियस्य शिष्टस्यदांतस्ययतस्यचैवभूतेषुनित्यंप्रियवादिनश्च २० ॥ ॥ ॥ ॥

चतुर्थ्यपेषष्टी २० २० २० ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

यस्तिब्राह्मणोपदिक्षुस्यादिकर्म करोति तं हिंसन्स्यपापमितार्यः २२ अध्यायः अत्रैवः २ जलार्थिनः तस्मिन्कलासे ददृशुरिलग्निमेराज्ञ्य॥ ७ ॥

यः क्षुद्रस्यांदेन विकर्म कुर्यान्मृत्युश्च शान्तो ह्यतिपिप्रिपश्च हन्ति द्विजा यातिस्तेन तस्मैयस्कृत्याशीलश्च सपुत्रदारः २१ शुभे
पात्रे ये गुणा गोप्रदाने तावान्दोषो ब्राह्मणस्वापहारे सर्वावस्थं ब्राह्मणस्वापहारो दाराश्चैषां दूरतो वर्जनीयाः २२ इति दान
धर्मेषु भीष्म उवाच अत्रैव कीर्त्यते सद्भिर्ब्राह्मणस्वाभिमर्षणे नृगेण सुमहत्कृछ्रं यदवाप्तं कुरूद्वह १ निविशंत्यां
पुरा पार्थ द्वारवत्यामिति श्रुतिः अदृश्यत महाकूपस्तृणवीरुत्समावृतः २ प्रयत्नं तत्र कुर्वाणास्तस्मात्कूपाज्जलार्थि
नः श्रमेण महता युक्तास्तस्मिंस्तोये सुसंवृते ३ ददृशुस्ते महाकायं कृकलासमवस्थितं तस्य चोद्धरणे यत्नमकुर्वंस्ते
सहस्रशः ४ प्रगृह्य हेमवर्णपट्टैश्चर्मतंतुवर्ध्याप वर्तोपमं नाशक्नुवन्समुद्धर्तुं ततो जग्मुर्जनार्दनं ५ खमावृत्योदपानस्य कृक
लासः स्थितो महान् तस्य नास्ति समुद्धर्ता इति तत्कृष्णन्यवेदयन् ६

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

दा० स वासुदेवेन समुद्धृतश्च श्वभ्रस्थ कार्यं निजगाद राजा नृगस्तदात्मानमथो न्यवेदयत्सुरान्नतं यज्ञसहस्रयाजिनं ७ तथा ब्रुवाणं तु तमाह माधवः
१६१ शुभं त्वया कर्म कृतं न पापकं कथं भवान्दुर्गतिमीदृशीं गतो नरेंद्र तद्ब्रूहि किमेतदीदृशं ८ शतं सहस्राणि गवां शतं पुनः पुनः शतान्यष्ट
शतायुतानि त्वया पुरा दत्तमितीह सुश्रुम नृपद्विजेभ्यः क्वनु तद्गतं तव ९ नृगस्ततोऽब्रवीत्कृष्णं ब्राह्मणस्याग्निहोत्रिणः प्रोषितस्य परिभ्र
ष्टा गौरेका मम गोधने १० गवां सहस्रे संख्याता तदा सा पशुपैर्मम सा ब्राह्मणाय मे दत्ता प्रेत्यार्थमभिकांक्षता ११ अपश्यत्परिमार्गं
श्च मां गां परगृहे द्विजः ममेयमिति चोवाच ब्राह्मणो यस्य साभवत् १२ तावुभौ समनुप्राप्तौ विवदंतौ भृशं ज्वरौ भवान्दाता भवा
न्हर्तेति यतौ मामवोचतां १३ शतेन शतसंख्येन गवां विनिमयेन वै याचे प्रतिगृहीतारं स तु मामब्रवीदिदं १४ देशकालो
पसंपन्ना दोग्ध्री क्षांतातिवत्सला स्वादुक्षीरप्रदा धन्या मम नित्यं निवेशने १५ कृशं च भरते सा गौर्मम पुत्रमपस्तनं न सा शक्या म
या दातुमित्युक्त्वा स जगाम ह १६ ततस्तमपरं विप्रं याचे विनिमयेन वै गवां शतसहस्रं हि तत्कृते गृह्यतामिति १७ ॥ दा०
१६१

© Dharmartha Trust J&K. Digitized By eGangotri

२२ अन्तात् ब्राह्मणधेनोर्नाशात् तस्मात् स्वस्य आदानात् २३ कृच्छ्रं चरिष्ये पापफलं मोक्ष्ये २६ त्मानं आत्मानं संधिशिराषः २७ २८

ब्राह्मण उवाच न राजन्प्रतिगृह्णामि शक्तोहं स्वस्य मार्गणे सैव गौर्दीयतां शीघ्रं ममेति मधुसूदन १८ रुक्ममश्वांश्च ददतो रजतं स्पं
दनांस्तथा न जग्राह ययौ चापि तदा स ब्राह्मणर्षभः १९ एतस्मिन्नेव काले तु चोदितः कालधर्मणा पितृलोकमहं प्राप्य धर्मराजमु
पागमं २० यमस्तु पूजयित्वा मां ततो वचनमब्रवीत् नांतः संख्यायते राजंस्तव पुण्यस्य कर्मणः २१ अस्ति चैव कृतं पापमज्ञाना
त्तदपि त्वया चरस्व पापं पश्चाद्वा पूर्वं वा त्वं यथेच्छसि २२ रक्षितास्मीति चोक्तं ते प्रतिज्ञा चानृता तव ब्राह्मणस्वस्य चादानं द्विवि
धस्ते व्यतिक्रमः २३ पूर्वं कृच्छ्रं चरिष्येहं पश्चाच्छुभमिति प्रभो धर्मराजं ब्रुवन्नेवं पतितोस्मि महीतले २४ अश्रौषं पतित
श्चाहं यमस्योच्चैः प्रभाषतः वासुदेवः समुद्धर्ता भविता ते जनार्दनः २५ पूर्णे वर्षसहस्रांते क्षीणे कर्मणि दुष्कृते प्राप्स्यसे शाश्वतां
ल्लोकान्जितान्स्वेनैव कर्मणा २६ कूपेत्मानमधःशीर्षमपश्यं पतितश्च ह तिर्यग्योनिमनुप्राप्तं न च मामजहात्स्मृतिः २७ त्वया
तु तारितोस्म्यद्य किमन्यत्र तपोबलात् अनुजानीहि मां कृष्ण गच्छेयं दिवमद्य वै २८ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

३२ अध्यायः दत्तानां ४ अतिभोजनंभोजनसामग्रीकेशाकादि ५ ६ ॥

अनुज्ञातःसकृष्णेननमस्कृत्यजनार्दनं विमानंदिव्यमास्थायययौदिवमरिंदम २९ ततस्तस्मिन्दिवंयातेनृगेभरतसत्तम वासुदेवइमं
श्लोकंजगादकुरुनंदन ३० ब्राह्मणस्वंनहर्तव्यंपुरुषेणविजानता ब्राह्मणस्वंहृतंहंतिनृगंब्राह्मणगौरिव ३१ सतांसमागमः
सन्निष्फलःपार्थविद्यते विमुक्तंनरकात्पश्यनृगंसाधुसमागमात् ३२ प्रदानंफलवत्तत्रद्रोहस्तत्रतथाफलः अपचारंग
वांतस्माद्वर्जयेत युधिष्ठिर ३३ इतिदानधर्मेषुउत्तमानुशासने युधिष्ठिरउवाच दत्तानांफलसंप्राप्तिंगवांप्रब्रूहिमेनघ विस्तरेण
महाबाहोनहितृप्यामिकथ्यतां १ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं ऋषेरुद्दालकेर्वाक्यंनाचिकेतस्यचोभ
योः २ ऋषिरुद्दालकिर्दीक्षामुपगम्यततःसुतं त्वंमामुपचरस्वेतिनाचिकेतमभाषत ३ समाप्तेनियमेतस्मिन्महर्षिःपुत्रमब्रवी
त् उपस्पर्शनसक्तस्यस्वाध्यायाभिरतस्यच ४ इध्मादर्भाःसुमनसःकलशश्चातिभोजनं विस्मृतंमेतदादायनदीतीरादिहाव्रज
५ गत्वानवाप्यतत्सर्वंनदीवेगसमाप्लुतं नपश्यामितदित्येवंपितरंसोब्रवीन्मुनिः ६ ॥ ॥ ७ ॥ ७

© Dhamartha Trust J&K. Digitized By eGangotri

गतसत्त्वोमतः १० ससंभ्रमुत्थमाणां १४ योजनेनितिलुप्तत्तीमार्कपदंयोजनैः सहस्रशः संमितामितिशेषः १५ त्रसैमेत्रासनंदेहीतिसम्भ्रमःसंप्रादिदेश १६

क्षुत्पिपासाश्रमाविष्टोमुनिरुद्दालकिस्तदा मर्मपश्येपतितंपुत्रमशपत्सुमहातपाः ७ तथासपित्राभिहितोवाग्वज्रेणाहृतो
ञ्जलिः प्रसीदेतिब्रुवन्नेवगतसत्त्वोपतन्भुवि ८ नाचिकेतंपिताद्दृष्ट्वापतितंदुःखमूर्छितः किंमयाकृतमित्युक्त्वानिपपात
महीतले ९ तस्यदुःखपरीतस्यस्वपुत्रमनुशोचतः व्यतीतंतदहःशेषंसाचोग्रातत्रशर्वरी १० पित्र्येणाश्रुप्रपातेननाचि
केतःकुरूद्वह प्रास्पंदच्छयनेकौश्येवृष्ट्यासस्यमिवाप्लुतं ११ सपर्यपृच्छत्तंपुत्रंक्षीणंपर्यागतंपुनः दिव्यैर्गंधैःसमादिग्धं
क्षीणस्वप्नमिवोत्थितं १२ अपिपुत्रजितालोकाःशुभास्तेस्वेनकर्मणा दिष्ट्याचासिपुनःप्राप्तोनहितेमानुषंवपुः १३ प्रत्यक्षद
र्शीसर्वस्यपित्रापृष्टोमहात्मना सतांवार्त्तांपितुर्मध्येमहर्षीणांन्यवेदयत् १४ कुर्वन्भवच्छासनमाशुयातोह्यहंविशालांरुचि
रप्रभावां वैवस्वतींप्राप्यसभामपश्यंसहस्रशोयोजनहेमभासं १५ दृष्ट्वैवमामभिमुखमापतंतंदेहीतिसह्यासनमादिदेश वैव
स्वतोर्घ्यादिभिरर्हणैश्चभवत्कृतेपूजयामासमांसः ॥ ॥

२२ अनेकशतानिभौमानिउपर्युपरिभूमिसमष्ठापेषुतानिमासादमंडलानि २३ २४ २५

ततस्त्वहंतंशनकैरवोचंत्वतः सहस्रैरभिपूज्यमानः प्राप्तोस्मितेविषयंधर्मराजलोकानहेयानहतान्विधत्स्व १७ यमोब्रवीन्मान्त्वम
तोसिसौम्ययंत्वंपश्येत्ताहसत्वांतपस्वी पितापदीप्ताग्निसमानतेजानतच्छक्यमनृतंविप्रकर्तुं १८ दृष्टस्तेहंप्रतिगच्छस्वतातशो
चत्यसौतवदेहस्यकर्ता ददानिकिंचापिमनःप्रणीतंप्रियातिथेस्तवकामान्वृणीष्व १९ तेनैवमुक्तस्तमहंप्रत्यवोचंप्राप्तोस्मिते
विषयंदुर्निवर्त्यं इच्छाम्यहंपुण्यकृतांसमृद्धांल्लोकांस्तेहंप्रदिष्टुंवरार्हः २० यानंसमारोप्यतुमांसदेवोवाहैर्युक्तंसुप्रभंभानुमत्तत्
संदर्शयामासततदास्मलोकान्सर्वांस्तथापुण्यकृतांद्विजेंद्र २१ अपश्यंतत्रवेश्मानितैजसानिमहात्मनां नानासंस्थानरूपाणि
सर्वरत्नमयानिच २२ चंद्रमंडलशुभ्राणिकिंकिणीजालवंतिच अनेकशतभौमानिसांतर्गुल्मवनानिच २३ वैडूर्यार्कप्र
काशानिरूप्यरुक्ममयानिच तरुणादित्यवर्णानिस्थावराणिचराणिच २४ भक्ष्यभोज्यमयाञ्शैलान्वासांसिशयनानिच स
र्वकामफलांस्तत्रवृक्षान्भवनसंस्थितान् २५ २५ २५ ॥ ॥ ॥ ॥ ॥ ॥

२६ गवांश्रान्तं च नोन्मत्तारत्तमं श्रवद् ३० क्षुत्क्षामा याः संकराजनिरोधात्मुक्ताः पोषणार्थं दरिद्रागारादागताः तादृशीनां पालनं प्रशस्ततरमिसर्पः ३१

नधावीष्यः समावाप्य दीर्घिकास्त्वेव सर्वशः घोषवंति च पानानि युक्तान्यप्यसहस्रशः २६ क्षीरस्रवा वै सरितो गिरीश्च सर्पिस्तथा विमलं चापि तो
यं वैवस्वतस्यानुमतांश्च देशानदृष्टपूर्वान्सुबहूनपश्यं २७ सर्वान्दृष्ट्वा तदहं धर्मराजमवोचं वै प्रभविष्णुं पुराणं क्षीरस्यैताः सर्पिषश्चैव न
द्यः शश्वत्स्रोताः कस्य भोज्याः प्रदिष्टाः २८ यमोऽब्रवीद्विद्धि भोज्यास्त्वमेता ये दातारः साधवो गोरसानां अन्ये लोकाः शाश्वता वीतशोकैः
समाकीर्णा गोप्रदाने रतानां २९ न त्वेतासां दानमात्रं प्रशस्तं पात्रं कालो गोविशेषो विधिश्च ज्ञात्वा देयं विप्र गवान्तरं हि दुःखं ज्ञातुं पाव
कादित्यभूतं ३० स्वाध्यायवान्योऽतिमात्रं तपस्वी वैतानस्थो ब्राह्मणः पात्रमासां क्षुत्क्षामाः स्युः पोषणाभ्यागतास्त्वं द्वारैरेतैर्गोविशेषाः
प्रशस्ताः ३१ तिस्रो रात्रस्त्वद्भिरुपोष्य भूमौ तृप्ता गावस्तर्पितेभ्यः प्रदेयाः वत्सैः प्रीताः सुप्रजाः सोपचारास्त्र्यहं दत्त्वा गोरसैर्वर्ति
तव्यं ३२

तिस्रइति त्र्यहं अस्मान्नाहारो भूमिशायी भूत्वा चतुर्थदिनमारभ्य त्र्यहं एकैकां गां दत्त्वा गोरसैर्वर्तितं कुर्वीत एवं व्रतपूर्वकं गां प्रददतः उक्तं वक्ष्यमाणं च फलं भवती
त्यर्थः ३२ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

३४ वृद्धेश्चानेरोगिणिशिपथ्याशनार्थंसंभ्रमेदुर्भिक्षेमहार्थेपन्नाधर्थेचमसस्ताप्पुत्रजन्मनि ३५ वालपुष्पाभिप्रायेरावा ऋंतः वहुदुग्धाःशांतेत्पादिगुणा वेले

दत्वाधेनुंसुव्रतांकांस्यदोहांकल्याणवत्सामपलायिनींच यावंतिरोमाणिभवंतितस्यास्तावद्वर्षाणिपश्नुतेस्वर्गलोकं ३३ तथानद्वाहंब्राल
णेभ्यःप्रदायदांतंधुर्यंवलवंतंयुवानं कुलानुजीव्यंवीर्यवंतंवृहंतंभुंक्तेलोकान्संमितान्धेनुदस्य ३४ गोषुक्षांतंगोशरण्यंकृतज्ञंव
त्तिग्लानंतादृशंपात्रमाहुः वृद्धेग्लानेसंभ्रमेवामहार्थेकृष्यार्थेवाहोमहेतोप्रसूत्यां ३५ गुर्वर्थेवावालपुष्ट्याभिषंगाद्गांवैदातुंदेशेकालो
विशिष्टः अंतर्जाताःसक्रयज्ञानलब्धाःप्राणक्रीतानिर्जिताश्चौदकाश्च ३६ नाचिकेतउवाच श्रुत्वावैवस्वतवचस्तमहंपुनरब्रुवं
अभावेगोप्रदाःशर्मकथंलोकान्हिगच्छति ३७ ततोब्रवीद्यमोधीमान्गोप्रदानपरांगतिं गोप्रदानानुकल्पंतुगामृतेसंतिगोप्रदा
ः ३८ अलाभेयोगवांदद्याद्घृतधेनुंप्रयत्नतः तस्यैताघृतवाहिन्यःक्षरंतेवत्सलाइव ३९ घृतालाभेतुयोदद्यात्तिलधेनुंय
तव्रतः सदुर्गात्तारितोधेन्वाक्षीरनद्यांप्रमोदते ४० तिलालाभेतुयोदद्याज्जलधेनुंयतव्रतः सकामप्रवहांशीतांनदीमेतामुपाश्नुते ४१

नशात्मः श्रीरामरामराम राम राम ॥ ॥ ॥ ॥ ७ ॥ ॥ ॥ ॥

७७ कन्तुः गोदानरूपः ७८ प्रापणीयं गोः आहारादेकाम्याष्टम्यां ७९ गोप्रयुक्तं रपशकगृदि ५०

एवमेतानि मेतत्र धर्मराजो न्यदर्शयत् दृष्ट्वा च परमं हर्षमवापमहमच्युत ७२ निवेदयेतानि मिमंमियं तेक्रतुर्महानन्यधनप्रचारः प्रा
प्तोमयातात समग्रस्ततः प्रपन्नस्ते वेदविधिः प्रहृतः ७३ शापो ह्ययं भवतो नुग्रहाय प्राप्तो मया यत्र दृष्टो यमो वै दानव्युष्टिं तत्र च
दृष्ट्वा महात्मन्निःसंदिग्धां दानधर्मांश्चरिष्ये ७४ इदं च मामब्रवीद्धर्मराजः पुनः पुनः संप्रहृष्टो महर्षे दानेन यः प्रयतो भूत्सदैव विशेष
तो गोप्रदानं च कुर्यात् ७५ शुद्धो ह्यर्थो नावमन्यः स्वधर्मान्पात्रे देयं देशकालोपपन्ने तस्माद्गावस्तेन नित्यमेव प्रदेया मा भूच्चात्र सं
शयः कश्चिदत्र ७६ एताः पुरा ह्यददन्नित्यमेव शान्तात्मानो दानपथे निविष्टाः तपांस्युग्राण्यप्रतिशंकमाना स्ते वै दानं प्रददुश्चैव
शक्त्या ७७ काले च शक्त्या मत्सरं वर्जयित्वा शुद्धात्मानः श्राद्धिनः पुण्यशीलाः दत्त्वा गां वै लोकममुं प्रपन्ना देदीप्यन्ते पुण्यशीला
स्तु लोके ७८ एतद्दानं न्यायलब्धं द्विजेभ्यः पात्रे दत्तं प्रापणीयं परीक्ष्य काम्याष्टम्यां वर्तितव्यं दशाहं रसैर्गवां शकृता प्रस्नवे
न ७९ देवव्रती स्याद्वृषभप्रदानैर्वेदावाप्तिर्गोयुगस्य प्रदाने तीर्थावाप्तिर्गोप्रयुक्तप्रदाने पापोत्सर्गः कपिलायाः प्रदाने ५०

© (O) Dharmartha Trust J&K. Digitized By eGangotri

पा हार्दं हृत्संभ्रमश्च पानकंडूयनादिकं कर्तुं न शक्नोति नानुसरति ५३ गवां सूर्यरश्मिसाम्याद्भ्राऽदः सूर्य इवाहमेत्येति ५४ विधिं गुर्वीराधनपरं विधयो गोधानविधयः संविशंती

गामप्येकां कपिलां संप्रदाय न्यायोपेतां कलुषाद्विप्रमुच्येत् गवां रसात्परमं नास्ति किंचिद्गवां दानं सुमहत्तद्वदंति ५१ गावो लोकां
स्तारयंति क्षरंत्यो गावश्चान्नं संजनयंति लोके यस्तं जानन्न गवां हार्दमेति स वै गंता निरयं पापचेताः ५२ यैस्तु दत्तं गोसहस्रं शतं वा द
शार्धं वा दश वा साधुवत्से अप्येकां वै साधवे ब्राह्मणाय सास्यामुष्मिन्पुण्यतीर्था नदी वै ५३ प्राप्त्या पुष्ट्या लोकसंरक्षणेन गावस्तुल्याः
सूर्यपादैः पृथिव्यां शब्दश्चैकः संनतिश्चोपभोगस्तस्माद्गोदः सूर्य इवावभाति ५४ गुरुं शिष्यो वरयेद्गोप्रदाने स वै गंता नियतं स्वर्गमेव
विधिज्ञानां सुमहान्धर्म एषो विधिं ह्याद्यं विधयः संविशंति ५५ इदं दानं न्यायलब्धं द्विजेभ्यः पात्रे दत्त्वा प्रापयेथाः परीक्ष्य त्वय्याशंस
त्यमराणां नवाश्च वपं चापि प्रसूते पुण्यशीले ५६ इत्युक्तोऽहं धर्मराजं द्विजर्षे धर्मात्मानं शिरसाभिप्रणम्य अनुज्ञातस्तेन वैवस्वतेन
प्रत्यागमं भगवत्पादमूलं ५७ इति दानधर्मेषु यमवाक्यं ॥

त्रिपुणपैहेगुणप्रयुक्तं ५५ द्विजेभ्यस्त्वेवाशीकेभ्यो न्यायलब्धं दत्त्वा पलब्धं दत्त्वा समर्प्य प्रापयेथाः न तु पोषणामात्रार्थं प्रापयेथा इत्यर्थः ५५ ५५ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

उक्तं १५ प्रश्नेपैर्श्यामि [प१] ७ कोगुणः सचकिंस्वित्परमः कांतस्यपराकाष्टेत्यर्थः १२ अध्यायः योयं १

युधिष्ठिरउवाच उक्तंतेगोप्रदानंवैनाचिकेतमृषिंप्रति माहात्म्यमपिचैवोक्तमुद्देशेनगवांप्रभो १ नृगेणचमहद्दुःखमनुभूतंमहात्मना एका
पराधाद्ज्ञातानात्पितामहमहामते २ द्वारवत्यांयथाचासौनिर्विशन्मोसमुद्धृतः मोक्षहेतुरभूत्कृष्णस्तदप्यवधृतंमया ३ किंत्वस्तिममसंदेहोगवांलो
कंप्रतिप्रभो तत्वतःश्रोतुमिच्छामिगोदायत्रवसन्त्युत ४ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं यथापृष्टःपद्मयोनिर्मेतदेवशतक्र
तुः ५ शक्रउवाच स्वर्लोकवासिनांलक्ष्मीमभिभूयस्वयार्चिषा गोलोकवासिनःपश्येव्रजतःसंशयोत्रमे ६ कीदृशाभगवन्लोकागवांत
द्ब्रूहिमेनघ यानावसंतिदातारएतदिच्छामिवेदितुं ७ कीदृशाःकिंफलाःकिंस्वित्परमस्तत्रकोगुणः कथंचपुरुषास्तत्रगच्छंतिविग
तज्वराः ८ किंयत्कालंप्रदानस्यदाताचफलमश्नुते कथंबहुविधंदानंस्यादल्पमपिवाकथम् बहूनांकीदृशंदानमल्पानांवापिकीदृश
म् अदत्वागोप्रदाःसंतिकेनवातच्चशंसमे कथंवाबहुदातास्यादल्पदात्रासमःप्रभो अल्पप्रदाताबहुदःकथंस्विदिहस्यादिहेश्वर ११ कीदृ
शीदक्षिणाचैवगोप्रदानेविशिष्यते एतत्तथ्येनभगवन्ममशंसितुमर्हसि १२ इतिदानधर्मेषुगोप्रदानिके पितामहउवाच योयंप्र
श्नस्त्वयापृष्टोगोप्रदानाधिकारितः नास्मिन्प्रष्टास्तिलोकेस्मिन्त्वत्तोन्योहिशतक्रतो [illegible] १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

दा०
१६६

२३ शरीरन्यासःसमाधिकालेमोक्षःमरणोनिर्मलेनमनसायोगिनोन्यासेमोक्षेचतान् लोकान्पश्यंति २३

संतिनानाविधालोकायांस्त्वंशक्रनपश्यसि पश्यामियानहंलोकानेकपत्नव्रतायास्त्रियः २ कर्मभिश्चापिसुशुभैःसुव्रताऋषयस्तथा सश
रीराहितान्यांतिब्राह्मणाःशुभबुद्धयः ३ शरीरन्यासमोक्षेणमनसानिर्मलेनच स्वप्नभूतांश्चतान्लोकान्पश्यंतीहापिसुव्रताः ४ तेतुलोकाः
सहस्राक्षप्रगुणपादगुणान्विताः नतत्रक्रमतेकालोनजराणनचपावकः ५ तथानास्त्यशुभंकिंचिन्नव्याधिस्तत्रनक्लमः यद्यच्चगावोम
नसातस्मिन्वांछंतिवासव ६ तत्सर्वंप्राप्नुवंतिस्मममप्रत्यक्षदर्शनात् कामगाःकामचारिण्यःकामान्कामांश्चभुंजते ७ वाप्यःसरांसिसरितो
विविधानिवनानिच गृहाणिपर्वताश्चैवयावद्द्रव्यंचकिंचन ८ मनोज्ञंसर्वघृतेभ्यःसर्वंतत्रप्रदृश्यते ईदृशाद्विपुलाल्लोकान्नास्तिलोक
स्तथाविधः ९ तत्रसर्वसहाःक्षांतावत्सलागुरुवर्त्तिनः अहंकारैर्विरहितायांतिशक्रनरोत्तमाः १० यःसर्वमांसानिनभक्षयीतपुमान्प्र
दाभावितोधर्मयुक्तः मातापित्रोरर्चितासत्ययुक्तःशुश्रूषिताब्राह्मणानामनिंद्यः ११ अक्रोधनोगोषुतथाद्विजेषुधर्मेरतोगुरुशुश्रूषक
श्च यावज्जीवंसत्यवृत्तेरतश्चदानेरतोयःक्षमीचापराधे १२ मृदुर्दांतोदेवपरायणाश्चसर्वातिथिश्चापितथादयावान् ईदृग्गुणोमानव
संप्रयातिलोकंगवांशाश्वतंचाव्ययंच १३

राम०
१६६

© Dharmartha Trust J&K. Digitized by eGangotri

२४ नैष्कृतिकः वंचकः शठः समर्थोपिदरिद्रभाषी २० गुरोर्द्विजानांवापराधंसहतेइतिगुरुद्विजसहः २१ गोहन्तिरसंग्रहपरः घासादेरनुकल्पकः संपादकः २५

नपारदारीपश्यतिलोकमेतंनवैगुरुघ्नोनमृषासंप्रलापी सदाप्रवादीब्राह्मणेजातवैरोदोषैरेतैर्यश्चयुक्तोदुरात्मा १४ नमित्रध्रुङ्नैष्कृतिकः
कृतघ्नः शठोनऋजुर्धर्मविद्वेषकश्च नब्रह्महामनसापिप्रपश्येद्गवांलोकंपुण्यकृतांनिवासं १५ एतन्मेसर्वमाख्यातंनिपुणेनसुरेश्वर
गोप्रदानरतानांतुफलंश्रृणुशतक्रतो १६ दातायघलब्धैर्धनैर्यागाः क्रीत्वासंप्रयच्छति धर्मार्जितान्धर्मक्रीतान्सलोकानाप्नुतेक्षपान
१७ योवैद्यूतेधनंजित्वागाः क्रीत्वासंप्रयच्छति सदिव्यमयुतंशक्रवर्षाणांफलमश्नुते १८ दायाद्याघस्यवैगावोन्यायपूर्वैरुपा
र्जितम्नुते १८ दायाद्याद्यस्यवैगावोन्यायपूर्वैरुपार्जिताः प्रदद्यात्ताःप्रदातारःसंभवंत्यक्षयाध्रुवाः १९ प्रतिगृह्यतुयोदद्याद्गाः संशुद्धेनचेतसा
तस्यापीहाक्षयान्लोकान्ध्रुवान्विद्धिशचीपते २० जन्मप्रभृतिसत्यंचयोब्रूयान्नियतेंद्रियः गुरुद्विजसहःक्षांतस्तस्यगोभिः स
मागतिः २१ नजातुब्राह्मणोवाच्योयदवाच्यंशचीपते मनसागोषुनद्रुह्येत्गोवृत्तिर्गोनुकल्पकः २२ सत्येधर्मेचनिरतस्तस्यश
क्रफलंश्रृणु गोसहस्रेणसमितातस्यधेनुर्भवत्युत २३ क्षत्रियस्यगुणैरेतैरेषितुल्यफलंश्रृणु तस्यापिद्विजतुल्यागौर्भवतीत
तिविनिश्चयः २४ वैश्यस्यैतेयदिगुणास्तस्यपंचाशतंभवेत् शूद्रस्यापिविनीतस्यचतुर्भागफलंस्मृतं २५ ॥ ॥ ॥ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

६१

दा० १६७ ३४ संदर्शयेत्तपश्येत् यावद्वत्सांडेगोजातीयमसिताविमेदिसर्पिः ३५

एतच्चैवंयोनुतिष्ठेतपुत्रः सत्येरतोगुरुशुश्रूषयाच दक्षःशांतोदेवतार्थीप्रशांतः शुचिर्बुद्धोधर्मशीलोनहंवाक् २६ महत्फलंप्राप्नुतेस
द्विजायदत्वादोग्ध्रीविधिनानेनधेनुं नित्यंदद्यादेकभक्तःसदाचसत्येस्थितोगुरुशुश्रूषिताच २७ वेदाध्यायीगोषुयोभक्तिमांश्चनि
त्यंदृष्ट्वायोभिनंदेतगाश्च आघातितोयस्तुगवांनमेतइदंफलंशक्रनिबोधतस्य २८ तस्मादिष्ट्वाराजसूयेफलंतुयस्मादिष्ट्वाबहुनाकां
चनेन एतत्तुल्यंफलमप्याहुरग्र्यंसर्वेसंतस्त्वृषयोयेचसिद्धाः २९ योग्रंभक्तंकिंचिदप्राश्यदद्याद्गोभ्योनित्यंगोव्रतीसत्यवादी
शांतोलुब्धोगोसहस्रस्यपुण्यंसंवत्सरेणाप्नुयात्सत्यशीलः ३० यदेकभक्तमश्नीयाद्दद्यादेकंगवांचयत् दशवर्षाण्यनंतानिगो
व्रतीगोनुकंपकः ३१ एकेनैवचभक्तेनयःक्रीत्वागाःप्रयच्छति यावंतितस्यारोमाणिसंभवंतिशतक्रतो ३२ तावत्प्रदानात्सग
वांफलमाप्नोतिशाश्वतं ब्राह्मणस्यफलंहीदंक्षत्रियस्यतुवैश्यराट् ३३ पंचवार्षिकमेवंतुक्षत्रियस्यफलंस्मृतं ततोर्द्धेनतु
वैश्यस्यशूद्रोवैश्यार्द्धतःस्मृतः ३४ यश्चात्मविक्रियंकृत्वागाःक्रीत्वासंप्रयच्छति यावत्संदर्शयेत्तावैसतावत्फलमश्नुते ३५ राम० १६७

© (Dharmartha Trust J&K) Digitized By eGangotri

असाः अक्षपाइतिसंधिरार्षः ४१ अर्जुनीनांगवां ४२ ४४ ४५ ॥ ॥

रोमिणीरोमिणीमहाभागलोकास्तस्यास्ता क्षपाः स्मृताः संग्रामेष्वपि जीवित्वा तु यो वै गाः संप्रयच्छति ३६ आत्मविक्रयतुल्यास्ताः शाश्व
ता विद्धि कौशिक अभावे योगवां दद्यात्तिलधेनुं यतव्रतः दुर्गात्स्मतारितो धेन्वा क्षीरनद्यां प्रमोदते ३७ न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च कालज्ञानं विप्र गवांतरं हि दुःखं ज्ञातुं पावकादित्यभूतं ३८ स्वाध्यायाढ्यं शुद्धयोनिं प्रशांतं वैता
नस्थं पापभीरुं बहुज्ञं गोषु क्षांतं नातितीक्ष्णं शरण्यं वृत्तिग्लानं तादृशं पात्रमाहुः ३९ वृत्तिग्लाने सीदति चातिमात्रं कृष्यर्थे
वा होमहेतोः प्रसूतेः गुर्वर्थं वा बालसंवृद्धये वा धेनुं दद्याद्देशकाले विशिष्टे ४० अंतर्ज्ञाताः शक्रयाज्ञानलब्धाः प्राणैः क्रीता
स्तेजसा यौतकाश्च कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च द्वारैरेतैर्गोविशेषाः प्रशस्ताः ४१ बलान्विताः शीलवयोपपन्नाः सर्वाः
प्रशंसंति सुगंधवत्याः यथा हि गंगा सरितां वरिष्ठा तथार्जुनीनां कपिला वरिष्ठा ४२ तिस्रो रात्रीस्त्वद्भिरुपोष्य भूमौ तृप्ता गावः
स्तर्पितेभ्यः प्रदेयाः वत्सैः पुष्टैः क्षीरपैः सुप्रचारास्त्र्यहं दत्वा गोरसैर्वर्तितव्यं ४३ दत्वा धेनुं सुव्रतां साधुदोहां कल्याणवत्सामप
पलायिनीं च यावंति रोमाणि भवंति तस्याः तावंति वर्षाणि भवंत्यमुत्र ४४ तथानड्वाहं ब्राह्मणाय प्रदाय धुर्यं युवानं बलिनं
विनीतं हलस्य वोढारमनंतवीर्यं प्राप्नोति लोकान्दशधेनुदस्य ४५

© (Oh) Dharmartha Trust J&K. Digitized By eGangotri

दा०
१६८

अध्यायःज्ञानन् २ विक्रयार्थंयोनियुङ्इतिशेषः ३ ४ ५ ६ ७ ॥ (गौ १)

कांतारेब्राह्मणान्गाश्चयःपरित्रातिकौशिक क्षणेनविप्रमुच्येतस्तस्यपुण्यफलंशृणु ४६ अश्वमेधक्रतोस्तुल्यंफलंभवतिशा
श्वतं मृत्युकालेसहस्राक्षयांश्चनिमनुकांक्षते ४७ लोकान्बहुविधान्दिव्यान्यच्चास्यहृदिवर्त्तते तत्सर्वंसमवाप्नोतिकर्मणै
तेनमानवः ४८ गोभिश्चसमनुज्ञातःसर्वत्रचमहीपते यस्तेनैवकल्पेनगोवनेष्वनुगच्छति ४९ तृणगोमयपर्णाशीनि
स्पृहोनियतःशुचिः अकामंतेनवस्तव्यंमुदितेनशतक्रतो ५० ममलोकेसुरैःसार्द्धंलोकेयत्रापिचेच्छति ५१ इतिदा
नधर्मेषुउत्तमानुशासनेगोलोकप्रश्ने इंद्रउवाच जानन्योगामपरेद्विक्रीयाच्चार्थकारणात् एतद्विज्ञातुमिच्छामिकान्नु
तस्यगतिर्भवेत् १ पितामहउवाच भक्षार्थंविक्रयार्थंवायेपहारंहिकुर्वते दानार्थंब्राह्मणार्थायपतत्रेदंशृणुतांफलं २ वि
क्रयार्थंहियोहिंस्याद्भक्षयेद्वानिरंकुशः घातयानंहिपुरुषंयेनुमन्येयुरर्थिनः ३ घातकःखादकोवापितथायश्चानुमन्यते यावं
तितस्यारोमाणितावद्वर्षाणिमज्जति ४ येदोषायादृशाश्चैवद्विजयज्ञोपघातके विक्रयेचापहारेचतेदोषावैस्मृताःप्रभो ५
अपहृत्यतुयोगांवैब्राह्मणायप्रयच्छति यावद्दानंफलंतस्याःतावन्निरयमृच्छति ६ सुवर्णंदक्षिणामाहुर्गोप्रदानेमहाद्युते सुव
र्णंपरमित्युक्तंदक्षिणार्थमसंशयं ७

दान०
१६८

© Dharmartha Trust J&K. Digitized By eGangotri

७९ अध्यायः विश्रंभितः १ २ ३ ४ ॥ ॥ ४ ॥

गोप्रदानात्तारयतेसप्तपूर्वांस्तथापरान् सुवर्णंदक्षिणांकृत्वातावद्द्विगुणमुच्यते ८ सुवर्णंपरमंदानंसुवर्णंदक्षिणापरा सु
वर्णंपावनंशक्रपावनानांपरंस्मृतं ९ कुलानांपावनंप्राहुर्जातरूपंशतक्रतो एषामेदक्षिणाप्रोक्तासमासेनमहाद्युते १० भीष्म
उवाच एतत्पितामहेनोक्तमिंद्रायभरतर्षभ इंद्रोदशरथायाहरामायाहपितातथा ११ राघवोपिप्रियभ्रात्रेलक्ष्मणाययशस्वि
ने ऋषिभ्योलक्ष्मणेनोक्तमरण्येवसताप्रभो १२ पारंपर्यागतंचेदमृषयःशंसितव्रताः दुर्द्धरंधारयामासूराजानश्चैवधार्मिकाः
उपाध्यायेनगदितंममचेदंयुधिष्ठिर १३ यइदंब्राह्मणोनित्यंवदेद्ब्राह्मणसंसदि यज्ञेषुगोप्रदानेषुद्वयोरपिसमागमे १४
तस्यलोकाःकिलाक्षय्यादैवतैःसहनित्यदा इतिब्रह्मासभगवानुवाचपरमेश्वरः १५ इतिदानधर्मेषुउत्तमानुशासने युधि
ष्ठिरउवाच विश्रंभितोहंभवताधर्मान्प्रवदताविभो प्रवक्ष्यामितुसंदेहंतन्मेब्रूहिपितामह १ व्रतानांकिंफलंप्रोक्तंकीदृशंवामहा
द्युते नियमानांफलंकिंचस्वधीतस्यचकिंफलं २ दमस्येहफलंकिंचवेदानांधारणेचकिं अध्यापनेफलंकिंचसर्वमिच्छा
मिवेदितुं ३ अप्रतिग्राहकेकिंचफलंलोकेपितामह तस्यकिंचफलंदृष्टंश्रुतंस्तत्प्रयछति ४ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा०
२६६

५ अनुक्रोशःपरदुःखेनदुःखित्वंअनुकंपातत्प्रतीकारश्च ७ व्रतंएकभक्तादिनियमं ८ फलंसम्यग्यमेवप्रसक्तं १६

स्वकर्मनिरतानांचशूराणांचापिकिंफलं शौचेचकिंफलंप्रोक्तंब्रह्मचर्येचकिंफलं ५ पितृशुश्रूषणेकिंचमातृशुश्रूषणेत
था आचार्यगुरुशुश्रूषास्वनुक्रोशानुकंपने ६ एतत्सर्वमशेषेणपितामहयथातथं वेत्तुमिच्छामिधर्मज्ञपरंकौतूहलंहिमे
७ भीष्मउवाच योव्रतंवैयथोद्दिष्टंतथासंप्रतिपद्यते अखंडंसम्यगारभ्यतस्यलोकाःसनातनाः ८ नियमानांफलंराज
न्प्रत्यक्षमिहदृश्यते नियमानांक्रतूनांचत्वयावाप्तमिदंफलं ९ अधीतस्यापिचफलंदृश्यतेमुत्रचेहच इहलोकेथ
वानित्यंब्रह्मलोकेचमोदते १० दमस्यतुफलंराजन्शृणुत्वंविस्तरेणमे दांताःसर्वत्रसुखिनोदांताःसर्वत्रनिर्वृताः ११ य
त्रेच्छागामिनोदांताःसर्वशत्रुनिषूदनाः प्रार्थयंतिचयद्दांतालभंतेतन्नसंशयः युज्यंतेसर्वकामैर्हिदांताःसर्वत्रपांडव स्व
र्गेयथाप्रमोदंतेतपसाविक्रमेणच १२ दानैर्यज्ञैश्चविविधैस्तथादांताःक्षमान्विताः दानाद्दमोविशिष्टोहिदानेकिं
चित्द्विजातये १४ दाताकुप्यतिनोदांतस्तस्माद्दानात्परंदमः यस्तदद्यादकुप्यन्हितस्यलोकाःसनातनाः १५ क्रो
धोहंतिहियद्दानंतस्माद्दानात्परंदमः अदृश्यानिमहाराजस्थानान्ययुतशोदिवि १६ ॥ छ ॥ ॥

दान०
२६६

© (i) Dharmartha Trust J&K Digitized By eGangotri

अथैतां सर्वलोकेषु यानि तीर्थानि देवताः इमे न यान्ति नश्यन्ते गच्छन्ति परमर्षयः १७ कामयानाम हृत्स्थाने तस्माद्दानात्परं दमः अध्यापकः परि-
क्लेशात्स्वर्गफलमश्नुते १८ विधिवत्स्नापकं कृत्वा अस्मिल्लोके नराधिप अधीतान्यपि हि यो वेदान्मायया विद्वः प्रयच्छति १९ गुरुकर्मप्रशं-
सातस्सोपि स्वर्गे महीयते क्षत्रियोऽध्ययने युक्तः क्रियायस्तेन दानकर्मणि २० शूद्रोपि अपारिज्ञानासोपि स्वर्गे महीयते वैश्यः स्वकर्मनिरतः प्रदानाल्ल-
भते महत् २१ शूद्रः स्वकर्मनिरतः स्वर्गं शुश्रूषयार्छति अपात्रबहुविधाः प्रोक्तास्तेषामर्थाननुमेऽप्सरा २२ अराजयानामनिर्दिष्टफलं अप्र-
प्यैव हि यज्ञश्राद्धेषु श्राद्धाः सत्यश्राद्धस्तथापरे २३ शुद्धश्राद्धस्तथैवोक्तादानश्राद्धमानवाः [illegible] इति श्रु-
ताख्यौ वा मे क्षमाश्राद्धस्तथापरे २४ आर्जवं वचनं यत्राश्राद्धः शमेवं तेतिमानवाः तेषां स्वनियमैः श्राद्धब्रह्मचर्यं तथापरे वेदाध्ययनश्राद्धश्च
गस्त्वाध्ययनेरताः गुरुशुश्रूषया श्राद्धः पितृशुश्रूषयापरे मातृशुश्रूषयाश्राद्धैः श्राद्धस्तथापरे सांख्यश्राद्धाश्च बहवो योगश्राद्धस्तथापरे २६
अरण्ये गृहवासे च [illegible] श्राद्धस्तानिति थिपद्यन्ते सर्वे यान्ति परां लोकान् स्वकर्मफलनिर्जितान् २७ धारणां सर्वदेवानां सर्वतीर्थावगाहनं स-
त्यं च ब्रुवतो नित्यं समं वा स्याद्वा समं २८ अश्वमेधसहस्रं च सत्यं च तुलया धृतं अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते २९ सत्येन सूर्यस्तप-
ति सत्येनाग्निः प्रदीप्यते सत्येन मरुतो वान्ति सर्वं सत्ये प्रतिष्ठितं ३० सत्येन देवाः प्रीयन्ते पितरो ब्राह्मणास्तथा सत्यमाहुः परो धर्मस्तस्मात्सत्यं न
लंघयेत ३१ मुनयः सत्यनिरता मुनयः सत्यविक्रमाः मुनयः सत्यशपथास्तस्मात्सत्यं विशिष्यते ३२ सत्यवन्तः स्वर्गलोके मोदंते भर[illegible]नर्षभ

© (O) Dharmartha Trust J&K Digitized By eGangotri

दा० दमः सत्यफलावाप्तिस्सत्कारास्सर्वास्सनातनाः ३३ असंशयं विनानातस्मात्सर्वैः स्वर्गो महत्पते ब्रह्मचर्यस्य च गुणाञ्शृणु त्वं वसुधाधिप ३४ आ
९० जन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह न तस्य किंचिदप्राप्यमिति विद्धि नराधिप ३५ बह्व्यः कोट्यस्त्वृषीणां तु ब्रह्मलोके वसन्त्युत स
त्ये रतानां सततं दान्तानामूर्ध्वरेतसां ३६ ब्रह्मचर्यं दहेद्राजन्सर्वपापान्युपोषितं ब्राह्मणेन विशेषेण ब्राह्मणो ह्यग्निरुच्यते ३७
प्रत्यक्षं हि तथा ह्येतद्ब्राह्मणेषु तपस्विषु बिभेति हि यथा शक्रो ब्रह्मचारिप्रधर्षितः ३८ तद्ब्रह्मचर्यस्य फलमृषीणामिह दृश्यते मा
तापित्रोः पूजने यो धर्मस्तमपि मे शृणु ३९ शुश्रूषते यः पितरं न चासूयेत्कदाचन मातरं भ्रातरं वापि गुरुमाचार्यमेव च ४० तस्य
राजन्फलं विद्धि स्वर्लोके स्थानमर्चितं न च पश्येत नरकं गुरुशुश्रूषयात्मवान् ४१ इति दानधर्मे गोलोकवर्णनः समाप्तः ॥

राम
९०

त्रिविधं २ यो वितिष्ठत्याहितः ४ स कालमिति पाठे सकालं सर्वमस्य श्वःकालमित्यर्थः । कुंजानायो रोहिणीं लोहितवर्णां ५ बहुलेत्यादि गवां नामानि ६ दिवं स्वर्गं शर्मणे ह्निकं सुखं प्रपद्ये इति

युधिष्ठिर उवाच त्रिविधं गवां परं श्रोतुमिच्छामि नरपतत्वतः येन तान् शाश्वतां(ल्लो)कानर्थिनां प्राप्नुयादिह १ भीष्म उवाच न गोदानात्परं किंचिद्विद्यते वसुधाधिप गौर्हि न्यायागता दत्ता सद्यस्तारयते कुलं २ सतामर्थे सम्यगुत्पादितो यः सतां प्रजानां शाश्वतः प्रजाभ्यः तस्मात्पूर्वं ह्यादिकालप्रवृत्तं गोदानार्थं शृणु राजन्विधिं मे ३ पुरा गोषु नीतासु गोषु संदिग्धदर्शिना मांधात्रा प्रकृतं संप्रश्नं बृहस्पतिरभाषत ४ द्विजातिमभिसत्कृत्य श्वःकालमभिवेद्य च गोदानार्थं प्रयुंजीत रोहिणीं नियतव्रतः ५ आह्वानं च प्रयुंजीत समंगे बहुलेति च प्रविश्य च गवां मध्यमिमां श्रुतिमुदाहरेत् ६ गौर्मे माता गौर्वृषभः पिता मे दिवं शर्म जगती मे प्रतिष्ठा प्रपद्यैवं शर्वरीमुष्य गोषु पुनर्वाणीमुत्सृजेद्गोप्रदाने ७ ॥ ॥ ॥

शेषः जगती गौः यश्च वो जगती श्रुतेः एवमनेन संजेन गोषु प्रपन्नाः गत्वा मौनेन नक्तं वासं कृत्वा द्वितीयेह्नि गोप्रदानकाले एवं वाचं विसृजेत् गोदानस्य पूर्वांगं व्रतं ७

२० साममरव्यः अनिवारयन समवृतः भूतलशापितात्देशाय वैनिरकृत्वा हि गुणात्मभूः ८ उत्सर्ष्टृवर्षोत्सवः सोपयाससानघा रवृत्सेति गोत्रः त्वया दात्राव देयात्रिदि
१७१ वं वषतिषसं सं अर्थवादं संत्रोक्ता आशिषश्च नवभविष्यंता निषेधत ९ आशिषएवात् ऊर्जस्विमन्त्र इति ऊर्जस्वः कार्तिको त्मा बलेभ्यरात्रेषु प्रीति मेदिनी उत्सा
हकर्त्ता ऊर्जस्वि यः ऊर्जमेधाः उपगतधराः यतेन्द्रमतस्य तस्या धनस्य हविषः गर्भरूपगर्भः क्षेत्रभूताः क्षितेः ऐश्वर्यस्य गेहः शास्त्रतक्षितेः प्रवहः प्रवाहरूपा स्य

दार ट

सतामेकान्तिशंगोभिः सममसंरम्भः समवृः ऐकान्त्यगमनात्मयः कल्मषाद्विप्रमुच्यते ८ उत्सर्ष्टवत्साद्विदेयात्सर्यदर्श
ते त्रिवर्हिर्वतिपन्नममर्थवीशिषत्व ९ ऊर्जस्विमकूर्जमेधाश्चपात्मगर्भो मनस्य जगतीमयश्रितिष्ठा क्षितेरोहः प्रवहः ग्रारव
देवशान्तापस्याः सर्वमिमर्थवादः १० गातोमसैनः शत्रुहन्तस्रौर्यस्तथासोमाः स्वर्गयातायसेन आत्मानेमेमात्तवत्तामाश्चपंतुन
पान्ताः सेनसमर्शीशिषोमे ११ शोषोत्सर्गे कर्मभिर्देहमोक्षेसरत्सयः श्रेयमेसप्रपन्नाः पूर्णं निर्यसर्वप्रशपापगाह्यांदिशप्रेमग
निमित्तंप्रपन्नाः १२ यातेश्वपंसोह मचेकभागोपुष्मान्न्तावाहमात्मप्रदाता मनस्युत्तामनएवोपपन्नाः संयुक्षवैसोमद्रणेत्रतताः १३

अनुक्ता

१० अपनक्ताः मवरूपेनोक्ताम्भ्रुआशिषोमेसंत्न ११ शोषोत्सर्गे गोपत्नापापनयेशोषायस्मरितिशोषरोरूनिमेदिमेदिनाक्षयरोगादिनिवृत्तौ देहमोक्षे सकर्मभिः राम
भविताः सनयः सरत्सर्सो नयरव श्रेयधीसंप्रपन्नाः १२ गोतिगर्वास्वसपूर्वामेदेनगोदानात आत्मदानफलंलभामित्यर्थः मनस्यूफतः रात्रमेमत्वाभिमाना युताः मम १७१
मनः उपपन्नाः महीयममतानाष्टीभूताः संयुक्तत्वं दातारं मध्यरूपेभौगैः प्रकाशयपंघं १३ ॥ छ ॥

© (O) Dharmarth Trust J&K. Digitized By eGangotri

एवमित्यस्यार्थः श्लोकः दानवतिगृहीतस्मांकमेगाहृशः पठनीयस्वार्थः १४ गोप्रदानानीति अर्थस्वरूपप्रदेशे पितृगोप्रदानानीति क्रमशमितियोजना पीगोः प्रतिनिधित्व
नस्वर्णं वस्त्र स्वर्णं वा पयः तस्मात् सोऽपि गोप्रदानो भवतीत्यर्थः अर्थो मावहारिकं गोमूल्यं वस्त्रमपि श्राधानं करणो वा धापनेः तयोः प्रतिनिधिलेन उक्तं यावन्तीर्गा
दृष्यान्नांवतिवासांसितानवस्त्रोदनान्नादृश्याहिति सुवर्णं तत्रो सकमानानविधन इतिश्रुतेरपरिसिमिते अर्थादिकंपावद्युक्तिः देयं नत्वर्थं गोप्रदानेर्मांजुर्धास्यान्त
ठाने रूपस्यामितितस्यं संप्रदर्शितं गगृहरो तिको दर्शितः वस्त्रधेनुः भवति तथे तिपाठां नेरग्यामितमेतिमावस्थेवं वैस्त्रा वानिक्रीईयो दिस्यर्थः १५ गवादीनां गोप्रति

एवं तस्याशेषं सर्वं कर्दवदेतगवां दानानि विधिवत्सर्वदेवं प्रतिगृह्याद्वेषमर्हं द्विजातिः प्रतिगृह्णन्ति गोप्रदाने विधिर्नेः १४ गोप्रदानानि व
क्रमशः कर्म तत्र स्वयमुपदेशः ऊर्ध्वं स्याभवितव्याद्वै सर्वाणि मोक्षेत नामसंकीर्त्तनेन स्यायथा संख्योपनरं सर्वे १५ फलव
द्धिं शरदेशेवसहस्राणि वर्गिणीतिः एवमेतान्युत्तानि विधाः कृतादीनां यथाक्रमं १६ गोप्रदानसमानोऽति समस्नानं ष्पेक्रमे १७ ॥
गोदः शीलानिर्भयश्चार्घदानानि स्पाङ्गः सीवसदानाचकामं उपसोमभावेन यश्च विद्वान्विद्योनास्वैर्वस्वावाश्च ब्रुद्धलोकाः १८ ॥

निधीनांएतत्फलं १६ प्रतस्योदानेगोः प्रतिग्रहीनर्गहंगच्छत्यास्यषिमेगदेभवति किमुतत्तद्दयमनेनदीयवास्तुकाति अपि त्रिहोत्रादीनां चिरकालानिर्वहर
भिभावः १७ गोदइति शालीशीलवानस्थर्घदानानिर्भयश्चनिसंबंधः निष्कृष्टत्वात्वहस्तानुः फलनोक्तं एवंत्रयाणां ऐहिकं फलमुक्त्वा आमुष्मिकं फलमाह
उपस्फोटेतिउपसंधानस्यानाहिकमर्त्युं प्रोप्रः तेउपसोमास हि ज्ञेया ब्रह्मदेयाप्रत्यक्षः भारतेविद्वान भारतवतोर्वैगाः विष्णुभक्ताः वंडवत लोकः आलोकोदे
बोएवं विद्यानः कश्चिमाद्दति किंचित्तवचो पिवैस्वगाः विप्रदत्ता स्वर्गं द्रवत अमनसाबालोकाः पिदाविघंते भिन्नविद्वान १८ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा० १७२

देवव्रती ब्रह्मचारी सूर्यमंडलभेत्ता २० एकसंस्थान् एकीकृतान् गजग्रामादि सर्वं दानतुल्यं कंधेनुदानं किमुत वृषो हव्यादिमत्यो देयाः तासां ताभ्यो धिक

गां वै दत्वा गोव्रती स्यात्त्रिरात्रं निशां चैकां संवसेन्नेह ताभिः कामाष्टम्यां वर्तितव्यं त्रिरात्रं रसैर्वा गोशकृता प्रस्नवैर्वा १९ दे
वव्रती स्याद्वृषभप्रदाने वेदावाप्तिर्गोयुगस्य प्रदाने तथा गवां विधिमासाद्य यज्वा लोकानग्र्यान्विंदते नाविधिज्ञः २० कामान्स
र्वान्पार्थिवानेकसंस्थान्यो वै दद्यात्कामदुघां च धेनुं सम्यक्ताः स्युर्हव्यकव्यौघवत्यस्तासामुक्ष्णां ज्यायसां संप्रदाने २१ न चाशि
ष्यायाव्रतायोपकुर्यान्नाश्रद्दधानाय न वक्रबुद्धये गुह्यो ह्ययं सर्वलोकस्य धर्मो नेमं धर्मं यत्र तत्र प्रजल्पेत् २२ संति लोके
श्रद्दधाना मनुष्याः संति क्षुद्रा राक्षसा मानुषेषु येषामेतद्दीयमानं ह्यनिष्टं येनास्तिक्यं चाश्रयंतेल्पपुण्याः २३ बार्हस्प
त्यं वाक्यमेतन्निशम्य ये राजानो गोप्रदानानि दत्वा लोकान्प्राप्ताः पुण्यशीलाः सुवृत्तास्तान्मे राजन्कीर्त्यमानान्निबोध २४
उशीनरो विश्वगश्वो नृगश्च भगीरथो विश्रुतो यौवनाश्वः मांधाता वै मुचुकुंदश्च राजा भूरिद्युम्नो नैषधः सोमकश्च २५ पुरू
रवा भरतश्चक्रवर्ती यस्यान्ववाये भरताः सर्व एव तथा वीरो दाशरथिश्च रामो ये चाप्यन्ये विश्रुताः कीर्तिमंतः २६ त
था राजा पृथुकर्मा दिलीपो दिवं प्राप्तो गोप्रदाने विधिज्ञः यज्ञैर्दानैस्तपसा राजधर्मैर्मांधाताभूद्गोप्रदानैश्च युक्तः २७ ॥

मितिशेषः उक्ष्णां श्रेष्ठानां २१ उपकुर्यात् एतत्कथयेन्न २२ २३ २४ २५ २६ २७ ॥ ॥

राम १७२

© Dharmartha Trust J&K. Digitized By eGangotri

३१ अध्यायः ततः कन्यादिः पश्चोध्यायः १ २ ३ ४ ५ ६ ७ ॥ ॥ ॥

इतिधा१ वी३

तस्मात्पार्थत्वमपीमां मयोक्तां वाईस्पतीं भारत स द्विजातिभ्यः संप्रयच्छस्व प्रीतो गाः पुण्या वै प्राप्य राज्यं कुरूणां २८ वैशंपायन उवा
च तथा सर्वं कृतवान्धर्मराजो भीष्मेणोक्तो विधिवद्गोप्रदाने समांधातुर्देवदेवोपदिष्टं सम्यग्धर्मं धारयामास राजा २९ इति नृ
प सततं गवां प्रदाने यवशकलान्सह गोमयैः पिबानः क्षितितलशयनः शिखी जटालः पुरुषवरः स बभूव ३० नरपतिर
भवत्सदैव तासु संयतमना ह्यभिसंस्तुवंश्च ताश्च न पुनर्धुरि गामयुक्त भूयस्तुरगवरैरगमच्च यत्र तत्र ३१ इति दान
धर्मे गोप्रदानिके वैशंपायन उवाच ततो युधिष्ठिरो राजा भूयः शान्तनवं नृप गोदानविस्तरं धीमान्पप्रच्छ विनयान्वितः १
युधिष्ठिर उवाच गोप्रदानगुणान्सम्यक्पुनर्मे ब्रूहि भारत न हि तृप्याम्यहं वीर शृण्वानोऽमृतमीदृशं २ वैशंपायन उवाच इत्यु
क्तो धर्मराजेन तदा शान्तनवो नृपः सम्यगाह गुणांस्तस्मै गोप्रदानस्य केवलान् ३ भीष्म उवाच वत्सलां गुणसंपन्नां तरुणीं व
त्ससंयुतां दत्वेदृशीं गां विप्राय सर्वपापैः प्रमुच्यते ४ असुर्या नाम ते लोका गां दत्वा तान्न गच्छति पीतोदकां जग्धतृणां नष्ट
क्षीरां निरिंद्रियां ५ जरारोगोपसंपन्नां जीर्णां वापीमिवाजलां दत्वा तमः प्रविशति द्विजं क्लेशेन योजयेत् ६ दुष्टा
रुष्टा व्याधिता दुर्बला वा नो दातव्या याश्च मूल्यैरदत्तैः क्लेशैर्विप्रं योऽफलैः संयुनक्ति तस्यावीर्याश्चाफलाश्चैव लोकाः
:७

२५

© Dhaamantar Trust & Digitized By eGangotri

दा० वत्साभिरताः शीलवयोपपन्नाः सर्वे प्रशंसंति सुगंधवत्यः यथा हि गंगा सरितां वरिष्ठा तथार्जुनीनां कपिला वरिष्ठा ८
१७३ युधिष्ठिर उवाच कस्मात्समाने बहुलाप्रदाने सद्भिः प्रशस्तं कपिलाप्रदानं विशेषमिच्छामि महाप्रभावं श्रोतुं समर्थो
स्मि भवान्प्रवक्तुं ९ भीष्म उवाच वृद्धानां ब्रुवतां तात श्रुतमेतत्पुरातनं वक्ष्यामि तदशेषेण रोहिण्यो निर्मिता यथा १०
प्रजाः सृजेति चादिष्टः पूर्वं दक्षः स्वयंभुवा असृजद्वृत्तिमेवाग्रे प्रजानां हितकाम्यया ११ यथा ह्यमृतमाश्रित्य वर्तयंति दि
वौकसः तथा वृत्तिं समाश्रित्य वर्तयंति प्रजा विभो १२ अचरेभ्यश्च भूतेभ्यश्चराः श्रेष्ठाः सदा नराः ब्राह्मणाश्च ततः श्रेष्ठा
स्तेषु यज्ञाः प्रतिष्ठिताः १३ यज्ञैराप्यायते सोमः स च गोषु प्रतिष्ठितः ततो देवाः प्रमोदंते पूर्वं वृत्तिस्ततः प्रजाः १४ ॥
एतान्येव च भूतानि प्राक्रोशन्वृत्तिकांक्षया वृत्तिदं चान्वपद्यंत तृषिताः पितृमातृवत् १५ इतीदं मनसा
गत्वा प्रजासर्गार्थमात्मनः प्रजापतिर्बलाधानममृतं प्रापिबत्तदा १६ स गतस्तस्य तृप्तिं तु गंधं सुरभिमुद्गिर
न् ददर्शोद्गारसंवृत्तां सुरभिं मुखजां सुतां १७ सासृजत्सौरभेयीस्तु सुरभी लोकमातरः सुवर्णवर्णाः क
पिलाः प्रजानां वृत्तिधेनवः १८ तासाममृतवर्णानां क्षरंतीनां समंततः बभूवामृतजः फेनः स्रवंतीना
मिवोर्मिजः १९ ॥

तं ४

© Dharmartha Trust J&K. Digitized By eGangotri

वि ष्ठा पीतं ५

सवत्सा सुरभिश्रेष्ठा मथ्यमाना विनिर्गता: शिरस्यथापतत्तत्क्षुद्रः सततदैवतप्रभः २० ललाटप्रभवेनाक्ष्णा रोषेणेह हि यी प्रदहन्ति
व तन्नंजलक्तनमौर्द्रं कपिलाख्य विशांपते २१ नानावर्णत्वमनयन्नेषानिव दिवाकरः पास्कतस्मादपक्रम्य सोममेवा
भिसंश्रिताः २२ यथोत्पन्नाः सवर्णास्थास्तानीमा नानावर्णामा अथ क्रुद्धं महादेवं प्रजापतिरभाषत २३ अमृतेना
वसिक्तोत्वं नोच्छिष्टं विद्यते गवां यथाह्यमृतमादाय सोमो विस्यन्दते पुनः २४ तथा क्षीरं क्षरंत्येता रोहिण्योमृतसंभवं नदु
ष्यत्यनिलो नाग्निर्न सुवर्णं न चोदधिः २५ नामृतेनामृतं चैव पीतं नाव चत्मला इमांल्लोकान्भरिष्यन्ति हविषा प्रस्रवे
नच २६ आसामैश्वर्यमन्विच्छंति सर्वेमृतमयं शुभं वृषभं च ददौ तस्मै सह गोभिः प्रजापतिः २७ प्रसादयामास मन
स्तेन रुद्रस्य भारत प्रीतश्चापि महादेवश्चकार वृषभं तदा २८ ध्वजं च वाहनं चैव तस्मात्स वृषभध्वजः ततो देवैर्महादेव
स्तदा पशुपतिः कृतः २९ ईश्वरः स गवां मध्ये वृषभांकः प्रकीर्तितः एवमव्यग्रवर्णानां कपिलानां महौजसां प्रदा
ने प्रथमः कल्पः सर्वासामेव कीर्तितः ३० लोकज्येष्ठा लोकवृत्तिः प्रवृत्ता रुद्रोपेताः सोमविष्यंदभूताः सौम्याः
शान्ताः कामदाः प्राणदाश्च गा वै दत्वा सर्वकामप्रदः स्यात ३१

© Dharmartha Trust J&K. Digitized by eGangotri

हे० १७४

३२ ३३ ३४ ३५ एतस्मिन्नवौङ्कवाक्यश्रवणकाले १ २ ३ ४ ५ ६

इमंगवांप्रभवविधानमुत्तमंपठन्सदाशुचिरपिमंगलप्रियः विमुच्यतेकलिकलुषेणमानवःश्रियंसुतान्धनपशूमा
प्नुयात्सदा ३२ हव्यंकव्यंतर्पणंशान्तिकर्मयानंवासोवृद्धबालस्यतुष्टिः एतान्सर्वान्गोप्रदानेगुणान्वैदाताराजन्
नाप्नुयाद्वैसदैव ३३ वैशंपायनउवाच पितामहस्याथनिशम्यवाक्यंराजासहभ्रातृभिराजमीढः सुवर्णव
र्णानडुहस्तथागाःपार्थोददौब्राह्मणसत्तमेभ्यः ३४ तथैवतेभ्योपिददौद्विजेभ्योगवांसहस्राणिशतानिचैव
यज्ञान्समुद्दिश्यचदक्षिणार्थंलोकान्विजेतुंपरमांचकीर्तिं ३५ इतिदानधर्मेषुगोप्रदानिके भीष्मउ
वाच एतस्मिन्नेवकालेतुवसिष्ठमृषिसत्तमं इक्ष्वाकुवंशजोराजासौदासोवदतांवरः १ सर्वलोकचरंसिद्धंब्रह्म
कोशंसनातनं पुरोहितमपृष्टुमभिवाद्योपचक्रमे २ सौदासउवाच त्रैलोक्येभगवन्किंस्वित्पवित्रंकथ्यतेनघ
यत्कीर्तयन्सदामर्त्यःप्राप्नुयात्पुण्यमुत्तमं ३ भीष्मउवाच तस्मैप्रोवाचवचनंप्रणतायहितंतदा गवामुप
नि[illegible]षद्विद्वान्नमस्कृत्यगवांशुचिः ४ गावःसुरभिगंधिन्यस्तथागुग्गुलगंधयः गावःप्रतिष्ठाभूतानांगावः
स्वस्त्ययनंमहत् ५ गावोभूतंचभव्यंचगावःपुष्टिःसनातनी गावोलक्ष्म्यास्तथामूलंगोषुदत्तंननश्यति ६

भिष्४

राम १७४

© Dharmartha Trust J&K. Digitized By eGangotri

कीनाशः कर्षकः स्मृतो गा १७ गोसमृद्धिकरं कर्म यज्ञनष्टं विकर्माह स्मार्थं इति चर्मणि गोरवसार्द्रे प्रेक्षमाणो नाडीकन्ते उपविश्य तिथिषः स्मारितिकांस्य निष्ठिताः १८ ॥ ९ ॥

प्रष ६

अग्निहोत्रपरं गावो देवानां परमं हविः स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ७ गावो यज्ञस्य हि फलं गोषु यज्ञाः प्रतिष्ठि-
ताः गावो भविष्यं भूतं च गोषु यज्ञाः प्रतिष्ठिताः ८ सायं प्रातश्च सततं होमकाले महाद्युते गावो ददति वै होम्यमृषिभ्यः पुरु-
षर्षभ ९ यानि कानि च दुर्गाणि दुष्कृतानि कृतानि च तरन्ति चैव पाप्मानं धेनुं ये ददति प्रभो १० एकां च दशगुर्दद्याद्दश दद्याच्च
गोशती शतं सहस्रगुर्दद्यात्सर्वे तुल्यफला हि ते ११ अनाहिताग्निः शतगुरयज्वा च सहस्रगुः समृद्धो यश्च कीनाशो नार्घमर्हं-
ति ते त्रयः १२ कपिलां ये प्रयच्छन्ति सवत्सां कांस्यदोहनीं सुव्रतां वस्त्रसंवीतामुभौ लोकौ जयन्ति ते युवानमिंद्रियोपेतं शतेन सह यूथ-
पम् गवेंद्रं ब्राह्मणेंद्राय भूरिशृंगमलंकृतम् १४ वृषभं ये प्रयच्छंति श्रोत्रियाय परंतप ऐश्वर्यं तेऽधिगच्छंति जायमानाः पुनः पुनः
नाकीर्तयित्वा गाः सुप्यान्नासंस्मृत्योत्पतेन्नर सायं प्रातर्नमस्येच्च गास्ततः पुष्टिमाप्नुयात् गवां मूत्रपुरीषस्य नोद्विजेत कथंचन
न चासां मांसमश्नीयाद्गवां पुष्टिं तथाप्नुयात् गाश्च संकीर्तयेन्नित्यं नावमन्येत तास्तथा १६ अनिष्टं स्वप्नमालक्ष्य गां नरः संप्रकीर्तयेत
गोमयेन सदा स्नायात्करीषे चापि संविशेत ७ श्लेष्ममूत्रपुरीषाणि प्रतिघातं च वर्जयेत् सार्द्रचर्मणि भुंजीत निरीक्षन्वारुणीं
दिशं वाग्यतः सर्पिषा भूमौ गवां पुष्टिं सदाश्नुते १८ ॥

जुहुयात्र गोमत्येतिस्त्रपकृष्णेनेगोमां अस्मीतिमंत्रोगोमती १९ २० २१ २२ २३ अध्यायः शतं १ २ ३ ४ ५ ॥

९०
९७५

घृतेनजुहुयादग्निंघृतेनस्वस्तिवाचयेत घृतंदद्यात्घृतंप्राशेद्गवांपुष्टिंतथाश्नुते १९ गोमत्याविद्ययाधेनुंतिला
नामभिमंत्र्यय: सरत्नमयींदद्यान्नशोचेत्कृताकृते २० गावोमामुपतिष्ठंतुहेमशृंग्य: पयोमुच: सुरभ्य:
सौरभेय्यश्चसरित:सागरंयथा २१ गावैपश्याम्यहंनित्यंगाव:पश्यंतुमांसदा गावोस्माकंवयंतासांयतोगावस्त
तोवयं २२ एवंरात्रौदिवाचापिसमेषुविषमेषुच महाभयेषुचनर:कीर्तयन्मुच्यतेभयात २३ इतिदानधर्मेषु
गोप्रदानिके वसिष्ठउवाच शतंवर्षसहस्राणांतपस्तप्तंसुदुष्करं गोभि:पूर्वंविसृष्टाभिर्गच्छेमश्रेष्ठतामिति १
लोकेस्मिनदक्षिणानांचसर्वासांवयमुत्तमा: भवेमनचलिप्येमदोषेणेतिपरंतप २ अस्मत्पुरीषस्नानेनजन:पू
येतसर्वदा शकृताचपवित्रार्थंकुर्वीरन्देवमानुषा: ३ तथासर्वाणिभूतानिस्थावराणिचराणिच प्रदातारश्चलो
कान्गच्छेयुरितिमानद ४ ताभ्योवरंददौब्रह्मातपसांतेस्वयंप्रभु: एवंभवत्वितिविभुर्लोकांस्तारयतेतिच ५ ॥ ९७५

© Dharmartha Trust J&K. Digitized By eGangotri

९ लोकस्य यथा गावस्त्वभीष्टं शुभं तिशेषः ७ ८ ९ १० ११ १२ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

म३

उत्सृष्टां सिद्धिकामानां भूतभव्यस्य मातरः प्रातर्नमस्या गावस्ततः पुष्टिमवाप्नुयात् नापसव्ये महाभागा गावो लोकपरायणाः न तस्माद्वा
वामतो भागाः पवित्रं परमुच्यते ७ नैवेद्यं सर्वभूतानां समतिष्ठन्त्यधूर्धनि समानवत्सां कपिलां धेनुं दत्वा पयस्विनीं ८ सुव्रतां वस्त्रसंवी
तां ब्रह्मलोके महीयते ९ लोहितां तुल्यवत्सां तु धेनुं दत्वा पयस्विनीं सुव्रतां वस्त्रसंवीतां सोमलोके महीयते १० समानवत्सां शब
लां धेनुं दत्वा पयस्विनीं सुव्रतां वस्त्रसंवीतां सोमलोके महीयते ११ समानवत्सां श्वेतां धेनुं दत्वा पयस्विनीं सुव्रतां वस्त्रसंवीता
मिन्द्रलोके महीयते १३ समानवत्सां कृष्णां तु धेनुं दत्वा पयस्विनीं सुव्रतां वस्त्रसंवीतां मग्निलोके महीयते १४ समानवत्सां धू व४
म्रां तु धेनुं दत्वा पयस्विनीं सुव्रतां वस्त्रसंवीतां याम्ये लोके महीयते १५ अपां फेनसवर्णां तु सवत्सां कांस्यदोहनां प्रदाय वस्त्र
संवीतां वारुणं लोकमाप्नुते १६ वातरेणुसवर्णां तु सवत्सां कांस्यदोहनां प्रदाय वस्त्रसंवीतां वायुलोके महीयते १७
हिरण्यवर्णां पिंगाक्षीं सवत्सां कांस्यदोहनां प्रदाय वस्त्रसंवीतां कौबेरं लोकमश्नुते १८ पलालधूमवर्णां तु सव॥
त्सां कांस्यदोहनां प्रदाय वस्त्रसंवीतां पितृलोके महीयते १९

© Dharmartha Trust J&K. Digitized By eGangotri

दा०
१७६

इतिकंठाघलंवगलकंवलां २२ वैराटंहटंष्टंयस्परतिकंदत्यनेतिराटंकृतंविगतंराटंयस्मात्नद्विराटंस्तार्थैतद्विनः २३ नीलांगंविलसितांगं २५ अध्यायः घृतधेनः

वा१

सवत्सांपीवरींदत्वाइतिकंठामलंकृतां वैश्वदेवमसं धंस्थानंश्रेष्ठंप्रपद्यते २० समानवत्सांगोरीतधेनुंदत्वापयस्विनीं सवत्सांवस्त्रसं
वीतांवसूनांलोकमाप्नुयात् २१ पांडुकंवलवर्णाभांसवत्सांकांस्यदोहनां प्रदायवस्त्रसंवीतांसाध्यानांलोकमाप्नुते २२ वैराटपृ
ष्ठमुक्तानांसर्वरत्नैरलंकृतां प्रदायमरुतानांलोकान्राजन्प्रतिपद्यते २३ वयोपपन्नांनीलांगंसर्वरत्नसमन्वितां गंधर्वाप्सरसांलो
कान्दत्वाप्राप्नोतिमानवः २४ इतिकंठमनड्वाहंसर्वरत्नैरलंकृतं दत्वाप्रजापतेर्लोकान्विशोकःप्रतिपद्यते २५ गोप्रदानरतोया
तिभित्वाजलदसंचयान् विमानेनार्कवर्णेनदिविराजन्विराजते २६ तंचारुवेषाःसुश्रोणयःसहस्रंसुरयोषितः रमयंतिनरश्रेष्ठंगो
प्रदानरतंनरं २७ वीणानांवल्लकीनांचनूपुराणांचसिंजितैः हासैश्चहरिणाक्षीणांप्रसुप्तःप्रतिबोध्यते २८ यावंतिरोमाणिभवंति
धेन्वास्तावंतिवर्षाणिमहीयतेसः स्वर्गाच्च्युतश्चापिततोनृलोकेप्रसूयतेवैविपुलेगृहेसः २९ इतिदानधर्मेषुगोप्रदानिके वसिष्ठवा
च घृतक्षीरप्रदागावोघृतयोन्योघृतोद्भवाः घृतनद्योघृतावर्तास्तामेसंतुसदागृहे १ घृतंमेहृदयंनित्यंघृतंनाभ्यांप्रतिष्ठितं घृत
सर्वेषुगात्रेषुघृतंमेमनसिस्थितम् २ ॥ ॥ ७ ॥ ७

घृतपात्रः १ २ २ २ २ २ २ २ २ २ २ २ २ २ २

दा०
१७६

सुतः १

३ ४ वसोर्धारा मंदाकिनी ५ पुण्यगीतिपौराणीकथां ६ आह्निकं कृतं हि कः ७ ८ पानीयदाना जलधेनुदाता ९ १० ११ १२ १३ १४

गावो ममाग्रतो नित्यं गावः पृष्ठत एव च गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहं ३ इमा वश्मजपेत्सायं प्रातश्च शुचिः स
दा यस्मात्कृतात्पापात्तस्मात्परिमुच्यते ४ प्रासादा यत्र सौवर्णा वसोर्धारा च यत्र सा गंधर्वाप्सरसो यत्र तत्र यान्ति
सहस्रदाः ५ नवनीतपंकाः क्षीरोदाः दधिशैवलसंकुलाः वहंति यत्र वै नद्यस्तत्र यान्ति सहस्रदाः ६ गवांश
तसहस्रं दद्यात्स यथाविधि परां वृद्धिमवाप्नोति स गोलोके महीयते ७ दश चोभयतः पुत्रान्मातापित्रोः पिता
महान् दद्याति सुकृतान्लोकान्सतारयति कुलं नरः ८ धेन्वाः प्रमाणेन समप्रमाणां धेनुं तिलानामपि च प्रदा
नी य पानीयदाता च यमस्य लोके न यातनां काचिदुपैति तत्र ९ पवित्रमग्र्यं जगतः प्रतिष्ठा दिवौकसां मातरोथाप्रमेयाः
स्पृष्ट्वालभेद्दक्षिणतो व्रजेच्च दद्याच्च पात्रे प्रसमीक्ष्य काले १० धेनुं सवत्सां कपिलां भूरिशृंगीं कांस्योपदोहां वसनो
त्तरीयां प्रदाय तां गाहति दुर्विगाह्यां याम्यां सभां वीतभयो मनुष्यः ११ सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः ॥
गावो मामुपतिष्ठंतामिति नित्यं प्रकीर्तयेत् १२ नातः पुण्यतरं दानं नातः पुण्यतरं फलं नातो विशिष्टं लो
के भूतं भवितुमर्हति १३ त्वचा लोम्नाथ शृंगैर्वा वालैः क्षीरेण मेदसा यज्ञं वहति संभूय किमस्त्यभ्यधिकं ततः १४

© Dharmarth Trust J&K. Digitized By eGangotri

१५ १६ भूमिदः सौदासो नाम राजा १७ अध्यायः पवित्राणां शिष्टचक्राह मत ५ श्रागीतं पौराणीकथा ६ आङ्गिरसकृतः कर्म नाह्निकः ७ ॥७४॥ ॥ ॥

यथा सर्वमिदं व्याप्तं जगत्स्थावरजंगमं तां धेनुं शिरसा वंदे भूतभव्यस्य मातरं १५ गुणा वचनसमुच्चये एकदेशो न वर्णितः एष गवां प्रकी
र्तितस्ते न च परमिह दानमस्ति गोभ्यो भवति न चापि परायणं तथान्यत् १६ भीष्म उवाच वरमिदमिति भूमिदो विचिंत्य प्रवरमृषेर्वच
नं ततो महात्मा व्यसृजत नियतात्मवान्द्विजेभ्यः स च कुरु च गोधनमाप्य लोकान् १७ इति दानधर्मे गोप्रदानिके युधिष्ठिर उवा
च पवित्राणां पवित्रं यच्छिष्टं लोके च यद्भवेत् पावनं परमं चैव तन्मे ब्रूहि पितामह १ भीष्म उवाच० गावो महार्थाः पुण्याश्च तारयंति
च मानवान् धारयंति प्रजाश्चेमा हविषा पयसा तथा २ नहि पुण्यतमं किंचिद्गोभ्यो भरतसत्तम एताः पुण्याः पवित्राश्च त्रिषु लोकेषु
सत्तम ३ देवानामुपरिष्टाच्च गावः प्रतिवसंति वै दत्वा चैता नारयंते यांति स्वर्गं मनीषिणः ४ मांधाता यौवनाश्वश्च ययातिर्न
हुषस्तथा गा वै ददंतः सततं सहस्रशतसंमिताः गताः परमकं स्थानं देवैरपि सुदुर्लभं ५ अपि चात्र पुरा गीतं कथयिष्यामि तेन
घ ऋषीणामुत्तमं धीमान्कृष्णद्वैपायनं शुकः ६ अभिवाद्याह्निककृतः शुचिः प्रयतमानसः पितरं परिपप्रच्छ दृष्टलोकपरावरं ७

प४ नी३

© Dharmartha Trust J&K. Digitized By eGangotri

१२ अथंगाइत्यरतुराइत्यसाप्युपलक्षणां गावोवैसत्रमारणशफानश्रृंगाणिसिषाप्यत्नासांदशमेमासिशफाः श्रृंगाणपजायंतेतिश्रुतेः १९ ॥

कि.पं.२

कोयज्ञःसर्वयज्ञानांवरिष्ठोह्युपलक्ष्यते किंचकृत्वापरंस्थानंप्राप्नुवंतिमनीषिणः ८ केनदेवाःपवित्रेणस्वर्गमश्नंतिवाविभो
किंचयज्ञस्ययज्ञत्वंक्वचयज्ञःप्रतिष्ठितः ९ देवानामुत्तमंकिंचसत्रमितःपरः पवित्राणांपवित्रंचयत्तद्ब्रूहिममानघ १० ए
तच्छ्रुत्वातुवचनंव्यासःपरमधर्मवित् पुत्रायाकथयत्सर्वंतत्त्वेनभरतर्षभ ११ व्यासउवाच गावःप्रतिष्ठाभूतानांतथागा
वःपरायणं गावःपुण्याःपवित्राश्चगोधनंपावनंतथा १२ पूर्वमासन्नशृंगावैगावइत्यनुशुश्रुम शृंगार्थेसमुपासंतताःकि
लप्रभुमव्ययं १३ ततोब्रह्मातुगाःप्रायमुपविष्टाःसमीक्ष्यह ईप्सितंप्रददौताभ्योगोभ्यःप्रत्येकशःप्रभुः १४ तासांशृंगाणिप
जायंतयस्यायादृङ्मनोगतं नानावर्णाःशृंगवंत्यस्ताव्यरोचंतपुत्रक १५ ब्रह्मणावरदत्तास्ताहव्यकव्यप्रदाःशुभाः पुण्याः
पवित्राःसुभगादिव्यसंस्थानलक्षणाः १६ गावस्तेजोमहद्दिव्यंगवांदानंप्रशस्यते येचैताःसंप्रयच्छंतिसाधवोवीतमत्सराः १७
तेवैसुकृतिनःप्रोक्ताःसर्वदानप्रदाश्चते गवांलोकंतथापुण्यमाप्नुवंतिचतेनघ १८ यत्रवृक्षामधुफलादिव्यपुष्पफलोप
गाः पुष्पाणिचसुगंधीनिदिव्यानिद्विजसत्तम १९ ॥

© Dhanvantari Trust & K Digitized By eGangotri

द्रो० १७८

२३ उद्धृतपुलिनाः अंकुरितजीराः २६ नगाः वृक्षाः पत्ररथाः पक्षिणाः २७ २९ ३० ॥

सर्वामणिमयीभूमिः सर्वकांचनवालुका सर्वर्तुसुखसंस्पर्शानिष्पंकानिरजा शुभाः २० रक्तोत्पलवनैश्चैवमणिखंडैर्हिरण्म
यैः तरुणादित्यसंकाशैर्भांतितत्रजलाशयाः २१ महार्हमणिपत्रैश्चकांचनप्रभकेसरैः नीलोत्पलविमिश्रैश्चसरोभिर्वहुपं
कजैः २२ करवीरवनैः फुल्लैः सहस्रावर्तसंवृतैः संतानकवनैः फुल्लैर्वृक्षैश्चसमलंकृताः २३ निर्मलाभिश्चमुक्ताभिर्मणि
भिश्चमहाप्रभैः उद्धृतपुलिनास्तत्रजातरूपैश्चनिम्नगाः २४ सर्वरत्नमयैश्चित्रैरवगाढाद्रुमोत्तमैः जातरूपमयैश्चान्यैर्हुता
शनसमप्रभैः सौवर्णागिरयस्तत्रमणिरत्नशिलोच्चयाः सर्वरत्नमयैर्भांतिशृंगैश्चारुभिरुच्छ्रितैः २६ नित्यपुष्पफलास्तत्र
नगाः पत्ररथाकुलाः दिव्यगंधरसैः पुष्पैः फलैश्चभरतर्षभ २७ रमंतेपुण्यकर्माणस्तत्रनित्यंयुधिष्ठिर सर्वकामसमृद्धार्था
निःशोकागतमन्यवः २८ विमानेषुविचित्रेषुरमणीयेषुभारत मोदंतेपुण्यकर्माणोविहरंतोयशस्विनः २९ उपक्रीडंतिता
न्राजन्शुभाश्चाप्सरसांगणाः एतांल्लोकानवाप्नोतिगांदत्वावैयुधिष्ठिरः ३० ॥ ॥ ॥ ७ ॥ राम० १७८

नाममात्रं जपेदित्ति संबंधः युगंधराः सप्तादियुगं धारयंतिताः ३१ प्राजापत्यं प्रजापतिनोक्तं ३७ जहुयात सर्वीक्तयैगोमता ३८ निर्हृतैः गोमयनिर्गतैः ३९

येषामधिपतिः पूषा मारुतो बलवान्बली ऐश्वर्ये वरुणो राजा नाममात्रे युगंधराः ३१ सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः
प्राजापत्यमिति ब्रह्मन्जपेन्नित्यं यतव्रतः ३२ गाश्च शुश्रूषते यश्च समन्वेति च सर्वशः तस्मै तुष्टाः प्रयच्छंति वरानपि सुदु
र्लभान् ३३ द्रुह्येन्न मनसा वापि गोषु नित्यं सुखप्रदः अर्चयेत सदा चैव नमस्कारैश्च पूजयेत ३४ दांतः प्रीतमना नित्यं गवां
व्युष्टिं तथाश्नुते अहमुष्णं पिवेन्मूत्रं त्र्यहमुष्णं पिवेत्पयः गवामुष्णं पयः पीत्वा त्र्यहमुष्णं घृतं पिबेत् त्र्यहमुष्णं घृतं पीत्वा वायु
भक्षो भवेत्त्र्यहं ३६ येन देवाः पवित्रेण भुंजते लोकमुत्तमं यत्पवित्रं पवित्राणां तच्छकृच्छिरसा वहेत् ३७ घृतेन जुहुयादग्निं घृ
तेन स्वस्ति वाचयेत् घृतं प्राशेद्धृतं दद्याद्धृतं पुष्टिं तथाश्नुते ३८ निर्हृतैश्च यवैर्गोभिर्मासं प्रश्रित पावकः ब्रह्महत्यासमं पापं
सर्वमेतेन शुध्यते ३९ पराभवाच्च दैत्यानां देवैः शौचमिदं कृतं तद्देवत्वमपि प्राप्ताः संसिद्धाश्च महाबलाः ४० ॥ ॥ ॥ ॥

श्रीकृष्णायनमः॥ ॥ श्रीरामराम ॥ ३९ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

दा० १७९ ७३ गोमतींगोमत्यात्रात्वाप्रकाशितमर्घवरंलभते ७७ अध्यायःसमाप्तः १२ ॥ ॥

गावःपवित्राःपुरायाश्चपावनंपरमंमहत् ताश्चदत्वाहिद्विजातिभ्योनरःस्वर्गमुपाश्नुते ७१ गवांमध्येशुचिर्भूत्वागोमतींम
नसाजपेत् पूताभिरद्भिराचम्यशुचिर्भवतिनिर्मलः अग्निमध्येगवांमध्येब्राह्मणानांचसंसदि विद्यावेदव्रतस्नातात्रा
ह्मणाःपुरायकर्मिणः ७३ अध्यापयेरन्शिष्यान्वैगोमतींयज्ञसंमितां त्रिरात्रोपोषितोभूत्वागोमतींलभतेवरं ७४
पुत्रकामश्चलभतेपुत्रंधनमथापिवा पतिकामाचभर्त्तारंसर्वकामांश्चमानवः ७५ गावस्तुष्टाःप्रयच्छंतिसेवितावैन
संशयः एवमेतामहाभागायज्ञियाःसर्वकामदाः रोहिण्यइतिजानीहिनैताभ्योविद्यतेपरं ७६ इत्युक्तःसमहातेजा
शुकःपित्रामहात्मना पूजयामासगांनित्यंतस्मात्त्वमपिपूजय ७७ इतिदानधर्मेषुगोप्रदानिके युधिष्ठिरउवाच
मयागवांपुरीषंवैश्रियाजुष्टमितिश्रुतं एतदिच्छाम्यहंश्रोतुंसंशयोत्रपितामह १ भीष्मउवाच अत्राप्युदाहरंतीममि
तिहासंपुरातनं गोभिर्नृपेहसंवादंश्रियाभरतसत्तम २॥ राम० १७९

श्रीः स्त्वेह वपुः कांतं गोमध्येषु विवेश ह गावो थ विस्मितास्तस्या दृष्ट्वा रूपस्य संपदं ३ गाव ऊचुः कासि देवि कुतो वा त्वं रूपेणाप्रति
माभुवि विस्मिताः स्म महाभागे तव रूपस्य संपदा ४ इच्छाम त्वां वयं ज्ञातुं का त्वं क्व च गमिष्यसि तत्वेन वरवर्णाभि सर्वमेतद्ब्रवीहि
नः ५ श्रीरुवाच लोककांतास्मि भद्रं वो श्रीर्नाम्नाहं परिश्रुता मया दैत्याः परित्यक्ता विनष्टाः शाश्वतीः समाः ६ मयाभिपन्ना
देवाश्च मोदंते शाश्वतीः समाः इंद्रो विवस्वान्सोमश्च विष्णुरापोग्निरेव च ७ मयाभिपन्ना ऋषयो देवतास्तथा यान्नावि
शाम्यहं गावस्ते विनश्यंति सर्वशः ८ धर्मश्चार्थश्च कामश्च मया जुष्टाः सुखान्विताः एवं प्रभावां मां गावो विजानीत सुखप्रदाः ९ इच्छामि
चापि युष्मासु वस्तुं सर्वासु नित्यदा आगम्य प्रार्थये युष्मान् श्रीजुष्टा भवताथ वै १० गाव ऊचुः अध्रुवां चपलां च त्वं सामान्यां ब
हुभिः सह न त्वामिच्छामि भद्रं ते गम्यतां यत्र रंस्यते ११ वपुष्मंत्यो वयं सर्वाः किमस्माकं त्वयाद्य वै यथेष्टं गम्यतां तत्र कृतकार्या व
यं त्वया १२ श्रीरुवाच किमेतद्वः क्षमं गावो यन्मां नेहाभिनंदथ न मां संप्रतिगृह्णीध्वं कस्माद्वै दुर्लभां सती १३ सत्यं च लोक
वादोयं लोके चरति सुव्रताः स्वयं प्राप्ते परिभवो भवतीति विनिश्चयः १४ १४ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ॥

© Dhanvantari Trust. Digitized By eGangotri

दा० २० एकाअहंअंगेषुमध्येकुत्सितो २१ २२ २३ २४ २५ २६

१८०

महद्दुग्रंतपः कृत्वामांनिषेवंतिमानवाः देवदानवगंधर्वाःपिशाचोरगराक्षसाः १५ प्रभावएववोगावः प्रतिगृह्णीतमामिह
नावमन्याह्यहंसौम्यास्त्रैलोक्येसचराचरे १६ गावऊचुः नावमन्यामहेदेविनत्वांपरिभवामहे अध्रुवाचलचित्तासितनस्त्वां
वर्जयामहे १७ बहुनात्रकिमुक्तेनगम्यतांयत्रवांछसि वपुष्मंतोवयंसर्वाःकिमस्माकंत्वयानघे १८ श्रीरुवाच अवज्ञा
ताभविष्यामिसर्वलोकस्यमानदाः प्रत्याख्यानेनयुष्माकंप्रसादःक्रियतांमम १९ महाभागाभवंत्यौवैशरण्याःशरणागतां
परित्रायंतुमांनित्यंभजमानामनिंदिताः २० माननामहमिच्छामिभवतःसततंशिवाः अप्येकांगेषवोवस्तुमिच्छामिचसुकु
त्सिते २१ नवोस्तिकुत्सितंकिंचिदंगेष्वालक्ष्यतेनघाः पुण्याःपवित्राःसुभगाममादेशंप्रयच्छत २२ वसेयंयत्रवोदेहेतन्
मेव्याख्यातुमर्हथ एवमुक्तास्ततागावःशुभाःकरुणवत्सलाः २३ संमंत्र्यसहिताःसर्वाःश्रियमूचुर्नराधिप २४ अव
श्यंमाननाकार्यात्वास्माभिर्यशस्विनी शकृन्मूत्रेनिवसत्वंपुण्यमेतद्धिनःशुभे २५ श्रीरुवाच दिष्ट्याप्रसादोयुष्माभिःकृ
तोमेनुग्रहात्मकः एवंभवतुभद्रंवःपूजितास्मिसुखप्रदाः २६ ॥ २६ राम०

१८०

© (c) Dharmartha Trust J&K. Digitized By eGangotri

२८ अध्यायः येच १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ ॥

एवंकृत्वातुसमयंश्रीर्गोभिःसहभारत पश्यंतीनांततस्तासांतत्रैवांतरधीयत २७ एवंगोशकृतःपुत्रमाहात्म्यंतेनवर्णितं मा
हात्म्यंचगवांभूयःश्रूयतांगदतोमम २८ इतिदानधर्मेषुश्रीगोसंवादः भीष्मउवाच येचगांसंप्रयच्छंतिहुतशिष्टाशिनश्चये
तेषांसत्राणियज्ञाश्चनित्यमेवयुधिष्ठिर १ ऋतेदधिघृतेनेहनयज्ञःसंप्रवर्त्तते तेनयज्ञस्ययज्ञत्वमतो-- मूलंचकथ्यते
२ दानानामपिसर्वेषांगवांदानंप्रशस्यते गावःश्रेष्ठाःपवित्राश्चपावनंह्येतदुत्तमं ३ पुष्ट्यर्थमेताःसेवेतशांत्यर्थमपिचैवह
पयोदधिघृतंयासांसर्वपापप्रमोचनं ४ गावस्तेजःपरंप्रोक्तमिहलोकेपरत्रच नगोभ्यःपरमंकिंचित्पवित्रंभरतर्षभ
५ अत्राप्युदाहरंतीममितिहासंपुरातनं पितामहस्यसंवादमिंद्रस्यचयुधिष्ठिर ६ पराभूतेषुदैत्येषुशक्रेत्रिभुवनेश्वरः
प्रजाःसमुदिताःसर्वाःसत्यधर्मपरायणाः ७ अथर्षयःसगंधर्वाःकिन्नरोरगराक्षसाः देवासुरसुपर्णाश्चप्रजानांपतयस्त
था ८ पर्युपासंतकौरव्यकदाचिद्वैपितामह नारदःपर्वतश्चैवविश्वावसुर्हहाहुहू ९ दिव्यतानेषुगायंतःपर्युपासंततंप्र
भुं तत्रदिव्यानिपुष्पाणिप्रावहत्पवनस्तदा १० आजह्रुरृतवश्चापिसुगंधीनिपृथक्पृथक् तस्मिन्देवसमावायेसर्वभू
तसमागमे ११ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा॰ १८१ २० अक्रूरवाहिन्यः अमायाश्च वहारिणः २१ निवासार्थं कृतं तनिवासकृतं २२ २४ ॥ ॥ ॐ

दिव्यवादित्रसंघुष्टे दिव्यस्त्रीचारणावृते इंद्रः पप्रच्छ देवेशमभिवाद्य प्रणम्य च १२ देवानां भगवन्कस्मान्लोकेशानां पितामह
उपरिष्टाद्गवां लोक एतदिच्छामि वेदितुं १३ किं तपो ब्रह्मचर्यं वा गोभिः कृतं महेश्वर देवानामुपरिष्टाद्यद्वसंत्यरजसः सुखं १४
ततः प्रोवाच ब्रह्मा तं शक्रं बलनिषूदनं अवज्ञातास्त्वया नित्यं गावो बलनिषूदन १५ तेन त्वमासां माहात्म्यं न वेत्सि शृणु यत्प्रभो
गवां प्रभावं परमं माहात्म्यं च सुरर्षभ १६ यज्ञांगं कथिता गावो यज्ञ एव च वासव एताभिश्च विना यज्ञो न वर्त्तेत कथंचन १७ धारयं
ति प्रजाश्चैव पयसा हविषा तथा एतासां तनयाश्चापि कृषियोगमुपासते १८ जनयंति च धान्यानि वीजानि विविधानि च ततो यज्ञाः
प्रवर्त्तंते हव्यं कव्यं च सर्वशः १९ पयो दधि घृतं चैव पुण्याश्चैताः सुराधिप वहंति विविधान्भारान्क्षुत्तृष्णापरिपीडिताः २० मुनीं
श्च धारयंतीह प्रजाश्चैवापि कर्मणा वासवाकूटवाहिन्यः कर्मणा सुकृतेन च २१ उपरिष्टात्ततोस्माकं वसंत्येताः सदैव हि एतत्ते का
रणं शक्र निवासकृतमद्य वै २२ गवां देवोपरिष्टाद्धि समाख्यातं शतक्रतो एता हि वरदत्ताश्च वरदाश्चापि वासव २३ सुरभ्यः पुण्य
कर्मिण्यः पावनाः शुभलक्षणाः यदर्थं गां गताश्चैव सुरभ्यः सुरसत्तम २४ ॥ दान॰ १८१

तच्चमेश्रृणुकार्त्स्न्येनवदतोवलसूदन २५ पुरादेवयुगेतातदेवेंद्रेषुमहात्मसु त्रीन्लोकाननुशासत्सुविष्णौगर्भत्वमागते २६ आदित्यास्तप्यमानाया
स्तयोघोरंसुदुश्चरं पुत्रार्थममरश्रेष्ठपादेनैकेननित्यदा २७ तांतुदृष्ट्वामहादेवींतप्यमानांमहत्तपः दक्षस्यदुहितादेवीसुरभीनाममानतः २८
अतप्यततपोघोरंहृष्टाधर्मपरायणा कैलासशिखरेरम्येदेवगंधर्वसेविते २९ व्यतिष्ठदेकपादेनपरमंयोगमास्थिता दशवर्षसहस्राणिदशवर्षशता
निच ३० संतप्तास्तपसातस्यादेवाःसर्षिमहोरगाः तत्रगत्वामयासार्द्धंपर्युपासंततांशुभां ३१ अथाहमब्रुवंतत्रदेवींतांतपसान्वितां किमर्थंतप
सेदेवीतपोघोरमनिंदिते ३२ प्रीतस्तेहंमहाभागेतपसानेनशोभने चरयस्ववरंदेविदातास्मीतिपुरंदर ३३ सुरभ्युवाच वरेणभगवन्मह्यंकृतं
लोकपितामह एषएववरोमेद्ययत्प्रीतोसिममानघ ३४ ब्रह्मोवाच तामेवंब्रुवतींदेवींसुरभींत्रिदशेश्वर प्रत्यब्रुवंयद्देवेंद्रतन्निबोधशचीपते
३५ अलोभकाम्ययादेवितपसाचशुभानने प्रसन्नोहंवरंतस्मादमरत्वंददामिते ३६ ॥ ३६ ॥ ३६ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

टी० त्रयाणामुपरिष्टात् ब्रह्मलोके इत्यर्थः ततः परस्य तपःफलस्याभावात् तत्रैव च गोलोकः श्रूयते तावां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः अत्राह तदुरुगाय
१८२ स्य वृष्णः परमं पदमवभाति भूरीति ता ती निवां युवयोः रिंद्राविष्ण्वोर्नरनारायणयोः प्रसादात् वास्तूनि स्थानानि उश्मसि कामयामहे गमध्यै गंतुं यत्र येषु स्थानेषु गावः भूरिशृं

त्रयाणामपि लोकानामुपरिष्टान्निवत्स्यसि मत्प्रसादाच्च विख्यातो लोकः सम
॥भविष्यति ३८॥

गा अत्यंतं मानवत्यः अयासः गतवत्यः अत्र अस्मिन् गोलोके अह एव तत् प्रसिद्धं उरुगायस्य विष्णोः वृष्णः कामपूरकस्य परमं पदं सर्वोत्कृष्टं स्थानं अवभाति अल्पमिव भाति
भूरि अत्यंतं सर्वेभ्यो लोकेभ्य उपरि गोलोक इति सिद्धं अन्यथा चतुर्थो महर्लोक एवाप्नोति न च तस्य परमपदत्वम् अस्तीति मंत्रानुसाराद्ब्रह्मलोके एव गावः संतीति ज्ञेयं ३७॥३७॥ राम०
१८२

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

मानुषेषुचकुर्वाणाःप्रजाः कर्मशुभंतथा निवसंतिमहाभागेसर्वेदुहितरश्चते ३८ मनसाचिंतिताभोगास्तयावैदिव्यमानुषाः यत्रस्वर्गेस्सर्वंदेवितत्तत्सं
पत्स्यतेशुभे ३९ तस्यालोकाःसहस्राक्षसर्वकामसमन्विताः नतत्रक्रमतेमृत्युर्नजरानचपावकः ४० नदैवंवाशुभंकिंचिद्विद्यतेतत्रवासवः तत्रदिव्यान्यरण्या
निदिव्यान्याभरणानिच ४१ विमानानिसुयुक्तानिकामगानिचवासव ब्रह्मचर्येणतपसासत्येनचदमेनच दानैश्चविविधैःपुण्यैस्तथातीर्थानुसेवनात्तपसा
महताचैव ---- सुकृतेनचकर्मणा शक्यःसमासादयितुंगोलोकःपुष्करेक्षण ४३ एतत्तेसर्वमाख्यातंमयाशक्रानुपृच्छते नतेपरिभवःकार्योगवामसुरसू
दन ४४ भीष्मउः एवंश्रुत्वासहस्राक्षःपूजयामासनित्यदा गाश्चक्रेबहुमानंचतासुनित्यंयुधिष्ठिर ४५ एतत्तेसर्वमाख्यातंपावनंचमहाद्युते पवित्रंपरमं
पिगवांमाहात्म्यमुत्तमं ४६ कीर्तितंपुरुषव्याघ्रसर्वपापविमोचनं यइदंकथयेन्नित्यंब्राह्मणेभ्यःसमाहितः ४७ हव्यकव्येषुयज्ञेषुपितृकार्येषुचैवहि
सार्वकामिकमक्षय्यंपितॄंस्तस्योपतिष्ठते ४८ ॥ ४८ ॥ ॥ ४८ ॥ ॥ ४८ ॥ ४८ ॥ ४८ ॥ श्रीरामः॥

© (n) Dhaanantar Trust, J&K Digitized By eGangotri

दा० १८३

५१ अध्यायः उक्तं १ नम्रमात्रसुमा १ पूर्यंतेसुद्धंति ३ ४ ५ ६ ७ ८ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥

म ३

गोषुभक्तश्चलभतेयद्यदिच्छतिमानवः स्त्रियोपिभक्तायागोषुताश्चकाममवाप्नुयुः ४९ पुत्रार्थीलभतेपुत्रंकन्यार्थीतामवाप्नुयात् धनार्थीलभतेवित्तंधर्मार्थी
धर्ममाप्नुयात् ५० विद्यार्थीचाप्नुयाद्विद्यांसुखार्थीप्राप्नुयात्सुखं नकिंचिद्दुर्लभंचैवगवांभक्तस्यभारत ५१ इतिदानधर्मेषुगोलोकप्रश्नः समाप्तः युधिष्ठिरउवाच
उक्तंपितामहेनेदंगवांदानमनुत्तमं विशेषेणनरेंद्राणामिहधर्ममवेक्षतां १ राज्यंहिसततंदुःखंदुर्धरंचाकृतात्मभिः भूयिष्ठंचनरेंद्राणांविद्यतेनशुभागतिः २
पूयंतेतत्रनियतंप्रयच्छंतोवसुंधरां सर्वेचकथिताधर्मास्त्वयामेकुरुनंदन ३ एवमेवगवामुक्तंप्रदानंतेनृगेणह ऋषिणानाचिकेतेनपूर्वमेवनिदर्शितं ४
वेदोपनिषदश्चैवसर्वेकर्मसदक्षिणाः सर्वक्रतुषुचोद्दिष्टंभूमिर्गावोथकांचनं ५ तत्रश्रुतिस्तुपरमासुवर्णंदक्षिणेतिवै एतदिच्छाम्यहंश्रोतुंपितामहयथातथ्यं ६ किंसुवर्णंकथंजातंकस्मिन्कालेकिमात्मकं किंदैवंकिंफलंचैवकस्माच्चपरमुच्यते ७ कस्माद्दानंसुवर्णस्यपूजयंतिमनीषिणः कस्मा
॥च्चदक्षिणार्थंतद्यज्ञकर्मसुशस्यते ८॥ छ॥ छ॥ छ॥

राम० १८३

कस्माच्चपावनंश्रेष्ठंभूमेर्गोभ्यश्चकांचनं परमंदक्षिणार्थेचतद्ब्रवीहिपितामह ९ भीष्मउ शृणुराजन्नवहितोवहुकारणविस्तरं जातरूपसमुत्पत्तिमनुभूतं
चतन्मया १० पितामममहातेजाःशांतनुर्निधनंगतः तस्यदित्सुरहंश्राद्धंगंगाद्वारमुपागमं तत्रागम्यपितुःपुत्रश्राद्धकर्मसमारभं ११ मातामेजाह्न
वीचात्रसहाय्यमकरोत्तदा ततोग्रतस्तपःसिद्धानुपवेश्यवहूनृषीन् तोयप्रदानात्प्रभृतिकार्याण्यहमथारभं १३ तत्समाप्ययथोद्दिष्टंपूर्वकर्मसमाहि
तःदातुंनिर्वपणंसम्यग्यथावदहमारभं १४ ततस्तंदर्भविन्यासंभित्वासरुचिरांगदः प्रलंवाभरणोवाहुरुदतिष्ठद्विशांपते १५ तमुत्थितमहंदृष्ट्वा
परंविस्मयमागमं प्रतिग्रहीतासाक्षान्मेपितेतिभरतर्षभ १६ ततोमेपुनरेवासीत्संज्ञासंचिंत्यशास्त्रतःनायंवेदेषुविहितोविधिर्हस्तइतिप्रभो १७ पि
डोदेयोनरेणेहततोमतिरभून्मम साक्षान्नेहमनुष्यस्यपिंडंहिपितरःक्वचित् १८ गृह्णन्तिविहितंचैवंपिंडोदेयःकुशेष्विति ततोहंतदनादृत्यपितुर्हस्त
निदर्शनं १९ शास्त्रप्रामाण्यसूक्ष्मंतुविधिंपार्थिवसंस्मरन् ततोदर्भेषुतत्सर्वमददंभरतर्षभ २० शास्त्रमार्गानुसारेणतद्विद्धिमनुजर्षभ ततः
सोंतर्हितोवाहुःपितुर्ममजनाधिप २१ ततोमांदर्शयामासुःस्वप्नांतेपितरस्तथा प्रीयमाणास्तुमामूचुःप्रीताःस्मभरतर्षभ २२ ।। २२ ।।

द्रो० ३३ त्वच्छ्रुतांनिष्पापता ३४ ॥३४॥ ॥३४॥ ॥ ॥ ॥ ॥ ॥ ॥ छ॥ ॥छ॥ छ॥छ
१२४

मं३

विज्ञानेनतपसानेनयज्ञमुख्यसिधर्मतः त्वयाहिकुर्वताशास्त्रंप्रमाणमिहपार्थिव २३ आत्माधर्मःश्रुतंवेदाःपितरश्चर्षिभिःसह साक्षाभिनामहोत्रब्राह्मण
स्त्वोयप्रजापतिः २४ प्रमाणमुपनीतावैस्थितिश्चनविचालिताः तदिदंसम्यगारब्धंत्वयाद्यभरतर्षभ २५ किंतुभूमेर्गवांचार्थेसुवर्णंदीयतामिति
एवंस्वयंचधर्मज्ञसर्वेचास्मत्पितामहाः २६ पावितावैभविष्यंतिपावनेनपरेहितत् दशपूर्वान्दशैवान्यांस्तथासंतारयंतिवै २७ सुवर्णंयेप्रयच्छंतिएवं
मत्पितरोब्रुवन् ततोहंविस्मितोराजन्प्रतिबु द्धोविशांपते २८ सुवर्णदानेकरवंमतिंभरतर्षभ इतिहासमिमंचापिश्रृणुराजन्पुरातनं २९ जा
मदग्न्यंप्रतिविभोधन्यमायुष्यमेवच जामदग्न्येनरामेणतीव्ररोषान्वितेनवै ३० त्रिःसप्तकृत्वःपृथिवीकृतानिःक्षत्रियापुरा ततोजित्वामहींकृत्स्नां
रामोराजीवलोचनः ३१ आजहारक्रतुंवीरोब्रह्मक्षत्रेणपूजितं वाजिमेधंमहाराजसर्वकामसमन्वितं ३२ पावनंसर्वभूतानांतेजोद्युतिविवर्द्धनं
विपाप्माचसतेजस्वीतेनक्रतुफलेनच ३३ नैवात्मनोथलघुतांजामदग्न्योध्यगच्छत सतुक्रतुवरेणेष्ट्वामहात्मादक्षिणावतां अपृच्छदागमसंपन्ना राम०
नृषीन्देवांश्चभार्गवः ॥पावनंपरमंनृणांउग्रेणकर्मणाभारतः ॥ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽऽऽः १२४

© Dharmartha Trust J&K Digitized By eGangotri

४६ अजइति अजादीनामग्न्यादिरूपत्वात्तद्दानंततच्छोकप्रदं ४७॥ ॥ ६॥ छ॥ छ छ छ छ छ छ:

तदुच्यतांमहाभागाइतिजातघृणोब्रवीत् इत्युक्तावेदशास्त्रज्ञास्तमूचुस्तेमहर्षयः राम विप्राःसत्क्रियंतांवेदप्रामाणदर्शनात् ३६ भूयश्चविप्रर्षिगणाः
प्रष्टव्याःपावनंप्रति तेयद्ब्रूयुर्महाप्राज्ञास्तच्चैवसमुदाचर ३७ ततोवसिष्ठंदेवर्षिमगस्त्यमथकाश्यपं तमेवार्थंमहातेजाःपप्रच्छभृगुनंदनः ३८ जाताम
तिर्मेविप्रेंद्राःकथंपूयेयमित्युत केनवाकर्मयोगेनप्रदानेनेहकेनवा ३९ यदिवोनुग्रहकृताबुद्धिर्मोप्रतिसत्तमाः प्रब्रूतंपावनंकिंमेभवेदितितपोधनाः
४० अथयऊचुःगाश्चभूमिंचवित्तंचदत्त्वेहभृगुनंदन पापकृत्पूयतेमर्त्यइतिभार्गवशुश्रुम ४१ अन्यदानंतुविप्रर्षेश्रूयतांपावनंमहत् दिव्यम
त्यद्भुताकारमपत्यंजातवेदसः ४२ दग्ध्वालोकान्पुरावीर्यात्संभूतमिहशुश्रुम सुवर्णमितिविख्यातंतद्दत्त्वासिद्धिमेष्यसि ४३ ततोब्रवीद्वसिष्ठस्तंभ
गवान्संशितव्रतः शृणुरामयथोत्पन्नंसुवर्णमनलप्रभं ४४ फलंदास्यतितेयत्तुदानेपरमिहोच्यते सुवर्णंयच्चयस्माच्चयथाचगुणवत्तरं ४५ त
न्निबोधमहाबाहोसर्वंनिगदतोमम अग्नीषोमात्मकमिदंसुवर्णंविद्धिनिश्चये ४६ अजोग्निर्वरुणोमेषःसूर्योश्वइतिदर्शनः कुंजराश्चमृगानागा
॥ महिषाश्चासुराइति ४७॥

© Dharmartha Trust J&K. Digitized By eGangotri

ह्रा० १८५ अमरराक्षसपदाभ्यामपितस्थो:वराहश्चनिर्ऋतिः अस्यदानं अल्पफलंएहादृयोभूमिरित्याहतितद्दानंमहाफलं।इडेतिइडावानयज्ञः ४८ जगदितिस्वर्णेदानंब्रह्मांदुदान

कश्चकुठाश्चवराहाश्चराक्षसाभृगुनंदन इडागावःपयःसोमोभूमिरित्येवचस्मृतिः ४८ जगत्संवेदनिर्मथ्यतेजोराशिःसमुत्थितः सुवर्णमेभ्योविप्रर्षेर
त्नंपरममुत्तमं ४९ एतस्मात्कारणाद्देवागंधर्वोरगराक्षसाः मनुष्याश्चपिशाचाश्चप्रयताधारयंतितत् ५० मुकुटैरंगदयुतैरलंकारैःपृथग्विधैः सुव
र्णविकृतैस्तत्रविराजंतेभृगूत्तम ५१ तस्मात्सर्वपवित्रेभ्यःपवित्रंपरमंस्मृतं भूमेर्गोभ्योथरत्नेभ्यस्तद्विद्धिमनुजर्षभ ५२ पृथिवींगाश्चदत्वेहय
च्चान्यदपिकिंचन विशिष्यतेसुवर्णस्यदानंपरमकंविभो ५३ अक्षयंपावनंचैवसुवर्णममरद्युते प्रयच्छ [illegible] द्विजमुख्येभ्यःपावनंह्ये
तदुत्तमम्।सुवर्णमेवसर्वासुदक्षिणासुविधीयते॥सुवर्णंयेप्रयच्छंतिसर्वदास्तेभवंत्युत।देवतास्तेप्रयच्छंतियेसुवर्णंददत्यथः अग्निर्हिदेवताः
सर्वाःसुवर्णंचतदात्मकं ५६ तस्मात्सुवर्णंददताद्दत्ताःसर्वाःस्युर्देवताः भवंतिपुरुषव्याघ्रनस्वतःपरमंविदुः ५७ भूयएवचमाहात्म्यंसुवर्णस्य
॥सुनिबोधमे गदतोममविप्रर्षेसर्वशस्त्रभृतांवर:५८॥

तुल्यमितिभावः ४९॥ ॥ ४९ ॥ ॥४९॥ ॥४९॥ ॥४९ ॥ ॥४९॥ ४९॥ ॥४९ ॥४९॥ ४९ राम० १८५

© (c) Dharmartha Trust J&K Digitized By eGangotri

मयाश्रुतमिदं पूर्वं पुराणो भृगुनंदन प्रजापतेः कथयतो यथान्यायं तु तस्य वै ५९ शूलपाणेर्भगवतो देव्या सह महात्मनः गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह
६० देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनंदन समागमे भगवतो देव्या सह महात्मनः ६१ ततः सर्वे समुद्विग्ना देवा रुद्रमुपागमन् ते महादेवमासीनं देवीं च वरदामुमां
६२ प्रसाद्य शिरसा सर्वे रुद्रमूचुर्भृगूद्वह अयं समागमो देव देव्या सह तवानघ ६३ तपस्विनस्तपस्विन्या तेजस्विन्यातितेजसः अमोघतेजास्त्वं देवी चेयं — मुमा देव
तथा ६४ अपत्यं युवयोर्देव बलवद्भविता विभो तन्नूनं त्रिषु लोकेषु न किंचिच्छेषयिष्यति। तदेभ्यः प्रणतेभ्यस्त्वं देवेभ्यः पृथुलोचन वरं प्रयच्छ लोकेश त्रैलोक्यहि
तकाम्यया ६६ अपत्यार्थं निगच्छ दीप्ततेजः परमकं विभो त्रैलोक्यसारौ हि युवां लोकं संतापयिष्यथः ६७ तदपत्यं हि युवयोर्देवानभिभवेद्ध्रुवं न हि ते पृथिवी
देवी न च द्यौर्न दिवं विभो नेदं धारयितुं शक्ताः समस्ता इति नो मतिः ६८ तेजःप्रभावनिर्दग्धं तस्मात्सर्वमिदं जगत् तस्मात्प्रसादं भगवन् कर्तुमर्हसि नः प्रभो ६९
न देव्यां संभवेत्पुत्रो भवतः सुरसत्तम धैर्यादेव निगृह्णीष्व तेजो ज्वलितमुत्तमं ७० इति तेषां कथयतां भगवान्वृषभध्वजः एवमस्त्विति देवांस्तान्विप्रर्षे प्रत्यभा
षत ७१ इत्युक्त्वा चोर्ध्वमनयद्रेतो वृषभवाहनः ऊर्ध्वरेताः समभवत् ततः प्रभृति चापि सः ७२ रुद्राणी तु ततः क्रुद्धा प्रजोच्छेदे तथा कृते देवानथाब्रवीत्तत्र
स्त्रीभावात्परुषं वचः ७३ यस्मादपत्यकामो वै भर्ता मे विनिवर्तितः तस्मात्सर्वे सुरा यूयमनपत्या भविष्यथ ७४ प्रजोच्छेदो मम कृतो यस्माद्युष्माभिरद्य वै
॥ तस्मात्प्रजा वः खगमाः सर्वेषां न भविष्यति ७५ पावकस्तु न तत्रासीच्छा ॥

रा० पकालेभृगुद्वह देवादेव्यास्तथाशापात्तनयत्यास्ततोभवन् ७६ रुद्रस्तुतेजोप्रतिमंधारयामासवैतदा प्रस्कन्नंतुततस्तस्मात्किंचित्तत्रापतद्भुवि ७७ उत्प
१८६ पाततदावन्हौवह्नेर्देवाद्भुतोपमं तेजस्तेजस्विसंयुक्तमात्मयोनित्वमागतं ७८ एतस्मिन्नेवकालेतुदेवाशक्रपुरोगमाः असुरस्तारकोनामतेनसंतापिता
भृशं ७९ आदित्यावसवोरुद्रामरुतोथाश्विनावपि साध्याश्वसर्वे संत्रस्ता दैतेयस्यपराक्रमात् ८० स्थानानिदेवतानांहि विमानानिपुराणिच ऋषि
णांचाश्रमाश्चैववभूवुरसुरैर्हृताः ८१ तेदीनमनसः सर्वेदेवताऋषयश्चये प्रजग्मुःशरणंदेवंब्रह्माणमजरंविभुं ८२ ॥ ८२ ॥ ८२॥॥

राम०
१८६

अ
अध्यायः सुरः १२ नष्टः अदर्शनं गतः १३ ॥ छ ॥ छ ॥ छ ॥ छ छ छ ॥ छ ॥ छ ॥ छ ॥ ॥ छ छ ॥

इति दानवे भेषु सर्वशो त्पन्नो देवा ऊचुः असुरस्तारको नाम त्वया दत्तवरः प्रभो सुरान् बाधते नित्यं तस्य वधः प्रविधीयतां १ तस्माद्भयं समुत्पन्नम
स्माकं वै पितामह परित्राय स्व नो देव नस्त्वन्या गतिरस्ति नः २ ब्रह्मोवाच समोहं सर्वभूतानामधर्मं नैव रोचये हन्यतां तारकः क्षिप्रं सुरर्षिगणबाधिता ३
वेदा धर्माश्च नोच्छेदं गच्छेयुः सुरसत्तमाः विहितं पूर्वमेवात्र मया वै व्येतु वो ज्वरः ४ देवा ऊचुः वरदानाद्भगवतो दैतेयो बलगर्वितः देवैर्न शक्यते हन्तुं स कथं
प्रशमं व्रजेत् ५ स हि नैव स्म देवानां नासुराणां न रक्षसां वध्यः स्यामिति जग्राह वरं त्वत्तः पितामह ६ देवाश्च शप्ता रुद्राण्या प्रजोच्छेदे पुरा कृते न भवि
ष्यति वो पत्यमिति सर्वे जगत्पते ७ ब्रह्मोवाच हुताशनो न तत्रासीच्छापकाले सुरोत्तमाः स उत्पादयिता पत्यं वधाय त्रिदशद्विषां ८ तदेव सर्वानतिक्र
म्य देवदानवराक्षसान् मानुषानथ गंधर्वान्नागानथ च पक्षिणः ९ अस्त्रेणामोघपातेन शक्त्या तं घातयिष्यति यतो वो भयमुत्पन्नं ये चान्ये सुरशत्र
वः १० सनातनो हि संकल्पः काम इत्यभिधीयते रुद्रस्य तेजः प्रस्कन्नमग्नौ निपतितं च यत् ११ तत्तेजोऽग्निर्महद्भूतं द्वितीयमिव पावकं वधार्थं देवशत्रू
णां गंगायां जनयिष्यति १२ स तु नावाप्तं शापं नष्टः स हुतभुक् तदा तस्माद्वो भयहृद्देवाः समुत्पत्स्यति पावकिः १३ ॥ ॥ १३ ॥ १३

रा० १८७ १४ ननु सर्वे सुरास्तु दिश्यदेव्याः शापात्कथं वह्नेर्न शापः सत्त्वानासीदितिचेत्तेनास्मिमित्यत आह नीति वह्नेस्तेन सलिलाश्रयोद्देश्यतेति भावः १५ कामः काम्य

अविष्यतो वै ज्वलनस्तथा वाघनिसूदनः तारकस्य वधोपायः कथितो वै मयानघाः १४ नहि तेजस्विनां शापास्तेजः संप्रभवंति वै बलान्यतिबलं प्राप्य
दुर्बलानि भवंति वै १५ हन्यात्स वध्या वरदान्नपि देवतपस्विनः संकल्पाभिरुचिः कामः सनातनतमोऽभवत् १६ जगत्पतिरनिर्देश्यः सर्वगः सर्वभावनः
हृच्छयः सर्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः १७ अविष्यतां सतु क्षिप्रं तेजोराशिर्हुताशनः स वो मनोगतं कामं देवः संपादयिष्यति १८ स तद्वाक्यमुपश्रु
त्य ततो देवा महात्मनः जग्मुः संसिद्धसंकल्पाः पर्येषंतो विभावसुं १९ ततस्त्रैलोक्यमृषयो व्यचिन्वंत सुरैः सह कांक्षंतो दर्शनं वह्नेः सर्वे तद्गतमानसाः
२० परेण तपसा युक्ताः श्रीमंतो लोकविश्रुताः लोकाननुचरन्सिद्धाः सर्व एव भृगूत्तम २१ नष्टमात्मनि संलीनं नाधिजग्मुर्हुताशनं ततः संजातसंत्रासा
न गनेर्दर्शन लालसान् २२ जलेचरः क्लांतमनास्तेजसाग्नेः प्रदीपितः उवाच देवान्मंडूको रसातलतलोत्थितः २३ रसातलतले देवा वसत्यग्निरिति
प्रभो संतापादिह संप्राप्तः पावकप्रभवादहं २४ स संसृष्टो जले देवा भगवान्हव्यवाहनः अपः संसृज्य तेजोभिस्तेन संतापिता वयं २५ ॥ ॥

मानो वह्निः संकल्पः अपत्यविषयस्तस्यैं अभिरुचिः सर्वतो रोचमानो वत्सरस्य १६ नष्टं अदर्शनं गतं आत्मनि जले जलस्य तेजोजन्यत्वात् ॥ १४॥ १५॥ राम० १८७

२६ नरसानितिरसेनेंद्रियरहितोभविष्यसीत्यर्थः २० अग्निह्रुत्र्यपीतिच्छेदः ३७ ॥ ॥३७॥ ३७॥ ३७॥ ॥३७॥ ॥३७॥ ॥३७॥ ३७॥

तस्यदर्शनमिष्टंवोयदिदेवाविभावसोः॥तेनैनमधिगच्छध्वंकार्यंवोयदिवह्निनागम्यतांसाधयिष्यामोवयंत्वग्निभयात्सुराः एतावदुक्त्वामंडूकस्त्वरितोजलमा
विशत् २७ हुताशनस्तुबुबुधेमंडूकस्यचपैशुनं शशापसतमासाद्यनरसान्वेत्स्यसीतिवै २८ तंवैसंयुज्यशापेनमंडूकंत्वरितोययौ अन्यत्रवासायविभुर्नचात्मा
नमदर्शयत् २९ देवास्त्वनुग्रहंचक्रुर्मंडूकानांभृगूत्तम यत्तच्छृणुमहाबाहोगदतोममसर्वशः ३० देवाऊचुः अग्निशापादजिह्वापिरसज्ञानवहिष्कृ
ताः सरस्वतींबहुविधांयूयमुच्चारयिष्यथ ३१ बिलवासगतांश्चैवनिराहारानचेतसः गतासूनपिसंशुष्कान्भूमिःसंतारयिष्यति ३२ तमोघनाया
मपिवैनिशायांसंचरिष्यथ इत्युक्त्वातांस्ततोदेवाःपुनरेवमहीमिमां ३३ परीयुर्ज्वलनस्यार्थेनचाविंदन्हुताशनं अथतान्द्विरदःकश्चित्सुरेंद्रद्विरदो
पमः ३४ अश्वत्थस्थोग्निरित्येवमाहदेवान्भृगूद्वह शशापज्वलनःसर्वान्द्विरदान्क्रोधमूर्छितः प्रतीपाभवतांजिह्वाभवित्रीतिभृगूद्वह ३५ इ
त्युक्त्वानिःसृतोश्वत्थादग्निर्वारणसूचितः प्रविवेशशमीगर्भमथवह्निःसुषुप्सया ३६ अनुग्रहंतुनागानांयंचक्रुःशृणुतंप्रभो देवाभृगु
॥ कुलश्रेष्ठप्रीतासत्यपराक्रमः ३७ ॥

© (c) Dharmartha Trust J&K. Digitized by eGangotri

५५ उमाऊमाणां द्राघुम्यम्यामितिमर्न्नंतात्द्राप अधिशयता अधिशयानेन ४८॥ ४८॥ ॥४८॥ ४८॥ ४८॥ ॥४८॥ ४८॥ ४८॥

देवाऊचुः प्रतीययाजिह्वयापिसर्वोहारंकरिष्यथ वाचंचोच्चारयिष्यध्वमुच्चैरव्यंजिताक्षरां ३८ इत्युक्त्वापुनरेवाग्निमनुसस्रुर्दिवौकसः अश्वत्था
न्निस्रतश्चाग्निःशमीगर्भमुपाविशत् ३९ शुकेनख्यापितोविप्रतंदेवाःसमुपाद्रवन् शशापशुकमग्निस्त्वंवाग्विहीनोभविष्यसि ४० जिह्वामावर्त्त
यामासतस्यापिहुतभुक्तथा दृष्ट्वातुज्वलनंदेवाःशुकमूचुर्दयान्विताः ४१ भवितानत्वमत्यंतंशुकत्वंनष्टवागिति आवृत्तजिह्वस्यसतोवाक्यंकांतं
भविष्यति ४२ बालस्येवप्रवृद्धस्यफलमव्यक्तमद्भुतं इत्युक्त्वातंशमीगर्भेवह्निमालक्ष्यदेवताः ४३ देवतायतनंचक्रुःपुण्यंसर्वक्रियास्वपि ततः
प्रभृतिचाप्यग्निःशमीगर्भेषुदृश्यते ४४ उत्पादनेतथोपायमधिजग्मुश्चमानवाः आपोरसातलेयास्तुसंततमाश्विजभानुना ४५ ताःपर्वतप्र
स्रवणैरूष्मांमुंचंतिभार्गव पावकेनाधिशयतासंतप्तास्तस्यतेजसा ४६ अथाग्निर्देवताःदृष्ट्वा बभूवव्यथितस्तदा किमागमनमित्येवंतान
पृच्छतपावकः ४७ तमूचुर्विबुधाःसर्वेतेचैवपरमर्षयः त्वांनियोक्ष्यामहेकार्येतद्भवान्कर्तुमर्हति ४८ ॥ ४८ ॥ ४८ ॥ ४८ ॥

© (C) Dhaarti Trust & K Digitized By eGangotri

५८ अवुद्धिपतितेनअकस्मात्जातेन ५९ ६० ६१ ॥ ॥ ६१ ॥ ६१ ॥ ६१ ॥ ।६१ ॥ ॥ ६१॥ ६१

स्मृतेचतस्मिन्भवितातवापिसुमहानुगणः ४९ अग्निरुवाच कृतयज्ञवतांकार्यंकर्त्तास्मितत्रहेसुराः भोवतांतुनियोज्योस्मिमावोत्रास्तुविचारणा ५०
देवाऊचुः अस्तुरतारकोनामब्रह्मणोवरदर्पितः अस्मान्प्रबाधतेवीर्याद्वधस्तस्यविधीयतां ५१ इमान्देवगणांस्तातप्रजापतिगणांस्तथा ऋषींश्चापिम
हाभागपरित्रायस्वपावक ५२ अपत्यंतेजसायुक्तंप्रवीरंजनयप्रभो यद्भयंनोसुराणांतस्मान्नाशयेद्धव्यवाहन ५३ शप्तानांनोमहादेव्यानान्यदस्तिपरा
यणं अन्यत्रभवतोवीर्यंतस्मात्त्रायस्वनःप्रभो ५४ इत्युक्तःसतथेत्युक्त्वाभगवान्हव्यवाहनः जगामाथदुराधर्षोगंगांभागीरथींप्रति ५५ तयाचाप्य
भवन्मिश्रोगर्भंचास्यादधेत्तदा वह्न्धेस्ततदागर्भः कृच्छ्रेणस्वगतिर्यथा ५६ तेजसातस्यदेमवस्यगंगाविह्वलचेतना संतापमगमत्तीव्रंमासोढुंनशशा
कह ५७ अहितेज्वलनेनागर्भेतेजःसमन्विते गंगायामहत्सुरः कश्चिद्भैरवंनादमानदत् ५८ अवुद्धिपतितेनाथनादेनविपुलेनसा वित्रस्तो
द्भ्रांतनयनागंगाविह्वललोचना ५९ विसंज्ञानाशकद्गर्भंवोढुमात्मानमेवच सातुतेजःपरीतांगीकंपयंतीवजान्हवी ६० उवाचज्वलनंविप्रतदागर्भव
॥लोद्धुता तेनाशक्तास्मिभगवंस्तेजसोस्यविधारणे ६१॥

प३

तेजः १

रा० १८६ ६८ रुद्रस्य यन्मैः तेन प्रधर्षिता रुद्रेवाण्यपरस्मिन्निरितिश्रुतेः ७१ कर्हवानोकस्तुमुण्यारमं ७३ ७४॥ ७३॥ ॥७३ ॥७३॥ ७३॥ ७४॥ ॥७३॥ ७४॥

विमूढास्मिभृत्तानेननमेस्वास्थ्यंयथापुरा विह्वलाचास्मिभगवंश्चेतोनष्टंचमेनघ ६२ धारणेनास्यशक्ताहंगर्भस्यतपतांवर उत्सक्ष्येहमिमंदुःखान्नतुकामा
त्कथंचन ६३ नतेजसोस्ति संस्पर्शोममदेवविभावसो आपदर्थंहिसंबंधःसुसूक्ष्मोपिमहाद्युते ६४ यदत्रगुणसंपन्नमितरत्रहुताशन त्वय्येवनरहंमन्ये
धर्मोधर्मोत्रकेवलो ६५ तामुवाचततोवह्निर्धार्यतांधार्यतामिति गर्भोमत्तेजसायुक्तोमहागुणफलोदयः ६६ शक्तात्वमसिमहींकृत्स्नांवोढुंधारयितुंतथा नहिते
किंचित्प्राप्यमन्यतोधारणाहृते ६७ सावह्निनावायमाणादेवैरपिसरिद्वरा समुत्ससर्जतंगर्भंमेरोगिरिवरेतदा ६८ समर्थाधारणेचापिरुद्रतेजःप्रधर्षिता
नाशकत्तंतदागर्भंसंधारयितुमोजसा ६९ सासमुत्सृज्यतंदुःखाद्दीप्तवैश्वानरप्रभं दर्शयामासचाग्निस्तांतदागंगांभृगूद्वह ७० पप्रच्छसरितांश्रेष्ठांकच्चि
द्गर्भःसुखोदयः कीदृग्वर्णोपिवादेविकीदृग्रूपश्चदृश्यते तेजसाकेनवायुक्तःसर्वमेतद्ब्रवीहिमे ७१ गंगोवाच जातरूपःसगर्भोवैतेजसात्वमिवानघ
सुवर्णोविमलोदीप्तःपर्वतंचावभासयन् ७२ पद्मोत्पलविमिश्राणांह्रदानामिवशीतलः गंधोस्यसकदंबानांतुल्योवैतपतांवरे ७३ तेजसातस्यगर्भस्यभा

॥स्करस्येवरश्मिभिः यद्द्रव्यंपरिसंसृष्टंपृथिव्यांपर्वतेषुच १४॥

तत्सर्वंकांचनीभूतंसमंतात्प्रत्यदृश्यत पर्यधावतशैलांश्च नदीःप्रस्रवणानिच ॥७५॥ व्यादीपयंस्तेजसाचत्रैलोक्यंसचराचरम् ॥ एवंरूपःसभगवान्पुत्रस्तेहव्यवाहन ॥ सूर्यवै
॥श्वानरसमःकांत्यासोमद्वापरः॥ एवमुक्त्वातुसादेवीतत्रैवांतरधीयत ७७॥ त्रुटिरिवम १४ राम० १८६

८७ देवसमहतस्तिरुद्रसेत्यर्थः ८८ ८९ ९० ॥ ॥९०॥ ९०॥ ॥ ९०॥ ॥९०॥ ९०॥ ९०॥ ९० ॥

शर्म १ ५३

पावकश्चापितेजस्वीकृत्वाकार्यंदिवौकसां जगामेष्टंततोदेशंतदावंशनंदन ७८ एतैःकर्मगुणैर्लोकेनामाग्निःपरिगीयते हिरण्यरेताइतिवैऋ
षिभिर्विबुधैस्तथा ७९ पृथिवीचतदादेवीख्यातावसुमतीतिवै सतुगर्भोमहातेजागांगेयःपावकोद्भवः ८० दिव्यंशरवणंप्राप्यव
वृधेद्भुतदर्शनः ददृशुःकृत्तिकास्तंतुबालार्कसदृशद्युतिं ८१ पुत्रंचैताभृतंबालंपुपुषुस्तन्यविस्रवैः ततःसकार्त्तिकेयत्वमवापपरमद्युतिः ८२
स्कन्नत्वात्स्कंदतांचापिगुहावासाद्गुहोभवत् एवंसुवर्णमुत्पन्नमपत्यंजातवेदसः ८३ तत्रजांबूनदंश्रेष्ठंदेवानामपिभूषणं ततःप्रभृतिचा
प्यतज्जातरूपमुदाहृतं ८४ रत्नानामुत्तमंरत्नंभूषणानांतथोत्तमं पवित्रंचपवित्राणांमंगलानांचमंगलं ८५ यत्सुवर्णंसभगवानग्निरीशःप्र
जापतिःपवित्राणांपवित्रंहिकनकंद्विजसत्तम अग्नीषोमात्मकंचैवजातरूपमुदाहृतं ८६ वसिष्ठउ अपिचेदंपुराराममश्रुतंमेब्रह्मदर्श
नं पितामहस्ययद्वृत्तंब्रह्मणःपरमात्मनः ८७ देवस्यमहतस्तातवारुणींबिभ्रतस्तनुं ऐश्वर्येवारुणेरामरुद्रस्येशस्यवैप्रभो ८८ आ
जग्मुर्मुनयःसर्वेदेवाश्चाग्निपुरोगमाः यज्ञांगानिचसर्वाणिवषट्कारश्चमूर्तिमान् ८९ मूर्तिमंतिचसामानियजूंषिचसहस्रशः ऋग्वेद
॥श्चागमत्तत्रपदक्रमविभूषितः ९० ॥

द्रा० १८०

९९ विसंज्ञात् करणायानारताभिः पतिताभीरेतः कणिकाभिः सहपश्चूत्संगतस्य ९९ प्रादुर्भावश्चरमधात्तुः १०१ भूतमनामं चतुर्विधं ततेजसः तस्मत्रिगुणात्म

घा१

लक्षणानि सुरास्तोमानि रुक्तेसुरपंक्तयः ॐकारश्चावसन्नोत्र नियमहत्प्रमहोत्तथा ९८ वेदाश्चसोपनिषदो विद्या सावित्र्यथापिच भूतंभव्यंभविष्यं
च दधार भगवान्शिवः ९२ संजुहावात्मनात्मानं स्वयमेव तदा प्रभो यज्ञंच शोभयामासबहुरूपं पिनाकधृक् ९३ घोनेभः पृथिवी स्वंच तत्तथा चैवैष
भूपतिः सर्वविद्येश्वरः श्रीमानेषचापि विभावसुः ९४ एषब्रह्मा शिवो रुद्रो वरुणोग्नि प्रजापतिः कीर्त्यते भगवान्देवः सर्वभूतपतिः शिवः ९५
तस्ययज्ञः पशुपतेस्तपः क्रतवएवच दीक्षादीप्तव्रतास्वादिशश्चसदिग्गीश्वराः ९६ देवपत्न्यश्चकन्याश्चदेवानांचैवमातरः आजग्मुः सहितास्तत्र
तदा भृगुकुलोद्वह ९७ यज्ञंपशुपतेः प्रीता वरुणस्यमहात्मनः स्वयंभुवस्ततां दृष्ट्वारेतः समपतद्भुवि ९८ तस्य शुक्रस्य विस्यंदात्पश्चूत्संगतस्य
भूमितः प्रास्यत्पूषाकराभ्यां वैतस्मिन्नेवहुताशने ९९ ततस्तस्मिन्संप्रहृते सत्रेज्वलितपावके ब्रह्मणो जुह्वतस्तत्र प्रादुर्भावो बभूवह १००
स्कन्नमात्रंच तच्छुक्रं स्रुवेण परिगृह्य सः आज्यवन्मंत्रतश्चापि सोजुहोद्भृगुनंदन १ ततस्तज्जनयामास भूतग्रामं च वीर्यवान् तस्मात्तैजस

त१

॥स्तस्मात् जज्ञे लोकेषु तैजसं १०१॥

यस्य रेतसः संबंधी यस्ते जोंशः रजोंशः तस्मात्तेजसप्रवृत्तिप्रधानं नगतं च भूत १०१ ॥ ॥१०१॥ ॥ १०१ ॥ ॥१०१॥ १०१ राम० १८०

© Dharmartha Trust J&K. Digitized by eGangotri

तमतः तमोंशात्तामसंस्थावरं सत्वांशस्तउभयत्रानुगतः उभयेषुसात्त्विकानांभावानांधर्महेतुत्वादीनांदर्शनात् सइति समस्त्वगुणाः तेजसः प्रकाशरूपायबुद्धेः नित्यः सत्वमेवबुद्धेःस्व
रूपमित्यर्थः बुद्धेस्तेजस्त्वंप्रकाशकत्वसाम्यान्मनोज्योतिरितिमंत्रलिंगाच्च तस्यधीसत्वस्यच आकाशं आकाशादिवत् स्वंविम्बंस्वरूपं नहिलब्धसत्वात्मकंतदात्मनारमतइतिभावः १३

तमसस्तामसाभावायापिसत्वंतयोभयं सगुणस्तेजसोनित्यस्तस्यचाकाशमेवच ३ सर्वभूतेषुचतथासत्वंतेजस्तथोत्तमंस्मृतेहृतेगेनोतस्मिंस्त
प्रादुरासंस्त्वयाप्रभो ४ पुरुषावपुषायुक्ताः स्वैः स्वैःप्रसवजैर्गुणैः भृगिरेवमगुः पूर्वमंगारेभ्योंगिराभवत् ५ अंगारसंश्रयाच्चैव कविरित्यपरोभवत्
सहज्वालाभिरुत्पन्नोभृगुस्तस्माद्भृगुःस्मृतः ६ मरीचिभ्योमरीचिस्तुमारीचःकश्यपोस्त्वभूत्॥ अंगारेभ्योंगिरास्तातवालखिल्याःकुशोच्चयात् अत्रे
॥वात्रे[illegible]तिवविभोजातमत्रिंवदंत्यपि॥८॥

तस्मात्सर्वेषुभूतेषुतमोमयेषुजङ्गेषुशरीरेषुसत्वंप्रकाशः उत्तमंतेज्ञः धर्मप्रवृत्तिश्चतत्सर्वं तस्माद्ब्रह्मणोहुतात्प्रजापतिशुक्रात्तजज्ञिरेभूत्यर्थः ४ प्रसवजैः कारणजैर्गुणैः
तानेवाहभृगितिभृजतिपचयतीतिभृकूज्वालासस्मात्जालाहृत्येवभृगुरितिनाम ५ अंगाराश्रिताअल्पज्वालाः निर्धूमाः ताभ्यःकविरभूदित्यर्थः भृगितिव्याचष्टेसहेति ६
॥अत्रैवकुशोच्चयेअत्र अत्रैवेतिसंबंधः ८॥

© Dharmartha Trust J&K. Digitized By eGangotri

रा० १९१

वर्यो हेम्यः समूहेभ्यः ९ अश्रुतः अश्रुसकाशात् स्रोतोभ्यः श्रोत्रादीन्द्रियेभ्यः १० बलात्वीर्यात् एतस्मात् अग्निजत्वात् ११ निर्यासाः हारुगताः लाक्षाद्यो हरसाः १४

तथा भस्मव्ययोहेभ्यो ब्रह्मर्षिगणास्सम्मताः वैखानसाः समुत्पन्नास्तपःश्रुतगुणोत्सवाः ९ अश्रुतोस्य समुत्पन्नावश्विनौ रूपसम्मतौ शेषाः प्रजानां पतयः स्रोतोभ्यस्तस्यजज्ञिरे १० अथयोरोमकूपेभ्यः स्वेदाच्च होबलान्मनः एतस्मात्कारणादाहुरग्निस्सर्वास्तु देवताः ११ अयःश्रुत संपन्नाविस्रा मारापदर्शनात् यानि दारुगतानि ते मासान्निर्यासाः पत्र संज्ञिताः १२ अहोरात्रा मुहूर्त्ताश्च पित्तं ज्योतिश्च दारुणं होत्रं लोहितमित्याहु लोहितात्कन कं स्मृतं १३ तन्मैत्रमितिविज्ञेयं धूमाच्च वसवः स्मृताः अर्चिषो याश्च ते रुद्रास्तथादित्यामहाप्रभाः १४ उद्दिष्टास्ते तथांगारा ये धिष्ण्येषु दिवि स्थिताः आदिकर्त्ताच लोकस्य तत्परं ब्रह्मतद्ध्रुवं सर्वकामदमित्याहुं तद्रहस्यमुवाचह १५ ततोब्रवीन्महादेवो वरुणः पवनात्मकः ममसत्रमिदं दिव्यम
॥हं गृहपतिस्त्विह १६॥ १६॥ १६॥

दिविस्थिताः ग्रहतारादयः धिष्ण्येषु स्थानेषु १५ ॥ १६॥ ॥१६॥ १६॥ ॥१६॥ ॥१६॥ श्रीराम श्रीराम श्रीरामः रामः रा० १९१

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

त्रीणिभृगवेगिरःकविसंज्ञानि १७ अवशः आत्माचिन्त्यस्यसोऽवशात्मकः मांतइत्यर्थः १८ ॥१८॥ ॥१८॥ १८ ॥ १८॥ १८॥ ॥१८॥ १८॥

रु२ म१

त्रीणिपूर्वोत्पयत्यानिममतानिनसंशयः इतिजानीतखगमोम य ज्ञफलंहितत् १७ अग्निरुवाच मत्प्रसूतानिमदाश्रयकृतानिच ममैवता
न्यपत्यानिवरुणोस्ववशात्मकः १८ अथाब्रवीद्लोकगुरुर्ब्रह्मालोकपितामहः ममैवतान्यपत्यानिममशुक्रंहुतंहितत् १९ अहंकर्त्ताहिसत्रस्यहो
ताशुक्रस्यचैवह यस्यबीजंफ लंतस्यशुक्रंचेत्कारणंमतं २० ततोभुवस्देवगणाः पितामहमुपेत्यवै कृतांजलिपुटाःसर्वेशिरोभिर्वंधच २१ वयं
चभगवन्सर्वेजगच्चसचराचरं तवैवप्रसवाःसर्वेतस्मात्ग्निर्विभावसुः २२ वरुणश्चेश्वरोदेवोलभतांकाममीप्सितं निसर्गाद्ब्रह्मणश्चापिवरु
णोयादसांपतिः २३ जगृहेवैभृगुंपूर्वमपत्यंसूर्यवर्चसं ईश्वरोंगिरसंचाग्नेरपत्यार्थमकल्पयत् २४ पितामहस्त्वपत्यंवैकविंजग्राहतत्व
वित्तदासवारुणः ख्यातोभृगुःप्रसवकर्मकृत् २५ आग्नेयस्त्वंगिराःश्रीमान्कविर्ब्राह्मोमहायशाः भार्गवांगिरसौलोकेलोकसंतानलक्षणौ
२६ एतेहि प्रसवाःसर्वेप्रजानांपतयस्त्रयः सर्वेसंतानमेतेषामिदमित्युपधारय २७ भृगोस्तुपुत्राःसप्तासन्सर्वेतुल्याभृगोर्गुणैः च्यवनोव
ज्रशीर्षश्चशुचिरौर्वस्तथैवच २८ ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

रा० १९२ ३१ कवेःपुत्रावारुणाइत्यनेनस्वीयभागेपिकविर्ब्रह्मणापसमर्पितइत्यत्रेयं ३७ नः अस्मान् संतरिष्यंतिसंतारयिष्यंति १३९ ॥ १३९ ॥ १३९ ॥ १३९ ॥

भृगोर्वरेणपश्च्वविभुःसवनश्चेतिसप्तते भार्गवावारुणाःसर्वेयेषांवंशेभवानपि २९ अष्टौचांगिरसःपुत्रावारुणास्तेप्युदाहृताः बृहस्पतिरुतथ्यश्च
वयस्यःशांतिरेवच ३० घोरोविरूपःसंवर्तःसुधन्वाचाष्टमःस्मृतः एतेष्टौवह्निजाःसर्वेज्ञाननिष्ठानिरामयाः ३१ ब्रह्मणस्तुकवेःपुत्रावारुणास्तेप्यु
दाहृताः अष्टौप्रसवजैर्युक्ताःगुणैर्ब्रह्मविदःशुभाः ३२ कविःकाव्यश्चधृष्णुश्चबुद्धिमानुशनातथा भृगुश्चविरजाश्चैवकाशीचोग्रश्चधर्मवित् ३३ अ
ष्टौकविसुताह्येतेसर्वमेभिर्जगत्ततं प्रजापतयएतेहिप्रजातायैरिहप्रजाः ३४ एवमंगिरसश्चैवकवेश्चप्रसवान्वयैः भृगोश्चभृगुशार्दूलवंशजैःसत
तंजगत् ३५ वरुणश्चादितोविप्रजग्राहप्रभुरीश्वरः कविंचापिभृगुंचापितस्मात्तौवारुणौस्मृतौ ३६ जग्राहांगिरसंदेवःशिखीतस्माद्धुताश
न तस्मादांगिरसाज्ञेयाःसर्वएवतदन्वयाः ३७ ब्रह्मापितामहःपूर्वंदेवताभिःप्रसादितः इमेनःसंतरिष्यंतिप्रजाभिर्जगतीश्वराः ३८ सर्वेप्रजा
नांपतयःसर्वेचापितपस्विनः त्वत्प्रसादादिमंलोकंतारयिष्यंतिसांप्रतं १३९ ॥ ॥१३९ ॥ ॥१३९ ॥१३९ ॥ ॥१३९ ॥१३९॥ रामा० १९२

© Dhamma Trust & K Digitized By eGangotri

विदुषः विद्वांसः ४२ समयामस्तोत्कर्षीर्थंश्चात्मोत्पाभिमवायनयतामहस्स्पर्धः ४३ ते अनेन समावता आदितिधनेऽयत्निमलयपोरंतरले ४५ देवश्रेष्ठस्यहस्य ४६
धारणानिमुषः ४७ वेदश्रुतिश्चग्राववुगजेंतरा आहुतीहिरण्डन्नरांजुहुयादितिकल्पकारैरसदर्शिता ४८ वल्मीकवपायासानोप्यमितिदधिपयतोः तहहोमऽनेः

तथैववंशाकत्वांरिस्तवृतेजोधिवर्द्धनाः भवेयुर्वेदविदुषः सर्वेचकृतिनस्तथा ४० देवयक्षचराः सौम्याः प्राजापत्यामहर्षयः आप्नुवंति
तपश्चैवब्रह्मचर्यपरंतथा ४१ सर्वेह्येवपमेतेचतवैवप्रभवः प्रभो देवानांब्राह्मणानांचत्वंहिकर्त्तापितामह ४२ मरीचमादितः कृ
त्वासर्वेचैवाथभार्गवाः अपत्यानीतिसंप्रेसहस्रमपाम्पितामह ४३ तेत्वनेनैवरूपेणाभजनिष्यंतिवैप्रजाः स्थापयिष्यंतिवात्मान
युगादिनिधनेतथा ४४ रवमुक्तः सतदातैस्तब्रह्मालोकपितामहः तथेत्यब्रवीत्प्रीतस्तेपिजग्मुर्यथागतं ४५ एवमेतत्पुरावृ
त्तंतस्यपत्नेमहात्मनः देवश्रेष्ठस्यलोकादौवारुणीबिभ्रतस्तनुं ४६ अग्निर्ब्रह्मापशुपतिः शर्वोरुद्रः प्रजापतिः अग्नेरप
त्यमेतद्वैसुवर्णमितिधारणा ४७ अग्न्यभावेचकुर्वंतेवह्निस्थानेषुकांचनं जामदग्न्यप्रमाणज्ञोवेदश्रुतिनिदर्शनात ४८
कुशस्तंबेजुहोत्यग्निंसुवर्णंतत्रचस्थिते वल्मीकस्यवपायांचकर्णेवाजस्यदक्षिणे ४९ शकटेर्व्यापरस्याप्सुब्राह्मणस्य
करेपिवा हुतेप्रीतिकरीमृद्धिंभगवांस्तत्रमन्यते ५० ॥ छ॥

श्रीहिवापारणजकरणीस्सर्वसंवासकायेष्विसेतानिश्रुतौदृश्यंते ४९ शकटोर्वीतुश्रुतंतगारजोयापरस्पतीर्यादेस्य १९० ॥ छ॥ छ॥ छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वा॰
१९३

५२ राजराज्येन कुबेरत्वेन ५८ तेभ्यो लोकेभ्यो न च्यवन्ति ५९ अग्निंश्रोतं स्मार्त्तं वा संजनयित्वा प्रातः प्रागुष्यमर्दयकालेरथात १६०॥ ४॥ ४॥ ४॥४॥

तस्मादग्निपराः सर्वे देवता इति नः श्रुतम् ब्रह्मणो हि प्रसूतो ऽग्निरग्नेरपि च कांचनं ५१ तस्माद्ये वै प्रपश्यन्ति सुवर्णं धर्मदर्शिनः देवतास्ते
प्रपश्यन्ति समस्ता इति नः श्रुतं ५२ तस्य चानपसो लोकान्गछतः परमां गतिं स्वर्लोके राजराज्येन सो ऽभिषिच्येत भार्गव ५३ आदि
त्योदयसंप्राप्ते विधिमंत्रपुरस्कृतं ददाति कांचनं यो वै दुःस्वप्नं प्रतिहंति सः ५४ ददात्युदितमात्रे यस्तस्य पाप्मा विधूयते मध्याह्ने
ददतो रुक्मं हंति पापमनागतं ५५ ददाति पश्चिमां संध्यां यः सुवर्णं यतव्रतः ब्रह्मवाय्वग्निसोमानां सालोक्यमुपयाति यः ५६ सेंद्रेषु चै
व लोकेषु प्रतिष्ठां विंदते शुभां इह लोके यशः प्राप्य शांतपाप्मा च मोदते ५७ ततः संपद्यते ऽन्येषु लोकेष्वप्रतिमः सदा अना
वृतगतिश्चैव कामचारी भवत्युत ५८ न च क्षरन्ति ते भ्यस्य यशश्चैवाप्नुते महत् सुवर्णमक्षयं दत्वा लोकानाप्नोति पुष्कलान्
५९ यस्तु संजनयित्वाग्निमादित्योदयनं प्रति दद्याद्वै व्रतमुद्दिश्य सर्वकामान्समश्नुते १६० ॥ ४ ५॥।

॥४॥ ४॥ ४ ४ ६॥ ६ ६ ६॥ ४॥ ४॥ ४ ॥

स्मा॰
१९३

© (Dharmartha Trust J&K. Digitized By eGangotri

अग्निमिति अग्न्यादित्ययोः प्रादुर्भूतयोरंतराले सुवर्णोदानं रूपेण गुणेन न सुविदितं विप्रकाशमानेन रूपेणाम यास्येयमिसेवं रूपेण गुणेन अनेन रात्रकालेन च गुणेन सुवृत्ते
समानं जातं एतच्च गुणत्रातं प्रवर्तकं दानरोचकं अग्निजत्वात् इत्यग्निः इति शब्दः प्रकारार्थः हिरण्यपुराणकसमापकहरोहिति सामप्युद्दालकप्रलाति क्रमेण प्रसिद्धं

अग्निमित्येव तत्प्राहुः प्रदानं वै सुखावहं पवित्रगुणसंवृत्तं प्रवर्तकमिति स्मृतं ६१ एषा सुवर्णस्योत्पत्तिः कथिता ते मया नघ कार्ति
केयस्य च विभो तत्त्विद्धि भृगुनंदन ६२ कार्तिकेयस्तु संवृद्धः कालेन महता तदा देवैः सेनापतित्वेन वृतः सेंद्रैर्भृगूद्वह ६३ जघा
न तारकं चापि दैत्यं सहान्यैः पापसुरान् त्रिदशेंद्राज्ञया ब्रह्मन् लोकानां हितकाम्यया ६४ सुवर्णदाने च मया कथिता स्ते गुणा
विभो तस्मात्सुवर्णं विप्रेभ्यः प्रयच्छ ददतां वर ६५ भीष्म उवाच इत्युक्तः स वसिष्ठेन जामदग्न्यः प्रतापवान् ददौ सुवर्णं
[illegible] ति [illegible] विप्रेभ्यो व्यमुच्यत च किल्बिषात् ६६ एतत्ते सर्वमाख्यातं सुवर्णस्य महीप
ते प्रदानस्य फलं चैव जन्म चास्य युधिष्ठिर ६७ तस्मात्त्वमपि विप्रेभ्यः प्रयच्छ कनकं बहु ददत्सुवर्णं नृपते किल्बिषाद्वि
प्रमोक्ष्यसि ६८ इति दानधर्मेषु सुवर्णोत्पत्तिः॥ ८५॥

रणपुरस्कारवचनात् हिरण्यं आदित्यत्वेनापि ज्ञातव्यमिति अतस्तयोरंतराले सुवर्णं दरतता हरणमेव फलं प्राप्नोतीत्यर्थः ६१ एवेति पथ्या कार्तिकेयः सर्वदे
वानामग्रे पदे संनिहितवान् एवं तस्मादपि सुवर्णमपि तेषां धर्माणामग्र्यं पुरितेनाशापत्तिलोके च तादृशं जयतीत्यर्थः ६८ दानधर्मेषु हिरण्योत्पत्तिः॥

रा॰ १९४ उक्ताः श्रुतिर्विस्तरलक्षणेनापकं येषां ते श्रुतिलक्षणाः श्रुतस्तुतनाइस्यार्थः ४ विपन्नकृत्ये षां जेगपागर्भे सन्ने सन्निनषट्कार्याः ५ चोदयामासुरित्यत्र हेतुमाहनेति गर्भधा

युधिष्ठिर उवाच १

उक्ताः पितामहेनेह सुवर्णस्य विधानतः विस्तरेण प्रदानस्य ये गुणाः श्रुतिलक्षणाः १ यत्तु कारणमुत्पत्तेः सुवर्णस्य प्रकीर्तितं स कथं
तारकः प्राप्तो निधनं तद्ब्रवीहि मे २ उक्तः सुदेवतानां हि अवध्य इति पार्थिव कथं तस्याभवन्मृत्युर्विस्तरेण प्रकीर्तय ३ एतदि
च्छाम्यहं श्रोतुं त्वत्तः कुरुकुलोद्वह कार्त्स्न्येन तारकवधं परं कौतूहलं हि मे ४ भीष्म उ॰ विपन्नकृत्या राजेंद्र देवता ऋषयस्तथा
कृत्तिकाश्चोदयामासुरपत्यभरणाय वै ५ न देवतानां काचिद्धि समर्था जातवेदसः एकापि शक्तास्तं गर्भं संधारयितुमोज
सा ६ षण्णां तासां ततः प्रीतः पावको गर्भधारणात् स्वेन तेजोविसर्गेण वीर्येण परमेण च ७ तास्तु षट्कृत्तिका गर्भं
पुपुषुर्जातवेदसः षट्सु वर्त्मसु [illegible] तेजोग्नेः सकलं निहितं प्रभो ८ ततस्ता वर्धमानस्य कुमारस्य महात्मनः तेजसा
भिपरितांगो न क्वचिच्छर्म लेभिरे ९ ततस्तेजः परीतांगः सर्वाः काल उपस्थिते समं गर्भं सुषुविरे कृत्तिकास्तं नरर्षभ १०
ततस्तं षट्‌धिष्ठानं गर्भमेकत्वमागतं पृथिवी प्रतिजग्राह कांचनस्य समीपतः ११ ॥ छ॥ श्रीगणेशाय नमः ॥ रामा १९५

रपितुमित्यपकृष्यते पूर्वार्द्धेपि ६ प्रीतस्ताभिर्गुरुडीहृदेशतद्वेत॰ पीताषोटागर्भधृते सतीति विशेषः ७ वर्त्मसु गर्भागमनमार्गेषु योनिष्वित्यर्थः ८ एमा

१६ देवेभ्यो येते येत्वानि श्रापज्जु सामानि मर्जितं तिदेवार्पणानि १७ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥

सगर्भो दिव्यसंस्थानो दीप्तिमान्पावकप्रभः दिव्यं शरवणं प्राप्य ववृधे प्रियदर्शनः ददृशुः कृत्तिकास्तं तु बालमर्कसमद्युतिं जातस्ने
हाश्च सौहार्दात्पुपुषुः स्तन्यविस्रवैः १३ अभवत्कार्त्तिकेयः स त्रैलोक्ये सचराचरे स्कन्नत्वात्स्कन्दतां प्राप्तो गुहावासाद्गुहोभवत् १४
ततो देवास्त्रयस्त्रिंशद्दिशश्च सदिशस्पतिः रुद्रो धाता च विष्णुश्च यमः पूषार्यमा भगः १५ अंशो मित्रश्च साध्याश्च वासवो वसवो
श्विनौ आपो वायुर्नभश्चन्द्रो नक्षत्राणि ग्रहा रविः १६ पृथग्भूतानि चान्यानि यानि देवार्पणानि वै आजग्मुस्तत्र तं द्रष्टुं कुमा
रं ज्वलनात्मजं १७ ऋषयस्तुष्टुवुश्चैव गंधर्वाश्च जगुस्तथा षडाननं कुमारं तु द्विषडक्षं द्विजप्रियं १८ पीनांसं द्वादशभुजं
पावकादित्यवर्चसं शयानं शरगुल्मस्थं दृष्ट्वा देवाः सहर्षिभिः १९ लेभिरे परमं हर्षं मेनिरे चासुरं हतं ततो देवाः प्रियाण्यस्य स
र्वएव समाहरन् २० क्रीडतः क्री[illegible]डनीयानि ददुः पक्षिगणांश्च ह सुपर्णोस्य ददौ पत्रं मयूरं चित्रबर्हिणं २१ राक्षसाश्च ददुस्त
स्मै वराहमहिषावुभौ कु[illegible]क्कुटं चाग्निसंकाशं प्रददौ वरुणः स्वयं २२ चंद्रमाः प्रददौ मेषमादित्यो रुचिरां प्रभां गवां माता च
गा ददौ शतसहस्रशः २३ छागमग्निर्गुणोपेतमिला पुष्पफलं बहु सुधन्वा शकटं चैव रथं चामितकूबरं २४ ॥ छ॥

देवी १

॥ छ॥ ॥ छ॥ ॥ छ॥ छ॥ ॥ छ॥ ॥ छ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ छ॥

© Dharmartha Trust J&K. Digitized By eGangotri

३४ अध्यायः चातुर्वर्ण्यस्य १ ॥ छ

वरुणो वारुणान्दिव्यान्सगजाश्वर सैन्युमान्सिंहान्व्यैरैर्व्याघ्रांश्चद्विपान्नयांश्च पक्षिणः २५ आपरांश्च बहून्घोरांश्छन्नाणि विविधा
नि च राक्षसासुरसंघांश्च अनुजग्मुस्तमाप्लुतं २६ वर्द्धमानं तु तं दृष्ट्वा प्रार्थयामास तारकः उपायैर्बहुभिर्हन्तुं नाशकच्चापि तं विभुं
२७ सेनापत्ये न तं देवाः पूजयित्वा गुहालयं शशंसुर्विप्रकारं तं तस्मै तारककारितं २८ स विवृद्धो महावीर्यो देवसेनापतिः
प्रभुः जघानामोघया शक्त्या दानवं तारकं गुहः २९ तेन तस्मिन्कुमारेण क्रीडता निहते तदा सुरेंद्रः स्थापितो राज्ये देवानां
प्रभुरीश्वरः ३० स सेनापतिरेवाथ बभौ स्कंदः प्रतापवान् ईशो गोप्ता च देवानां प्रियकृच्छंकरस्य च ३१ हिरण्मय
श्री भगवान्नेष एव च पावकिः सदा कुमारो देवानां सैनापत्यमवाप्तवान् ३२ तस्मात्सुवर्णं मंगल्यं रत्नमक्षय्यमुत्तमं सह
जं कार्त्तिकेयस्य वह्नेस्तेजः परं मतं ३३ एवं रामाय कौरव्य वसिष्ठोऽकथयत्पुरा तस्मात्सुवर्णदानाय प्रयतस्व नराधिप ३४
रामः सुवर्णं दत्वा हि विमुक्तः सर्वकिल्बिषैः त्रिविष्टपे महत्स्थानमवापासुलभं नरैः ३५ इति दानधर्मे सुवर्णदाने.
ध्वर्यवे दुहितरं प्रदातु छंदोगे वा चरितं ब्रह्मचर्यं आथर्वणं वेदमधीत्य विप्रः स्नायेत यः पुष्करमाददाति ४४
सर्वान्वेदानधीयीत पुण्यशीलोस्तु धार्मिकः ब्रह्मणः सदनं यातु यस्ते हरति पुष्कर ४५ अगस्त्य उवाच आशी
र्वादस्त्वया प्रोक्तः शपथो बलसूदन दीयतां पुष्करं मह्यमेष धर्मः सनातनः ४६ इंद्र उवाच न मया भगवल्लोभाद्ध
तं पुष्करमद्य वै धर्मांस्तु श्रोतुकामेन हृतं न क्रोद्धुमर्हसि ४७ धर्मः श्रुतिसमुत्कर्षो धर्मसेतुरनामयः आर्षो वै शा एम० २२५
श्वतो नित्यमव्ययोयं मया श्रुतः ४८

प्राय ४३ धर्मश्रुतीनां समुत्कर्षः यत्न एव सेतुस्तरणोपायः ४८ ४८ ४८ ॥ ७ ७ ॥ ७ ॥ ७ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

एष शापस्त्रविधिर्नीमाध्यायः यदिदं १ पुण्यकेषुस्त्रीणांव्रतोत्सर्वेषु २ ३ ४ ५ ५ ५ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

तदिदंगृहीतांविद्यन्मुखारंद्विजसत्तम अतिक्रमंमेगोवत्तद्वंतन्मर्हस्यनिंदित ४९ इत्युक्तःसमहेंद्रेणातपस्वीकोपनो
मशंजग्राहपुष्करंधीमान्प्रसन्नश्चाभवन्मुनिः ५० प्रययुस्तेततोभूयस्तीर्थानिवनगोचराः पुण्येषुतीर्थेषुतथागा
त्राण्याप्लावयंतते ५१ आख्यानंयइदंयुक्तःपठेत्पर्वणिपर्वणि नमूर्खंजनयेत्पुत्रंनभवेच्चनिराकृतिः ५२ नतमा
पत्स्पृशेत्काचिद्विज्वरोनजरावहः विरजाःश्रेयसायुक्तःप्रेत्यस्वर्गमवाप्नुयात ५३ यश्चशास्त्रमधीयीतऋषिभिःप
रिपालितं सगच्छेद्ब्रह्मणोलोकमव्ययंचनरोत्तम ५४ इतिदानधर्मेषुशपथविधिः युधिष्ठिरउवाच यदिदंश्राद्ध
कर्मेषुदीयतेभरतर्षभ छत्रंचोपानहौचैवकेनैतत्संप्रवर्त्तितं कथंचैतत्समुत्पन्नंकिमर्थंचैवदीयते न केवलं
श्राद्धकर्मेषुपुण्यकेष्वपिदीयते २ बहुष्वपिनिमित्तेषुपुण्यमाश्रित्यदीयते एतद्विस्तरतोब्रह्मन्श्रोतुमिच्छामितत्वतः
३ भीष्मउवाच शृणुराजन्नवहितश्छत्रोपानहविस्तरं यथैतत्प्रथितंलोकेयथाचैतत्प्रवर्त्तितं ४ यथाचा
क्षय्यतांप्राप्तंपुण्यतांचयथागतं सर्वमेतदशेषेणप्रवक्ष्यामिनराधिप ५ ॥ ७ ॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

८ ज्येष्ठामूले प्रदक्षिणावर्तमानमध्यमगतो भचक्रे ज्येष्ठानां समस्त्रे पतितं रोहिणीनक्षत्रं तदेव ज्येष्ठानाम मूलं यथाश्रुतार्थग्रहणे तु

दा० २१६ जमदग्नेश्च संवादं सूर्यस्य च महात्मनः पुरा स भगवान्साक्षाद्धनुषाऽक्रीडत प्रभो ६ संधाय संधाय शरांश्चिक्षे
पकिल भार्गवः तानक्षिप्तान्रेणुका सर्वानस्तस्येषून्दीप्ततेजसः ७ आनीय सा तदा तस्मै प्रादादसकृदच्युत
अथ तेन स शब्देन ज्यायाश्चैव शरस्य च प्रहृष्टः संप्रचिक्षेप सा च प्रत्याजहार तान ८ ततो मध्याह्नमारूढे ज्येष्ठा
मूले दिवाकरे स सायकान्द्विजो मुक्त्वा रेणुकामिदमब्रवीत ९ गच्छानय विशालाक्षि शरानेतान्धनुश्च्युतान
यावदेतान्पुनः सुभ्रु क्षिपामीति जनाधिप १० सा गच्छन्त्यन्तरा छायां वृक्षमाश्रित्य भाविनी तस्थौ तस्या हि संतप्तं
शिरः पादौ तथैव च स्थिता सा तु मुहूर्तं वै भर्तुः शापभयाच्छुभा ययावानयितुं भूयः सायकानसितेक्षणा प्र
त्याजगाम च शरांस्तानादाय यशस्विनी सा वै खिन्ना सुचार्वङ्गी पद्भ्यां दुःखं नियच्छती १३ उपाजगाम भर्तारं भया
द्भर्तुः प्रवेपती स तामृषिस्तदा क्रुद्धो वाक्यमाह शुभाननां रेणुके किं चिरेण त्वमागतेति पुनः पुनः १५ रेणुको
वाच शिरस्तावत्प्रदीप्तं मे पादौ चैव तपोधन सूर्यतेजोनिरुद्धाहं वृक्षच्छायां समाश्रिता १६ ॥ ७ ॥ एम० २१६

न ज्येष्ठामूलस्थेऽर्के हेमंते शिरःपाददाहस्यानवसरात ९ १० १० १० १० १० १० १० ॥ ७ ॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

एतस्मात्कारणाद्ब्रह्मन्निश्चयेनात्कृतं मया एतच्छ्रुत्वा मम विभो मा क्रुधस्त्वं तपोधन १७ जमदग्निरुवाच अद्यैनं दीप्तकिरणं रेणु
केतव दुःसहं शरैर्निपातयिष्यामि सूर्यमस्त्राग्नितेजसा १८ भीष्म उ० स विस्फार्य धनुर्दिव्यं गृहीत्वा च शरान्बहून् अतिष्ठ
त्सूर्यमभितो यतो याति ततो मुखः १९ अथ तं प्रेक्ष्य संनद्धं सूर्योऽभ्येत्य तथाब्रवीत् द्विजरूपेण कौन्तेय किं ते सूर्योऽपराध्यते २०
आदत्ते रश्मिभिः सूर्यो दिवि तिष्ठंस्ततस्ततः रसं स तं वै वर्षासु प्रवर्षति दिवाकरः २१ ततोऽन्नं जायते विप्र मनुष्याणां सुखाव
हं अन्नं प्राणा इति यथा वेदेषु परिपठ्यते २२ अथाभ्रेषु निगूढश्च रश्मिभिः परिवारितः सप्तद्वीपानिमान्ब्रह्मन्वर्षेणाभिप्रव
र्षति २३ ततस्तदोषधीनां च वीरुधां पुष्पपत्रजं सर्वं वर्षाभिनिर्वृत्तमन्नं संभवति प्रभो २४ जातकर्माणि सर्वाणि व्रतोपनय
नानि च गोदानानि विवाहाश्च तथा यज्ञसमृद्धयः २५ शास्त्राणि दानानि तथा संयोगा वित्तसंचयाः अन्नतः संप्रवर्त्तन्ते यथा
त्वं वेत्थ भार्गव २६ रमणीयानि यावन्ति यावदारंभिकाणि च सर्वमन्नात्प्रभवति विदितं कीर्त्तयामि ते २७ सर्वं हि वेत्थ विप्र त्वं
यदेतत्कीर्त्तितं मया प्रसादये त्वां विप्रर्षे किं ते सूर्यं निपात्य वै २८ इति दानधर्मेषु छत्रोपानहोत्पत्तौ युधिष्ठिर उवाच
एवं प्रयाच २ तितदा भास्करे मुनिसत्तमः जमदग्निर्महातेजाः किं कार्यं प्रत्यपद्यत १ भीष्म उ० स तथा याचमानस्य मुनिरग्नि
समप्रभः जमदग्निः शमं नैव जगाम कुरुनन्दन २ ततः सूर्यो मधुरया वाचा तमिदमब्रवीत् कृताञ्जलिर्विप्ररूपी
म१ प्रणम्यैनं विशांपते ३ चलं निमित्तं विप्रर्षे सदा सूर्यस्य ग

दा०
२१७

छत्रः कथं चलं वेत्स्यसि त्वं सदा यान्तं दिवाकरं ४ जमदग्निरुवाच स्थिरं चापि चलं चापि जाने त्वां ज्ञानचक्षुषा
अवश्यं विनयाधानं कार्यमद्य मया तव ५ मध्याह्ने वै निमेषार्द्धं तिष्ठसि त्वं दिवाकर तत्र वेत्स्यामि सूर्य त्वां न मे त्रा
स्ति विचारणा ६ सूर्य उ० असंशयं मां विप्रर्षे वेत्स्यसे धन्विनां वर अपकारिणं मां विद्धि भगवन् शरणागतं ७
भीष्म उ० ततः प्रहस्य भगवान् जमदग्निरुवाच तं न भीः सूर्य ते त्वया कार्या प्रतिपानगतो ह्यसि ८ ब्राह्मणेष्वार्जवं यच्च
स्थैर्यं च धरणीतले सौम्यतां चैव सोमस्य गाम्भीर्यं वरुणस्य चा ९ दीप्तिमग्नेः प्रभां मेरोः प्रतापं तपनस्य च एतान्यति क
मेद्यो वै स हन्याच्छरणागतं १० भवेत्स गुरुतल्पी च ब्रह्महा च स वै भवेत् सुरापानं स कुर्याच्च यो हन्याच्छरणागतं ११
एतस्य त्वपनीतस्य समाधिं तात चिंतय पथास्तु खगमः पंथा भवेत्त्वद्रश्मिभावितः १२ भीष्म उवाच एतावदुक्त्वा स त
दा तूष्णीमासीद्भृगूत्तमः अथ सूर्यो ददौ तस्मै छत्रोपानहमाशु वै १३

एप०
२१७

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

सूर्यउवाच महर्षेरिरसस्त्राणाछत्रंमद्रश्मिवारणं प्रतिगृह्णीष्वपद्भ्यांचत्राणार्थंचर्मपादुके १४ अद्यप्रभृतिचैवे
हलोकेसंप्रचरिष्यति पुण्यकेषुचसर्वेषुपरमक्षय्यमेवच १५ भीष्मउ० छत्रोपानहमेतत्तुसूर्येणैतत्प्रवर्त्तितं पुण्य
मेतदभिख्यातंत्रिषुलोकेषुभारत १६ तस्मात्प्रयच्छविप्रेषुछत्रोपानहमुत्तमं धर्मस्तेसुमहान्भावीनमेऽत्रास्तिविचारणा
१७ छत्रंहिभरतश्रेष्ठयःप्रदद्याद्द्विजातये शुभ्रंशतशलाकंवैसप्रेत्यसुखमेधते १८ सशक्रलोकेवसतिपूज्यमानोद्विजा
तिभिः अप्सरोभिश्चसततंदेवैश्चभरतर्षभ १९ दह्यमानायपँयःप्रयच्छत्युपानहौ स्नातकायमहाबाहोसंशितायद्विजा
तये २० सोपिलोकानवाप्नोतिदैवतैरभिपूजितान् गोलोकेसमुदायुक्तोवसतिप्रेत्यभारत २१ एतत्तेभरतश्रेष्ठम
याकार्त्स्न्येनकीर्त्तितं छत्रोपानहदानस्यफलंभरतसत्तम २२ इतिदानधर्मेषुछत्रोपानहदानप्रशंसा युधिष्ठि
रउ० गार्हस्थ्यंधर्ममखिलंप्रब्रूहिभरतर्षभ ऋद्धिमाप्नोतिकिंकृत्वामनुष्यइहपार्थिव १ भीष्मउ० अत्रते
वर्त्तयिष्यामिपुरावृत्तंजनाधिप वासुदेवस्यसंवादंपृथिव्याश्चैवभारत २ संस्तूयपृथिवींदेवींवासुदेवःप्रतापवान
पप्रच्छभरतश्रेष्ठमांत्वंपृच्छसेयथा ३ ३

© Dharmartha Trust J&K. Digitized by eGangotri

६ बलिकर्म वैश्वदेवः ततः प्रागन्नमेधनग्राह्यं ७ ८ ९ १० १६ ॥ छ ॥

दा० २१८

वासुदेव उवाच गार्हस्थ्यं धर्ममाश्रित्य मया वा मद्विधेन वा किमवश्यं धरेकार्यं किं वा कृत्वा कृतं भवेत ४ पृथि
व्युवाच ऋषयः पितरो देवा मनुष्याश्चैव माधव इत्याश्चैवार्चनायाश्च यथा चैनं निवोध मे ५ सदा यज्ञेन देवाश्च
सदातिथ्येन मानुषाः छंदतश्च यथा नित्यमर्हान्भुंजीत नित्यशः ६ तेन ह्यृषिगणाः प्रीता भवंति मधुसूदन नि
त्यमग्निं परिचरेद्भुक्त्वा बलिकर्म च ७ कुर्यात्तथैव देवा वै प्रीयते मधुसूदनं कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन
च ८ पयोमूलफलैर्वापि पितॄणां प्रीतिमाहरन् सिद्धान्नाद्वैश्वदेवं वै कुर्यादग्नौ यथाविधि ९ अग्नीषोमं वै
श्वदेवं धान्वंतर्यमनंतरं प्रजानां पतये चैव पृथग्घोमो विधीयते १० तथैव चानुपूर्व्येण बलिकर्म प्रयोजये
त दक्षिणायां यमायेति प्रतीच्यां वरुणाय च ११ सोमाय चाप्युदीच्यां वै वास्तुमध्ये प्रजापतेः धन्वंतरेः प्रा
गुदीच्यां प्राच्यां शक्राय माधव १२ मनुष्येभ्य इति प्राहुर्बलिं द्वारि गृहस्य वै मरुद्भ्यो देवतेभ्यश्च बलिमंतर्गृहे ह
रेत १३ तथैव विश्वेदेवेभ्यो बलिमाकाशतो हरेत निशाचरेभ्यो भूतेभ्यो बलिं नक्तं तथा हरेत १४ एवं कृत्वा बलिं स
म्यग् दद्याद्भिक्षां द्विजातये अलाभे ब्राह्मणस्याग्राद्वग्रमुद्धृत्य निक्षिपेत १५ यदा श्राद्धं पितृभ्यो पि दातुमिच्छेत मानवः एम० २१८
तदा पश्चात्प्रकुर्वीत निवृत्ते श्राद्धकर्मणि १६

© Dharmartha Trust J&K. Digitized By eGangotri

पितॄन्संतर्पयित्वा तु बलिं कुर्याद्विधानतः वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनं १७ ततोन्नेन विशेषेण भोजयेदतिथीनपि
अर्चापूर्वं महाराज ततः प्रीणाति मानवान् १८ अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते आचार्यस्य पितुश्चैव सख्युरा
प्तस्य चातिथेः १९ इदमस्ति गृहे मह्यमिति नित्यं निवेदयेत् ते यद्वदेयुस्तत्कुर्यादिति धर्मो विधीयते २० गृहस्थः पुरुषः कृ
ष्ण शिष्टाशी च सदा भवेत् राजर्त्विजस्नातकं च गुरुं श्वशुरमेव च अर्चयेन्मधुपर्केण परिसंवत्सरोषितान् २२ श्वभ्यश्च श्व
पचेभ्यश्च वयोभ्यश्चावपेद्भुवि वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते २३ एतांस्तु धर्मान्गार्हस्थ्यान्यः कुर्यादनसूयकः स
इह र्षिवरान्प्राप्य प्रेत्य नाके महीयते २४ भीष्म उ० इति भूमेर्वचः श्रुत्वा वासुदेवः प्रतापवान् तथा चकार सततं त्वमप्येवं स
माचर २५ एतद्गृहस्थधर्मं त्वं चेतमानो जनाधिप इहलोके यशः प्राप्य प्रेत्य स्वर्गमवाप्स्यसि २६ इति दानधर्मेषु बलिप्रदा
नविधिः युधिष्ठिर उवाच आलोकदानं नामैतत्कीदृशं भरतर्षभ कथमेतत्समुत्पन्नं फले तात ब्रवीहि मे १ भीष्म उ
वाच अत्राप्युदाहरन्तीममितिहासं पुरातनं मनोः प्रजापतेर्वादं सुवर्णस्य च भारत २ तपस्वी कश्चिदभवत्सुवर्णो
नाम भारत वर्णतो हेमवर्णः स सुवर्ण इति प्रप्रथे ३ कुलशीलगुणोपेतः स्वाध्याये च परं गतः बहून्स्ववंशप्रभवान्सम
तीतः स्वकैर्गुणैः ४

© (P) Dharmartha Trust J&K. Digitized By eGangotri

६ स्तांत्प्रभवतां १५ तपः वर्णाश्रमधर्मः यमैर्दिव्यदिः वीरुधः लताश्चौषधयः व्रीह्यादयः ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥

दा० २२९

सकदाचिन्मनुं विप्रो ददर्शैपि ससर्षिं च कुशलप्रश्नमन्योन्यं तौ चोभौ तत्र चक्रतुः ततस्तौ सत्यसंकल्पौ मेरौ कांचनपर्वते रम
णीये शिलापृष्ठे सहितौ समुपीदतां ६ तत्र तौ कथयन्तौ स्तां कथा नानाविधाश्रयाः ब्रह्मर्षिदेवदैत्यानां पुराणानां महा
त्मनां ७ सुवर्णस्त्वब्रवीद्वाक्यं मनुं स्वायंभुवं प्रति हितार्थं सर्वभूतानां प्रश्नं मे वक्तुमर्हसि ८ सुमनोभिर्यदिज्यन्ते देवता
नि प्रजेश्वर किमेतत्कथमुत्पन्नं फलं योगं च शंस मे ९ मनुरुवाच अत्राप्युदाहरन्तीममितिहासं पुरातनं शुक्रस्य च
बलेश्चैव संवादं वै महात्मनोः १० बलेर्वैरोचनस्येह त्रैलोक्यमनुशासतः समीपमाजगामाशु शुक्रो भृगुकुलो
द्वहः ११ तमर्घ्यादिभिरभ्यर्च्य भार्गवं सोसुराधिपः निषसादासने पश्चाद्विधिवद्भूरिदक्षिणः १२ कथेयमभवत्त
त्र या या परिकीर्तिता सुमनोधूपदीपानां संप्रदाने फलं प्रति १३ ततः पप्रच्छ दैत्येन्द्रः कवीन्द्रं प्रश्नमुत्तमं बलिरु
वाच सुमनोधूपदीपानां किं फलं ब्रह्मवित्तम प्रदानस्य द्विजश्रेष्ठ तद्भवान्वक्तुमर्हति १४ शुक्र उ० तपः पूर्वं स
मुत्पन्नं धर्मस्तस्मादनन्तरं एतस्मिन्नन्तरे चैव वीरुधौषधमेव च १६ सोमस्यात्मा च बहुधा संभूतं पृथिवीतले
अमृतं च विषं वये चान्ये तुल्यजातयः १७ अमृतं मनसः प्रीतिं सद्यः पुष्टिं ददाति च मनो ग्लपयते तीव्रं विषं गंधे
चै

घ।

नेसर्वशः १८

दान० २२९

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

अमृतं मंगलं विद्धि महद्विषममंगलं १८ ओषध्यो ह्यमृतं सर्वं विषं तेजोग्निसंभवं १९ मनो ह्लादयते यस्मात् श्रियं चापि
दधाति च तस्मात्सुमनसः प्रोक्ता नरैः सुकृतकर्मभिः २० देवताभ्यः सुमनसो योर्पयति नरः शुचिः तस्य तुष्यंति वै देवा स्त
स्याः पुष्टिं ददत्यपि २१ यं यमुद्दिश्य दीयेरन् देवं सुमनसः प्रभो मंगलार्थं स तेनास्य प्रीतो भवति दैत्यप २२ तेयास्तु ग्राह्या
सौम्याश्च तेजस्विन्यश्च ताः पृथक् २३ ओषध्यो वरवीर्या हि बहुरूपास्तथैव च १३ यज्ञियानां च वृक्षाणामयाज्ञियान्नि बो
धमे आसुराणि च माल्यानि दैवतेभ्यो हितानि च २४ रक्षसामुरगाणां च यक्षाणां च तथा प्रियाः मनुष्याणां पितॄणां च कां
ता यास्त्वानुपूर्वशः २५ वन्या ग्राम्याश्चेह तथा कृष्टोप्ताः पर्वताश्रयाः अकंटकाः कंटकिनो गंधरूपरसान्विताः २६ द्विवि
धो हि स्मृतो गंधइष्टोनिष्टश्च पुष्पजः इष्टगंधानि देवानां पुष्पाणीति विभावय २७ अकंटकानां वृक्षाणां श्वेतप्रायाश्च व
र्णतः तेषां पुष्पाणि देवानामिष्टानि सततं प्रभो २८ जलजानि च माल्यानि पद्मादीनि च यानि वै गंधर्वनागयक्षेभ्यस्तानि
दद्यादिचक्षणः २९ ओषध्यस्कटुपुष्पाश्च कटुकाः कटुकान्विताः शत्रूणामभिचारार्थमथर्वेषु निदर्शिताः ३० ॥ ५४ ॥

(c) Dharmartha Trust J&K. Digitized by eGangotri

३८ निर्यासाः गुग्गुलप्रभृतयः सारिणाः काष्ठाग्निसंयोगान्निःसृतः त्रिमात्रघं गंधाद्यपः ३९ ४० ४१ ॥ ॥ ७ ॥ ७ ॥ ॥

टी०
२२०

तीक्ष्णावीर्यास्तस्मभूतानां दुर्लभाः सकंटकाः रक्तमप्यथवर्णानि च बहूनि च सेवोपहारयेत ३१ मनो हृद्यनंदितोविदमर्शम
धुराश्चयाः चारुरूपाः सुमनसो मानुषाणां स्मृताविभो ३२ नतश्मशानसंभूतादेवताय योगेयथास्मृति ३४ गंधे तनो
द्भवाः सत्रयेत्सुखिपुक्तेषु विवाहेषु रहः स्वच ३३ गिरिसानुरुहाः सौम्यादेवानामुपपादयेत प्रोद्दितास्सुद्धिताः सौम्याघथा
योगेयथास्मृति ३४ गंधेन देवास्तुष्यंति दर्शनात्पत्रकारूसाः नागाः समुपभोगान्निर्दिमिरेतेस्तुमानुषाः ३५ सद्यःप्रीणा
तिदेवान्वै तेप्रीताभावयंत्युत संकल्पसिद्ध्या मर्त्यानामीप्सितैश्च मनोरमैः ३६ प्रीताः प्रीणंतिसततं मानितामानयंतिच अव
ज्ञाताअवधूताश्च निर्दहंत्यधमान्नरान ३७ अतऊर्ध्वं प्रवक्ष्यामि धूपदानविधेः फलं धूपांश्च विविधान्साधून साधूंश्च तिबोध
मे ३८ निर्यासाः सारिणश्चैव कृत्रिमाश्चैवते त्रयः क्षानिष्टो भवेद्धूपस्तन्मे विस्तरशः शृणु ३९ निर्यासाः सल्लकीवर्ज्या
देवानां दयितास्तु ते गुग्गुलुः प्रवरस्तेषां सर्वेषामिति निश्चयः ४० अगरुः सारिणां श्रेष्ठस्तेष्ठपरुणक्तु समभोतिनां दैत्यानां स
२९ ल्लकीयश्च कांक्षितोयश्च तद्विधः ४१

राम०
२२०

© Dharmartha Trust J&K. Digitized by eGangotri

कादि चितास्वते आसवेन तीव्रगंधेन संयुक्तो दैत्यादिरूप्रमतपः ते पाठांतरे फालिताः विकसिताः मल्लिकादयस्तासां रसैर्मकरंदैः ... रससंयुक्तैर्दारवैः सघृताक्षिकरो धूप इति शेषः ४२ वैहारिकाः विहारमात्रोपयुक्ताः ४५ ज्योतिः दीपादि तेजः कांतिः प्रकाशः कीर्तिः ४६ तमिस्रं अंधकारः अंधंतमो नाम नरकरूपम्

अथ सर्जरसादीनां गंधैः पार्थिवदारवैः फालितारससंयुक्तैर्मनुष्याणां विधीयते ४२ देवदानवभूतानां सघृताक्षिकरः स्मृ
तः पेयैर्वैहारिकास्तत्र मानुषाणामिति स्मृताः ४३ यएकोक्ताः सुमनसां प्रदाने गुणहेतवः धूपेष्वपि परिज्ञेयास्त एव प्रीतिवर्द्धनाः
४४ दीपदानं प्रवक्ष्यामि फलयोगमनुत्तमं यथा येन यदा चैव प्रदेया यादृशाश्च ते ४५ ज्योतिस्तेजः प्रकाशं वाप्यूर्ध्वगं चापि वर्ण्य
ते प्रदानं तेजसो तस्मात्तेजो वर्द्धयते नृणां ४६ अंधं तमस्तमिस्रं च दक्षिणायनमेव च उत्तरायणमेतस्माज्ज्योतिर्दानं प्रशस्य
ते ४७ यस्मादूर्ध्वगमेतत्तु तमसश्चैव भेषजं तस्मादूर्ध्वगतेर्दाता भवेदत्रेति निश्चयः ४८ देवास्तेजस्विनो यस्मात्प्रभावंतः प्रका
शकाः तामसा राक्षसाश्चैव तस्मात् दीपः प्रदीयते ४९ आलोकदानाच्चक्षुष्मान्प्रभायुक्तो भवेन्नरः तान्दत्वा नोपहिंसेत
न हरेन्नोपशमयेत ५० दीपहर्त्ता भवेदंधस्तमोगतिरसुप्रभः दीपप्रदः स्वर्गलोके दीप्यमाने विराजते ५१ ॥ छ ॥

तथा दक्षिणायनमप्यंधंतमसमेव अत उत्तरायणे ज्योतिर्दानं अतस्तमोनाशकं ज्योतिर्दद्यात नरकनिवृत्त्यर्थः ४७ ४८ ४९ ५० ५१ ॥ छ ॥

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

करिशिरोत्पन्नेत्यादि हविषाद्येनेन ओषधीरसैः तिलसर्षपादिस्नेहैः वसामेदोस्थीनि प्राणपतपवास्ते षां तिर्यासाः स्नेहाः वसादयः पृथग्वा निर्यासात्

हविषाप्रथमः कल्पोद्वितीयश्चौषधीरसैः वसामेदोस्थिनिर्यासैर्नकार्यं पुष्टिमिच्छता ५२ गिरिप्रयातेगहनेवैतस्थानेचत
बधे दीपदाताभवेन्नित्यं यश्छेद्भूतिमात्मनः ५३ कुलोद्योतोविशुद्धात्माप्रकाशत्वंचगच्छति ज्योतिषांचैवसालोक्यंदीपदा
तानरःसदा ५४ बलिकर्मसुप्रवक्ष्यामिगुणान्कर्मफलोदयान् देवयक्षोरगनृणांभूतानामथरक्षसां ५५ येषांनाग्रभुजोवि
प्रादेवतातिथिबालकाः राक्षसानेवतान्विद्धिनिर्विशंकानमंगलान् ५६ तस्माद्यंप्रयच्छेतदेवेभ्यःप्रतिपूजितं शिरसाप्रय
तेश्चापिहरेदितिमंतद्भितः ५७ गृह्णातिदेवतानित्यमाशंसंतोगृहान् बाह्याश्चागंतवोयेन्येयक्षराक्षसपन्नगाः ५८ इतोद
त्तेनजीवंतिदेवताःपितरस्तथा तेप्रीताःप्रीणयंत्येनमायुषायशसाधनैः ५९ बलयःसहपुष्पैस्तुदेवानामुपहारयेत् दधि
दुग्धामयाःपुण्याःसुगंधाःप्रियदर्शनाः ६० कार्याहिधिरमांसाद्यावलायोयक्षरक्षसां सुरासवपुरस्कारालाजोल्ला
पिकभूषिताः ६१ नागानांदयितानित्यंपद्मोत्पलविमिश्रिताः तिलान्गुडसुसंपन्नान्भूतानामुपहारयेत् ६२ ॥

सं३ पासं४

६० लाजोल्लापिकभूषिताः उल्लापिका उपरिलापनं ६१ ६१ ॥ छ ॥

६६ अध्यायः श्रुतं १ लाजाभिः आर्षेत्यात्रीतं ७ ८ ९ ॥ ७॥ ॥७॥ ७ ॥ ॥७॥

अगतदानागतभोगीस्याद्धुलवर्णसमान्वितः तस्मादग्रंप्रयच्छेतदेवेभ्यः प्रतिपूजितं ६३ ज्वलत्यकरहोवेश्मयात्स्वास्यगृहदेवताः
ताःप्रजयाभ्युतिकामेनप्रसंग्रामप्रदीपिना ६४ इत्येतत्पस्वरेंद्रायकाव्यःप्रोवाचभार्गवः सुवर्णायमनुःप्राहसुवर्णोनारदायच ६५
नारदोपिमयिप्राहगुणानेतान्महाद्युते त्वमप्येतद्विदित्वेहसर्वमाचरपुत्रक ६६ इतिदानधर्मेषुसुवर्णमनुसंवादः युधिष्ठि
र उ० श्रुतंमेभरतश्रेष्ठपुष्पधूपप्रदायिनां फलंबलिविधानेचतद्भूयोवक्तुमर्हसि धूपप्रदानस्यफलंप्रदीपस्यतथैवच बलय
श्चकिमर्थंवैदीयंतेगृहमेधिभिः २ भीष्म उ० अत्राप्युदाहरंतीममितिहासंपुरातनं नहुषस्यचसंवादमगस्त्यस्यभृगो
स्तथा ३ नहुषोहिमहाराजराजर्षिःसुमहातपाः देवराज्यमनुप्राप्तःसुकृतेनेहकर्मणा ४ तत्रापिप्रयतोराजन्नहुष
स्त्रिदिवेवसन मानुषीश्चैवदिव्याश्चकुर्वाणोविविधाःक्रियाः ५ मानुष्यस्तत्रसर्वाःस्मक्रियास्तस्यमहात्मनः प्रवृत्ता
स्त्रिदिवेराजन्दिव्याश्चैवसनातनाः ६ अग्निकार्याणिसमिधःकुशाःसुमनसस्तथा बलयश्चान्नलाजाभिर्धूपनंदीपकर्मच
७ सर्वंतस्यगृहेराज्ञःप्रावर्त्ततमहात्मनः जपयज्ञान्मनोयज्ञांस्त्रिदिवेपिचकारसः ८ देवानभ्यर्चयच्चापिविधिवत्ससु
रेश्वरः सर्वानेवयथान्यायंयथापूर्वमरिंदमः ९

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

ए० २२२

अथेंद्रोहमिति ज्ञात्वा अहंकारं समाविशत् सर्वाश्चैव क्रियास्तस्य पर्यहीयंत भूपते १० स कर्षीत्वा यामास वरदानमद

न्वितः परिहीनक्रियश्चैव दुर्बलत्वमुपेयिवान् ११ तस्य वाह्यतः कालो मुनिमुख्यांस्तपोधनान् अहंकाराभिभूतस्तस्तुम

हानस्प्रवर्त्ततः १२ अथ पर्यायिशः सर्वान् वाहनायोपचक्रमे पर्यायश्चाप्यगस्त्यस्य समपद्यत भारत १३ अथागत्य महा

तेजा मैत्रावरुणिर्ब्रह्मविदांवरः अगस्त्य माश्रमस्थं वै समुपेत्येदमब्रवीत् १४ एवं वयमसत्कारं देवाभवतो विहिता तदुकः १६ योमेद

ष्टिपथं गछेत्समेवश्यो वेदनस्यास्य दुर्मतेः नहुषस्य किमर्थं वै मर्षयीमहामुने १५ अगस्त्य उवाच कथमेष मयाशाक्यः शप्तुं य

स्य महामुने वरदेन वरो दत्तो भवतो विदितश्च सः १६ योमे दृष्टिपथं गछेत्स मे वश्यो भवेदिति इत्यनेन वरं देवायाचितो गछ

तादिवं १७ एवं न दग्धः सम या भवताचन संशयः अत्येनाप्यृषिमुख्येन न दग्धो न च पातितः १८ अमृतं चैव पानाय दत्तमस्मे

पुराविभो महात्मना तदर्थं च नास्माभिर्विनिपात्यते १९ प्रायच्छत वरं देवः प्रजानां दुःखहारकं द्विजेष्वधर्मयुक्तानि स करोति न

राधमः २० तत्र यत्प्राप्तकालं न स्तद्ब्रूहि वदतांवर भवांश्चापि यथा ब्रूयात्तत्कर्त्तास्मि न संशयः २१ भृगुरुवाच पितामह

नियोगेन भवंतमिह मागतः प्रतिकर्त्तुं बलतिनहुषे देवमोहिते २२ २३ २३ ॥ ७ ॥ ७ ॥ ७ ॥ एम० २२२

वा

© Dharmartha Trust J&K. Digitized By eGangotri

२२ अध्यायः कथं २ वत्सकाः वार्षिकोत्सवाः वत्सः पुत्रादि वर्षयोरिति मेदिनी ५ ग्रहायस्रतिथये ७ ॥ ७ ॥ ७ ॥ ७ ॥

अद्य हित्वा सदुर्बुद्धीरथ्येयोरुत्ति देवराट् अद्यैतमहमुद्धर्त्तंकरिष्येऽनिंद्रमोजसा २३ अद्येदं स्थापयिष्यामि पश्यतस्ते शत
क्रतुं संचाल्य पापकर्माणं मे द्रष्टा स्थानात्सुदुर्मतिं २४ अद्य चासौ कुदेवेंद्रस्त्वां पदा धर्षयिष्यति देवोपहतचित्तत्वादात्म
नाशाय मंदधीः २५ मुक्त्वा तं धर्षितमहं धर्षणामर्षितो भृशं अहिर्भवस्वेति रुषा शप्स्ये पापं द्विजद्रुहं २६ ततएनं सुदु
र्बुद्धिं विकुष्ठव्याभिहतत्विषं धरणां पातयिष्यामि पश्यतस्ते महामुने नहुषं पापकर्माणमैश्वर्यबलमोहितम् यथा च
रोचते तुभ्यं तथा कर्तास्म्यहं मुने २७ एवमुक्तस्तु भृगुणा मैत्रावरुणिरव्ययः अगस्त्यः परमप्रीतो बभूव विगतज्वरः २८ इ
ति दानधर्मे पु॰ अगस्त्यभृगुसंवादे युधिष्ठिर उ॰ कथं वै स विपन्नः कथं वै पातितो भुवि कथं चानिंद्रतां प्राप्तस्तद्भवान्वक्तुमर्हति
१ भीष्म उ॰ एवं तयोः संवदतोः क्रियास्तस्य महात्मनः सर्वास्तस्य समु सर्वा एव प्रवर्तंते या दिव्या याश्च मानुषाः २ तथैव दी ५५
पदानानि सर्वोपकरणानि वै बलिकर्म च यच्चान्यदुत्सवाश्च पृथग्विधाः ३ सर्वे तस्य समुत्पन्ना देवेंद्रस्य महात्मनः
देवलोके नृलोके च सदाचारा बुधैः स्मृताः ४ ते चेद्भवंति राजेंद्र ऋध्यंते गृहमेधिनः धूपप्रदानैर्दीपैश्च नमस्कारैस्तथै
व च ५ यथा सिद्धस्य चान्नस्य द्विजायाग्रं प्रदीयते बलयश्च गृहोद्देशे अतः प्रीयंति देवताः ६ यथा च गृहिणस्तोषो भ
लोके३ वेद्वै बलिकर्मणि तथा शतगुणा प्रीतिर्देवतानां प्रजायते ७

© (c) Dharmartha Trust J&K. Digitized By eGangotri

तैरु तैर्वृ

रा० २२३ एवंधूपप्रदानंचदीपदानंचसाधवः प्रयच्छंतिनमस्कारैर्युक्तमात्मगुणावहं ८ स्नानेनाद्भिश्चयत्कर्मक्रियतेश्चिता नमस्कारप्रयुक्तेनतेन
प्रीयंतिदेवताः ९ पितरश्चमहाभागाऋषयश्चतपोधनाः गृह्याश्चदेवताःसर्वाःप्रीयंतेविधिनार्चिताः १० इत्येतांबुद्धिमास्थायनहुषःसुर
रेश्वरः सुरेंद्रत्वंमहत्प्राप्यकृतवानिदमद्भुतं ११ कस्यचित्त्वथकालस्यभाग्यक्षयउपस्थिते सर्वमेतदवज्ञायनकृतवानिदमीदृशं १२
ततःसपरिहीणोभूत्सुरेंद्रोबलिकर्मतः धूपदीपोदकविधिंनयथावच्चकारह १३ ततोस्ययज्ञविषयोरक्षोभिःपर्यवध्यत अथागस्त्य
मृषिश्रेष्ठंवाहनायाजुहावह १४ द्रुतंसरस्वतीकूलात्स्मयन्निवमहाबलः ततोभृगुर्महातेजामैत्रावरुणिमब्रवीत् निमीलयस्वन
रा०४ यनेजै[illegible]यावद्विशामिते १५ स्थाणुभूतस्यतस्याथजटाःप्राविशदच्युत भृगुःससमहातेजाःपातनायनृपस्यच १६ ततःसदेवराट्
प्राप्तस्तमृषिंवाहनायवै ततोगस्त्यःसुरपतिंवाक्यमाहविशांपते १७ योजयस्वेतिमांक्षिप्रंकंचदेशंवहामिते पंचवक्त्र
सितत्रत्वांनयिष्यामिसुराधिप १८ इत्युक्तोनहुषस्तेनयोजयामासतंमुनिं भृगुस्तस्यजटांतस्थोनचकवहर्षितोभृशं १९ न
चापिदर्शनंतस्यचकारभृगुस्तदा वरदानप्रभावज्ञोनहुषस्यमहात्मनः २० २० ॥ छ ॥ छ ॥ छ ॥

सा

राम० २२३

CC-0. Bharat Muni Trust, J&K. Digitized by eGangotri

पराहतःपादेनहतवानसि २४ २५ २५ २५ २५ ॥ ७॥ ७ ॥ ७॥

नचुकोपतदागस्त्योपुस्त्रोपिनहुषेणवै ततःप्रतोदेनचोदयामासभारत २१ नचुकोपस धर्मात्माततःपादेनदेवराट्
अगस्त्यस्यतदाक्रुद्धोवामेनाभ्यहनच्छिरः २२ तस्मिंछिरस्यभिहतेसजटान्तर्गतोभृगुः शशापबलवत्क्रुद्धोनहुषंपापचे
तसं २३ यस्मात्पदाहतःक्रोधाच्छिरसीमंमहामुनिं तस्मादाशुमहींगच्छसर्पोभूत्वासुदुर्मते २४ इत्युक्तःसतदातेनसर्पो
भूत्वापपातह अदृष्टेनाथभृगुणाभूतलेभरतर्षभ २५ भृगुंहियदिसोद्राक्षीन्नहुषःपृथिवीपते नचशक्तोभविष्यद्धिपात
नेतस्यतेजसा २६ सतुतैस्तैःप्रदानैश्चतपोभिर्नियमैस्तथा पतितोपिमहाराजभूतलेस्मृतिमानभूत् २७ प्रसादयामा
सभृगुंशापांतोमेभवेदिति २८ ततोगस्त्यःकृपाविष्टःप्रसादयततंभृगुं शापांतार्थंमहाराजसचप्रादात्कृपान्वितः २९
भृगुरुवाच राजायुधिष्ठिरोनामभविष्यतिकुलोद्वहः सत्वांमोक्ष्यतिशापादित्युक्त्वांतरधीयत ३० अगस्त्योपिम
हातेजाःकृत्वाकार्यंशतक्रतोः स्वमाश्रमपदंप्रायात्पूज्यमानोद्विजातिभिः ३१ नहुषोपित्वयाराजंस्तस्माच्छापात्समु
द्धृतः जगामब्रह्मभवनंपश्यतस्तेजनाधिप ३२ तदासपातयित्वातंनहुषंभूतलेभृगुः जगामब्रह्मभवनंब्रह्मणेच
न्यवेदयत ३३

© Dharmartha Trust J&K. Digitized By eGangotri

५० अध्यायः ब्राह्मणं २ राज्ञः सेवी रेणुगुंठितः ३ ३ ३ ॥ छ ॥ - छ ॥ छ ॥

रा०
२२५

ततःशक्रंसमानाय्यदेवानाहपितामहः वरहानान्ममहस्त्राणिऋषोराज्यमवाप्नुवान् ३४ सचापास्येनक्रुद्धेनभ्रंशि
तोभूतसंगतः नचशक्तंविनाराज्ञात्सुरावर्त्तयितुंक्वचित् ३५ तस्मात्त्वंपुनःशक्रोदेवराज्येभिषिच्यतां एवंसंभाषमा
णंतुदेवाःपार्थःपितामहं एवमस्त्वितिसंहृष्टाःप्रत्यूचुस्तेनराधिप ३६ सोभिषिक्तोभगवतादेवराज्येचवासवः ब्राह्म
णाराजशार्दूलयथापूर्वंव्यरोचत ३७ एवमेतत्पुरावृत्तंनकृष्यस्यव्यतिक्रमात् सचतैरेवसंसिद्धोनकृषःकर्मभिःपु दीप ५
नः ३८ तस्माद्दीपाःप्रदातव्याःसायंवैगृहमेधिभिः दिव्यंचक्षुरवाप्नोतिप्रेत्यसौप्रदायकः ३९ पूर्णचंद्रप्रतीका
शादीपदास्त्वभवंत्युत यावदक्षिनिमेषाणिज्वलंतेतावतीःसमाः रूपवान्बलवांश्चापिनरोभवतिदीपदः ४० इति
राजधर्मेषु आगस्तिभृगुसंवादः युधिष्ठिर उ० ब्राह्मणस्वानियेमंदाहरंतिभरतनशंसकारिणोमूढाःक्वतेगच्छंति
मानवाः १ भीष्म उ० अत्राप्युदाहरंतीममितिहासंपुरातनं चांडालस्यचसंवादंक्षत्रबंधोश्चभारत २
राजन्य उ० वृद्धरूपोसिचांडालबालवच्चविचेष्टसे स्वाखराणांरजःसेवीकस्मादुद्विजसेगवां ३ ॥ ५ ॥ राम०
२२५

तर्षम्

© Dharmartha Trust J&K. Digitized By eGangotri

गोरजसा गोपरागेण यथा पुष्पस्य परागो रजः कासारं दांतसरो वनेपरितः प्रसर्पति एवं प्रचलंत्या धेनोर्हृषसः सकाशात् प्रसरंत्यः क्षीरविप्रुषो रज
परागपर्यायेण रजःपदेनोच्यंते तथा च मेदिनी रजः क्लीवं गुणांतरे आर्तवे च परागे च परागे च रेणुमात्रे च दृश्यते इति ध्वस्तं व्याप्तं युरीरम्भि तिरो

साधुभिर्गर्हितं कर्म चांडालस्य विधीयते कस्माद्गोरजसा ध्वस्तमपां कुंडे निषिंचसि ४ चांडाल उवाच ब्राह्मणस्य गवां राज
न्ह्रियतीनां रजः पुरा सोमम्प्रध्वंसयामास तं सोमं येपिबन्द्विजाः ५ दीक्षितश्च स राजापि क्षिप्रं नरकमाविशन् सह तैर्या
जकैः सर्वैर्ब्रह्मस्वमुपजीव्य तत् ६ येपि तत्रापिबन्क्षीरं घृतं दधि च मानवाः ब्राह्मणाः सह राजन्याः सर्वे नरकमाविशन्
७ जघ्नुस्ताः पयसा पुत्रांस्तथा पौत्रान्विधुन्वतीः पश्यन्वे क्रममाणास्ता साधुवृत्ते न दंपती ८ अहं तत्रावसं राजन्ब्रह्म
चारी जितेंद्रियः तासां मे रजसा ध्वस्तं भैक्ष्यमासीन्नराधिप ९ चंडालोहं ततो राजन्भुक्त्वा तदभवं नृप ब्रह्मस्वहारी च
नृपः सोप्रतिष्ठां गतिं ययौ १०

२६३

षः विप्रुण्मात्रेणापि ब्रह्मस्वेन देहिन्लिप्तं मा भूदिति भावः ४ ह्रियमाणानां रजः क्षीरविप्रुट् मार्गस्थवल्लीरूपसोमम्प्रध्वंसयामास नाशि
तवत् ६ तत्र गोहरणां पुरे ७ ताः हृताः गावः विधुन्वतीः स्वस्वामिवत्सवियोगार्ताः शरीरं कंपयंत्यः परैः पीते न स्वपयसा तेषां पुत्रपौत्रान्
दंपती च जघ्नुः सद्योऽप्याप्युपघ्नं चक्रुः ८ तत्र देशे काले च ९ १०

© Dharmartha Trust J&K. Digitized by eGangotri

११ प्रसंगात्सोमविक्रियं नि इति तस्मादिति १२ एवंब्रह्मस्वमेसखं १३ चिरंतविनश्यतीतिनान्अपितुचिरनरकवासात्रश्यत्येव १४ स्वच

दा० २२५

तस्माद्धरेन्नविप्रस्वंदाचिदपिकिंचन ब्रह्मस्वरजसाध्वस्तंभुक्तामांपश्यपादृशं ११ तस्मात्सोमोप्यविक्रेयः पुरुषेणविप
श्चिता विक्रयंत्विहसोमस्यगर्हयंतिमनीषिणः १२ येचैनंक्रीणतेतातयेचविक्रीणतेजनाः तेतुवैवस्वतंप्राप्यरौरवंयांति
सर्वशः १३ सोमंतुरजसाध्वस्तंविक्रीणन्विधिपूर्वकं श्रेयोत्रिवार्द्धुषीभत्वानचिरंसविनश्यति नरकंत्रिंशतंप्राप्यसवि
ष्टामुपजीवति १४ श्वचर्यामभिमानंचसखिदारेषु विप्लवं तुलयाधारयन्धर्ममभिमानोतिरिच्यते १५ श्वानंवैपापिनं
पश्यविवर्णंहरिणंकृशं अभिमानेनभूतानामिमांगतिमुपागतं १६ अहंवैविपुलेजातःकुलेधनसमन्विते अन्य
स्मिन्जन्मनिद्विजविभोज्ञानविज्ञानपारगः १७ अभवंतत्रजानानोह्येतान्दोषान्मदान्वितः संरब्धएवभूतानांपृष्ठमांसमभक्ष
यं १८ सोहंतेनचवृत्तेनभोजनेनवजनेन च इमामवस्थांसंप्राप्तःपश्यकालस्यपर्ययं १९ आदीप्तमिवचैलांतेभ्रमरैरि
वचार्दितं धावमानंसुसंरब्धंपश्यमेरजसान्वितं २०

वमा१ सा२

यनीचसेवांस्वचर्यादित्रयंतुलयाधारयन्तुल्यंमन्यमानो ऽभिमानीधर्मंअतिक्रम्यरिच्यतेरिक्तोभवतिअभिमानीइतद्वयोपेक्षपाऽत्यंतपापी
त्यर्थः १७ भूतानांपृष्ठपरिसदासंरब्धएवकुपितएव १९ भ्रमरैस्तीक्ष्णतुंडैःअर्द्यमानमिवचैलांतवद्ध्यमानमिवक्लिश्यंतंमांपश्य २० ॥ राम० २२५

२८ रक्ष्यमेवनरश्रमक्ष्यं २९ दानधर्मेषुराजन्यचांडालसंवादः एकेतिविद्यास्यासमत्रश्रद्धादिनारतस्मात्कर्मफलतारतम्यंमेस्तिउतनेतिप्रश्नार्थः १ क

स्वाध्यायेरक्तमहत्मायंहरंतिगृहमेधिनः दानैःपथ्यविधैश्चापियथाप्रोक्तंमनीषिणः २१ तथापापकृतंविप्रमाश्रमस्थंम
हीपते सर्वसंगविनिर्मुक्तंछंदांस्युत्तारयंत्युत २२ अहंहिपापयोन्यांवैप्रसूतःक्षत्रियर्षभ निश्चयंनाधिगच्छामिक
थंमुच्येयमित्युत जातिस्मरत्वंचममकेनचित्पूर्वकर्मणाशुभेनयेनमोक्षंवैप्राप्तुमिच्छाम्यहंनृप २४ त्वमिमंसंप्रपन्ना
यसंशयंब्रूहिपृच्छते चंडालत्वात्कथमहंमुच्येयमितिसत्तम २५ राजन्यउवाचचंडालप्रतिजानीहियेनमोक्षमवाप्स्यसि
ब्राह्मणार्थत्यजन्प्राणान्गतिमिष्टामवाप्स्यसि २६ दत्वाशरीरंक्रव्याद्भ्योरणाग्नौद्विजहेतुकं हुत्वाप्राणान्प्रमोक्षस्तेनान्य
थामोक्षमर्हसि २७ भीष्मउ० इत्युक्तःसतदातेनब्रह्मस्वार्थेपरंतप हुत्वारणमुखेप्राणान्गतिमिष्टामवापह २८ त
स्माद्रक्ष्यंत्वयापुत्रब्रह्मस्वंभरतर्षभ यदिच्छसिमहाबाहोशाश्वतींगतिमात्मनः २९ इतिदानधर्मेषुराजन्यचंडालसंवादः
युधिष्ठिरउ० एकलोकाःसुकृतिनःसर्वेत्वाहोपितामह उततत्रापिभिन्नास्तेतन्मेब्रूहिपितामह १ भीष्मउ० कर्मभिः
पार्थनानात्वंलोकानांयांतिमानवाः पुण्यान्पुण्यकृतोयांतिपापान्पापकृताजनाः २ ॥ छ ॥ छ ॥

र्मभिरितिपुण्यपापयोरिवपुण्यानामप्यवांतरभेदोस्तीत्यर्थः १ २ ३ ॥ छ ॥ छ ॥ छ ॥ छ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणस्यब्राह्मणसंबंधिनाधनेन: ११ १२ १३ १३ ॥ ७॥ ॥

अ० ५

दा० २२६

अत्राप्युदाहरंतीममितिहासंपुरातनं गौतमस्यमुनेस्तातसंवादंवासवस्यच ३ ब्राह्मणोगौतमःकश्चिन्मृदुर्दां
तोजितेंद्रियः महावनेहस्तिशिशुंपरिद्युतममातृकं ४ तंदृष्ट्वाजीवयामाससानुक्रोशोधृतव्रतः सतुदीर्घेण
कालेनबभूवातिबलोमहान ५ तंप्रभिन्नंमहानागंप्रस्रुतंपर्वतोपमं धृतराष्ट्रस्यरूपेणशक्रोजग्राहहस्ति
नं ६ ह्रियमाणंतुतंदृष्ट्वागौतमःसंशितव्रतः अभ्यभाषतराजानंधृतराष्ट्रंमहातपाः ७ मामेहार्षीर्हस्ति
नंपुत्रमेनंदुःखात्पुष्टंधृतराष्ट्राकृतज्ञ मैत्रंसप्तपदंवदंतिमित्रद्रोहोनैवराजन्स्पृशेत्वां ८ इध्मोदकप्रदातारंशू
न्यपालंममाश्रमे विनीतमाचार्यकुलेसुयुक्तंगुरुकर्मणि ९ शिष्टंदांतंकृतज्ञंचप्रियंचसततंमम नमेविक्रोशतो
राजन्हर्तुमर्हसिकुंजरं १० धृतराष्ट्रउवाच गवांसहस्रंभवतेददानिदासीशतंनिष्कशतानिपंच
अन्यच्चवित्तंविविधंमहर्षेकिंब्राह्मणस्येहगजेनकृत्यं ११ गौतमउवाच ब्राह्मणांनांह गंवांस नवेवगावो
हिभवंतुराजन्दास्यःसनिष्कंविविधंचरत्नं अन्यच्चवित्तंविविधंनरेंद्रकिंब्राह्मणस्येहधनेनकृत्यं १२ धृत
राष्ट्रउवाच ब्राह्मणानांहस्तिभिर्नास्तिकृत्यंराजन्यानांनागकुलानिविप्र स्ववाहनंनयतोनास्त्यधर्मोनाग
श्रेष्ठंगौतमस्मान्निवर्त १३

एम० २२६

© (c) Dharmartha Trust J&K. Digitized By eGangotri

पातयिष्येहस्तिनंस्त्रीपंकलंत्वतोगन्हीष्येइत्यर्थः १४ २० २१ ॥ छ ॥ छ ॥

गौतमउवाच यत्रप्रेतोनंदतिपुण्यकर्मायत्रप्रेतःशोचतेपापकर्मा वैवस्वतस्यसदनेमहात्मंस्तत्रत्वहंहस्तिनंपातयिष्ये १४ धृ
तराष्ट्रउवाच येनिष्क्रियानास्तिकाश्रद्दधानाःपापात्मानइंद्रियार्थेनिविष्टाः यमस्यतेयातनांप्राप्नुवंतिपरंगंताधृतराष्ट्रोनत
त्र १५ गौतमउ० वैवस्वतीसंयमनीजनानांयत्रानृतंनोच्यतेयत्रसत्यं यत्राबलाबलिनंपातयंतितत्रत्वाहंहस्तिनंपा
तयिष्ये १६ धृतराष्ट्रउ० ज्येष्ठास्वसारंपितरंमातरंचयथाशत्रुंमदमत्ताश्चरंति तथाविधानामेषलोकोमहर्षेपरंगंता
धृतराष्ट्रोनतत्र १७ गौतमउ० मंदाकिनीवैश्रवणस्यराज्ञोमहाभागाभोगिजनप्रवेश्या गंधर्वयक्षैरप्सरोभिश्चजुष्टातत्र
त्वाहंहस्तिनंपातयिष्ये १८ धृतराष्ट्रउ० अतिथिव्रताःसुव्रतायेजनावैप्रतिश्रयंददतिब्राह्मणेभ्यः शिष्टाशिनःसंवि
भत्वाहंहस्तिज्याश्रितांश्चमंदाकिनींतेविभूषयंति १९ गौतमउ० मेरोरग्रेयद्वनंभातिरम्यंसुपुष्पितंकिंनरगी
तजुष्टंसुदर्शनायत्रजंबूर्विशालातत्रत्वाहंहस्तिनंपातयिष्ये २० धृतराष्ट्रउ० येब्राह्मणामृदवःसत्यशीलाबहुश्रु
ताःसर्वभूताभिरामाः येधीयंतेसेतिहासंपुराणंमध्वाहुत्याजुह्वतिवैद्विजेभ्यः २१ ॥ छ ॥ छ ॥ रा१४ ॥

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

२४ अग्नियोनाः ध्वघ्युग्नवदग्निरेवयोनेर्योनिर्नियधान्ते ३० दंताः दमिनः सत्रीभूताः भूतानामाश्वासनदक्षकाः ३१ ॥ ७ ॥ ७॥

दा० २२७ तथाविधानामेष लोको महर्षे परं गंता धृतराष्ट्रो न तत्र यद्विद्युते विदितं स्थानमस्ति तद्ब्रूहि त्वं त्वरितो ह्येष यामि २२ गौतम उ०
सुपुष्पितं किंनरराजजुष्टं प्रियं वनं नंदनं नारदस्य गंधर्वाणामप्सरसां च शश्वत्तत्र त्वाहं हस्तिनं पातयिष्ये २३ धृतराष्ट्र उ०
येन त्यागी ते कृशलाजनास्सदा सत्यमाचमानाः सहिताश्चरंति तथाविधानामेष लोको महर्षे परं गंता धृतराष्ट्रो न तत्र २४ गौतम उ०
यत्रोत्तराः कुरवो भांति रम्या देवैः सार्द्धं मोदमाना नरेंद्र यत्राग्नियोनाश्च वसंति लोका अयोनयः पर्वतयोनयश्च २५ यत्र शक्रो
वर्षति सर्वकामान्यत्र स्त्रियः कामचारा भवंति यत्र चेर्ष्या नास्ति नारीनराणां तत्र त्वाहं हस्तिनं यातयिष्ये २६ धृतराष्ट्र उ०
ये सर्वभूतेषु निवृत्तकामा अमांसादा न्यस्तदंडाश्चरंति न हिंसंति स्थावरं जंगमं च भूतानां ये सर्वभूतात्मभूताः २७ निराशि
षो निर्ममा वीतरागा लाभेलाभे तुल्यनिंदाप्रशंसाः तथाविधानामेष लोको महर्षे परं गंता धृतराष्ट्रो न तत्र २८ गौतम उ० न
ततः परं भांति लोकाः सनातनाः सुपुण्यगंधा विरजा वीतशोकाः सोमस्य राज्ञः सदने महात्मनस्तत्र त्वाहं हस्तिनं पातयिष्ये
२९ धृतराष्ट्र उ० ये दानशीला न प्रतिग्रहस्ता ते सदान्याय्यमर्थोश्चादत्ते परेभ्यः येषामदेयमर्हते नास्ति किंचित्सर्वातिथ्याः
सुप्रसादा जनाश्च ३० ये क्षंतारो नाभिजल्पंति चान्यान्सत्रीभूताः सततं पुण्यशीलाः तथाविधानामेष लोको महर्षे परं ग एम० २२७
ता धृतराष्ट्रो न तत्र ३१

को१

त३

धर्मस्य वस्तरं हरः तत्र सषुस्याकाशं प्रधारयंति ते स्वधारिणस्तेषां धर्मधुरे इत्यपि पाठः ३९ ४० ॥ ७॥

गौतम उ० ततो परे भांति लोकाः सनातना विरजसो विनमर्कविशोकाः आदित्यदेवस्य पदे महात्मनस्तत्र त्वाहं हस्ति
नं पात विष्ये ३३ धृतराष्ट्र उ० स्वाध्यायशीला गुरुशुश्रूषणे रतास्तपस्विनः सुव्रताः सत्यसंधाः आचार्याणाम प्रतिकूल
भाषिणो नित्योत्थिता गुरुकर्मस्वचोद्याः ३३ तथाविधानामेष लोको महर्षेविशुद्धानां भावितो वाग्यतानां सत्ये स्थितानां
वेदविदां महात्मनो परं गंता धृतराष्ट्रो न तत्र ३४ गौतम उ० ततो परे भांति लोकाः सनातनाः सुपुण्यगंधा विरजा विशोकाः
वरुणस्य राज्ञः सदने महात्मनस्तत्र त्वाहं हस्तिनं पात विष्ये ३५ धृतराष्ट्र उ० चातुर्मास्यैर्ये यजंते जनाः सदानर्थेष्टीनां
शतं प्राप्नुवंति येचाग्निहोत्रं जुह्वति श्रद्दधाना यथाम्नायं त्रीणि वर्षाणि विप्राः ३६ स्वधारिणां धर्मधुरे महात्मनां पथो
दितेव र्त्मनि सुस्थितानां धर्मात्मनामुद्वहतां गतिं तां परं गंता धृतराष्ट्रो न तत्र ३७ गौतम उ० इंद्रस्य लोका विरजा विशो
का दुरन्वयाः कांक्षिता मानवानां तस्याहं ते भवने भूरितेजसो राजन्निमं हस्तिनं पात विष्ये ३८ धृतराष्ट्र उ० शतवर्षजीवी
यश्च शूरो मनुष्यो वेदाध्यायी यश्च यज्वाप्रमत्तः एते सर्वे शक्रलोकं व्रजंति परं गंता धृतराष्ट्रो न तत्र ३९ गौतम उ० प्राजा
पत्याः संति लोका महांतो नाकस्य पृष्ठे आवीतशोकाः मनीषिताः मनीषिताः सर्वलोकोद्भवानां तत्र त्वाहं हस्तिनं पा
म२ नपात विष्ये ४०

दा० २२८ धृतराष्ट्र उवाच येराजानोराजसूयाभिषिक्ताधर्मात्मानोरक्षितारःप्रजानां येचाश्वमेधावभृथेप्लुतांगास्तेषांलोकाधृत
राष्ट्रोनतत्र ४१ गोतमउ० ततःपरंभांतिलोकाःसनातनाःसुपुण्यगंधाविरजावीतशोकाः तस्मिन्नहंदुर्लभेत्वाप्य
धृष्येगवांलोकेहस्तिनेपातयिष्ये ४२ धृतराष्ट्रउ० योगोसहस्रीशतदःसमांसमांगवांशतीदशदद्याच्चशक्त्या त
ध्य३ थादशभ्योपश्चद[illegible]हिकांपंचभ्योवादानशीलस्तथैकां ४३ येजीर्यंतेब्रह्मचर्येणविप्राब्राह्मीवाचंपरिरक्षंति च
परिरक्षंतिचैव मनस्विनस्तीर्थयात्रापरायणास्तेतत्रमोदंतिगवांनिवासे ४४ प्रभासंमानसंतीर्थंपुष्कराणिमहत्स
रः पुण्यंचनैमिषंतीर्थंबाहुदांकरतोयिनीं ४५ गंगागयाशिरश्चैवविपाशांस्थूलवालुकां कृष्णांगंगांपंचनदंमहा
ह्रदमथापिच ४६ गोमतींकौशिकींगंगांमहात्मानोधृतव्रताः सरस्वतीदृषद्वत्यौयमुनांयेप्रयांतिच ४७ तत्रते
दिव्यसंस्थानादिव्यमाल्यधराःशिवाः प्रयांतिपुण्यगंधाढ्याधृतराष्ट्रोनतत्रवै ४८ गोतमउ० यत्रशीतभयंनास्ति
नचोष्णभयमण्वपि नक्षुत्ति नक्षुत्पिपासेनग्लानिर्नदुःखंनसुखंतथा ४९ नद्वेष्योनप्रियःकश्चिन्नबंधुर्नरिपु दान०
स्तथा नजरामरणेतत्रनपुण्यंनचपातकं ५० तस्मिन्विरजसिस्फीतेप्रज्ञासत्वव्यवस्थिते स्वयंभुवनेपुण्येहस्ति २२८
नंमेप्रदास्यसि ५१

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

धृतराष्ट्र उ० निर्मुक्ताः सर्वसंगेभ्यः कृतात्मानो यतव्रताः अध्यात्मयोगसंस्थाने युक्ताः स्वर्गगतिं गताः ५२ ते ब्रह्मभवनं पुण्यं
प्राप्नुवंतीह सात्विकाः न तत्र धृतराष्ट्रस्त्वा शक्यो द्रष्टुं महामुने ५३ गौतम उ० रथंतरं यत्र बृहच्च गीयते यत्र वेदिष्ठुएपज्जनैर्वृ
ताव यत्रोपयाति हरिभिः सोमवीथीं तत्र त्वाहं हस्तिनं पातयिष्ये ५४ बुध्यामि त्वां वृत्रहणं शतक्रतुं व्यतिक्रमंतं भुव
नानि विश्वा कच्चिन्न वाचा वृजिनं कदाचिदकार्षं ते मनसोभिषंगात् ५५ शतक्रतुरुवाच मघवाहं लोकपथं प्रजा
नामन्वागमं परिवादे गजस्य तस्माद्भवान्प्रणतं मानुशास्तु ब्रवीषि यत्तत्करवाणि सर्वं ५६ गौतम उ० श्वेतं करेणुं म
म पुत्रनागं यं मे हार्षीर्दशवर्षाणि बालं यो मे वने वसतो भूद्द्वितीयस्तमेव मे देहि सुरेंद्र नागं ५७ शतक्रतुरुवाच अयं
सुतस्ते द्विजमुख्य नाग आगच्छति त्वामभिवीक्षमाणः पादौ च ते नासिकयोपजिघ्नते श्रेयो मम ध्याहि नमः स्तु ते स्तु ५८
गौतम उ० शिवं सदैवेह सुरेंद्र तुभ्यं ध्यायामि पूजां च सदा प्रयुंजे ममापि त्वं शक्र शिवं ददस्व त्वया दत्तं प्रतिगृह्णामि ना
गं ५९ शतक्रतुरुवाच येषां वेदा निहिता वै गुहायां मनीषिणां सत्यवतां महात्मनां तेषां त्वयैकेन महात्मनास्मि
बुद्धस्तस्मात्प्रीतिमांस्तेहमद्य ६० हंतैहि ब्राह्मण क्षिप्रं सह पुत्रेण हस्तिना त्वं हि प्राप्तुं शुभांल्लोकानह्नाय च चिरा
पच ६१ भीष्म उवाच स गौतमं पुरस्कृत्य सह पुत्रेण हस्तिना दिवमाचक्रमे वज्री सद्भिः सह दुरासदं ६२

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

ब्रह्मसंब्रह्मलोके मतस्यापि न जीर्णतः इत्यध्यायतात्पर्यं ६३ अध्यायो हस्तिकूटो नाम दानं [illegible] अहिंसितं अहिंसा १ तपस कृछ्र

दा० २२९ यइदंश्ररण्यमाश्रित्यं यःपठेद्वा जितेंद्रियः सयाति ब्रह्मणो लोकं ब्राह्मणो गौतमो यथा ६३ इति दानधर्मे हस्तिकूटो नाम
युधिष्ठिरउ० दानंबहुविधाकारंशांतिःसत्यमहिंसितं स्वदारतुष्टिश्चोक्तातेफलंदानस्यचैवयत १ पितामहस्यवि
दितंकिमन्यत्तपसोबलात तपसोयत्परंत्वद्यतन्मेव्याख्यातुमर्हसि २ भीष्मउ० तपःप्रचक्षतेयावत्तावल्लोकोयुधि
ष्ठिर मतंममात्रकौंतेयतपोनानशनात्परं ३ अत्राप्युदाहरंतीममितिहासंपुरातनं भगीरथस्यसंवादंब्रह्मण
श्चमहात्मनः ४ अतीत्यसुरलोकंचगवांलोकंचभारत ऋषिलोकंचसोगच्छद्भगीरथइतिश्रुतिः ५ तंदृष्ट्वावचःप्रा
हब्रह्माराजन्भगीरथं कथंभगीरथागास्त्वमिमंलोकंदुरासदं ६ नहिदेवानगंधर्वानमनुष्याभगीरथ आयांत्यत
प्ततपसःकथंवैत्वमिहागतः ७ भगीरथउ० निष्काणांवैसदद्दंब्राह्मणेभ्यःशतंसहस्राणिसदैवदानं ब्रह्मव्रतं
नित्यमास्थायविद्धिनत्वेवाहंतस्यफलादिहागां दशैकरात्रान्दशपंचरात्रानेकादशैकादशकान्क्रतूंश्च ज्योतिष्टो
मानांचशतंयदिष्टंफलेनतेनापिनचागतोहं ८ राम० २२९

चांद्रायणादेर्बलात्अन्यत्किंबलवत्तरंविदितंनकिमपितातपसस्तपसांमध्येयत्परं २ लोकोभोगप्रदेशः ८ एकरात्रादियःक्रतुविशेषाः ९

रा॰वि॰टी॰अ॰ ९

वारिपूरं कत्यासमृद्रमदं ११ चंद्रोद्भवैः व्रवेनाहमत्रागत इत्यनुवर्तते १२ एकैकशः ग्रामायदशगाः १३ आप्तोर्यामः सोमयागः १४ कर्क

नाडीसहस्रं

प्रत्यावसंज्ञान्द्वीतीरनित्यः शतं समासप्यमान स्तपोहं अरण्यं चतत्राश्वतरी सहस्रं नचतेनाहमागां १० दशायु

तानि चाश्वानां गोयुतानि च विंशतिं पुष्करे पुद्विजातिभ्यः प्राप्तं शतसहस्रशः ११ सुवर्णचिंद्रोन्तमधारिणी नांक

न्योन्नमानामदृदं सहस्रं षष्टिंसहस्राणि विभूषितानां जांबूनदेनाभरणैर्नीतेन १२ दशार्बुदान्यदर्दं गो सर्वज्यास्तेकै

कशो दशगा लोकनाथ समाथ समानवत्साः पयसा समन्विताः सुवर्णकांस्योपदुहा व्रतेन आप्तोर्यामे पुसततमे कै

कस्मिन् दशार्दं गव्वीनां क्षीरदात्रीणां रोहिणीनां शतानि च १४ दोग्ध्रीणां वै गवां चापि प्रयुतानि दशैव ह प्राप्तं

दशगुणं ब्रह्मन् चतेनाहमागतः वाजिनां बाह्लिजातानामयुतान्यदर्दं दश कर्कानां हेममालीनां नचतेनाहमाग

तः १६ कोटीश्च कांचनस्याष्टौ प्राप्तं ब्रह्मन् दशान्वहं एकैकस्मिन् क्रतौ तेन फले नाहं नचागतः १७ वाजिनां श्या

मकर्णानां हरितानां पितामह प्राप्तं हेमस्रजां ब्रह्मन् कोटीर्दश च सप्त च १८ ईषादंतान्महाकायान्कांचनस्रग्विभू

षितान् पद्मिनो वै सहस्राणि प्राप्तं दशच सप्त च १९ अलंकृतानां देवेशा दिव्यैः कनकभूषणैः रथानां कांच

नांगानां सहस्राण्यदर्दं दश २०

ः कर्कटिकेव क्तो भुक्ताश्चेदर्यणो पुरे इति मेदिनी तः कर्काणां शुक्लाश्वानां १८ पद्मिनः पद्मविकृताः १९ २० २० २० २० ॥४॥

दक्षिणा कृपाः पत्नीं गम्यतां दक्षिणावयवाः २१ निष्ककंगनां युद्धे जितानां शतां सहस्त्रं [redacted] विप्रेभ्यो विप्रवचनाद्दक्षिणामहं दं तु त्वं पवान २७

द्रा० २३० सप्तचान्यादि निपुणानि वाजिभिः समलंकृतैः दक्षिणावयवाः केचिद्द्देयैसंप्रकीर्त्तिताः वाजपेयेषु दशसु प्राप्तं तान्यपि चा
प्यहं २१ शक्रतुल्यप्रभावानामिष्ट्वा विक्रमेण ह सहस्त्रनिष्ककंठानाम ददं दक्षिणामहं २२ विजित्य भूपतीन्स
र्वान्म्लेच्छांश्च पितामह अश्वमेधो राजसूयेभ्यो न च ते नाहमागतः २३ स्रोतस्वयावक्रगायामच्छन्नमासीज्जगत्पते द
क्षिणाभिः प्रवृत्ताभिर्मम नागाश्च तत्कृते २४ वाजिनां च सहस्त्रे द्वे सुवर्णशतभूषिते वरं ग्रामशतं चाहमेकैकस्य
त्रिधा ददं २५ तपस्वी नियताहारः शममास्थाय वाग्यतः दीर्घकालं हिमवति गंगायामाचरं तपः २६ मूर्द्ध्ना धारां महा
देवः शिरसा यामधारयत न तेनाप्यहमागच्छं फलेनेह पितामह २७ शम्याक्षेपैरभजं यच्च देवाक्रान्तैः क्रतूनाम [redacted] रू४
[redacted] स्तुते स्वापि पन्नत त्रयोदशाहद्वादशाहाश्च देवसपौंडरीकान्न च तेषां फलेन २८ अष्टौ सहस्त्राणि ककुद्मिना
महं शुक्लऋषभाणाम ददं द्विजेभ्यः एकैकं चैकां च तेन स्वर्गं गमेभ्यः पत्नीमेषामददं निष्ककंठीः २९ हिरण्यरत्ननिचया
न ददं रत्नपर्वतान धनधान्यैः समृद्धांश्च ग्रामांश्चान्ये सहस्त्रशः ३० ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

शम्यापरशुवध्नः कापदंडः स वलवनादिनप्रेरो यावद्दूरं पतति तावान्देशो यस्य स वेदिकायै भवति स शम्याक्षेपो यागः स घस्कारयो यागविशे द्रा० २३०
ता १ षाः ३०

© (c) Dharmartha Trust J&K Digitized By eGangotri

३२ कांचनमयानां वृक्षाणां चूतानां वनं नानावर्णरत्नखचितानामिति पर्थः ३५ अग्निं अग्निचयनानि ३८ गुहायां निहितेमोपितं गुह्यपदनश

गद्यामयने: २

शतं शतानां गच्छीनामदद्दं चाप्यतं द्रितः दृष्टानेकैर्महायज्ञैर्ब्राह्मणेभ्योनतेनच ३१ एकादशाहेरयजं सदक्षिणैर्द्वि
[redacted] द्वादशाहेरश्वमेधैश्चदेव आर्क्षायणेः षोडशभिश्च ब्रह्मंस्तेषांफलेनेहनचागतोस्मि ३२ निष्ककंठमदद्दं
योजनायतं तद्विस्तीर्णं कांचनपादपानां वनंलताना रत्नविभूषितानां नचैवतेषामागतोहंफलेन ३३ तुरायणं
हिव्रतमप्यधस्यमक्रोधनोकरवं त्रिंशतोवृदान शतंगवामष्टशतानिचैवदिनेदिनेप्रददं ब्राह्मणेभ्यः ३४ पय
स्विनीनामथरोहिणीनां तथैवान्यानडुहोलोकनाथ प्रादांनित्यंब्राह्मणेभ्यः सुरेश नेहागतस्तेनफलेनचाहं शम्या
क्षेपिणा पृथिवीं त्रिधापर्यचरं यजन ३५ त्रिंशदग्नीनहंब्रह्मन्नयजंयच्चनित्यदा अष्टाभिः सर्वमेधैश्चनरमेधैश्च
सप्तभिः ३६ दशभिर्विश्वजिद्भिश्च शतैरष्टादशोत्तरैः नचैवतेषांदेवेशफलेनाहमिहागमं ३७ शरय्वां बाहुदायां
चगंगायामथनैमिषे गवांशतानामयुतमददंनचतेनवै ३८ इंद्रेणगुह्यंनिहितंगु[redacted]हायांयद्भार्गवस्तप
सेहाभ्यविंदत् जाज्वल्यमानमुशनस्तेजसैवतत्साधयामासमहंवरेण्य ३९ ततोमेब्राह्मणाद्धेत्तस्मिन
कर्मणिसाधिते सहस्रमृषयश्चासन्सवैतत्रसमागताः ४० ॥ ७ ॥ ५ ॥

नंतपसाश्रमविंदतश्रुत्वासीत उशनस्तेजसा शुक्रस्यबलेनजाज्वल्यमानं तच्चवाक्यशेषात्सर्वभोगत्यागात्मकं अनशनसर्वमेधेगेब्राह्मणानां
सतर्पणंचसाधयामासमितप्रायं ४०

© (Dharmarth Trust J&K). Digitized By eGangotri

४६ अध्यायः शतायुः ४ वर्तयन्नानुतिष्ठन ५ ६ ६ ६ ॥ छ ॥

शां० २३१ उक्तस्तेस्मिगच्छत्वंब्रह्मलोकमितिप्रभो प्रीतेनोक्तःसहस्रेणाक्षाणानांमहंप्रभो ४१ इमंलोकमनुप्राप्तोमाभूत्तेत्र
विचारणा ४२ कामंयथावछ्हितंविधात्रापथेनवाच्यंतमयापथावत तयोहिनान्यत्रानशनान्मतेमेनमोस्तुतेदेव
वरप्रसीद ४३ भीष्मउ० इत्युक्तवंतंतंब्रह्मा राजानंसभगीरथम पूजयामासपूज्जार्हंविधिदृष्टेनकर्मणा ४४ त
स्मादन्नशनैर्युक्तोविप्रान्पूजयनित्यदा विप्राणांवचनात्सर्वंपरत्रेहचसिध्यति ४४ वासोभिरन्नैर्गोभिश्चशुभैर्नैवे
शिकैरपि शुभैस्सुरगणैश्चापितुष्टोप्यावैद्विजास्तथा एतदेवपरंगुह्यमलोभेनसमाचर ४५ इतिदानधर्मेब्रह्मभ
गीरथसंवादः युधिष्ठिरउ० शतायुरुक्तःपुरुषःशतवीर्यश्चजायते कस्मान्म्रियतेपुरुषावाला अपिपितामह
१ आयुष्मानकेनभवतिस्वल्पायुर्वापिमानवः केनवालभतेकीर्त्तिंकेनवालभतेश्रियं २ तपसाब्रह्मचर्येण
जपहोमैस्तथौषधैः कर्मणामनसावाचातन्मेब्रूहिपितामह भीष्मउवाच अत्रतेहंप्रवक्ष्यामियन्मांत्वमनु
पृच्छसि अल्पायुर्येनभवतिदीर्घायुर्वापिमानव ४ येनवालभतेकीर्त्तिंयेनवालभतेश्रियं यथावर्त्तयन्पुरुषः
श्रेयसासंप्रयुज्यते ५ आचाराल्लभतेह्यायुराचाराल्लभतेश्रियं आचारात्कीर्त्तिमाप्नोतिपुरुषःप्रेत्यचेहच ६ शां० २३१

© Dharmartha Trust J&K. Digitized By eGangotri

अलक्षणं कुर्वाय स्मारादिविरुद्धं लक्षणाः ९ अवात अवणा तजमाः साधवः १४ शंकस्तुकः दुर्जनः अस्थिरश्च शंकस्तुकोस्थिरइत्यम
रः १६

दुराचारो हि पुरुषो नेहायुर्विंदते महत् त्रसंति यस्माद्भूतानि तथा परिभवंति च ७ तस्मात्कुर्यादिहाचारं यदीछेद्भूति
मात्मनः अपि पापशरीरस्य आचारो हंत्यलक्षणं ८ आचारलक्षणो धर्मः संतश्चाचारलक्षणाः साधूनां च यथा वृत्त
मेतदाचारलक्षणं ९ अप्यदृष्टं श्रवादेव पुरुषं धर्मचारिणं भूतिकर्माणि कुर्वाणं तं जनाः कुर्वते प्रियं १० ये ना
स्तिका निष्क्रियाश्च गुरुशास्त्राभिलंघिनः अधर्मज्ञा दुराचारास्ते भवंति गतायुषः ११ विशीला भिन्नमर्यादा नित्यं संकी
र्णमैथुनाः अल्पायुषो भवंतीह नरा निरयगामिनः १२ सर्वलक्षणहीनोपि समुदाचारवान्नरः श्रद्दधानोनसूयश्च
शतं वर्षाणि जीवति १३ अक्रोधनः सत्यवादी भूतानामविहिंसकः अनसूयुरजिह्मश्च शतं वर्षाणि जीवति १४ लो
ष्टमर्दी तृणछेदी नखखादी च यो नरः नित्योछिष्टः शंकसुको नेहायुर्विंदते महत् स विनाशं जल्पाशुभ्रूचकोस्तुचिरेवच
१५ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत् उत्थायाचम्य तिष्ठेत पूर्वां संध्यां कृतांजलिः १६ ॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

१७ उपसर्गोराहुग्रस्ते १८ १९ २० २० २० ॥ ७ ॥ ७ ॥ ७ ॥

दा०
२३२

एवमेवापरांसंध्यासमुपासीतवाग्यतः नेक्षेतादित्यमुद्यंतंनास्तंयांतंकदाचन १७ नोपसृष्टंवारिस्थंनमध्यंनभ
सोगतं ऋषयोनित्यसंध्यत्वादीर्घमायुरवाप्नुवन् १८ तस्मात्तिष्ठेत्सदापूर्वांपश्चिमांचैववाग्यतः येनपूर्वामु
पासंतेद्विजाःसंध्यांनपश्चिमां सर्वांस्तान्धार्मिकोराजाशूद्रकर्माणिकारयेत् २० परदारानगंतव्यासर्ववर्णेषु
कर्हिचित् नहीदृशमनायुष्यंलोकेकिंचनविद्यते यादृशंपुरुषस्येहपरदारोपसेवनं [redacted]
[redacted] २१ यावंतोरोमकूपास्युःस्त्रीणांगात्रेषुनिर्मिताः तावद्वर्षसहस्राणिनरकंप
र्युपासते २२ प्रसाधनंचकेशानामंजनंदंतधावनं पूर्वाह्णएवकार्याणिदेवतानांचपूजनं पुरीषमूत्रेनोदी
क्षेत्राधितिष्ठेत्कदाचन नातिकल्पंनातिसायंनचमध्यंदिनेस्थिते २४ नज्ञातैःसहगच्छेत्तुनैकोनवृषलैःस
ह पथांदेयोब्राह्मणायगोभ्योराजभ्यएवच वृद्धायभारतप्तायगर्भिण्यैदुर्बलायच २५ प्रदक्षिणंचकुर्वीत
परिज्ञातान्वनस्पतीन् चतुष्पथान्प्रकुर्वीतसर्वानेवप्रदक्षिणान् २६ मध्यंदिनेनिशाकालेअर्द्धरात्रेचसर्वदा
चतुःपथंनसेवेतउभेसंध्येतथैवच २७ उपानहौचवस्त्रंचधृतमन्यैर्नधारयेत् ब्रह्मचारीचनित्यंस्यात्पादेनना
क्रमेत् २८ अमावास्यांपौर्णमास्यांचतुर्दश्यांचसर्वशः अष्टम्यांपर्वकालेचब्रह्मचारीसदाभवेत् २९ वृथा
मांसंनखादेत्तथापृष्ठमांसंतथैवच आक्रोशंपरिवादंचपैशुन्यंचविवर्जयेत् ३० ॥ ७ ॥ ७ ॥ राम०
२३२

६३

© Dharmartha Trust J&K. Digitized By eGangotri

३७ नस्थितेनहिंस्यते ३८ अतिभोज्यानिअदृष्टंसूक्ष्मेदकारि ४० ४१ ॥ छ ॥ छ॥ ॥ छ॥

नारुंतुदःस्यान्नृशंसवादीनहीनतःस्वंनमुपाददीत यथास्यवाचापरउद्विजेतनतांवदेदुशतीपापलोक्यां ३१ वाक्सा
यकावदनान्निष्पतंतियैराहतःशोचतिरात्र्यहानि परस्यवामर्मसुतेपतंतितान्पंडितोनावसृजेत्परेषु ३२
रोहतेसायकैर्विद्धंवनंपरशुनाहतं वाचादुरुक्तंबीभत्संनसंरोहतिवाक्क्षतं ३३ कर्णिनालीकनाराचान्नि
र्हरंतिशरीरतः वाक्शल्यस्तुननिर्हर्तुंशक्योहृदिशयोहिसः ३४ हीनांगानतिरिक्तांगान्विद्याहीनान्विगर्हिता
न् रूपद्रविणहीनांश्चसत्वहीनांश्चनाक्षिपेत् ३५ नास्तिक्यंवेदनिंदांचदेवतानांचकुत्सनं द्वेषस्तंभाभि
मानश्चतैक्ष्ण्यंपरिवर्जयेत् ३६ परस्यदंडंनोद्यछेत्क्रुद्धोनैनंनिपातयेत् अन्यत्रपुत्राच्छिष्याद्वाशिक्षार्थं
ताडनंस्मृतं ३७ नब्राह्मणान्परिवदेन्ननक्षत्राणिनिर्दिशेत् तिथिंपक्षस्यनब्रूयात्तथास्याप्नोतिहीयते ३८
कृत्वामूत्रपुरीषेतुरथ्यामाक्रम्यवापुनः पादप्रक्षालनंकुर्यात्स्वाध्यायेभोजनेतथा ३९ त्रीणिदेवाःपवि
त्राणिब्राह्मणानामकल्पयन् अदृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यते ४० संयावंकृशरंमांसंशष्कुली
पायसंतथा आत्मार्थंनप्रकर्तव्यंदेवार्थंतुप्रकल्पयेत् ४१

© (h) Dharmartha Trust J&K Digitized By eGangotri

नाभिगछेत्तरेज्जादीन्प्रति ४८ अहातांश्चातुमत्तीत्वेचकामुकीत्वेनवा ५० अंतर्धानअत्पंतंअधकारेसंयुक्तेइतरेणास्त्रादिना ५२ ॥ छ ॥ छ॥

नित्यमग्निं परिचरेद्द्विःस्नांदध्याच्चनित्यदा वाग्यतोदंतकाष्ठंचनित्यमेवसमाचरेत ४१ मंचाभ्युदितशायी स्यात्प्रायश्चित्ती
तथाभवेत मातापितरमुत्थायपूर्वमेवाभिवादयेत ४३ आचार्यमथचाप्यन्यंतथाप्युर्विदितेमहत वर्जयेदंतकाष्ठानिवर्जनी
यानिनित्यशः ४५ भक्षयेच्छास्त्रदृष्टानिपर्वस्वपिविवर्जयेत उदङ्मुखश्चसततंशौचंकुर्यात्समाहितः ४६ अकृत्वादे
वतापूजामाचरेद्दंतधावनं अकृत्वादेवपूजांचनाभिगछेत्कदाचन ४७ अन्यत्रतद्गुरुंवृद्धंधार्मिकंवाविचक्षणं अ
वलोकोनचादर्शोमलिनोवुद्धिमत्तरैः ४८ नचाज्ञातांस्त्रियंगछेद्गर्भिणींवाकदाचन ४८ उदक्छिराणस्वपितितथा
प्रत्यक्छिरानच ४९ प्राक्छिरास्तस्वपेद्विद्वानथवादक्षिणाशिराः नभग्नेनावदीर्णेचशयनेप्रस्वपीतच ५० नांतर्धानेनसं
युक्तेनचतिर्यक्कदाचन नचापिकुर्यात्कार्येणसमयाद्यापिनास्तिकैः ५१ आसंनतुपदाकृष्यन्नप्रसज्जेत्तथानरः
ननग्नःकर्हिचित्स्नायान्नंनिशायांकदाचन ५२ ॥ छ ॥ छ ॥ छ ॥ छ॥

© Dharmarth Trust J&K. Digitized By eGangotri
(c) Dharmarth Trust. Digitized By eGangotri

प्रस्कंदयेतन्नत्रशेषंकिंचित्पजेत भुक्त्वाचमनसाअग्निमुपस्पृशेत ५८ कृतंनिश्रेयसमिछन्नतिशेषः ५९ प्राणाननामादीन्स्पर्शेछि

स्नात्वाचनावमज्जेत गात्राणिस्तुविचक्षणः नवानुलिंपेदस्नात्वास्नात्वावासोनविधूनेत ५३ नचैवार्द्राणिवासांसि
नित्यंसेवेतमानवः स्रजश्चनावकृष्येत नबहिर्धारयीतच ५४ उदक्याचसंभाषांनकुर्वीतकदाचन नोत्सृजेन
पुरीषंचक्षेत्रेग्रामस्यचांतिके ५५ उभेमूत्रपुरीषेतुनाप्सुकुर्यात्कदाचन अन्नंबुभुक्षमाणस्तुत्रिर्मुखेनस्पृशेद
पः ५६ भुक्त्वाचान्नंतथैवत्रिर्द्विःपुनःपरिमार्जयेत प्राङ्मुखोनित्यमश्नीयाद्वाग्यतोन्नमकुत्सयन ५७ प्रस्कंदये
त्तमनसाभुक्त्वाचाग्निमुपस्पृशेत आयुष्यंप्राङ्मुखोभुंक्तेयशस्यंदक्षिणामुखः धन्यंपश्चान्मुखोभुंक्तेऋतंभुं
इश्रु४ क्तेउदङ्मुखः ५९ अग्निमालभ्यतोयेनसर्वान्प्राणानुपस्पृशेत गात्राणिचैवसर्वाणिपार्ष्णिपाणितलेतथा ६०
नाधितिष्ठेत्तुषांजातुकेशभस्मकपालिकाः अन्य स्यचाप्यवस्नातंदूरतःपरिवर्जयेत शांतिहोमांश्चकुर्वीतसावित्रा
णिचधारयेत निषण्णश्चापिखादेत नतुगच्छन्कदाचन ६२ मूत्रंनोत्तिष्ठताकार्यंनभस्मनिनगोव्रजे आर्द्रपा
दस्तुभुंजीतनार्द्रपादस्तुसंस्वपेत आर्द्रपादस्तुभुंजानोवर्षाणांजीवतेशतं ६३ ॥ छ ॥ छ ॥

ह्राणि ६० अवस्नातपास्नानजलं ६१ सावित्राणिमंत्रविशेषान ६२ ६२ ६२ ॥ छ ॥ छ ॥ छ ॥

तिसमधंतिलसंयुक्तंमधंमधंमस्त्वं ७२ चंचितंप्रेतवेदं ७३ ७५ ७६ ॥ ७ ॥

दा० २३४

त्रीणितेजांसिनोच्छिष्टआलभेतकदाचन अग्निंगांब्राह्मणंचैवतथाह्यायुर्नहीयते ६४ त्रीणितेजांसिनोच्छिष्ट
उदीक्षेतकदाचन सूर्याचंद्रमसौचैवनक्षत्राणिचसर्वशः ६५ ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति प्रत्युत्था
नाभिवादाभ्यांपुनस्तान्प्रतिपद्यते ६६ अभिवादयेतवृद्धांश्चदद्याच्चैवासनंस्वयं कृतांजलिरुपासीतगच्छंतंपृष्ठतो
न्वियात ६७ नचासीतासनेभिन्नेभिन्नकांस्यंचवर्जयेत नैकवस्त्रेणभोक्तव्यंननग्नस्नातुमर्हति ६८ स्वप्तव्यंनैव
नग्नेननचोच्छिष्टोपिसंविशेत उच्छिष्टोनस्पृशेच्छीर्षंसर्वेप्राणास्तदाश्रयाः ६९ केशग्रहान्प्रहारांश्चशिरस्येतान्विवर्ज
येत नसंहताभ्यांपाणिभ्यांकंडूयेदात्मनःशिरः ७० नचाभीक्ष्णंशिरस्नायात्तथास्यायुर्नरिष्यते शिरस्नातेतैलेश्च नेष्व
नांगंकिंचिदपिस्पृशेत ७१ तिलपिष्टंनचाश्नीयात्तथास्यायुर्नरिष्यते नाध्यापयेत्तथोच्छिष्टोनाधीयीतकदाच
न ७२ वातेचपूतिगंधेचमनसापिनचिंतयेत अत्रगाथायमोद्गीताःकीर्त्तयंतिपुराविदः आयुरस्यनिकृंततिप्र
जामस्याददेतथा ७४ यउच्छिष्टःप्रवदतिस्वाध्यायंचाधिगच्छति यश्चानध्यायकालेपिमोहादभ्यस्यतिद्वि
जः ७५ तस्यवेदःप्रणश्येतआयुश्चपरिहीयते तस्माद्युक्तोप्यनध्यायेनाधीयीतकदाचन ७६ ॥ ७ ॥ एम० २३४

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

मिथ्याप्रवृत्तेपिसम्यक्वर्जितव्यं ८६ विपर्ययंत्र्यौत्तराधर्यं ८७ ८७ ॥ ७॥

प्रत्यादित्यंप्रत्यनलंप्रतिगांचप्रतिद्विजान् येमेहंतिचपंथानंतेभवंतिगतायुषः ७७ उभेमूत्रपुरीषेतुदिवाकुर्यादुदङ्मु
खः दक्षिणाभिमुखोरात्रौतथाह्यायुर्नरिष्यते ७८ त्रीन्कृशान्नावजानीयाद्दीर्घमायुर्जिजीविषुः ब्राह्मणंक्षत्रियं
सर्पंसर्वेह्याशीविषास्त्रयः ७९ दहत्याशीविषःक्रुद्धोयावत्पश्यतिचक्षुषा क्षत्रियोपिदहेत्क्रुद्धोयावत्स्पृशति
तेजसा ८० ब्राह्मणस्तुकुलंहन्याद्ध्यानेनावेक्षितेनच तस्मादेतत्त्रयंयत्नादुपसेवेतपंडितः ८१ गुरुणाचैववनि
र्वंधोनकर्तव्यःकदाचन अनुमान्यःप्रसाद्यश्चगुरुःक्रुद्धोयुधिष्ठिर ८२ सम्यग्मिथ्याप्रवृत्तेपिवर्जितव्यंगुरावि
ह गुरुनिंदादहत्यायुर्मनुष्याणांनसंशयः ८३ दूरादावसथान्मूत्रंदूरात्पादावसेचनं उच्छिष्टोत्सर्जनंचैवदूरेका
र्यंहितैषिणा ८४ रक्तमाल्यंनधार्यंस्याच्छुक्लंधार्यंतुपंडितैः वर्जयित्वातुकमलंतथाकुवलयंप्रभो ८५ रक्तं
शिरसिधार्यंतुतथावानेयमित्यपि कांचनीमालायानसादुष्यतिकर्हिचित् ८६ स्नातस्यवर्णकंनित्यमार्द्रंदद्या
द्विशांपते विपर्ययंनकुर्वीतवाससोर्बुद्धिमान्नरः ८७ तथानान्यधृतंधार्यंनचापदशमेवच अन्यदेवभवेद्वासः
शयनीयेनरोत्तम अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि ८८

शेव३

प्रियंगुः स्त्री राधिकाकरणयोरपीति मेदिनी पथगिति सज्जिकया ऽनुलिपनं कृत्वा स्नात्वा चंदनाद्यन्यतमेनानुलिपनं कार्यमित्यर्थः तगर
दा० २३५ स्थगरे महाराष्ट्राणां ग्वालामिति प्रसिद्धं ८९ उपवासं ब्रह्मचर्या ९० आलीढयारजस्वलयापरिहृतं संपादितं नालीढं तापरिहि

प्रियंगुचंदनाभ्यां च विल्वेन तगरेण च पथगेवानुलिपेत केसरेण च बुद्धिमान ८९ उपवासं च कुर्वीत स्नातः शुचिर
लंकृतः पर्वकालेषु सर्वेषु ब्रह्मचारी सदा भवेत ९० समानमेकपात्रे तु भुंजेन्नान्नं जगनस्वर नालीढं नापरिहृतं
भक्ष्यीत कदाचन ९१ तथा नोद्धृतसाराणि प्रेहृते नाप्रदाय च नैसंनिहृष्टां मेधावी अशुचेर्न च सत्स्व च ९२
प्रतिषिद्धान्न धर्मेषु भक्ष्यान्भुंजीत पष्ठतः पिप्पलं च वस्त्वैव शणशाकं तथैव च ९३ उदुंवरं न खादेत्तु भवार्थी पु
रुषोत्तमः आजं गव्यं तथा मांसं माएरं चैव वर्जयेत ९४ वर्जयेच्छुष्कमांसं च तथापर्युषितं च यत नपालोच
वर्णं विद्वान प्रा श्रीयान्न च रात्रिषु दधिसक्तुं न भुंजीत तथा मांसं च वर्जयेत ९५ सायंप्रातस्तु भुंजीत नांतरालेस
माहितः वालेन तु न भुंजीत परश्राद्धं तथैव च ९६ वाग्यतो नैकवस्त्रश्च नासेविघः कदाचन भूमौ सदैव ना
श्रीयान्नानाशी लो न शद्वत ९७

तामिति पाठे आलीढं गवाघ्रातं अपरिहितं परिषेचनहीनं ९१ उद्धृतसाराणि क्षीरादीनि प्रेहृते पाचकाय मेधावी ना पुरुषः अशुचेः संनि
हृषेन भुंजीत मेधावी अशुचे रिति गोजः ९२ धर्मेषु श्राद्धादिषु प्रतिषिद्धान भक्ष्यान पष्ठतः श्राद्धाद्यभावे न भुंजीत ९५ वालेन के
शेन उपलक्षितं परश्राद्धं शत्रुश्राद्धं ९६ सदैव न सदा नैवेति संबंधः ९७ राम० २३५

© Dharmarth Trust J&K. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri

निरस्यपानीयादीयादीन्विहाय अन्येषांभक्ष्याणांशेषमन्यस्मैनदेयंपानीयादेरपिशेषंपुत्रादिभ्यएवदेवं। पितुःज्येष्ठस्यभ्रातुश्चोच्छिष्टंभोज्यमितिस्म
रणात अन्येषांतेषांतुतस्यनिषेधात गोडास्तुनिरस्यशेषमेतेषांनप्रदेयमितिपठंतितत्परिसंख्यापन्नेरूपेस्यते १०० शंक्षीकीर्यतिनवेति अत्र

तोयएवंप्रदायान्नमतिथिभ्योविशांपते पश्चाद्भुंजीतमेधावीनचाप्यन्यमनानरः ९८ समानमेकपंक्त्यांतुभोज्यमन्नं
नरेश्वर विषंहालाहलंभुंक्तेयोऽप्रदायपस्तुभुंजते ९९ पानीयंपापसंसक्तंनधिसर्पिर्मधून्यपि निरस्यशेषमेतेषांन
प्रदेयंतुकस्यचित १०० भुंजानोमनुजव्याघ्रनैवशंकांसमाचरेत दधिचाप्यनुपानंवैकर्त्तव्यंचभवार्थिना १०१ आ
चम्यचैकहस्तेनपरिस्राव्यंतथोदकं अंगुष्ठंचरणस्याथदक्षिणस्यावसेचयेत २ पाणिंमूर्ध्निसमाधायस्पृष्ट्वाचाग्निं
समाहितः ज्ञातिश्रैष्ठ्यमवाप्नोतिप्रयोगकुशलोनरः ३ अद्भिःप्राणान्समालभ्यनाभिपाणितलेनतथा स्पृशंश्चैव
प्रतिष्ठेतनचाप्यार्द्रेणपाणिना ४ अंगुष्ठस्यांतरालेचब्राह्मंतीर्थमुदाहृतं कनिष्ठिकायाःपश्चात्तुदेवतीर्थमिहोच्यते
५ अंगुष्ठस्यचयन्मध्यंप्रदेशिन्याश्चभारत तेनपित्र्याणिकुर्वीतस्पृष्ट्वापोन्यायतस्तथा ६॥ ७ ॥ ७॥

सख्येवहिभूयसीच यथापुराब्रह्मपुरेसवत्साशतक्रतोर्वज्रधरस्ययज्ञे ३६ भूयश्चयाविष्णुपदेस्थितायाविभावसोश्चापिपथे
स्थितायादेवाश्चसर्वेसहनारदेनप्रकुर्वतेसहेतिनाम ३७ मंत्रेणैतेनाभिवंदेतयोवैविमुच्यतेपापात् नभयंनशोकःसहस्रनेत्र
लोकंकर्मणा लोकानवाप्नोतिपुरंदरस्यगवांफलंचंद्रमसोद्युतिंच ३८ एतंहिमंत्रंत्रिदशाभिजुष्टंपठेतयःपर्वसुगोष्ठमध्ये
नतस्यपापंनभयंनशोकःसहस्रनेत्रस्यचयातिलोकं ३९ भीष्मउ० अथसप्तमहाभागाऋषयोलोकविश्रुताः ॥ ७॥
कृतेनकर्मणा ३

रा०
२७५

वसिष्ठप्रमुखाः सर्वे ब्रह्माणं पद्मसंभवं ४० प्रदक्षिणमभिक्रम्य सर्वे प्रांजलयः स्थिताः उवाच वचनं तेषां वसिष्ठो ब्रह्मवित्त
मः ४१ सर्वप्राणिहितं प्रश्नं ब्रह्मक्षत्रे विशेषतः द्रव्यहीनाः कथं मर्त्या दरिद्राः साधुवर्जिनः ४२ प्राप्नुवंतीह यज्ञस्य फलं के
न च कर्मणा एतच्छ्रुत्वा वचस्तेषां ब्रह्मा वचनमब्रवीत ४३ ब्रह्मोवाच अहो प्रश्नो महाभागा गूढार्थः परमः शुभः सूक्ष्मः श्रे
यांश्च मर्त्यानां भवद्भिः समुदाहृतः ४४ शृणुत तां सर्वमाख्यास्ये निखिलेन तपोधनाः यथा यज्ञफलं मर्त्यो लभते नात्र संश
यः ७५ पौषमासस्य शुक्ले वै यदा युज्येत रोहिणी तेन नक्षत्रयोगेन आकाशं पावनो भवेत ४६ एकवस्त्रः शुचिः स्ना
तः श्रद्दधानः समाहितः सोमस्य रश्मयः पीत्वा महायज्ञफलं लभेत ४७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

रा०
२७५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

५८ अध्यायःस्वलिलस्य १७ करंजसर्वर्वलेदत्ती वल्लीविशेषो ८ ९ १० ॥ ७॥

एतद्वःपरमंगुह्यंकथितंद्विजसत्तमाः यन्मांभवंतःपृच्छंतिसम्यक्तत्वार्थदर्शिनः ५८ इतिदानधर्मेषुदेवरहस्ये विभाव
सुरुवाचसलिलस्याजलिपूर्णामक्षताश्चघृतोत्तराः सोमस्योत्तिष्ठमानस्यतज्जलंचाक्षतां[illegible]श्चतान् १ स्थितोग्य
भिमुखोमर्त्यःपौर्णमास्यांवलिंहरेत् अग्निकार्यंकृतंतेनहुताश्चास्याग्नयस्तृपः २ वनस्पतिंतुयोहन्यादमावास्या
मबुद्धिमान् अपिह्येकेनपत्रेणलिप्यतेब्रह्महत्यया ३ दंतकाष्ठंतुयःखादेदमावास्यामबुद्धिमान् हिंसितश्चंद्रमास्तेन
पितरश्चोद्विजंतिच ४ हव्यंनतस्यदेवाश्चप्रतिगृह्णंतिपर्वसु कुप्यंतिपितरश्चास्यकुलवंशोस्यहीयते ५ श्रीरुवाच
प्रकीर्णंभाजनंपत्रपानभांडमथाशने योषितश्चैवहन्यंतेकश्मलोपहतेगृहे ६ देवताःपितरश्चैवउत्सवेसर्वपर्वणीए
वा निराशाःप्रतिगच्छंतिकश्मलोपहताद्गृहात् ७ अंगिराउवाच यस्तुसंवत्सरंपूर्णंदद्यादीपंकरंजके सुवर्चलामूलहस्तः
प्रजातस्यविवर्द्धते ८ गार्ग्यउवाच आतिथ्यंसततंकुर्याद्दीपं[illegible]प्रतिश्रयेवर्जयानोदिवास्वापंनचमांसानिभक्षये त
९ गोब्राह्मणांनहिंस्याच्चपुष्कराणिचकीर्त्तयेत् एषश्रेष्ठतमोधर्मःसरहस्योमहाफलः १० ॥ ७ ॥ ७॥

५१२

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

११ १२ अपुत्रिकेति छेदः १३ १६ मृतंवहन्निकंसर्पादिनरोपतग्रहेइतिशेषः १७ २० अध्यायः किंचित १२३

दा० २७६ इदंचपरमंगुह्यंसरहस्यंपितृयोधन श्राद्धकल्पेचदैवेचनैत्यिकेपर्वणीषुच १२ रजस्वलाचयानारीश्वित्रिकाऽपुत्रिकाचया
एताभिश्चक्षुषादृष्टंहविर्नाश्नंतिदेवताः १३ पितरश्चनतुष्यंतिवर्षाण्यपस्यत्रयोदश १४ शुक्लवासाः शुचिर्भूत्वाब्राह्म
णान्स्वस्तिवाचयेत कीर्त्तयेद्भारतंचैवतथास्याद्धक्षयंहविः १५ धौम्यउवाच भिन्नभांडंचखट्वांचकुक्कुटंश्वशुनस्तथा
अप्रशस्तानिसर्वाणियश्चवृक्षोगृहेरुहः १६ भिन्नभांडंकलिंप्राहुःखट्वायांतुधनक्षयं कुक्कुटेश्वशुनिवाचैवहविर्नाश्नंति
देवताः वृक्षमूलेध्रुवंसत्वंतस्माद्वृक्षंनरोपयेत १७ जमदग्निरुवाच योयजेदश्वमेधेनवाजपेयशतेनिव अवा
कूशिरावलंबेनसत्रेवास्फीतमाहरेत १८ नचास्यहृदयंशुद्धंनरकंसध्रुवंव्रजेत तुल्यंयज्ञश्चसत्यंचहृदयस्यचशु
द्धता १९ शुद्धेनमनसादत्वासक्तुप्रस्थंद्विजातये ब्रह्मलोकमनुप्राप्तःपर्याप्तंतन्निदर्शनं २० इतिदानधर्मेषुज
मदग्निरहस्यानि वायुरुवाच किंचिद्धर्मंप्रवक्ष्यामिमानुषाणांसुखावहं सरहस्याश्चयेदोषास्तान्शृणुष्वसमा एम० २७६
हिताः १ चतुरोवार्षिकान्मासान्योदत्यातितिलोदकं भोजनंचयथाशक्त्यंब्राह्मणेवेदपारगे २ अग्निकार्यंचकर्त्त
व्यंपरमान्नेनभोजनं दीपकश्चोपहर्त्तव्यःपितृणांसतिलोदकः ३ ३ ॥ ४ ॥ ४ ॥ ४॥

© Dharmartha Trust J&K. Digitized by eGangotri

४ अग्नेरणीरस्य प्रत्यक्षस्य वा वेदिवस्य नेता देशांतर प्राय कोय दिश्य दुंस्यात यदि पोषितः हविषा सोमान्यपपः प्रभृति नाय हाशिषे न३३॥

एतेन विधिना मर्त्यः श्रद्दधानः समाहितः पशुबंधस्य तस्येह फलं प्राप्नोति पुष्कलं ४ इदं चैव परं गुह्यमप्रशस्तं तिबोधतत अग्नि
स्कंदः खलो नेता हविर्भक्षा स्तु पोषितः मन्यते धर्म एवेति स चाधर्मेण लिप्यते ५ अग्न्यपस्तस्य कुर्वंति शूद्रयोनिं स गच्छति पित
रश्च न तच्छंति सह देवैर्विशेषतः ६ प्रायश्चित्तं तु यत्तत्र ब्रुवतस्तन्निबोध मे यत्कृत्वा तु नरः सम्यक् सुखी भवति विज्वरः ७ गवां
मूत्रपुरीषेण पयसा च घृतेन च अग्निकार्यं त्र्यहं कुर्यान्निराहारः समाहितः ८ ततः संवत्सरे पूर्णे प्रतिगृह्णंति देवताः हृष्यंति
स पितरश्चास्य श्राद्धकाल उपस्थिते एष धर्मो धर्मश्च सरहस्यः प्रकीर्तितः मर्त्यानां स्वर्गकामानां प्रेत्य स्वर्गसुखावहः १० ३
ति दानधर्मेषु लोमश उवाच परदारेषु ये सक्ता अकृत्वा दारसंग्रहं निराशाः पितरस्तेषां श्राद्धकाले भवंति वै १ परदा
रतिर्यस्य यश्च वंध्यामुपासते ब्रह्मस्वं हरते यैस्समदोषा भवंति ते २ असंभाष्या भवंत्येते पितॄणां नात्र संशयः देवताः पित
रश्चैषां नाभिनंदंति तद्धविः ३ तस्मात्परस्य वै दारांस्त्यजेद्वंध्यां च योषितं ब्रह्मस्वं हि न हर्तव्यमात्मनो हितमिच्छता ४ अ
पत्यां चापरं गुह्यं रहस्यं धर्मसंहितं श्रद्दधानेन कर्तव्यं गुरूणां वचनं यथा ५ ॥ छ ॥ छ ॥ छ ॥ छ॥

अ ३

दिव्यानीयेन मूः स्पुस्ता हित स्य दोषः ५ प्रायश्चित्तं च स्याधीति शेष ७ १० अध्यायः परदारेषु १ २ ३ ४ ५ ॥ छ ॥ छ ॥

© (c) Dharmartha Trust J&K Digitized By eGangotri

६ महोदधिः जलसमुद्रः ७ १० १५ अध्यायः ततस्त १२२ ॥ छ ॥ छ ॥

मासि १

द्वादश्यां पौर्णमास्यां च मासि घृताक्षतं ब्राह्मणेभ्यः प्रयच्छेत तस्य पुण्यं निबोधत ६ सोमश्च वर्द्धते तेन समुद्रश्च महोदधिः
दा० २७७ अश्वमेधचतुर्भागं फलं सृजति वासवः ७ दानेनैतेन तेजस्वी वीर्यवांश्च भवेन्नरः प्रीतश्च भगवान्सोमः इष्टान्कामान्प्र
यच्छति ८ श्रूयतां चापरो धर्मः सारस्यो महाफलः इमं कलियुगं प्राप्य मनुष्याणां सुखावहः ९ कल्यमुत्थाय यो म
र्त्यः स्नातः शुक्लेन वाससा तिलपात्रं प्रयच्छेत ब्राह्मणेभ्यः समाहितः १० तिलोदकं च यो दद्यात्पितॄणां मधुना सह दी
पकं कृशरं चैव श्रूयतां तस्य यत्फलं ११ तिलपात्रे फलं प्राह भगवान्पाकशासनः गोप्रदाने च यः कुर्याद्भूमिदाने च शा
श्वतं १२ अग्निष्टोमं च यज्ञं यो यजेत बहुदक्षिणं तिलपात्रं सहैतेन समं मन्यन्ति देवताः १३ तिलोदकं सदा श्राद्धे म
न्यन्ते पितरोऽक्षयं दीपे च कृशरे चैव तुष्यन्ते स्य पितामहाः १४ स्वर्गे च पितृलोके च पितृदेवाभिपूजने एवमेतन्मया दृष्ट
मृषिदृष्टं पुरातनं १५ इति दानधर्मेषु लोमशरहस्यानि भीष्म उवाच ततस्त्वृषिगणाः सर्वे पितरश्च सदेवता अरुन्धतीं
तपोवृद्धिमपृच्छन्त समाहिताः अरुन्धत्यु तपोवृद्धिर्मया प्राप्ता भवतां स्मरणेन वै भवतां च प्रसादेन धर्मं वक्ष्यामि शाश्व
व३
तं १६ दान० २७७

प्रयोक्तव्याःधर्मावाच्याः ३ ३ ४ ५ ६ १२ १३ १४ १५ स २

स्तगुह्यांश्चरहस्यांश्चतांछृणुष्वमशेषतः श्रद्दधानेप्रयोक्तव्यायस्यप्रुष्टंतथात्मनः ३ अश्रद्दधानोमानीचब्रह्महागुरुतल्पगः अस्ं
भाष्यास्तिचत्वारोनैषांधर्मंप्रकाशयेत ४ अहन्यहनियोदद्यात्कपिलाद्वादशीःसमाः मासिमासिचसत्रेणयोयजेतसदानरः ५ गवां
शतसहस्रंचयोदद्याज्ज्येष्ठपुष्करे नतद्धर्मफलंतुल्यमतिथिर्यस्यतुष्यति ६ श्रूयतांचापरोधर्मोमनुष्याणांसुखावहः श्रद्दधा
नेनकर्तव्यःसरहस्योमहाफलः ७ कल्यमुत्थायगोमध्येगृह्यदर्भान्सहोदकान निषिंचेतगवांश्रृंगेमस्तकेनचतज्जलं ८
ती प्रतीक्षत्निराहारस्तस्यधर्मफलंश्रृणु श्रूयंतेयानितीर्थानित्रिषुलोकेषुकानिचित ९ सिद्धचारणजुष्टानिसेवितानिमहर्षिभिः
अभिषेकःसमस्तेषांगवांश्रृंगोदकस्यच १० साधुसाध्वितिचोदिष्टंदैवतैःपितृभिस्तथा भूतैश्चैवसुसंहृष्टैःपूजितासाप्य
हंधती ११ पितामहउवाच अहोधर्मोमहाभागेसरहस्यउदाहृतः ददानितेधन्येनतपस्तेवर्द्धतांसदा १२ यमउ
वाच रमणीयाकथादिव्यायुष्मत्तोयामयाश्रुता श्रूयतांचित्रगुप्तस्यभाषितंममचप्रियं १३ रहस्यंधर्मसंयुक्तंशक्यं
श्रोतुंमहर्षिभिः श्रद्दधानेनमर्त्येनआत्मनोहितमिच्छता १४ नहिपुण्यंतथापापंकृतंकिंचिद्विनश्यति पर्वकाले
चयत्किंचिदादित्यंचाधिगच्छति १५ सं २

© Dharmartha Trust J&K. Digitized By eGangotri

प्रतिजानाति अर्थपतिरुपयुज्यते भुज्यते पुण्यपापकर्ता १९ प्रह्लादोलपं ऽदर्शनं यस्मात्तत्प्रलयं मरणं २० २७ ॥ छ॥ छ॥ छ॥ छ॥

तं २

दा० २७८ प्रेतलोकं गते मर्त्ये तत्र तत्सर्वं विभावसुः प्रतिजानाति पुण्यात्मा तच्च तत्रोपयुज्यते १६ किंचिद्धर्मं प्रवक्ष्यामि चित्रगुप्त मतं शृणु
अंपानीयं चैव दीपं च दातव्यं सततं तथा १७ उपानहौ च छत्रं कपिलां च यथातथं पुष्करे कपिलां देया ब्राह्मणो वेदपारगे १८
अग्निहोत्रं च यत्नेन सर्वशः प्रतिपालयेत् अयं चैवापरो धर्मश्चित्रगुप्तेन भाषितः १९ फलमस्य पृथक्त्वेन श्रोतुमर्हति
सत्तमाः प्रलयं सर्वभूतेस्ते गतं कालपर्ययात २० तत्र दुर्गमनुप्राप्ताः क्षुत्तृष्णापरिपीडिताः दह्यमाना विपच्यंते न तत्र
अस्ति पलायनं २१ अंधकारं तमो घोरं प्रविशंति अबुद्धयः तत्र धर्मं प्रवक्ष्यामि येन दुर्गाणि संतरेत् २२ अल्पव्ययं महार्थं
च प्रेत्य चैव सुखोदयं पानीयस्य गुणा दिव्याः प्रेत्य लोके विशेषतः २३ तत्र पुण्योदका नाम नदी तेषां विधीयते अक्षय्यं
सलिलं तत्र शीतलं ह्यमृतोपमं २४ स तत्र तोयं पिबति पानीयं यः प्रयच्छति प्रदीपस्य प्रदाने तु शृणु तां गुणविस्तरः २५
तमोऽंधकारं नियतं दीपदो न प्रपश्यति प्रभां चास्य प्रयच्छंति सोमभास्करपावकाः देवताश्चास्य मन्यंते विमलाः सर्वतो
दिशः २६ द्योतते च यथादित्यः प्रेतलोकगतो नरः तस्माद्दीपः प्रदातव्यः पानीयं च विशेषतः २७ २७ ॥ छ॥ दाम० २७८

सं ५

कपिलां ये प्रयच्छंति ब्राह्मणे वेदपारगे पुष्करे च विशेषेण अनंतं तस्य तत्फलं २८ गोशतं सवृषं तेन दत्तं भवति शाश्वतं पापं कर्म
च यत्किंचिद् ब्रह्महत्यासमं भवेत् शोधयेत्कपिला ह्येषा प्रदत्तं गोशतं यथा ३० तस्मात्तु कपिला देया कौमुद्यां ज्येष्ठपुष्करे न तेषां विषमं किं
चिन्न दुःखं न च कंटकाः ३१ उपानहौ च यो दद्यात्पात्रभूते द्विजोत्तमे छत्रदाने सुखी छायां लभते परलोकगः ३२ न हि दत्तस्य
दानस्य नाशोस्तीह कदाचन चित्रगुप्तमतं श्रुत्वा हृष्टरोमा विभावसुः ३३ उवाच देवताः सर्वाः पितॄंश्चैव महाद्युतिः श्रुतं च चि
त्रगुप्तस्य धर्मगुह्यं महात्मनः ३४ श्रद्दधानाश्च ये मर्त्या ब्राह्मणेषु महात्मसु दानमेतत्प्रयच्छंति न तेषां विद्यते भयं ३५ क
र्मदोषास्त्विमे पंच येषां नास्तीह निष्कृतिः असंभाष्या अनाचारा वर्जनीया नराधमाः ३६ ब्रह्मघ्नश्चैव गोघ्नश्च परदाररतश्च यः अ २५
श्रद्दधानश्च नरः स्त्रियं यश्चोपजीवति ३७ प्रेतलोकगता ह्येते नरके पापकर्मिणः पच्यंते वै यथा मीनाः पूयशोणितभोजनाः ३८
असंभाष्याः पितॄणां च देवानां चैव पंच ते स्नातकानां च विप्राणां ये चान्ये ते तपोधनाः ३९ इति दानधर्मेषु चित्रगुप्तरहस्यानि म३
भीष्म उवाच ततः सर्वे महाभागा देवाश्च पितरश्च ह अथ यक्षं महाभागाः प्रमथ्या वाक्यमब्रुवन् १ भवंतो वै महा
भागा अपरोक्षनिशाचराः उच्छिष्टानशुचीन्क्षुद्रान्कथं हिंसथ मानवान् २ के च स्मृताः प्रतीघाता येन मर्त्यान्न हिंसथ
रक्षोघ्नानि च कानि स्युर्येन गृहेषु प्रणोष्यथ ३

© (c) Dharmartha Trust J&K. Digitized By eGangotri

अधरोत्तरो यातेऽधरः उत्तरः शेषो पत्रशेषस्थाव मानेवाहृतेसति ४ आमिषं मांसं शिरसि दधानः पादतः शय्यायां यादृस्थाने शिरः कृत्वा पः संविशेत तर

दा० २७९

त्व २

श्रोतुमिच्छामि युष्माकं सर्वमेतन्निशाचराः ४ प्रमथा ऊचुः मैथुनेन सदोच्छिष्टाः कृते चैवाधरोत्तरे मोहान्मांसानि खादेत वृक्षमू
लेच यः स्वपेत ५ आमिषं शीर्षतो यस्य यादृतो यश्च संविशेत ततउच्छिष्टकाः सर्वे बहुच्छिद्राश्च मानवाः ६ उदके चाप्यमेध्यानि श्ले
ष्माणं च प्रमुंचति एते भक्ष्याश्च वध्याश्च मानुषा नात्र संशयः ७ एवंशीलसमाचारान्धर्षयामो हि मानवान् श्रूयतां च प्रती
घातायैर्न शक्नुम हिंसितुं ८ गोरोचनासमालंभो वचाहस्तश्च यो भवेत् घृताक्षतं च यो दद्यान्मस्तके तत्परायणः ९ ये च मांसं
न खादंति तान्न शक्नुम हिंसितुं यस्य चाग्निर्गृहे नित्यं दिवारात्रौ च दीप्यते १० तरक्षोश्चर्म दंष्ट्राश्च तथैव गिरिकच्छपः आज्यधू
मो विडालश्च छागः कृष्णोऽथ पिंगलः ११ येषामेतानि तिष्ठंति गृहेषु गृहमेधिनां तान्यधृष्याण्यगाराणि पिशिताशैः सुदारुणैः
१२ लोकानस्मद्विधा ये वै विचरंति यथासुखाः तस्मादेतानि गेहेषु रक्षोघ्नानि विशांपते १३ एतद्वः कथितं सर्वं यत्र वः संशयो महा
न् १४ इति दानधर्मेषु प्रमथानां रहस्यानि भीष्म उवाच ततः पद्मप्रतीकाशः पद्मोद्भूतः पितामहः उवाच वचनं देवान्वासवं च श
चीपतिं १ अयं महाबलो नागो रसातलचरो बली तेजस्वी रेणुको नाम महासत्त्वपराक्रमः २ ॥ ७ ॥ ७ ॥ ७

विच ३

पम० २७९

श्लो व्याघ्रस्य गिरिकच्छपः पर्वतदरीशायी स्थूलकूर्मः ११ १२ १३ १४ अध्यायः ततः पद्म १ नागो गजः २ ॥ ७ ॥ ७ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

भवद्भिः समनुज्ञातो रेणुकस्तान्महागजान् धर्मगुह्यानि सर्वाणि गत्वा पृच्छतु तत्र वै ४ पितामहवचः श्रुत्वा ते देवा रेणुकं तदा प्रेषया
मासुर्व्यग्रा यत्र ते धरणीधराः ५ रेणुक उवाच अनुज्ञातोस्मि देवैश्च पितृभिश्च महाबलाः धर्मगुह्यानि पृच्छामि कं श्रोतुमिच्छामि तत्व
तः ६ कथयध्वं महाभागा यद्वृत्तत्वं मनीषितं ७ दिग्गजा ऊचुः कार्त्तिके मासि चाश्लेषा बहुलस्याष्टमी शिवा तेन नक्षत्रयोगे
न यो दद्याति----गुडोदनं ८ इमं मंत्रं जपंश्चाद्वै पताक्षणेयकोपनः बलदेवप्रमतयो नागा बलवन्तराः ९ अनंताद्यस्तथा नि
त्यं भोगिनः सुमहाबलाः तेषां कुलोद्भवा ये च महाभूता भुजंगमाः १० ते मे बलिं प्रयच्छंतु बलतेजोभिवृद्धये पद्मनाभपरः श्री
मानुज्ज्वलहारवसुंधरः ११ तद्बलं तस्य देवस्य धाममुद्धरतस्तथा एवमुक्त्वा बलिं तत्र वल्मीके तु निवेदयेत १२ गजेंद्रकुसुमाकीर्णं
नीलवस्त्रानुलेपनं निर्वपेत्तं तु वल्मीके ह्यस्तं याते दिवाकरे १३ एवं तु घास्तनः सर्वे अधस्ताद्भूरपीडिताः श्रमंतं नावसु
ध्या मोधारयंतो वसुधरां १४ एवं मन्यामहे सर्वे भारार्त्ता निरये द्विजाः ब्राह्मणाः क्षत्रिया वैश्याः शूद्रे वाप्यथ योषितः १५ ए
तत्संवत्सरं कृत्वा दानं बहुफलं लभेत वल्मीके बलिमादाय तन्नो बहुफलं मतं १६ ये च नागा महावीर्या स्त्रिषु लोकेषु कृत्स्न
शः कृतातिथ्या भवेयुस्ते शतं वर्षाणि तत्वतः १७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

१८ अध्यायः साद् १ मम २ केभोज्या ३ इति स्वधार्थोऽध्यायः १२ ॥ छ ॥ छ ॥ छ ॥

दा० २८० दिग्गजानां तु तच्छ्रुत्वा देवताः पितरस्तथा ऋषयश्च महाभागाः पूजयंति स्म रेणुकं १८ इति दानधर्मेषु दिग्गजानां रहस्यानि
महेश्वर उवाच सारमुद्धृत्य युष्माभिः साधु धर्मं उदाहृतः धर्मगुह्यमिदं मत्तः शृणुध्वं सर्व एव च १ येषां धर्माश्रिता बुद्धिः श्र
द्दधानाः श्रद्दधानाश्च ये नराः तेषां स्यादुपदेष्टव्यः सरहस्यो महाफलः २ निरुद्विग्नस्त्र्यहो दद्यान्मासमेकं गवाह्निकं एकभ
क्तं तथाश्नीयाच्छ्रूयतां तस्य यत्फलं ३ इमा गावो महाभागाः पवित्रं परमं स्मृताः त्रीन्लोकान्धारयंति स्म सदेवासुरमानुषा
न् ४ तासु चैव महापुण्यं शुश्रूषा च महाफलं अहन्यहनि धर्मेण युज्यते वै गवाह्निके ५ मया ह्येता ह्यनुज्ञाताः पूर्वमासन्कृते
युगे ततोऽहमनुनीतो वै ब्रह्मणा पद्मयोनिना ६ तस्माद्व्रजस्थानगतस्तिष्ठत्युपरि मे वृषः रमेऽहं सह गोभिश्च तस्मात्पूज्याः स
दैवताः ७ महाप्रभावा वरदा वरं दद्युरुपासिताः अवंदिताश्च हिंसेयुस्तस्मात्पूज्यतमाश्च ताः ता गावोऽस्यानुमन्यंते सर्वक
र्म तच्छृणुध्वं समाहितास्तस्य यत्फलं तस्य तत्र च तु भागीयोर्द्धति गवाह्निकं ८ इति दानधर्मेषु महादेवरहस्यानि स्कंद उवाच
पयाप्यनुमतो धर्मस्तं शृणुध्वं समाहिताः नीलषंडस्य शृंगाभ्यां गृहीत्वा मृत्तिकां तु यः १ अभिषेकं त्र्यहं कुर्यात्तस्य धर्मं दा० २८०
निबोधत शोधयेदशुभं सर्वमाधिपत्यं परत्र च २

© Dharmartha Trust J&K. Digitized By eGangotri

यावच्चजायतेमर्त्यस्तावच्छूरोभविष्यति इदंवाप्यपरंगुह्यंसरहस्यंनिबोधत ३ अगस्त्योदुंवरंपात्रंपयकान्नंमधुनासह सोमस्योत्ति ष
मानस्यपौर्णमा... स्यांवलिंहरेत ४ तस्यधर्मफलंनित्यमत्रदैतिबोधत साध्यारुद्रास्तथादित्याविश्वेदेवास्तथाश्विनौ ५ मरु
तोवसवश्चैवप्रतिगृह्णन्तितंवलिं सोमश्चवर्धतेतेनसमुद्रश्चमहोदधिः ६ एषधर्मोमयोद्दिष्टःसरहस्यःसखावरुः विष्णुरुवा प:
च धर्मगुह्यानिसर्वाणिदेवतानांमहात्मनां ऋषीणांचैवगुह्यानियःपठेदाह्निकंसदा ८ श्रणुयाद्वानसूयश्चद्धधानःसमाहि
तः नास्यविघ्नःप्रभवतिभयंचास्यनविद्यते ९ येवधर्माःशुभाःपुण्याःसरहस्याउदाहृताः तेषांधर्मफलंतस्ययःपठेतजितेंद्रियः १०
नास्यपापंप्रभवतिनचपापेनलिप्यते पठेद्वाश्रावयित्वापिश्रुत्वावालभतेफलं ११ भुंजतेपितरोदेवाहव्यंकव्यमथाक्षयं श्रा कै५
वयंश्चापिविप्रेंद्रान्पर्वसुप्रयतोनरः १२ ऋषीणांदेवतानांचपितॄणांचैवनित्यदा भवत्यभिमतःश्रीमान्धर्मेषुप्रयतःस
दा १३ कृत्वापिपापकंकर्ममहापातकवर्जितं रहस्यधर्मंश्रुत्वेदंसर्वपापैःप्रमुच्यते १४ भीष्मउवाच एतद्धर्मरह
स्यंवैदेवतानांनराधिप व्यासोद्दिष्टंमयाप्रोक्तंसर्वदेवनमस्कृतं १५ पृथिवीरत्नसंपूर्णाज्ञानंचेदमनुत्तमम् इदमेवततः
श्राव्यमितिमन्येतधर्मवित १६

अध्यायः को भोज्याः भोज्यान्नाः ३ वैश्या भोज्याः भोज्यान्नीयाः ६ न केवलं शूद्रान्नमेव वर्ज्यं किं तु शूद्रस्य कर्मनिष्ठायां सेवायां वर्तमानो विकर्मस्थो विशि

दा०
२८१

नाश्रद्दधानस्यान्नमस्ति कापथेन न धर्माय न निर्गुणाय न देत्तु दुष्टाय गुरुद्विषे नात्मभूतापनिवेधमेजत १७ इति दानध
र्मेषु सर्वरहस्यं निसमाप्तानि युधिष्ठिर उवाच के भोज्या ब्राह्मणस्येह के भोज्याः क्षत्रियस्येह तथा वैश्यस्य के भोज्याः के च शू
द्रस्य भारत १ भीष्म उवाच ब्राह्मणा ब्राह्मणस्येह भोज्या ये चैव क्षत्रियाः वैश्याश्चापि तथा भोज्याः शूद्राश्च परिवर्जिता
: २ ब्राह्मणाः क्षत्रिया वैश्या भोज्या वै क्षत्रियस्य ह वर्जनीयास्तु वै शूद्राः सर्वभक्षा विकर्मिणः ३ वैश्यास्तु भोज्या विप्रा
क्षत्रियपालनं प णां क्षत्रियवच नित्याग्नयो विविक्ताश्च चातुर्मास्यरताश्च ये ४ शूद्राणामथ यो भुंक्ते स भुंक्ते पृथिवीमलं मलं नृणां स
पिबति मैभुंक्ते जनस्य च ५ शूद्राणां यस्तथा भुंक्ते स भुंक्ते पृथिवीमलं पृथिवी मलमश्नंति ये द्विजाः शूद्रभो
८५ जिनः ६ शूद्रस्य कर्मनिष्ठायां विकर्मस्थोपि पच्यते ब्राह्मणः क्षत्रियो वैश्यो विकर्मस्थश्च पच्यते ७ स्वाध्यायनिर
ता विप्रास्तथा स्वस्त्ययनेन नृणां रक्षणे क्षत्रियं प्राहुर्वैश्यं पुष्ट्यर्थमेव च ८ करोति कर्म यद्वैश्यस्तद्गत्वा ह्युपजीवति
कृषिगोरक्षवाणिज्यमकुत्सा वैश्यकर्मणि ९ शूद्रकर्म तु यः कुर्यादवहाय स्वकर्म च स विज्ञेयो यथा शूद्रो न च भोज्य
:कदाचन १० चिकित्सकः कांडपृष्ठः पुराध्यक्षः पुरोहितः सांवत्सरो वृथाध्यायी सर्वे ते शूद्रसंमिताः ११ ॥ ६ ॥ एम०
२८१

एकसंध्याववंदनादिष्वक्तो पि पच्यते नरके इति शेषः १० कांडपृष्ठः अधमः ११ ॥ ६ ॥ ६ ॥ ६ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

१५ पिशुनंतत्संवंधि १७ नारीरंडतितस्य २१ अध्यायः उक्ताः १ २ ३ ३ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

शूद्रकर्मतथैतेषुयोभुंक्तेनिरपत्रपः अभोज्यभोजनंभुक्त्वाभयंप्राप्नोतिदारुणं १२ कुलंवीर्यंचतेजश्चतिर्यग्योनित्वमेवच सप्र
यातिपथाश्वोवैनिर्ह्रियोधर्मवर्जितः १३ भुंक्तेचिकित्सिकस्यान्नंतदन्नंचपुरीषवत् पुंश्चल्यन्नंचसूत्रंस्यात्कारुकान्नंच शो
णितं १४ विप्रोपजीविनोन्नंतुयोभुंक्तेसाधुसंमतः तदप्यन्नंयथाशोद्रंतत्साधुःपरिवर्जयेत् १५ वचनीयस्ययोभुंक्तेतमाहुः
शोणितंह्रदं पिशुनंभोजनंभुंक्तेब्रह्महत्यासमंविदुः १६ असत्कृतमविज्ञातंनभोक्तव्यंकदाचन व्याधिंकुलक्षयंचैवाद्विःप्र
प्नोप्रोतिब्राह्मणः १७ नगरीरक्षिणोभुक्त्वाश्वचर्मप्रवणोभवेत् गोघ्नेब्रह्महणेचैवस्तएवेगुरुतल्पगे भुक्त्वान्नंजायतेविप्रोरक्ष
सांकुलवर्द्धनः १९ न्यासापहारिणोभुक्त्वाकृतघ्नेक्लीववर्तिनी जायतेशवरावासेमध्यदेशवहिष्कृतं २० अभोज्याश्चैवभोज्या
श्चमयाप्रोक्तायथाविधि किमन्यदद्यकौन्तेयमत्तस्त्वंश्रोतुमिच्छसि २१ इतिदानधर्मेष्वभोज्यान्नं युधिष्ठिरउवाच उक्तास्तुभवता
भोज्यास्तथाभोज्याश्चसर्वशः अत्रमेप्रश्नसंदेहस्तन्मेवदपितामह १ ब्राह्मणानांविशेषेणहव्यकव्यप्रतिग्रहे नानाविधे
षुभोज्येषुप्रायश्चित्तानिशंसमे २ भीष्मउवाच हंतवक्ष्यामितेराजन्ब्राह्मणानांमहात्मनां प्रतिग्रहेषुभोज्येचमुच्यतेयेन
पाप्मनां ३ ३ ॥ भोज्या३

सावित्रीसमिदाहुतिरितिसर्वत्रसंवध्यते ४ आदित्योदयनंततस्पर्यंतंस्थित्वा ५ विवृतंलोकप्रत्यक्षंधारयन् १० गृहस्तकयोःकारागारस्था

सू०
२८२

घृतप्रतिग्रहेचैवसावित्रीसमिदाहुतिः तिलप्रतिग्रहेचैवसममेतद्युधिष्ठिर ४ मांसप्रतिग्रहेचैवमधुनोलवणस्यच आदित्योदय
नंस्थित्वाप्तोभवतिब्राह्मणः ५ कांचनंप्रतिगृह्यापिजपमानोगुरुश्रुतिं कृष्णायसंचत्रिवृतंधारयन्मुच्यतेद्विजः ६ एवंप्रति
गृहीतेयधनेवस्त्रेतथास्त्रियां एवमेवनरश्रेष्ठसुवर्णस्यप्रतिग्रहे ७ अन्नप्रतिग्रहेचैवपायसेक्षुरसेतथा इक्षुतैलपवि
त्राणांत्रिसंध्येप्सुनिमज्जनं ८ व्रीहौपुष्पेफलेचैवजलेपिष्टमयेतथा यावकेदधिदुग्धेचसावित्रीशतशोविना ९ उपानहोच
वस्त्रंचप्रतिगृह्योर्ध्वदैहिकं जपेच्छतंसमायुक्तस्तेनमुच्येतपाप्मना १० क्षेत्रप्रतिग्रहेसैसतकयोस्तथा त्रीणिरात्राणिउपो
षित्वातेनपाप्माविमुच्यते ११ कृष्णपक्षेतुयश्राद्धंपितॄणामश्नुतेद्विजः अन्नमेतदहोरात्रात्पूतोभवतिब्राह्मणः १२ न
चसंध्यामुपासीतनचजप्यंप्रवर्तयेत नसंकिरेत्तदन्नंचतथापूयेतब्राह्मणः १३ इत्यर्थमपराह्णेतुपितॄणांश्राद्धमुच्यते य
थोक्तानांयदश्नीयुर्ब्राह्मणाःपूर्वकीर्तिताः १४ देवगृह४

शौचवतोःनवसंध्यामुपासीतेत्यत्रअस्नात्वेतिशेषःतसंकिरेतपुनर्भोजनंनकुर्यादित्यर्थः १३ अश्नीयुरित्यर्थमितिसंवंधं अपराह्णेदृष्टोधात्र
म्यगत्रमत्स्यंतात्पर्थःकीर्तिताःनिमंत्रिताः १४ एम०
२८२

© (c) Dharmartha Trust J&K. Digitized By eGangotri

हविःश्रुतं १६ दशरात्रेणदशरात्रावधिमतस्याश्नतः एवमेवप्रायश्चित्तानीत्यर्थः सावित्री गायत्रींरेवतीमितिरेवतं साम इषिं पवित्रे षिं कूष्मांडप देवा

मृतकस्यतृतीयाह्ने ब्राह्मणोयोन्नमश्नुते सत्रिवेलंसमुन्मज्यद्वादशाहेन शुध्यति १५ द्वादशाहेव्यतीतेतुकृतंशौचोविशेषतः ब्रा
ह्मणेभ्योहविर्दत्वामुच्यतेतेनपाप्मना १६ मृतस्यदशरात्रेणप्रायश्चित्तानिदापयेत सावित्रींरेवतींमिष्टिं कूष्माण्डमघमर्षणं --
१७ मृतकस्यत्रिरात्रेयःसमुद्दिष्टेसमश्नुते सस्त्रिषवणंस्नात्वापूतोभवतिब्राह्मणः १८ सिद्धिमाप्नोतिविपुलामापदैवे
वनाप्नुयात १९ यस्तुशूद्रैःसहाश्नीयाद्ब्राह्मणोप्येकभोजने सशौचंविधिवत्तस्यशौचमात्रंविधीयते २० यस्तुवैश्यैःस
हाश्नीयाद्ब्राह्मणोप्येकभोजने आप्लुतःसहवासोभिस्तेनमुच्येतपाप्मना ३१ शूद्रस्यतुकुलंहन्तिवैश्यस्यपशुबांधवं क्षत्रि
यस्यश्रियंहन्तिब्राह्मणस्यसुवर्चसं २२

देवहेळनमित्यनुवाकपंचकंअघमर्षणंजलेमग्नस्यदशप्रणवसंयुक्तंगायत्र्याःकृतंचेतितचस्पचात्रिर्जप्तःप्रायश्चित्तानीतिवरुवचनात्सर्वेषांस
मुच्चयः १९ अश्नो चेप्रायश्चित्ताभावएवः २२

सर्वेत्रिरात्रिंदीक्षित्वामुच्यतेतेनकर्मणा
क्षत्रियैःसहयोश्नीयाद्ब्राह्मणश्चैकभोजने ॥१

८

© Dharmartha Trust J&K. Digitized by eGangotri

विरजाद्दीराविर्हिरिद्रेतिविश्वः ३४ अध्यायः दानंतपसोर्मध्येपथिव्यां किंश्रेयमितिपृच्छतिदानेनेतिसार्द्धंमवर्त्तते स्वर्गेइतिशेषः १ तपोर्दानमेवप्रशंस

२४

दा० २८३ प्रायश्चित्तिंचशांतिंचकुर्यात्तेनमुच्यते सावित्रीरेवतीमिष्टिंकूष्मांडमघमर्षणं २३ अयोच्छिष्टमथान्योन्यंसंप्राश्नीन्नात्र
संशयः रोचनाविरजारात्रिर्मंगलालंभनानिच २४ इतिदानधर्मेषुप्रायश्चित्तविधिः युधिष्ठिरउवाच दानेनवर्त्ततेत्याहतं
पसाचैवभारत तदेतन्मेमनोदुःखंव्यपोहत्वंपितामह केचित्पृथिव्यामेतन्मेभवाञ्शंसितुमर्हति १ भीष्मउवाच शृणुयैर्द
मैनिरतैस्तपसाभावितात्मभिः लोकाह्यसंशयंप्राप्तादानपुण्यरतैर्नृपैः २ सत्कृत्त्वतथात्रेयःशिष्येभ्योब्रह्मनिर्गुणं उपदि
श्यतदाराजन्गतोलोकाननुत्तमान् ३ शिबिरौशीनरःप्राणान्प्रियस्यतनयस्यच ब्राह्मणार्थमुपाकृत्यनाकपृष्ठमितोगतः ४
प्रतर्द्दनःकाशिपतिःप्रदायतनयंस्वकं ब्राह्मणायातुलांकीर्तिमिहचामुत्रचाश्नुते ५ रंतिदेवश्चसांकृत्योवसिष्ठायमहात्मने
अर्घ्यंप्रदायविधिवल्लेभेलोकाननुत्तमान् ६ दिव्यंशतशलाकंचयज्ञार्थंकांचनंशुभं छत्रंदेवावृधोदत्वाब्राह्मणायास्थितोदि
वं ७ ए्र० २८३

तिष्ठपिवत्यादिना २ श्रीलक्ष्मायनमः ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ म छ ॥

सावित्रः कर्णौः ११ मनसो मनःसंकल्पादप्यधिकान् १२ देवराट् भूदेवराट् वसिष्ठः १४ न्यासं दानरूपेणास्थापने १६ अनुज्ञाप्य दत्वा १८

भगवानंबरीषश्च ब्राह्मणायामितौजसे प्रदाय सकलं राष्ट्रं सुरलोकमवाप्तवान् ८ सावित्रः कुंडले दिव्ये यानं च जन
मेजयः ब्राह्मणाय च गां दत्वा गतो लोकाननुत्तमान् ९ वृषादर्भिश्च राजर्षी रत्नानि विविधानि च रम्यांश्चावसथान्दत्वा
द्विजेभ्यो दिवमागमत् १० निमी राष्ट्रं च वैदर्भिः कन्यां दत्वा महात्मने अगस्त्याय गतः स्वर्गं सपुत्रपशुबांधवः ११ जाम
दग्न्यश्च विप्राय भूमिं दत्वा महायशाः रामोक्षयांस्तथा लोकान् जगाम मनसोधिकान् १२ अवर्षति च पर्जन्ये सर्वभूतानि
देवराट् वसिष्ठो जीवयामास येन जातोक्षयां गतिं १३ रामो दाशरथिश्चैव हुत्वा यज्ञेषु वै वसु स गतो ह्यक्षयान् लोकान् यस्य
लोके महद्यशः १४ कक्षसेनश्च राजर्षिर्वसिष्ठाय महात्मने न्यासं यथावत्संन्यस्य जगाम सुमहायशाः १५ करंधम
स्य पौत्रस्तु मरुत्तोऽविक्षितः सुतः कन्यामंगिरसे दत्वा दिवमाशु जगाम सः १६ ब्रह्मदत्तश्च पांचाल्यो राजधर्मभृतां वरः
निधिं शंखमनुज्ञाप्य जगाम परमां गतिं १७ राजा मित्रसहश्चैव वसिष्ठाय महात्मने मदयंतीं प्रियां भार्यां दत्वा च त्रिदिवं
गतः १८

© Dharmartha Trust J&K. Digitized by eGangotri

दंडचोरयोग्यंहस्तछेदरूपं १९ २० २१ २२ ३० ३१ ३२ ॥ छ ॥ छ ॥

दा० २८४ मनोःपुत्रस्त्वसुद्युम्नो लिखितायमहात्मने दंडमुधत्यधर्मेणगतोलोकाननुत्तमान १९ सहस्रचित्तोराजर्षिःप्राणानिष्टान्महाय
शः ब्राह्मणार्थेपरित्यज्यगतोलोकाननुत्तमान २० सर्वकामैश्चसंपूर्णं दत्वावेश्महिरण्मयं मौद्गल्यायगतःस्वर्गंशतद्यु
म्नोमहीपतिः २१ भक्ष्यभोज्यस्यचकृतान्राशयःपर्वतोपमान शांडिल्यायपुरादत्वासुमन्युर्दिवमास्थितः २२ नाम्नाचद्यु
द्युतिमान्नामशाल्वराजोमहाद्युतिः दत्वाराज्यमृचीकायगतोलोकाननुत्तमान २३ मदिराश्वश्चराजर्षिर्दत्वाकन्यांसु
मध्यमां हिरण्यहस्तायगतोलोकानदेवैरधिष्ठितान २४ लोमपादश्चराजर्षिःशांतांदत्वासुतांप्रभुः ऋष्यशृंगायवि
पुलैःसर्वैःकामैरयुज्यत २५ कौत्सायदत्वाकन्यांतुहंसानामयशस्विनी गतोक्षयानतोलोकान्राजर्षिश्चभगीरथः २६
दत्वाशतसहस्रंतुगवांराजाभगीरथः सवत्सानांकोहलोकाननुत्तमान २७ एतेचान्येचबहवोदानेनतपसाचह युधि
ष्ठिरगताःस्वर्गंनिवर्त्तंतेपुनःपुनः २८ तेषांप्रतिष्ठिताकीर्तिर्यावत्स्थास्यतिमेदिनी गृहस्थैर्दानतपसायैर्लोकावैवि
निर्जिताः २९ शिष्टानांचरितंह्येतत्कीर्तितंतेयुधिष्ठिर दानयज्ञप्रजासर्गैरेतेहिदिवमास्थिताः ३० दत्वातुसततं
तेस्तुकौरवाणांधुरंधर दानयज्ञक्रियायुक्तावुद्धिर्धर्मोपचायिनी ३१ ॥ छ ॥ छ ॥ छ ॥ एम० २८४

सायगतोऽ

© Dharmartha Trust J&K. Digitized by eGangotri

३२ अध्यायः श्रुतं ५ धर्माद्यानंआचक्षे इहेति ६ अर्थादित्यस्य लक्षणमाह ददातीति ७ एवमग्रेपि ११ अध्यायः ॥ ६७॥ ६७ ॥

तत्रतेनृपशार्दूलसंदेहोवैभविष्यति एकप्रभातेहिवसुर्मि संध्यातेसमुपस्थिता ३२ इतिदानधर्मेषुफलिकोनाम युधि
ष्ठिरउ० श्रुतंमेभवतस्तातसत्यव्रतपराक्रम दानधर्मेणमहतायेप्राप्ताःस्त्रिदिवंनृपाः १ इमांस्तुश्रोतुमिच्छामिधर्मान्धर्म
भृतांवर दानंकतिविधंदेयंकिंतस्यचफलंलभेत् २ कथंकेभ्यश्चधर्म्यंचदानंदातव्यमिष्यते कैःकारणैःकतिविधंश्रो
तुमिच्छामितत्वतः ३ भीष्मउवाच शृणुतत्वेनकौन्तेयदानंप्रतिममानघ यथादानंप्रदातव्यंसर्ववर्णेषुभारत ४ ध
र्मादर्थाद्भयात्कामात्कारुण्यादितिभारत दानंपंचविधंज्ञेयंकारणैर्यैर्निबोधतं ५ इहकीर्तिमवाप्नोतिप्रेत्यचानुत्तमं
सुखं इतिदानंप्रदातव्यंब्राह्मणेभ्योनसूयता ६ ददातिवादास्यतिवामह्यंदत्तमनेनवा इत्यर्थिभ्योनिशम्यैवंसर्वंदा
तव्यमर्थिने ७ नास्याहंनमदीयोयंपापंकुर्याद्विमानितः इतिदद्याद्भयादेवदृढंमूढायपंडितः ८ प्रियोमेयंप्रियो
स्याहमितिसंप्रेक्ष्यबुद्धिमान वयस्यायैवमक्लिष्टंदानंदद्यादतन्द्रितः ९ दीनश्चयाचतेचायमल्पेनापिहितुष्यति
इतिदद्याद्दरिद्रायकारुण्यादितिसर्वथा १० इतिपंचविधंदानंपुण्यकीर्तिविवर्द्धनं यथाशक्त्याप्रदातव्यमेवमाह
प्रजापतिः ११ इतिदानधर्मेषुदानप्रभेदोनाम

श्रीर

© Dharmartha Trust J&K Digitized By eGangotri

पितामहेत्यध्यायद्वयंसमर्थितस्यतात्पर्यं एकएवप्रभुः पर्वतस्यदारुकउत्थापकश्चस एवैवैसम्बैसम्बिस्मुरिस्मुरित्यधिगतः पूर्वोध्यायेमाहेश्वरैर्महे

दा० २८५

युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद आगमैर्बहुभिःस्फीतोभवान्नःप्रवरेकुले १ त्वत्तोधर्मार्थसंयुक्तमायत्यां
चसुखोदयं आश्चर्यभूतंलोकस्यश्रोतुमिच्छाम्यरिंदम २ अयंचकालःसंप्राप्तोदुर्लभोज्ञातिबांधवैः शास्ताचनहिनःकश्चित्त्वा
मृतेपुरुषर्षभ ३ यदितेहमनुग्राह्योभ्रातृभिःसहितोनघ वक्तुमर्हसिनःप्रश्नंयत्त्वांपृच्छामिपार्थिव ४ अयंनारायणःश्रीमान्स
र्वपार्थिवसंमतः भवंतंबहुमानेनप्रश्रयेणचसेवते ५ अस्यचैवसमक्षंत्वंपार्थिवानांचसर्वशः भ्रातॄणांचप्रियार्थंमेस्नेहाद्भा
षितुमर्हसि ६ वैशं तस्यतद्वचनंश्रुत्वास्नेहादागतसंभ्रमः भीष्मोभागीरथीपुत्रइदंवचनमब्रवीत ८ भीष्मउवाच अहंतेक
थयिष्यामिकथांमनोहरां अस्यविष्णोःपुराराजन्प्रभावोयोमयाश्रुतः ९ यश्चगोवृषभांकस्यप्रभावस्तंचमेशृणु रुद्राण्याःसंश
योयश्चदंपत्योस्तंचमेशृणु १० व्रतंचचारधर्मात्माकृष्णोद्वादशवार्षिकं दीक्षितंचागतौद्रष्टुमुभौनारदपर्वतौ ११ कृष्ण
द्वैपायनश्चैवधौम्यश्चजपतांवरः देवलःकाश्यपश्चैवहस्तिकाश्यपएवच १२ अपरेचर्षयःसंतोदीक्षादमसमन्विताः
शिष्यैरनुगताःसिद्धैर्देवकल्पैस्तपोधनैः १३

एम० २८५

प्रति२

रश्वरद्दत्तगणाध्यायोक्त्रैवतमेसंवर्तेदेवित्वयाबाल्यादनिंदितेलघालोकस्तदालोकःकृत्स्नोनसमपद्यतेतिमहेश्वरवचनेनशिवमूर्त्तेर्ब्रह्मा
उस्पवाभेदद्दर्शितः ९ दंपत्योःरुद्राणीरुद्रयोःतंसंवार १०

© (C) Dharmartha Trust J&K Digitized By eGangotri

तेषामतिथिसत्कारमर्चनीयंकुलोचितं देवकीतनयःप्रीतोदेवकल्पमकल्पयत् १४ हरितेषुसवर्णेषुवर्हिष्केषुनवेषुच उपोपविवि
ष्टुःप्रीताविष्टरेषुमहर्षयः १५ कथाश्चक्रुस्ततस्तेतुमधुराधर्मसंहिताः राजर्षीणांसुराणांचयेचसंतितपोधनाः १६ ततोनारायणं
तेजोव्रतचर्येंधनोत्थितं वक्त्रान्निःसृत्यसहसाप्रवह्निरद्भुतकर्मणः १७ सोग्निर्ददाहतंशैलंसद्रुमंसलताक्षुपं सपक्षिमृगसंघातंसश्वा
पदसरीसृपं १८ मृगैश्चविविधाकारैर्हीनंमृतमचेतनं शिखरंतस्यशैलस्यमथितंदीनदर्शनं १९ सतुवह्निर्महज्ज्वालोदग्ध्वासर्वम
शेषतः विष्णोःसमीपमागम्यपादौशिष्यवदस्पृशत् २० ततोविष्णुर्गिरिंदृष्ट्वानिर्दग्धमरिकर्शनः सौम्यैर्दृष्टिनिपातैस्तंपुनःप्रकृति
मानयत् २१ तथैवसगिरिर्भूयःप्रपुष्पितलताद्रुमः सपक्षिगणसंघुष्टःसश्वापदसरीसृपः २२ तमद्भुतमचिंत्यंचदृष्ट्वामुनिगणास्तदा वि
स्मितोहृष्टरोमाचबभूवास्राविलेक्षणाः २३ ततोनारायणोदृष्ट्वातानृषीन्विस्मयान्वितान् प्रश्रितंमधुरंस्निग्धंपप्रच्छवदतांवरः २४ किम
र्थमृषिपूगस्यत्यक्तसंगस्यनित्यशः निर्ममस्यागमवतोविस्मयःसमुपागमत् २५ एतन्मेसंशयंसर्वंयाथातथ्यमनिंदिताः ऋषयोवक्तु
मर्हन्तिनिश्चितार्थंतपोधनाः २६ ऋषयऊचुः भवान्विसृजतेलोकान्भवान्संहरतेपुनः भवान्शीतंभवानेवचवर्षति २७ पार्थिवा वंकु ३
यानिस्थावराणिचराणिच तेषांपितात्वंमाताचप्रभुःप्रभवएवच २८ एतन्नोविस्मयकरंसंशयंमधुसूदन त्वमेवार्हसिकल्याणं
वह्नेर्विनिर्गमं २९ ततोविगतसंत्रासावयमप्यरिकर्शन – यच्छ्रुतंयच्चदृष्टंनस्तत्त्वंवक्तुमर्हसिहरे ३० वासुदेवउवाच एतद्वै
स्तवंतेजोममवक्त्राद्विनिःसृतं कृष्णवर्त्मायुगान्ताभोयेनायंमथितोगिरिः ३१ ऋषयश्चार्तिमापन्नाजितक्रोधाजितेन्द्रियाः भवंतो
व्यथितास्त्वासन्देवकल्पास्तपो

भूतानि २

श्रीमतानु ५

धन्नाः ३२ व्रतचर्यापरीतस्यतपस्विव्रतसेवया ममवह्निःसमुद्भूतोनचैवस्थितुमर्हथ ३३ व्रतेचवर्द्धमिहायातस्त्वहेगिरिभिमंसुभं
दा० मा २ पुत्रैस्त्वसमंवीर्येतपसात्वसमागतः ३४ ततोममात्मायोदेहेसोग्निर्भूत्वाविनिःसृतः गतश्चवरदंद्रष्टुंसर्वलोकपितामहं ३५ ते
२८६ नचात्मानुशिष्टोमेपुत्रत्वेमुनिसत्तमाः तेजसोंऽहंनपुत्रस्तेभवितेतिवृषध्वजः ३६ सोयंवह्निस्वरूपागम्यपादमूलेममांतिके शिष्य
वत्परिचर्यार्थशांतःप्रकृतिमागतः ३७ एतदेवरहस्यंवःपद्मनाभस्यधीमतः मयाप्रोक्तंसमासेननभीःकार्यातपोधनाः ३८ सर्व
गतिरव्यग्राभवंतोदीर्घदर्शनात तपस्विव्रतसंदीप्ताज्ञानविज्ञानशोभिताः ३९ यच्छ्रुतंयच्चवोदृष्टंदिविवायदिवाभुवि आश्चर्यंपरमं
तावृवं ७ किंचित्तद्भवंतमे ४० तस्यामृतनिकाशस्यवाङ्मयोरस्तिमेस्पृहा भवद्भिःकथितस्येहतपोधनानिवासिभिः ४१ यद्यप्यहममद्दृष्टंचदिव्यम
द्भुतदर्शनं दिविचाभुविवाकिंचित्पश्याम्यमरदर्शनाः ४२ प्रकृतिःसाममपरातत्यक्षचित्प्रतिहन्यते नचानुगतमाश्चर्यमाश्चर्यंप्रतिभाति
मे ४३ श्रद्धेयःकथितोह्यर्थःसज्जनश्रवणागतः चिरंतिष्ठतिमेदिव्यंशैलेरेखेवार्पितं ४४ तदहंसज्जनमुखान्निःसृतंतत्स-मागमे
कथयिष्याम्यहंसहोबुद्धिदीपकरंनृणां ४५ ततोमुनिगणास्सर्वेविस्मिताःकृष्णसन्निधौ नेत्रैःपद्मदलप्रख्यैरपश्यंतजनार्दनं ४६ व
र्द्धयंतस्तथैवान्येपूजयंतस्तथापरे वाग्भिर्ऋग्भूषितार्थाभिःस्तुवंतोमधुसूदनं ४७ ततोमुनिगणाःसर्वेनारदंदर्शनेतदा नियो
जयामासुर्वचनेवाक्यकोविदं ४८ मुनयऊचुः यदाश्चर्यमभवित्तंचगिरौहिमवतिप्रभो अनुभूतंमुनिगणैस्तीर्थयात्रापरैर्मुने ४९ दाम०
तद्भवान्ऋषिसंघस्यहितार्थेसर्वमादितः यथादृष्टंहृषीकेशेसर्वमाख्यातुमर्हसि ५० एवमुक्तस्समुनिभिर्नारदोभगवान्मुनिः क २८६
थयामासदेवर्षिःपूर्ववृत्ता

२५ हरिपर्व

© Dharmartha Trust J&K. Digitized By eGangotri

मिमांकथां ५२ इतिदानधर्मेषुउमामहेश्वरसंवादे भीष्मउ० ततोनारायणसुहृन्नारदोभगवानृषिः शंकरस्योमयासार्द्धंसंवादंप्रत्यभा
षत १ नारदउवाच तपश्चचारधर्मात्मावृषभांकःसुरेश्वरः पुण्येगिरौहिमवतिसिद्धचारणसेविते २ नानौषधियुतेरम्येना ना
पुष्पसमाकुले अप्सरोगणसंकीर्णेभूतसंघनिषेविते ३ तत्रदेवोमुदायुक्तोभूतसंघशतैर्वृतः नानारूपैर्दिव्यैश्च -- विरूपै
द्भुतदर्शनैः ४ सिंहव्याघ्रगजप्रख्यैःसर्वजातिसमन्वितैः क्रोष्टुकद्वीपिवदनैर्ऋक्षर्षभमुखैस्तथा ५ उलूकवदनैर्भीमैःकैश्येन ५८
मुखैस्तथा नानावर्णमृगमुखैःसर्वजातिसमन्वितैः ६ किंनरैर्यक्षगंधर्वैरक्षोभूतगणैस्तथा दिव्यपुष्पसमाकीर्णंदिव्यज्वाला
समाकुलं ७ दिव्यचंदनसंयुक्तंदिव्यधूपेनधूपितं तत्सदोवृषभांकस्यदिव्यवादित्रनादितं ८ मृदंगपणवोद्घुष्टंशंखभेरीनिनादि
तं नृत्यद्भिर्भूतसंघैश्चबर्हिणैश्चसमंततः ९ प्रनृत्ताप्सरसंदिव्यंदेवर्षिगणसेवितं दृष्टिकांतमनिर्देश्यंदिव्यमद्भुतदर्शनं १० सगिरि
स्तपसातस्यगिरिशस्यव्यरोचत स्वाध्यायपरमैर्विप्रैर्ब्रह्मघोषनिनादितः ११ षट्पदैरुपगीतैश्चमाधव प्रतिमोगिरिः तन्महोत्सवसंका
शंभीमरूप-धरंततः दृष्ट्वामुनिगणस्यासीत्पराप्रीतिर्जनार्दन १३ मुनयश्चमहाभागाःसिद्धाश्चैवोर्द्ध्वरेतसः मरुतोवसवःसाध्या
विश्वेदेवाःसवासवाः १४ यक्षानागाःपिशाचाश्चलोकपालाहुताशनाः वाताःसर्वेमहाभूतास्तत्रवासन्समागताः १५ ऋ
तवःसर्वपुष्पैश्चव्यकिरंतमहाद्भुतैः ओषध्योज्वलमानाश्चद्योतयंतिस्मतद्वनं १६ विहंगाश्चमुदायुक्ताःप्रानृत्यन्व्यनदंश्चह
गिरिपृष्ठेषुरम्येषुव्याहरंतोजनप्रियाः १७ तत्रदेवोगिरितटेदिव्यधातुविभूषिते पर्यंकस्थोविभ्राजन्नुपविष्टोमहामनाः १८ व्या
घ्रचर्मांबरधरःसिंहचर्मोत्तरच्छदः व्यालयज्ञोप

© Dharmartha Trust J&K. Digitized by eGangotri

वीतिचलोहितांगदक्षघ्नः १९ हरिश्मश्रुर्जटी भीमो भयकर्त्ता सुरद्विषां अभयः सर्वभूतानां भक्तानां वृषभध्वजः २० दृष्ट्वा महर्षयः सर्वे
रा० शिरोभिरवनीं गताः विमुक्ताः सर्वपापेभ्यः क्षांता विगतकल्मषाः २१ तस्य भूतपतेः स्थानं भीमरूपधरं विभो अप्रधृष्यतरं चैक महोरगस
२८७ मा कुलं २२ दृष्ट्वा नैवाभवत्सर्वमद्भुतं मधुसूदन तत्सदो वृषभांकस्य भीमरूपधरं विभो २३ तमभ्ययाच्छैलसुता भूतस्त्रीगणसंवृता
२८८ हरतुल्यांबरधरा समानव्रतधारिणी २४ बिभ्रती कलशं रौक्मं सर्वतीर्थजलोद्भवं गिरिस्रवाभिः सर्वाभिः पृष्ठतोनुगता शुभा २५
पुष्पवृष्ट्याभिवर्षंती गंधैर्बहुविधैस्तथा सेवंती हिमवत्पार्श्वं हरपार्श्वमुपागमत २६ ततः स्मयंती पाणिभ्यां धर्मार्थं चारुहासिनी
हरनेत्रे शुभे देवी सहसा सा समावृणोत २७ संवृताभ्यां तु नेत्राभ्यां तमोभूतमचेतनं निर्होममनिवषट्कारं जगद्वै सहसाभवत २८ ज
नश्च विमनाः सर्वे भयत्राससमुद्विताः निमीलिते भूतपतौ नष्टसूर्यइवाभवत २९ ततो वितिमिरो लोकः क्षणेन समपद्यत ज्वाला च
महती दीप्ता ललाटात्तस्य निःसृता ३० तृतीयं चास्य संभूतं नेत्रमादित्यसंनिभं युगांतसदृशं दीप्तं येनासौ मथितो गिरिः ततो गि
रिः [illegible]सुता दृष्ट्वा दीप्ताग्निसदृशेक्षणं हरं प्रणम्य शिरसा ददर्शायतलोचना दह्यमाने वने तस्मिन्ससालसरलद्रुमे सचंदनवने
रम्ये दिव्यौषधिविदीपिते मृगाः पर्श्वैर्द्रुतैर्भीतैर्हरपार्श्वमुपागतैः शरणं चास्य विंदद्भिस्तत्सदः संकुलं विभो ३४ ततो नभस्पृशज्वालो वि
द्युल्लोलाग्निरुल्बणः द्वादशादित्यसंकाशो युगांताग्निरिवापरः क्षणेन तेन निर्दग्धो हिमवानभवन्नगः स धातुशिखराभोगो दीप्तदग्ध
वनौषधिः ३६ तं दृष्ट्वा मथितं शैलं शैलराजसुता ततः भगवंतं प्रपन्ना वै सांजलिप्रग्रहा स्थिता उमां शर्वस्तदा दृष्ट्वा स्त्रीभावागत एम०
मार्दवां पितुर्दैन्यमनिच्छंतीं प्रीत्यापश्यत्तदा गिरिं क्षणेन हिमवान्सर्वः प्रकृतिस्थः सुदर्शनः प्रहृष्टविहगश्चैव सुपुष्पितवनद्रुमः २८७
प्रकृतिस्थं गिरिं दृष्ट्वा प्रीता देवी महेश्वरं उवाच सर्वलोकानां पतिं पतिमनिंदिता ४० उमोवाच भगवन्सर्वभूतेश शूलपाणे महाव्रत सं २८८
शयो मे महाञ्जातस्तन्मे व्याख्यातुमर्हसि ४१

© Dharmartha Trust J&K. Digitized By eGangotri

५२ अध्यायः एवं शंभोः कुमारादनन्यत्वं जगदात्मत्वं चोक्त्वा चतुर्मुखादनन्यत्वं चाह तिलोत्तमेत्यादिना १ ॥ ७ ॥

किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितं किमर्थं च गिरिर्दग्धः सपक्षिगणकाननः ४२ किमर्थं च पुनर्देव प्रकृतिस्थस्त्वया कृतः
तथैव द्रुमसंछन्नः कृतोयं ते पितामह ४३ महेश्व० नेत्रे मे संवृते देवि त्वया बाल्यादनिंदिते नष्टालोकस्तदा लोकः क्षणेन सम
मपद्यत ४४ नष्टादित्ये तथा लोके तमोभूते नगात्मजे तृतीयं लोचनं दीप्तं सृष्टं मे रक्षता प्रजाः ४५ तस्याक्ष्णो महता तेजो येनायं
मथितो गिरिः त्वत्प्रियार्थं च मे देवि प्रकृतिस्थः पुनः कृतः ४६ उमोवाच भगवन्केन ते वक्त्रं चंद्रवत्प्रियदर्शनं पूर्वं तथैव श्रीकांत
मुत्तरं पश्चिमं तथा ४७ दक्षिणं च मुखं रौद्रं केनोर्द्ध्वं कपिला जटाः केन कंठश्च ते नीलो बर्हिबर्हनिभः कृतः ४८ हस्ते देव पिनाकं
ते सततं केन तिष्ठति जटिलो ब्रह्मचारी च किमर्थमसि नित्यदा ४९ एतन्मे संशयं सर्वं वक्तुमर्हसि वै प्रभो सधर्मचारिणी चा
हं भक्ता चेति वृषध्वज ५० भीष्म उवाच एवमुक्तः स भगवाञ्छैलपुत्र्या पिनाकधृक् तस्या धृत्या च बुध्या च प्रीतिमानभवत्प्र
भुः ५१ ततस्तामब्रवीद्देवः सुभगे श्रूयतामिति हेतुभिर्यैर्ममैतानि रूपाणि रुचिरानने ५२ इति दानधर्मेषु उमामहेश्वर
संवादे श्रीभगवानुवाच तिलोत्तमा नाम पुरा ब्रह्मणा योषिदुत्तमा तिलं तिलं समुद्धृत्य रत्नानां निर्मिता शुभा १ ७ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

पूर्वेणवदनेनेत्यादिनाष्टकलदिक्पाला ब्रह्मैवैकः ६ एवंभूतोपिस्वात्मभूतलोकरक्षार्थंतपश्चार्युषंचधारयामीत्याह जटिलइति ७ इंद्रेणे
ति एषवभ्रुंह्यदासानामतिक्रमेसोद्धातत्सोसर्थंनीलंकंठमपिधारयामीतिस्वस्यपरमकारुणिकत्वंदर्शितं ८ ९ सुरभीमिति वात्वंधेनुमुपासीत

रा० २८९ साप्यगच्छत्तमांदेविरूपेणाप्रतिमाभुवि प्रदक्षिणंलोमसंतीमांशुभेरुचिराननां २ पतोपतः सासदृतीमामुपाधावदंतिके
ततस्ततोमुखंचारुममदेविविनिर्गतं ३ तांदिदृक्षुरहंयोगाच्चतुर्मूर्त्तित्वमागतः चतुर्मुखश्चसंवृत्तोदृष्ट्यायोगमुत्तमं
४ पूर्वेणवदनेनाहमिंद्रत्वमनुशास्मिह उत्तरेणात्वयासार्धंरमाम्यहमनिंदिते ५ पश्चिमंमेमुखंसौम्यंसर्वप्राणिसुखावहं
दक्षिणंभीमसंकाशंरौद्रंसंहरतिप्रजाः ६ जटिलोब्रह्मचारीचलोकानांहितकाम्यया देवकार्यार्थसिद्ध्यर्थंपिनाकंमेकरे
स्थितं ७ इंद्रेणचपुरावज्रंक्षिप्तंश्रीकांक्षिणामम दग्ध्वाकंठंतुतयातंतेनश्रीकंठतामम ८ उमोवाच वाहनेषुतुस
र्वेषुश्रीमत्स्वन्येषुसत्तम कथंचवृषभोदेववाहनत्वमुपागतः ९ महेश्वरउवाच सुरभीमसृजद्ब्रह्मादेवधेनुंपयोमुचं सो
सृष्टाबहुधाजाताक्षरमाणापयोमृतं १० तस्यावत्समुखोत्सृष्टः फेनोमद्गात्रमागतः ततोदग्धामयागावोनानावर्णत्व
मागताः ११ ततोहंलोकगुरुणाशमंनीतोर्थवेदिना वृषंचैनंध्वजार्थंमेददौवाहनमेवच १२ ॥ ७ ॥ ७ ॥ राम० २८९

तस्याश्चत्वारस्तनाः स्वाहाकारः स्वधाकारोवषट्कारहंतिकारइति वाग्धेनोश्चतुर्भिस्तनैःपुष्टेषुधर्मोत्तोवृषःतस्यफलंभूतंपरवैराग्यविवेकादिफेनस्थानीयंपद्प्र
त्त्वोवगंभवतितदावाग्धेनोःपारमार्थिकंप्रामाण्यमपगमयतेव्यावहारिकमेवतत्स्याप्यतेसोयंतथाभवितवर्णाभावः धर्मश्चायंवभूतस्यजीवन्मुक्तस्वरूपस्यचको
ध्वजस्थतत्त्वविदिदृश्यतइतिप्रघट्टकार्थः १२

© Dharmartha Trust J&K. Digitized By eGangotri

निवासा इति १३ पूर्वं मे नेपथ्यमिच्छायां वाराणस्या महात्ते मुमुक्षुभिर्वस्तव्यमिति व्यासवासेन सूचितं अग्रे च सर्वत्रवासेन सूच्यते १४ वेत्र अल्पया भिक्षया दलया
मे नेत्रे यस्यानंतपुण्यो स्मात्रिवचनेन वाराणस्याः पुण्यदेहे त्वमुक्तं अग्रे च काश्यां शावदर्शनाद्धि चिरदर्शनस्यान्यथेति सिद्धिं सवने नेत्यादिनाभिधायां धीवतो अवि

उमोवाच निवासा बहुरूपास्ते दिवि सर्वगुणान्विताः तांश्च संत्यज्य भगवञ्छ्मशाने रमसे कथं १३ केशास्थिकलिले भीमकपालघटसं
कुले गृध्रगोमायुबहुले चितानिश्मशानसंकुले १४ अशुचौ मांसकलिले वसाशोणितकर्दमे विकीर्णास्थिनिचये शिवानादवि
नादिते १५ महेश्वर उ० मेध्यान्वेषी महीं कृत्स्नां विचराम्यनिशं सदा न च मेध्यतरं किंचिच्छ्मशानादिह लक्ष्यते १६ तेन मे सर्ववा
सानां श्मशाने रमते मनः न्यग्रोधशाखासंछन्ने निर्भुक्तस्रग्विभूषिते १७ तत्र चैव रमंती मे भूतसंघाः शुचिस्मिते न च भूतगणै
र्देवि विनाहं वस्तुमुत्सहे १८ एष वासो हि मे मेध्यः स्वर्गीयश्च मतः शुभे पुण्यः परमकश्चैव मेध्यकामैरुपास्यते १९ उमोवाच
भगवन्सर्वभूतेश सर्वधर्मविदां वर पिनाकपाणे वरद संशयो मे महानयं २० अयं मुनिगणाः सर्वस्तपस्तेप इति प्रभो तपोन्वेषक
रा लोके भ्रमन्ते विविधाकृतिः २१ अस्य चैवर्षिसंघस्य मम च प्रियकाम्यया एतं ममेह संदेहं वक्तुमर्हस्यरिंदम २२ ॥ ७ ॥

दितं मेध्यं ब्रह्मलतया प्रिकामैर्मेध्यकामैः इदं श्मशानं उपास्यत इति च नान्यत्र श्मशानं रुद्रावास इति ज्ञेयं १९ योगजधर्महर्षचारासी श्मशानं च सेवितुम
शक्तानां जय आदिकं विधातुं भगवन्नित्यादि ग्रंथिः प्रवर्तते २० त[illegible]वेषः त[illegible]ः सचकोवेषः नखलोमज[illegible]रत्वादिः २२ ॥ ७ ॥ ७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

२६ पंचविधः अहिंसादि विशिष्टगार्हस्थ्यधर्मादिः धर्मस्य पुण्यसंभवो योनिः ३६ ॥ ७ ॥

दा० २६० धर्मः किंलक्षणः प्रोक्तः कथं वाचरितं नरैः शक्यो धर्ममविंदद्भिर्धर्मज्ञ वद मे प्रभो २३ ततो मुनिगणाः सर्वे तां देवीं प्रत्यपूजयन् वा
ग्भिः ऋग्भूषितार्थाभिस्स्तवैश्चार्थविशारद २४ महेश्वर उ० अहिंसा सत्यवचनं सर्वभूतानुकंपनं शमो दानं यथाशक्ति गार्ह
स्थ्यो धर्म उत्तमः २५ परदारेष्वसंसर्गो न्यासस्त्रीपरिरक्षणं अदत्तादानविरमो मधुमांसस्य वर्जनं २६ एष पंचविधो धर्मो ब
हुशाखः सुखोदयः देहिभिर्धर्मपरमैश्चर्तव्यो देहसंभवः २७ उमोवाच भगवन्संशयं पृष्टस्तन्मे शंसितुमर्हसि चातुर्वर्ण्य
स्य यो धर्मः स्वे स्वे वर्णे सुखावहः २८ ब्राह्मणे कीदृशो धर्मः क्षत्रिये कीदृशो भवेत् वैश्ये किंलक्षणो धर्मः शूद्रे किंलक्षणो भवे
त् २९ भगवानुवाच न्याय्यतस्ते महाभागे संशयः समुदीरितः भूमिदेवा महाभागाः सदा लोके द्विजातयः ३० उपवासः सदा
धर्मो ब्राह्मणस्य न संशयः स हि धर्मार्थसंपन्नो ब्रह्मभूयाय कल्पते ३१ तस्य धर्मक्रियादेविव्रतचर्या च न्यायतः व्रतोपनय
नैश्चैव द्विजो येनोपपद्यते ३२ गुरुदैवतपूजार्थं स्वाध्यायाभ्यासनात्मकः देहिभिर्धर्मपरमैश्चर्तव्यो धर्मसंभवः ३३ उमोवा
च भगवन्संशयो मे स्ति तन्मे व्याख्यातुमर्हसि चातुर्वर्ण्यस्य धर्मं वै नैपुण्येनेह कीर्तय ३४ महेश्वर उवाच रहस्यश्रवणं राम० २६०
धर्मो वेदव्रतनिषेवणं अग्निकार्यं तथा धर्मो गुरुकार्यप्रसाधनं ३५ भैक्ष्यचर्यापरो धर्मो नित्यं यज्ञोपवीतिता नित्यं स्वा
ध्यायिता धर्मो ब्रह्मचर्याश्रमस्तथा ३६

© Dharmartha Trust J&K. Digitized By eGangotri

४० अपूर्वभोजनं पूर्वभोजनं प्राक्भोजनं तदभावः सकृद्भोजनमित्यर्थः ४६ निर्दिष्टफलभोगः ४७ ५१ ॥ ७ ॥ ७ ॥

गुरुणाचाप्यनुज्ञातः समावर्त्तेत वै द्विजः विंदेतानंतरं भार्यामनुरूपां यथाविधि ३७ शूद्रान्नवर्जनं धर्मस्तथा सत्पथसेवनं धर्मो नि
त्योपवासित्वं ब्रह्मचर्यं तथैव च ३८ आहिताग्निरधीयानो जुह्वानः संयतेंद्रियः विघसाशी यताहारो गृहस्थः सत्यवाक्शुचिः ३९
अतिथिव्रतताधर्मो धर्मस्त्रेताग्निधारणं इष्टींश्च पशुबंधांश्च विधिपूर्वं समाचरेत् ४० यज्ञश्च परमो धर्मस्तथाऽहिंसा च देहिषु
अपूर्वभोजनं धर्मो विघसाशित्वमेव च ४१ भुक्ते परिजने पश्चाद्भोजनं धर्म उच्यते ब्राह्मणस्य गृहस्थस्य श्रोत्रियस्य विशेषतः ४२
दंपत्योः समशीलत्वं धर्मः स्याद्गृहमेधिनां गृह्याणां चैव देवानां नित्यं पुष्पबलिक्रिया नित्योपलेपनं धर्मस्तथा नित्योपवासि
ता सुसंमृष्टोपलिप्ते च साज्यधूमो भवेद्गृहे ४३ एष द्विजजने धर्मो गार्हस्थ्यो लोकधारणः द्विजातीनां सतां नित्यं सदैवैष प्रवर्त
ते ४४ यस्तु क्षत्रगतो देवि त्वया धर्म उदीरितः तमहं ते प्रवक्ष्यामि तन्मे शृणु समाहिता ४६ क्षत्रियस्य स्मृतो धर्मः प्रजापालन
मादितः निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ४७ प्रजाः पालयते यो हि धर्मेण मनुजाधिपः तस्य धर्मार्जिता लोकाः प्रजापाल ता २
न संचिताः ४८ तस्याहुः परो धर्मो दमः स्वाध्याय एव च अग्निहोत्रपरिस्पंदो दानाध्ययनमेव च ४९ यज्ञोपवीतधरणं यज्ञो
धर्मक्रियास्तथा भृत्यानां भरणं धर्मः कृते कर्मण्यमोघता ५० सम्यग्दंडे स्थितिर्धर्मो धर्मो वेदक्रतुक्रियाः व्यवहारस्थितिर्ध
र्मः सत्यवाक्यरतिस्तथा ५१

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

आर्त्तहस्तेति अर्तिप्रियहस्तंर्थः आर्द्रेतिपाठे सजलेन हस्तेन ददाति ५६ सर्वप्रकारेणातिथ्यं सर्वातिथ्यं ६३ त्रयोधर्माः सर्जने सर्जनकाले ६४ ॥७॥

धर्मः किंलक्षणः प्रोक्तः कथं वाचरितं नरैः शक्यो धर्ममविंदद्भिर्धर्मं त्वं वद मे प्रभो २३ ततो मुनिगणाः सर्वे स्तां देवीं प्रत्यपूजयन् वाग्मि
दा० २९१ श्रेष्ठ भाषितार्थोपि स्त्वं वेत्थार्थविशारद २४ महेश्वर उ० अहिंसा सत्यवचनं सर्वभूतानुकंपनं शमो दानं यथाशक्ति गार्हस्थो धर्म
उत्तमः २५ परदारेष्वसंसर्गो न्यासस्त्रीपरिरक्षणं अदत्तादानविरमो मधुमांसस्य वर्जनं २६ एष पंचविधो धर्मो बहुशाखः सु
खोदयः देहिभिर्धर्मपरमैश्चर्त्तव्यो देहसंभवः २७ उमोवाच भगवन्संशयः पृष्ठस्तन्मे शंसितुमर्हसि चा) अर्तिहिंस्तप्रदेश
जाप्रेत्येह च महीयते गोब्राह्मणार्थे विक्रांतः संग्रामे निधनं गतः अश्वमेधजितान् लोकानाप्नोति त्रिदिवालये ५३ वैश्यस्य सत
तं धर्मः पाशुपाल्यं कृषिस्तथा अग्निहोत्रपरिस्पंदो दानाध्ययनमेव च ५४ वाणिज्यं सत्पथस्थानमातिथ्यं [illegible] प्रशमो दमः वि
प्राणां स्वागतं त्यागो वैश्यधर्मः सनातनः ५५ तिलान् गंधान्रसांश्चैव विक्रीणीयान्न चैव हि वणिक्सत्पथमुपासीनो वैश्यः सत्पथमा
श्रितः ५६ सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति यथार्हतः शूद्रधर्मः परो नित्यं शुश्रूषा चैव द्विजातिषु ५७ स शूद्रः संशिततपाः स
त्यवादी जितेंद्रियः शुश्रूषुरतिथिं प्राप्तं तपः संचिनुते महत् ५८ नित्यं स हि शुभाचारो देवताद्विजपूजकः शूद्रो धर्मफलैरिष्टैः
संप्रयुज्यति बुद्धिमान् ५९ एतत्ते सर्वमाख्यातं चातुर्वर्ण्यस्य शोभने एकैकस्येह सुभगे किमन्यच्छ्रोतुमिच्छसि ६० उमोवा
च उक्तस्त्वया पृथग्धर्मश्चातुर्वर्ण्यहितः शुभः सर्वव्यापी तु यो धर्मो भगवंस्तं ब्रवीहि मे ६१ महेश्वर उवाच ब्राह्मणा लोक
सारेण सृष्टा धात्रा गुणार्थिना लोकांस्तारयितुं कृत्स्नान्मर्त्येषु क्षितिदेवताः तेषामेव प्रवक्ष्यामि धर्मकर्मफलोदयं ब्राह्म रा०म० २९१
णेषु हि यो धर्मः स धर्मः परमो मतः ६३ इमे तु धर्मा लोकार्थं त्रयः सृष्टाः स्वयंभुवा पृथिव्यां सर्जने नित्यं सृष्टास्तानपि मे शृणु ६४

© Dharmartha Trust J&K Digitized By eGangotri

विकर्मा दानाध्ययज्ञनकर्मा त्रीन् कामक्रोधलोभान्परिक्रांतः परित्यज्यगतः ७१ अजितस्थितिछेदः ७८ ॥ ५ ॥ ७ ॥ ५ ॥ ७ ॥

वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः शिष्टाचीर्णोऽपरः प्रोक्तस्त्रयो धर्मः सनातनः ६५ त्रैविद्यो ब्राह्मणो विद्वान्न चाध्ययनजीव
नः त्रिकर्मा त्रिपरिक्रांतो मैत्र एष स्मृतो द्विजः ६६ षडिमानि तु कर्माणि प्रोवाच भुवनेश्वरः वृत्त्यर्थं ब्राह्मणानां वै शृणु धर्मान्स
नातनान् ६७ यजनं याजनं चैव तथा दानप्रतिग्रहौ अध्यापनं चाध्ययनं षट्कर्मा धर्मभाग्द्विजः ६८ नित्यस्वाध्यायिता धर्मो धर्मो
यज्ञः सनातनः दानं प्रशस्यते चास्य यथाशक्ति यथाविधि ६९ शमस्तु परमो धर्मः प्रवृत्तः सत्सु नित्यशः गृहस्थानां विशुद्धानां ध
र्मस्य निचयो महान् ७० पंचयज्ञविशुद्धात्मा सत्यवागनसूयकः दाता ब्राह्मणसत्कर्ता सुसंमृष्टनिवेशनः ७१ अमानी च सदा
जिह्मः स्निग्धवाणीप्रदस्तथा आतिथ्याभ्यागतरतिः शेषान्नकृतभोजनः ७२ पाद्यमर्घ्यं यथान्यायमासनं शयनं तथा दी
पं प्रतिश्रयं चैव यो दद्याति स धार्मिकः ७३ प्रातरुत्थाय चाचम्य भोजनेनोपमंत्र्य च सत्कृत्यानुव्रजेद्यश्च तस्य धर्मः सनातनः ७४
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति निशानिशं शूद्रधर्मः समाख्यातस्त्रिवर्णपरिचारणं ७५ प्रवृत्तिलक्षणो धर्मो गृहस्थेषु विधी
यते तमहं वर्त्तयिष्यामि सर्वभूतहितं शुभं ७६ दातव्यमसकृच्छक्त्या यष्टव्यमसकृत्तथा पुष्टिकर्मविधानं च कर्त्तव्यं भूति
मिच्छता ७७ धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनं कर्त्तव्यं धर्मपरमं मानवेन प्रयत्नतः ७८ ॥ ५ ॥ ५ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा०
२९२

एकेनांशेन धर्मार्थः कर्तव्यो भूतिमिच्छता एकेनांशेन कामार्थ एकमंशं विवर्द्धयेत ७९ निवृत्तिलक्षणस्त्वन्यो धर्मो मोक्ष
इति तिष्ठति तस्य वृत्तिं प्रवक्ष्यामि शृणु मे देवि तत्वतः ८० सर्वभूतदया धर्मो न चैकग्रामवासिता आशापाशविमोक्ष
श्च शस्यते मोक्षकांक्षिणां ८१ न कुर्ध्यां नोदके संगो न वाससि न चासने न त्रिदंडे न शयने नाग्नौ न शरणालये ८२
अध्यात्मगतिचित्तो यस्तन्मनास्तत्परायणः युक्तो योगं प्रति सदा प्रतिसंख्यानमेव च ८३ वृक्षमूलपरो नित्यं शून्यागा
रनिवेशनः नदीपुलिनशायी च नदीतीररतश्च यः ८४ विमुक्तः सर्वसंगेषु स्नेहबंधेषु च द्विजः आत्मन्येवात्मनो भावं
समासज्याधते द्विजः ८५ स्थाणुभूतो निराहारो मोक्षदृष्टेन कर्मणा परिव्रजति यो मुक्तस्तस्य धर्मः सनातनः ८६
न चैकत्र निरासक्तो न चैकग्रामगोचरः मुक्तो ह्यटति निर्मुक्तो न चैकपुलिनेशयः ८७ एष मोक्षविदां धर्मो वेदो
क्तः सत्पथः सतां यो मार्गमनुयातीमं पदं तस्य न विद्यते ८८ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

एम
२९२

© (c) Dharmartha Trust J&K. Digitized By eGangotri

कुटीचकूवहूदकौत्रिदंडिनौएकोगृहेवसतिअपरस्तीर्थाद्यटति इतरौएकंदंडिनौतयोराघःआश्रमधर्मनिषतुः परोनिस्त्रैगुण्यइतितेषांभेदः ९

चतुर्विधाभिक्षवस्ते कुटीचवहूदकौ हंसःपरमहंसश्चयोयःपश्चात्सउत्तमः ८९ अतःपरतरंनास्तिनावरंनातिरोग्रतः अ
दुःखमसुखंसौम्यमजरामरमव्ययं उमोवाच गार्हस्थ्योमोक्षधर्मस्तुसज्जनाचरितस्त्वया भाषितोजीवलोकस्यमार्गःश्रे
यःस्करोमहान् ९१ ऋषिधर्मंतुधर्मज्ञश्रोतुमिच्छाम्यतःपरं स्पृहाभवतिमेनित्यंतपोवननिवासिषु ९२ आज्यधूमोभ
वेऊंधोरम्यश्चैवतपोवनं तंदृष्ट्वामेमनःप्रीतंमहेश्वरसदाभवेत् ९३ एतन्मेसंशयंदेवमुनिधर्मकृतंविभो सर्वधर्मार्थ
तत्वज्ञदेवदेववदस्वमे ९४ निखिलेनमयापृष्टंमहादेवयथातथं ९५ भगवानुवाच हंततेतेहंप्रवक्ष्यामिमुनिधर्ममनु
त्तमं येकृत्वामुनयोयांतिसिद्धिंस्वतपसाशुभे ९६ फेनपानामृषीणांयोधर्मोधर्मविदांसतां तंमेशृणुमहाभागेधर्मज्ञेधर्म
मादितः ९७ ॥ छ ॥

अतःपारमहंस्येनास्ताधिगम्यातपरंश्रेयंनास्तिनास्तिनापि अवरादिसर्वस्यात्रैवांतर्भूतत्वात् ९५ मुनयःसंन्यासिनः ९६ ॥ छ ॥ छ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ग्राम्यं ब्रह्म सजातीयसंबंधिफेनोत्करं अग्रतान्न समूहं उंछंति अल्पशआदद्ते तदिदममृतं ब्रह्मणांधकावस्था अध्वरेण स्पृहिहाण
यज्ञांगरूपेणादिवि द्विहारायज्ञांगरूपेणादिवि दिव्यभोगात्मनाचप्रसृतं ९८ मार्गउक्तइतिशेषः १ स्वेस्वेधर्मइतिशेषः ३ चक्रचराःचक्रवच्चरंति
रैः ४

शां० २९३

उंछंति सततं येते ब्राह्मं फेनोत्करं शुभं अमृतं ब्रह्मणा पीतं मध्वरे प्रसृतं दिवि ९८ एषां विशुद्धानां फेनपानां तपोधने धर्मचर्या
कृतो मार्गो वालखिल्यगणे शृणु ९९ वालखिल्यास्तपःसिद्धा मुनयः सूर्यमंडले उंछेति उंछंति धर्मज्ञाः शाकुनीं वृत्तिमास्थि
ताः १०० मृगनिर्मोकवसना श्चीरवल्कलवाससः निर्द्वंद्वाः सत्पथं प्राप्ता वालखिल्यास्तपोधनाः १ अंगुष्ठपर्वमात्रा वै
भूत्वा स्वे स्वे व्यवस्थिताः तपश्चरणमीहंते तेषां धर्मफलं महत् २ ते सूर्यसमतां यांति सुरकार्यार्थसिद्धये द्योतयंति दिशः सर्वा
स्तपसा दग्धकिल्बिषाः ३ येत्वन्ये शुद्धमनसो दयाधर्मपरायणाः संतश्चक्रचराः पुण्याः सोमलोकचराश्च ये ४ पितृलो
कसमीपस्थास्त उंछंति यथाविधि संप्रक्षाला अश्मकुट्टाश्च दंतोलूखलिनश्च ये ५ सोमपानां च देवानामूष्मपाणां तथैव च उंछं
ति ये समीपस्थाः सदारा नियतेंद्रियाः ६ तेषामग्निपरिस्पंदः पितृणां चार्चनं तथा यज्ञानां चैव पंचानां यजनं धर्म उच्यते
७ एष चक्रचरैर्देवि देवलोकचरैर्द्विजैः ऋषिधर्मः सदाचीर्णो योन्यस्तमपि मे शृणु ८ सर्वेष्वेवर्षिधर्मेषु ज्ञेयो संयतेंद्रि
यैः कामक्रोधौ ततः पश्चाज्जेतव्याविति मे मतिः ९

भा० २९३

वासमुहिता इत्यर्थः उंछंति अर्थीन्मोनमकीरणात् संप्रक्षालाः सम्यक्पात्रादिकं प्रक्षालयंति न तु श्वो श्वोर्थे किंचित्स्थापयंति ॥ ४ ॥ ४ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मरात्रिर्धर्मसत्रेतेनसम्यगासनंसमासनंधर्मचक्रक्रमातनमितिगोत्रः १६ अध्यायः देशे २ स्वशरीरमेवोपजीवंतिनतुंरेस्तसादिस

अग्निहोत्रपरिस्पंदोधर्मचक्रसमासनं सोमयज्ञाभ्यनुज्ञातंपंचमीयज्ञदक्षिणा १० नित्यंयज्ञक्रियाधर्मः पितृदेवार्चनेर
तिः सर्वातिथ्यंचकर्तव्यमन्नेनोंछार्जितेनवै ११ निवृत्तिरुपभोगेषुगोरसानशनेरतिः स्थंडिलेशयनंयोगः शाकपर्णा
निषेवणं १२ फलमूलाशनंवायुरायः शैवलभक्षणं अपीणांनियमात्वेतैर्यजेपस्वजितांगति १३ विधूमेन्यस्तमु
सलेव्यंगारेभुक्तवज्जने अतीतपात्रसंचारेकालेविगतभिक्षुके १४ अतिथिंकांक्षमाणोवैशेषान्नकृतभोजनः स
त्यधर्मरतः शांतोमुनिर्द्धर्मेणयुज्यते १५ नस्तंभीनचमानीस्यान्नाप्रसन्नोनविस्मितः मित्रामित्रसमोमैत्रायः स
धर्मविदुत्तमः १६ इतिदानधर्मेषुउमामहेश्वरसंवादे उमोवाच देशेषुरमणीयेषुनदीनांनिर्झरेषुच स्रवंती
नांनिकुंजेषुपर्वतेषुवनेषुच १ देशेषुचपवित्रेषुफलवत्सुसमाहिताः मूलवत्सुचमेध्येषुवसंतिनियतव्रताः
तेषामविधिंपुराणंश्रोतुमिच्छामिशंकर वानप्रस्थेषुदेवेशस्वशरीरोपजीविषु २ ॥ ॥ ॥

यद्दासाद्दस्यथः ॥ ३ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© (C) Dharmartha Trust J&K. Digitized By eGangotri

ह्री० २९४

वीरशय्या वीरासनं। वीरस्थानं महाराण्यभीरूणामिरध्येषणं ७ मंडूकयोगो हठशास्त्रप्रसिद्धः ८ वीरासनं सदोपवेशनं शीतवर्षास्वासारशायित्वं योगात

महेश्वर उवाच वानप्रस्थेषु यो धर्मस्तं मे शृणु समाहिता श्रुत्वा चैकमना देवि धर्मबुद्धिपरा भव ४ संसिद्धैर्नियतैः सद्भिर्वनवासमु
पागतैः वानप्रस्थैरिदं कर्म कर्तव्यं शृणु यादृशं ५ त्रिकालमभिषेकं च पितृदेवार्चनं तथा अग्निहोत्रपरिस्पंदं इष्टिहोमविधि
स्तथा नीवारग्रहणं चैव फलमूलनिषेवणं इंगुदैरंडतैलानां स्नेहार्थं च निषेवणं ७ योगचर्याकृतैः सिद्धैः कामक्रोधविव
र्जितैः वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः ८ युक्तियोगवहैः सद्भिर्ग्रीष्मे पंचतपैस्तथा मंडूकयोगनियतैर्यथान्या
यनिषेविभिः ९ वीरासनरतैर्नित्यं स्थंडिलेशयनैस्तथा शीततोयाग्नियोगश्च कर्तव्यो धर्मबुद्धिभिः १० अब्भक्षैर्वायुभक्षैश्च
शैवालोत्तरभोजनैः अश्मकुट्टैस्तथा दांतैः संप्रक्षालैस्तथापरैः ११ चीरवल्कलसंवीतैर्मृगचर्मनिवासिभिः कार्या
यात्रा यथाकालं यथाधर्मं यथाविधि १२ वननित्यैर्वनचरैर्वनस्थैर्वनगोचरैः वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः
१३ तेषां होमक्रिया धर्मः पंचयज्ञनिषेवणं भागं पंचमियज्ञस्य यथोक्तस्यानुपालनं १४ ॥ ॥

वासी त्र्यग्निः ग्रीष्मे पंचाग्निमध्यस्थः एवं शीततोयाग्नियोगः १० १० ॥ ॥ ॥ ॥ ॥ ॥ ॥

एम० २९४

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धिवाटेषुज्ञानविज्ञानगोष्ठीषु २० संसिद्धाः संपन्नाः नैकदाचित्स्वैरिणः कदाचिद्दारसंयुक्ताः २१ नचस्वैरिणांमेो ध्यंकषायश्चकारणं ना

अष्टमीपञ्चपरताचातुर्मास्यनिषेवणं पौर्णमासादयोयज्ञानित्यपञ्चस्तथैवच १५ विमुक्तादारसंयोगैर्विमुक्ताः सर्वसंकरैः
विमुक्ताः सर्वपापेभ्यश्चरंतिमुनयोवने १६ मुग्धाउपरमानित्यंत्रेताग्निशरणाः सदा संतः सत्पथनित्यायेतेयांतिपरमांगतिं
१७ ब्रह्मलोकंमहापुण्यंसोमलोकंचशाश्वतं गच्छंतिमुनयः सिद्धाः सत्यधर्मव्यपाश्रयाः १८ एषधर्मोमयादेविवानप्रस्था
श्रितः शुभः विस्तरेणार्थसंपन्नोयथास्थूलमुदाहृतः १९ उमोवाच भगवन्सर्वभूतेशसर्वभूतनमस्कृतः योधर्मोमुनिसं
घस्यसिद्धिवाटेषुतंवद २० सिद्धिवाटेषुसंसिद्धास्तथावननिवासिनः स्वैरिणोदारसंयुक्तास्तेषांधर्मः क थंस्मृतः २१ दे
वदेवउवाच स्वैरिणस्तापसादेविसर्वेदारविहारिणः तेषांमौ ध्यंकषायश्चवासरात्रिश्चकारणं २२ त्रिकालमभिषेकश्च
होत्रंचर्षिकृतंमहत् समाधिसत्पथस्थानंयथोद्दिष्टनिषेवणं २३ येचतेपूर्वकथितावधर्मास्तेवनवासिनां यदिसेवंतिधर्मा
स्तानाप्नुवंतितपः फलं २४

मकं दारसंयुक्तानांरात्रिर्यासेकारणं नैस्वैरिणामिवेतेषांपश्चविहारोलीनयेः २२ त्रिकालमभिषेकउभयेषां दारवतामपिकृतंवन्यावुफलाशिनाहो
मः एवंयधर्मोस्यधर्मसंबंधऊरधः २४ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा० येचदंपतिधर्मेण स्वदारनियतेंद्रियाः चरंतिविधिदृष्टंतदृतुकालाभिगामिनः २५ तेषामृषिकृतोधर्मोधर्मिणामुपपद्यते नकाम
२९५ कारात्कामोन्यः संसेव्योधर्मदर्शिभिः २६ सर्वभूतेषुयः सम्यक्ददात्यभयदक्षिणां हिंसादोषविमुक्तात्मासवैधर्मेणयुज्यते २७
सर्वभूतानुकंपीयः सर्वभूतार्जवव्रतः सर्वभूतात्मभूतश्चसवैधर्मेणयुज्यते २८ सर्ववेदेषुवास्नानंसर्वभूतेषुचार्जवं उभेएतेस
मेस्यातामार्जवंतुविशिष्यते २९ आर्जवंधर्ममित्याहुरधर्मोजिह्मउच्यते आर्जवेनेहसंयुक्तोनरोधर्मेणयुज्यते ३० आर्जवेतु
रतोनित्यंवसत्यमरसन्निधौतस्मादार्जवयुक्तःस्याद्यइच्छेद्धर्ममात्मनः ३१ क्षांतोदांतोजितक्रोधोधर्मभूतोविहिंसकः धर्मेरतमना
नित्यंनरोधर्मेणयुज्यते ३२ व्यपेततंद्रोधर्मात्माशक्त्यासत्पथमाश्रितः चारित्रपरमोबुद्धोब्रह्मभूयायकल्पते ३३ उमोवाच
आश्रमाभिरतादेवतपसायेतपोधनाः दीप्तधर्मेयाकिंस्विच्चर्ययाथभवंतिते ३४ राजानोराजपुत्राश्चनिर्द्धनायेमहाधनाः
कर्मणाकेनभगवन्प्राप्नुवंतिमहाफलं ३५ नित्यंस्थानमुपागम्यदिव्यचंदनभूषिताः केनवाकर्मणादेवभवंतिवनगोचराः ३६
एतन्मेसंशयंदेवतपश्चर्याश्रितंशुभं शंससर्वमशेषेणत्र्यक्षत्रिपुरनाशन ३७ देवउवाच उपवासव्रतादांतास्त्वहिंस्राः सत्यवा
दिनः संसिद्धाःप्रेत्यगंधर्वैः सहमोदंत्यनामयाः ३८ मंडूकयोगशयनोयथान्यायंयथाविधि दीक्षांचरतिधर्मात्मासनागैः सहमोद राम०
ते ३९ ॥ ॥ २९५

मरुर्नामगिरिःधन्वनोरिरितिमेदिनी मरुसाधनंमेरुसाधनमितिपर्यायः जलाहारमपित्यक्त्वास्थः ४४ शुद्धमितिस्थासनंविनोपविश्य ४५

शैवालंशीर्णपर्णंवानक्तंतीयोनिषेवते शीतयोगवहोनित्यंसगच्छेत्परमांगतिं ४१ वायुभक्षोंवुभक्षोवाफलमूलाशनोपिवा
यक्षेश्वैश्वर्यमाधायमोदतेप्सरसांगणैः ४२ अग्नियोगवहोग्रीष्मेविधिदृष्टेनकर्मणा चीर्त्वाद्वादशवर्षाणिराजाभवतिपा
र्थिवः ४३ आहारनियमंकृत्वामुनिर्द्वादशवार्षिकं मरुंसंसाध्ययत्नेनराजाभवतिपार्थिवः ४४ देहंचानशनेत्यक्त्वासस्वर्गे
सुखमेधते स्थंडिलेशुद्धमाकाशंपरिगृह्यसमंततः ४५ प्रविश्यचमुद्रायुक्तोदीक्षांद्वादशवार्षिकीं स्थंडिलस्यफलान्या
ऊर्ध्वानाविशयनानिच ४६ गृहाणिचमहार्हाणिचंद्रशुभ्राणिभामिनि आत्मानमुपजीवन्योनियतोनियताशनः देहंव
कानेत्यक्त्वासस्वर्गेसमुपाश्नुते ४७ आत्मानमुपजीवन्योदीक्षांद्वादशवार्षिकीं त्यक्त्वामहार्णवेदेहंवारुणंलोकम
श्नुते ४८ आत्मानमुपजीवन्योदीक्षांद्वादशवार्षिकीं अश्मनाचरणौभित्वागुह्यकेषुसमोदते ४९ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

अरणीसहितं त्वग्निं स्कंधेन रुभकांडे वध्वा विलाप्य तत्र वर्ग्निं विसृज्य सर्थः ५४ वीरो देहमागोस्तकः ५६ अध्यायः भगवान् १ १ १

दा०
२९६

साधयित्वात्मनात्मानं निर्द्वंद्वो निष्परिग्रहः चीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोगतां ५० स्वर्गलोकमवाप्नोति देवैश्च सह मोदते
५१ आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीं कृत्वाग्नौ देहमुत्सृज्य वह्निलोके महीयते ५२ यस्तु देवि यथान्यायं दीक्षि
तो नियतो द्विजः आत्मन्यात्मानमाधाय निर्ममो धर्मलालसः ५३ चीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोगतां अरणीसहितं स्कं
धे बध्वा गच्छत्यनावृतः ५४ वीराध्वानमनानित्यं वीरासनरतस्तथा वीरस्थायी च सततं स वीरगतिमाप्नुयात् ५५ स शक्रलो
कगो नित्यं सर्वकामपुरस्कृतः दिव्यपुष्पसमाकीर्णो दिव्यचंदनभूषितः ५६ सुखं वसति धर्मात्मा दिवि देवगणैः सह वीर
लोकगतो नित्यं वीरयोगवहः सदा ५७ सत्वस्थः सर्वमुत्सृज्य दीक्षितो नियतः शुचिः वीराध्वानं प्रपद्येद्यस्तस्य लोकाः
सनातनाः ५८ कामगेन विमानेन स वै चरति छंदतः शक्रलोकगतः श्रीमान्मोदते च निरामयः ५९ इति दानधर्मे
षु उमामहेश्वरसंवादे उमोवाच भगवन्भगनेत्रघ्न पूष्णो दंतनिपातन दक्षक्रतुहर त्र्यक्ष संशयो मे महानयं १

दान०
२९६

© (c) Dharmartha Trust J&K. Digitized By eGangotri

चातुर्वर्ण्यंभगवतापूर्वंसृष्टंस्वयंभुवा केनकर्मविपाकेनवैश्योगच्छतिशूद्रतां २ वैश्योवाक्षत्रियः केनद्विजोवाक्षत्रियोभवेत् प्रतिलोमः
कथंदेवशक्योधर्मोनिवर्तितुं ३ केनवाकर्मणाविप्रः शूद्रयोनौप्रजायते क्षत्रियः शूद्रतामेतिकेनवाकर्मणाविभो ४ एतन्मेसंशयं
देववदभूतपतेनघ त्रयोवर्णाः प्रकृत्येहकथंब्राह्मण्यमाप्नुयुः ५ देवउवाच ब्राह्मण्यंदेविदुःप्राप्यंनिःसर्गाद्ब्राह्मणः शुभे क्षत्रियोवैश्य
शूद्रौचनिसर्गादितिमेमतिः ६ कर्मणादुःकृतेनेहस्थानाद्भ्रश्यतिवैद्विजः ज्येष्ठंवर्णमनुप्राप्यतस्माद्रक्षेतवैद्विजः ७ स्थितोब्रा
ह्मणधर्मेणब्राह्मण्यमुपजीवति क्षत्रियोवाथवैश्योवाब्रह्मभूयंसगच्छति ८ यस्तुविप्रत्वमुत्सृज्यक्षात्रंधर्मंनिषेवते स्वस्थानात्स
परिभ्रष्टः क्षत्रयोनौप्रजायते ९ वैश्यकर्मचयोविप्रोलोभमोहव्यपाश्रयः ब्राह्मण्यंदुर्लभंप्राप्यकरोत्यल्पमतिःसदा १० स
सद्विजोवैश्यतामेतिवैश्योवाशूद्रतामियात् स्वधर्मात्प्रच्युतोविप्रस्ततः शूद्रत्वमाप्नुते ११ तत्रासौनिरयंप्राप्तोवर्णभ्रष्टोबहिष्कृ
तः ब्रह्मलोकात्परिभ्रष्टः शूद्रः समुपजायते १२ क्षत्रियोवामहाभागेवैश्योवाधर्मचारिणि स्वानिकर्माण्यपाहायशूद्रकर्मनिषेव
ते १३ स्वस्थानात्सपरिभ्रष्टोवर्णसंकरतांगतः ब्राह्मणः क्षत्रियोवैश्यः शूद्रत्वंयातितादृशः १५ १४ १४

© Dharmartha Trust J&K. Digitized by eGangotri

२३ कुंडेपाकपात्रेअश्नातिकुंडाशी २४ २५ ६ ॥

हा०
२९७

यत्कचिद्ः स्वधर्मेणाज्ञानीविज्ञानवांछुचिः धर्मज्ञोधर्मनिरतः सधर्मफलमश्नुते १५ इहचैवापरेदेविब्रह्मणासमुदाहृतं
अध्यात्मंनैष्ठिकंसद्भिर्धर्मकामैर्निषेव्यते १६ उग्रान्नंगर्हितंदेविगणान्नंश्राद्धसूतकं दुष्टान्नंनैवभोक्तव्यंशूद्रान्नंनैवक
र्हिचित् १७ शूद्रान्नंगर्हितंदेविसदादेवैर्महात्मभिः पितामहमुखोत्सृष्टंप्रमाणमितिमेमतिः १८ शूद्रान्नेनावशेषेणज
ठरेयो म्रियेद्द्विजः आहिताग्निस्तथायज्वासशूद्रगतिभाग्भवेत् १९ तेनशूद्रान्न शेषेणब्रह्मस्थानादपाकृतः ब्रा
ह्मणः शूद्रतामेतिनास्तितत्रविचारणा २० यस्मान्नेनावशेषेणजठरेयोम्रियेद्द्विजः तांतांयोनिंव्रजेद्विप्रोयस्यान्नमु
पजीवति २१ ब्राह्मणत्वंशुभंप्राप्यदुर्लभंयोवमन्यते अभोज्यान्नानिचाश्नातिसद्विजत्वात्पतेतवै २२ सुरापोब्रह्महाक्षु
द्रश्चोरोभग्नव्रतोऽशुचिः स्वाध्यायवर्जितःपापोलुब्धोनैष्कृतिकःशठः २३ अव्रतीवृषलीभर्त्ताकुंडाशीसोमविक्रयी
निहीनसेवीविप्रोहियततेब्रह्मयोनितः २४ गुरुतल्पीगुरुद्रोहीगुरुकुत्सारतिश्चयः ब्रह्मविद्यापिपततिब्राह्मणो
ब्रह्मयोनितः २५ एभिस्तुकर्मभिर्देविशुभैराचरितैस्तथा शूद्रोब्राह्मणतांयातिवैश्यः क्षत्रियतांव्रजेत् २६ राम०
२९७

२८ चोक्षः शुद्धः २९ ३० ३१ ३२ ३३ ३३

शूद्रकर्माणि सर्वाणि यथान्यायं यथाविधि शुश्रूषां परिचर्यां च ज्येष्ठे वर्णे यथाविधिः २७ कुर्यादविमनाः शूद्रः सततं सत्पथे स्थितः
देवद्विजातिसत्कर्त्ता सर्वातिथ्यकृतव्रतः २८ ऋतुकालाभिगामी च नियतो नियताशनः चोक्षश्चोक्षजनान्वेषी शेषान्नकृतभो।
जनः २९ वृथामांसान्यभुञ्जानः शूद्रो वैश्यत्वमृच्छति ऋतवागनहंवादी निर्द्वन्द्वः शमकोविदः ३० यजते नित्ययज्ञैश्च स्वाध्या
यपरमः शुचिः दान्तो ब्राह्मणसत्कर्त्ता सर्ववर्णानुभूषकः ३१ गृहस्थव्रतमातिष्ठन् द्विकालकृतभोजनः शेषाशी विजिताहारो निः
कामो निरहंगमनः ३२ अग्निहोत्रमुपासंश्च जुह्वानश्च यथाविधि सर्वातिथ्यमुपातिष्ठन् शेषान्नकृतभोजनः ३३ त्रेताग्निमं
त्रविहितो वैश्यो भवति वै द्विजः स वैश्यः क्षत्रियो जातो जन्मप्रभृति संस्कृतः उपनीतो व्रतपरो द्विजो भवति सत्कृतः ३५ +प्र
कुले शुचिर्महतिजायते + ददाति यजते यज्ञैः समृद्धैराप्तदक्षिणैः अधीत्य स्वर्गमन्विच्छंस्त्रेताग्निशरणः सदा ३६
आर्त्तहस्तप्रदो नित्यं प्रजा धर्मेण पालयन् सत्यः सत्यानि कुरुते नित्यं यः सुखदर्शनः ३७ धर्मदण्डो न निर्दण्डो धर्मकार्यानु
शासकः यन्त्रितः कार्यकरणः षड्भागकृतलक्षणः ३८ ग्राम्यधर्मान्न सेवेत स्वच्छन्देनार्थकोविदः ऋतुकाले तु धर्मात्मा पत्नी
मुपशयेत् सदा ३९ ॥

प्रकुले शुचिर्महतिजायते ३४ स वैश्यः क्षत्रि ४४

सदोपवासीनियतः स्वाध्यायनिरतः शुचिः वर्हिकांतर्भितिनित्यंशयानोग्निगृहेसदा ४० सर्वातिथ्यंत्रिवर्गस्यकुर्वाणः सुमनाः सदा
शूद्राणांचान्नकामानांनित्यंसिद्धमितिब्रुवन् ४१ स्वार्थाद्वायदिवाकामान्नकिंचिदुपलक्षयेत् पितृदेवातिथिकृतेसाधनंकुरुतेचयः
४२ स्ववेश्मनियथान्यायमुपास्तेभैक्ष्यमेवच त्रिकालमग्निहोत्रंचजुह्वानोवैयथाविधि ४३ गोब्राह्मणहितार्थायरणेचाभिमुखोह
तः त्रेताग्निमंत्रपूतंवासमाविश्यद्विजोभवेत् ४४ ज्ञानविज्ञानसंपन्नः संस्कृतोवेदपारगः विप्रोभवतिधर्मात्माक्षत्रियः स्वेनकर्मणा
४५ एतैः कर्मफलैर्देविन्यूनजातिकुलोद्भवः शूद्रोप्यागमसंपन्नोद्विजोभवतिसंस्कृतः ४६ ब्राह्मणोवाप्यसद्वृत्तः सर्वसंकरभोज
नः ब्राह्मण्यंससमुत्सृज्यशूद्रोभवतितादृशः कर्मभिः शुचिभिर्देविविशुद्धात्माजितेंद्रियः शूद्रोपिद्विजवत्सेव्यइतिब्रह्माब्रवीत्स्वयं
४८ स्वभावंकर्मचशुभंयत्रशूद्रेपितिष्ठति विशिष्टः सद्विजातेर्वैविज्ञेयइतिमेमतिः ४९ नयोनिर्नापिसंस्कारोनश्रुतंनचसंततिः
कारणानिद्विजत्वस्यवृत्तमेवंतुकारणं ५ सर्वोयंब्राह्मणोलोकेवृत्तेनतुविधीयते वृत्तेस्थितस्तुशूद्रोपिब्राह्मणत्वंनियच्छति ५१
ब्रह्मस्वभावः सुश्रोणिसमः सर्वत्रमेमतिः निर्गुणंनिर्मलंब्रह्मयत्रतिष्ठतिसद्विजः ५२ ॥ ॥ ॥ ॥

प्रो ३

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

दाना

एतेयोनिफलाराविस्थानभागनिरूपकाः स्वयंचवरदेनोक्तं ब्रह्मणासृजताप्रजाः ५३ ब्राह्मणोपिमहत्क्षेत्रंलोकेचरतिपादवत् यत्र
त्रवीजंवपतिसाकृषिःप्रेत्यभाविनि ५४ मिताशिनासदाभाव्यंसत्पथालंबिनातथा ब्राह्मंमार्गमनुक्रम्यवर्तितव्यंबुभूषता ५५ सं
हिताध्यायिनाभाव्यंगृहेवैगृहमेधिना नित्यंस्वाध्याययुक्तेनध्ययनजीविना ५६ एवंभूतोहियोविप्रःसततंसत्पथेस्थितः आ
हिताग्निरधीयानोब्रह्मभूयायकल्पते ५७ ब्राह्मण्यंदेविसंप्राप्यरक्षितव्यंयतात्मना योनिप्रतिग्रहादानैःकर्मभिश्चशुचिस्मिते
५८ एतत्तेगुह्यमाख्यातंयथाशूद्रोभवेद्द्विजः ब्राह्मणोवाच्युतोधर्माद्यथाशूद्रत्वमाप्नुते ५९ इतिदानधर्मेषुउमामहेश्वरसंवादे उ
मोवाच भगवन्सर्वभूतेशसुरासुरनमस्कृत धर्माधर्मौनृणांदेवब्रूहिमेसंशयंविभो १ कर्मणामनसावाचात्रिविधंहिनरःसदा
बध्यतेबंधनैःपाशैर्मुच्यतेप्यथवापुनः २ केनशीलेनवैदेवकर्मणाकीदृशेनवा समाचारैर्गुणैःकैर्वास्वर्गंयांतीहमानवाः
३ देवउवाच देविधर्मार्थतत्वज्ञेधर्मनित्येउमेरते सर्वप्राणिहितःप्रश्नः श्रूयतांबुद्धिवर्द्धनः ४ ॥ ॥ ॥

फ३

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सेवेषामाश्रमाणां ... सर्वविवर्जिताः ६ नसज्जंतिसक्तानमचंति ७ प्राणातिपातात्इंद्रियाणांविषयाभिमुखात् १४ अकषायकृतः रागद्वे

हा०
२९९

सत्यधर्मरताः संतः सर्वलिंगविवर्जिताः नाधर्मेणानधर्मेणाबध्यंतेछिन्नसंशयाः ५ प्रलयोत्पत्तितत्वज्ञाः सर्वज्ञाः सर्वदर्शिनः वीत
रागाविमुच्यंतिपुरुषाकर्मबंधनैः ६ कर्मणामनसावाचायेनहिंसंतिकिंचन येनसज्जंतिकस्मिंश्चित्तेनबध्यंतिकर्मभिः ७
प्राणातिपाताद्विरताः शीलवंतोदयान्विताः तुल्यद्वेष्यप्रियादांतामुच्यंतेकर्मबंधनैः ८ सर्वभूतदयावंतोविश्वास्याः सर्वजंतुषु
त्यक्तहिंसासमाचारास्तेनराः स्वर्गगामिनः ९ परस्वेनिर्ममानित्यंपरदारविवर्जकाः धर्मलब्धान्नभोक्तारस्तेनराः स्वर्गगामिनः
१० मातृवत्स्वस्वसृवच्चैवनित्यंदुहितृवच्चये परदारेषुवर्तंतेतेनराः स्वर्गगामिनः ११ स्तैन्यान्निवृत्ताः सततंसंतुष्टाः स्व
धनेनच स्वभाग्यान्युपजीवंतितेनराः स्वर्गगामिनः १२ स्वदारनिरतायेचऋतुकालाभिगामिनः अग्राम्यसुखभोगाश्चतेनरा
ःस्वर्गगामिनः १३ परदारेषुयेनित्यंचारित्रावृतलोचनाः यतेंद्रियाः शीलपराः तेनराः स्वर्गगामिनः १४ एषदेव
कृतोमार्गः सेवितव्यः सदाबुधैः अकषायकृतश्चैवमार्गः सेव्यः सदाबुधैः १५ दानधर्मतपोयुक्तः शीलशौचदयात्मकः
वृत्त्यर्थंधर्महेतोर्वासेवितव्यः सदानरैः स्वर्गवासमभीप्सद्भिर्नसेव्यस्ततउत्तरः १७ ॥ ॥ ॥ ॥

राम०
२९९

पापभावार्थनिर्मितः १७ १७ १७ १७ १७

© Dhaarmartha Trust J&K. Digitized By eGangotri

१८ नर्मकेलिरतिं विनात्मयोर्हासप्रेमोत्साहनं ह्रासंतांडरामेवमाचाहिशुद्धेयारोपशूर्वकंगालनं १९ २० ३० ॥ ॥ ॥

उमोवाच वाचातुबध्यतेयेनमुच्यतेह्यथवापुनः तानिकर्माणिमेदेववदभूतपतेनघ १८ महेश्वरउवाच आत्महेतोः परार्थेवानर्महा
स्याश्रयात्तथा येमृषान वदंतीहतेनराः स्वर्गगामिनः १९ वृत्त्यर्थंधर्महेतोर्वाकामकारात्तथैवच अनृतंयेनभाषंतेतेनराः स्वर्गगा
मिनः २० श्लक्ष्णांवाणींनिराबाधांमधुरांपापव—र्जितां स्वागतेनाभिभाषंतेतेनराः स्वर्गगामिनः २१ कटुकंयेनभाषंतेप
रुषंनिष्ठुरंगिरं अपैशुन्यरताः संतस्तेनराः स्वर्गगामिनः २२ पिशुनांयेनभाषंतेमित्रभेदकरींगिरं ऋतांमैत्रींतुभाषंतेतेनराः
स्वर्गगामिनः २३ येवर्जयंतिपरुषंपरद्रोहंचमानवाः सर्वभूतसमादांतास्तेनराः स्वर्गगामिनः २४ शठप्रलापाद्विरताविरुद्धप
रिवर्जकाः सौम्यप्रलापिनोनित्यंतेनराः स्वर्गगामिनः २५ नकोपाद्व्याहरंतेयेवाचंहृदयदारणीं सांत्वंवदंतिक्रुद्धापितेनराः स्व
र्गगामिनः २६ एषवाणीकृतोदेविधर्मः सेव्यः सदानरैः शुभः सत्यगुणोनित्यंवर्जनीयामृषाबुधैः २७ उमोवाच मनसा
बध्यतेयेनकर्मणापुरुषः सदा तन्मेब्रूहिमहाभागदेवदेवपिनाकधृक् २८ महेश्वरउवाच मानसेनेहधर्मेणासंयुक्ताः पुरु
षाः सदास्वर्गंगच्छंतिकल्याणितन्मेकीर्तयतः शृणु २९ दुष्प्रणीतेनमनसादुष्प्रणीतांतराकृतिः नरोबध्येतयेनेहशृणु
वाक्यंशुभानने ३०

© (c) Dharmartha Trust J&K. Digitized By eGangotri

द्रो०
३००

नहिंसंति श्रारेणेनन्नमलाभिंनंनपीडयंति ३१ ३२ ३३ ३४ ३५

अरण्येपि विजने न्यस्तं परस्वं दृश्यते यदा मनसापि न हिंसंति ते नराः स्वर्गगामिनः ३१ ग्रामे गृहे वा ये द्रव्यं पारक्यं विजने स्थितं
नाभिनंदंति वै नित्यं ते नराः स्वर्गगामिनः ३२ तथैव परदारान्ये कामवृत्तान् रहोगतान् मनसापि न हिंसंति ते नराः स्वर्गगामिनः
३३ शत्रुं मित्रं च ये नित्यं तुल्येन मनसा नराः भजंति मैत्राः संगम्य ते नराः स्वर्गगामिनः ३४ श्रुतवंतो दयावंतः शुचयः सत्य
संगराः स्वैरर्थैः परिसंतुष्टास्ते नराः स्वर्गगामिनः ३५ अवैरा ये त्वनायासा मैत्रीचित्तरताः सदा सर्वभूतदयावंतस्ते नराः स्वर्ग
गामिनः ३६ शुभानामशुभानामशुभानां च कर्मणां फलसंचये विपाकज्ञाश्च ये देवि ते नराः स्वर्गगामिनः मायापितागुरुणा
पेताश्च द्विजपराः सदा समताः समनुप्राप्तास्ते नराः स्वर्गगामिनः ३८ शुभैः कर्मफलैर्देवि मयैते परिकीर्तिताः स्वर्गमार्गपरा भू
यः किं त्वं श्रोतुमिच्छसि ५० उमोवाच महान्मे संशयः कश्चिन्मर्त्यान्प्रति महेश्वर तस्मात्त्वं निपुणेनाद्य मम व्याख्यातुम
र्हसि ५१ केनायुर्लभते दीर्घं कर्मणा पुरुषः प्रभो तपसा वापि देवेश केनायुर्लभते महत् ५२ क्षीणायुः केन भवति राम०
कर्मणा भुवि मानवः विपाकं कर्मणां देव वक्तुमर्हस्यनिंदित ५३ ॥ ॥ ॥ ॥ ॥ ३००

अपरे च महाभागा मंदभाग्यास्तथापरे अकुलीनास्तथा चान्ये कुलीनाश्च तथापरे ४४ दुर्दर्शनाः केचिदाभांति नराः काष्ठमया इव प्रियदर्शना
स्तथा चान्ये दर्शनीया इव मानवाः ४५ दुष्प्रज्ञाः केचिदाभांति केचिदाभांति पंडिताः महाप्रज्ञास्तथैवान्ये ज्ञानविज्ञानभाविनः ४६ अल्पाबाधा
स्तथा केचिन्महाबाधास्तथापरे दृश्यंते पुरुषा देव तन्मे व्याख्यातुमर्हसि ४७ देव उ० हंत ते हं प्रवक्ष्यामि देवि कर्मफलोदयं मर्त्यलो
के नरः सर्वो येन स्वं फलमश्नुते ४८ प्राणातिपाते यो रौद्रो दंडहस्तोद्यतः सदा नित्यमुद्यतशस्त्रश्च हंति भूतगणान्नरः ४९ निर्दयः
सर्वभूतानां नित्यमुद्वेगकारकः अपि कीटपिपीलानामशरण्यः सुनिर्घृणः ५० एवंभूतो नरो देवि निरयं प्रतिपद्यते विपरीतस्तु धर्मा
त्मा रूपवानभिजायते ५१ निरयं याति हिंसात्मा याति स्वर्गमहिंसकः यातनां निरये रौद्रां स कृच्छ्रां लभते नरः ५२ यदि हि चेन्निरयात्त
स्मात्समुत्तरति कर्हिचित् मानुष्यं लभते चापि हीनायुस्तत्र जायते ५३ पापेन कर्मणा देवि बद्धो हिंसारतिर्नरः अप्रियः सर्वभूतानां ही
नायुरुपजायते ५४ यस्तु शुक्लाभिजातीयः प्राणिघातविवर्जकः निक्षिप्तशस्त्रो निर्दंडो न हिंसति कदाचन ५५ न घातयति नो
हंति हंतुं वान्वमोदते सर्वभूतेषु सस्नेहो यथात्मनि तथापरे ५६ ईदृशः पुरुषोत्कर्षो देवि देवत्वमश्नुते उपपन्नान्सुखान्भोगानु
पाश्नाति मुदायुतः ५७

© Dharmarth Trust J&K. Digitized By eGangotri

दा०
३०१

५९ अध्याय: किंशील: २ नैत्यकानि निरपेक्ष्याणि किमिष्टकं किमिष्टसीनि श्लापदीप्सितं दीपनेन किमिष्टकं ३ ४ ७ ॥ ॥ ॥

अथ चेन्मानुषे लोके कदाचिदुपपद्यते तत्र दीर्घायुरुत्पन्नः स नरः सुखमेधते ५८ एष दीर्घायुषां मार्गः सुवृत्तानां सुकर्मणां प्राणि।
हिंसाविमोक्षेणाव्रह्मणा समुदीरितः ५९ इति दानधर्मेषु उमामहेश्वरसंवादे उमोवाच किंशीलः किंसमाचारः पुरुषः कैश्च कर्म
भिः स्वर्गं समभिपद्येत संप्रदानेन केन वा १ महेश्वर उवाच दाता ब्राह्मणसत्कर्ता दीनान्धकृपणादिषु भक्ष्यभोज्यान्नपानानां वास
सां च प्रदायकः २ प्रतिश्रयान् सभाः कूपान् प्रपाः पुष्करिणीस्तथा नैत्यकानि च सर्वाणि किमिष्टकमतीव च ३ आसनं शयनं या
नं गृहं रत्नं धनं तथा सस्यजातानि सर्वाणि गोक्षेत्राण्यथ योषितः ४ सुप्रतीतमना नित्यं यः प्रयच्छति मानवः एवं भूतो नरो
देवि देवलोकेऽभिजायते ५ तत्रोष्य सुचिरं कालं भुक्त्वा भोगाननुत्तमान् महाप्सरोभिः सहितो रमित्वा नन्दनादिषु ६ तस्मात्स्वर्गाच्च्यु
तो लोके मानुषेषूपजायते महाभोगकुले देवि धनधान्यसमन्वितः ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
३०१

© Dharmartha Trust J&K. Digitized By eGangotri

अतिथीन्दृष्ट्वैतेयाच्यमानाः संतो निवर्तन्तेनप्रयच्छंति ११ १२ १९ २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्रकामगुणैः सर्वैः समुपेतासुरासुराः महाभोगामहाकोशाधनीभवंतिमानवाः ८ एतेदेविमहाभागाः प्राणिनोदानशीलिनः ब्रा
ह्मणोविपुराप्रोक्ताः सर्वस्यप्रियदर्शनाः ९ अपरेमानवादेविप्रदानकृपणाद्विजैः याचितानप्रयच्छंतिविद्यमानेप्यल्पबुद्धयः १० दीना
न्धकृपणान्दृष्ट्वाभिक्षुकानतिथीनपि याच्यमानानिवर्तन्तेजिह्वा लोभसमन्विताः ११ नधनानिनवासांसिनभोगान्नचकांचनं गा
नवोनान्नविकृतिंप्रयच्छंतिकदाचन १२ अप्रदा नाश्मेपलुब्धानास्तिकादानवर्जिताः एवंभूतानरादेविनिरयंयांत्यल्पबुद्धयः १३
तेवैमनुष्यतांयांतियदाकालस्यपर्ययात् धनरिक्तेकुलेजन्मलभंतेस्वल्पबुद्धयः १४ क्षुत्पिपासापरीताश्चसर्वलोकबहिष्कृता
ः निराशाःसर्वभोगेभ्याजीवंत्यधनजीविकाः १५ अल्पभोगकुलेजाताअल्पभोगरतानराः अनेनकर्मणादेविभवंत्यधनिनोनरा
ः १६ अपरेस्तंभिनोनित्यंमानिनःपापिनोनराः आसनार्हस्ययेपीठंनप्रयच्छंत्यचेतसः १७ मार्गार्हस्यचयेमार्गंनयच्छंत्यल्प
बुद्धयः पाद्यार्हस्यचयेपाद्यंनददत्यल्पबुद्धयः १८ सत्क्रियार्हान्नसत्कारैरर्चयंतियथाविधि अर्घ्यमाचमनीयंवानयच्छं
त्यल्पबुद्धयः १९ गुरुंचाभिगतंप्रेम्णागुरुवन्नबुभूषते अभिमानप्रवृत्तेनलोभेनसमवस्थिताः २० ॥ ॥ ॥

न ३

© Dharmartha Trust J&K. Digitized by eGangotri

दा०
३०२

२२ गुरुवृद्धापचापिनः गुरूणांचहीनत्वसंपादकाः २६ गुरुवत्पितृवत् ३० उदात्तंयशस्ते ३१ ३१ ॥ ॥ ॥ ॥

संमान्यांश्चावमन्यंतेवृद्धान्परिभवंतिच एवंविधानरादेविसर्वेनिरयगामिनः २१ नैवेयदिनरास्तस्मान्निरयादुत्तरंतिवै वर्षपूगैस्त
तोजन्मलभंतेकुत्सितेकुले २२ श्वपाकपुल्कसादीनांकुत्सितानामचेतसां कुलेषुतेषुजायंतेगुरुवृद्धापचापिनः २३ नस्त
भीनचमानीयोदेवताद्विजपूजकः लोकपूज्योनमस्कर्ताप्रश्रितोमधुरंवचः २४ सर्ववर्णप्रियकरःसर्वभूतहितःसदा अद्वेषी
सुमुखः श्लक्ष्णस्निग्धवाणीमृदुः सदा २५ स्वागतेनैवसर्वेषांभूतानामविहिंसकः यथार्हसत्क्रियापूर्वमर्चयन्नुपतिष्ठति २६
मार्गार्होयदद्न्मार्गंगुरुंगुरुवदर्चयेत् अतिथिप्रग्रहरतस्तथाभ्यागतपूजकः २७ एवंभूतोनरोदेविस्वर्गतिंप्रतिपद्यते त
तोमानुषमासाद्यविशिष्टकुलजोभवेत् २८ तत्रासौविपुलैर्भोगैः सर्वरत्नसमायुतः यथार्हदाताचार्हेषुधर्मचर्यापरोभवे
त् २९ संमतः सर्वभूतानांसर्वलोकनमस्कृतः स्वकर्मफलमाप्नोतिस्वयमेवनरः सदा ३० उदात्तकुलजातीयउ
दात्ताभिजनः सदा एषधर्मोमयाप्रोक्तोविधात्रास्वयमीरितः ३१ ३१ ३१

३१ उद्दः सिद्धांतः अथोद्देः पूर्वपक्षः ५० ५१ ५२ ५३ ५॥ ॥ ॥ ॥ ॥ ॥

त

यस्त्वैरौद्रसमाचारः सर्वभूतभयंकरः हस्ताभ्यां यदि वा पद्भ्यां रज्ज्वा दंडेन वा पुनः ३२ लोष्टैः स्तंभैरुपायैर्वा जंतून्बाधति शोभने
हिंसार्थं निकृतिप्रज्ञः प्रोद्वेजयति चैव ह ३३ उपक्रामति जंतूंश्च उद्वेगजनकः सदा एवंशीलसमाचारो निरयं प्रतिपद्यते ३४
सचेन्मनुष्यतां गच्छेद्यदि कालस्य पर्ययात् बह्वाबाधापरिक्लिष्टे [illegible] जायते सोऽधमे कुले ३५ लोकद्वेष्योऽधमः पुंसां स्वयं--
कर्मफलैः कृतैः एष तेऽद्य मनुष्येषु बोद्धव्यो ज्ञातिबन्धुषु ३६ अपरः सर्वभूतानि दयावाननुपश्यति मैत्रदृष्टिः पितृस-
मो निर्वैरो नियतेंद्रियः ३७ नोद्वेजयति भूतानि न विहिंसयते तथा हस्तपादैः सुनियतैर्विश्वास्यः सर्वजंतुषु ३८ न रज्ज्वा
न च दंडेन न लोष्टैर्नायुधेन च उद्वेजयति भूतानि श्लक्ष्णकर्मा दयापरः ३९ एवंशीलसमाचारः स्वर्गे समुपजायते तत्रासौ भवने
दिव्ये मुदा वसति देववत् ४० स चेत्कालक्षयान्मर्त्यो मनुष्येषूपजायते अल्पाबाधो निरातंकः स जातः सुखमेधते ४१
सुखभागी निरायासो निरुद्वेगः सदा नरः एष देवि सतां मार्गो बाधा यत्र न विद्यते ४२ उमोवाच इमे मनुष्या दृश्यंते ऊहापो-
५३ हविशारदाः ज्ञानविज्ञानसंपन्नाः प्रज्ञावंतोऽर्थकोविदाः ४३ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दृ०
२०३

दुःप्रज्ञाश्चापरेदेवज्ञानविज्ञानवर्जिताः केनकर्मविपाकेनप्रज्ञावाननुरूपोभवेत् ४४ अल्पप्रज्ञोविरूपाक्षकथंभवतिमानवः एत
न्मेसंशयंछिंधिसर्वधर्मविदांवर ४५ जात्यंधाश्चापरेदेवरोगार्त्ताश्चापरेतथा नराःक्लीबाश्चदृश्यंतेकारणंब्रूहितत्रवै ४६ महेश्व
रउ० ब्राह्मणान्वेदविदुषः सिद्धान्धर्मविदस्तथा परिपृच्छंत्यहरहः कुशलाकुशलंतथा ४७ वर्जयंतोऽशुभंकर्मसेवमानाःशुभंतथा ल
भंतेस्वर्गतिंनित्यमिहलोकेऽपितेसुखं ४८ सर्वेन्मानुषतांयांतिमेधाविनस्तत्रजायंते श्रुतंप्रज्ञानुगंतस्यकल्याणमुपजायते ४९
परदारेषुयेमूढाश्चक्षुर्दुष्टंप्रयुंजते तेनदुष्टस्वभावेनजात्यंधास्तेभवंतिते ५० मनसातुप्रदुष्टेन नग्नांपश्यंतियेस्त्रियं रोगा
र्त्तास्तेभवंतीहनराःदुष्कृतकर्मिणः ५१ येतुमूढादुराचाराविर्योनौमैथुनेरताः पुरुषेषुचदुष्प्रज्ञाः क्लीबत्वमुपयांतिते
५२ पशूंश्चयेवधयंतियेचैवगुरुतल्पगाः प्रकीर्णमैथुनायेचक्लीबाजायंतितेनराः ५३ उमोवाच सावद्यंकिंनुवैक
र्मनिरवद्यंतथैवच श्रेयःकुर्वन्नवाप्नोतिमानवोदेवसत्तम ५४ महेश्वरउ० श्रेयांसंमार्गमन्विच्छन्सदायःपृच्छतिद्विजा
न् धर्मान्वेषीगुणाकांक्षीसस्वर्गंसमुपाश्नुते ५५ ॥

राम०
२०३

६४ अध्यायः पत्र १ २ ३ ४ ४ ४ ४ ४ ४

त्परि १

यद्दिमानुषमांदेविकद्दाचिगछति मेधावीधारणायुक्तः प्राज्ञस्तत्राभिजायते ५६ एषदेविसतांधर्मोमंतव्योभूतिकारकः नृणां
हितार्थायमयात्तर्वेवैसमुदाहृतः ५७ उमोवाच अपरेअल्पविज्ञानाधर्मविद्वेषिणोनराः ब्राह्मणान्वेदविदुषोनेछंतिपरिसर्पितुं
५८ व्रतवंतोनराः केचित्श्रद्धाधर्मपरायणाः अव्रताभ्रष्टनियमास्तथान्येराक्षसोपमाः ५९ यज्वानश्चतथैवान्येनिर्होमाश्च
तथापरे केनकर्मविपाकेनभवंतीहवदस्वमे ६० महेश्वरउ० आगमालोकधर्माणांमर्यादाः पूर्वनिर्मिताः प्रामाण्येनानुव
र्तंते दृश्यंतेचदृढव्रताः अधर्मेधर्ममित्याहुर्येचमोहवशंगताः अव्रतानष्टमर्यादास्तेप्रोक्ताब्रह्मराक्षसाः ६२ येवैकाल
कृतोयोगात्संभवंतीहमानुषाः निर्होमानिर्वषट्काराःतेभवंतिनराधमाः ६३ एषदेविमयासर्वः संशयछेदनायते कुश
लाकुशलोनृणांव्याख्यातोधर्मसागरः नारदउवाचाथवमुक्त्वामहादेवः श्रोतुकामः स्वयंप्रभुः। अनुकूलांप्रियांभार्यांपार्श्व
स्थांसमभाषत ६४ उमामहेश्वरसंवादे महेश्वरउ० परावरज्ञेधर्मज्ञेतपोवननिवासिनि साध्विसुभ्रुसुकेशांतेहिमवत्प
र्वतात्मजे १ दक्षेशमदमोपेतेनिर्ममेधर्मचारिणि पृछाम्यहंत्वांवरारोहे पृष्टावदममेप्सितं २ सावित्रीब्रह्मणः साध्वीकौशि
कस्यशचीसती मार्कंडेयस्यधूमोर्णाऋद्धिर्वैश्रवणस्यच ३ वरुणस्यतथागौरीसूर्यस्यचसुवर्चला रोहिणीशशिनः सा
ध्वीस्वाहाचैवविभावसोः ४ ॥ ॥

गुणवानसस्त्रीधर्मः ८ गौर्यामंमोगच्छति अनादिपरंपरयाचलति ९ १० ११ १२ १३ १४ १५ १५

शि०
३०४

अदितिः कश्यपस्याथ सर्वाश्चाः पतिदेवताः पृष्टाश्चोपासिताश्चैव तास्त्वयोर्विनिस्पृशः ५ तेनत्वां परिपृच्छामि धर्मज्ञे धर्मचारिणि
स्त्रीधर्मं श्रोतुमिच्छामि त्वयोदाहृतमादितः ६ सधर्मचारिणी मेत्वं समशीला समव्रता समानसारवीर्या च तपस्तीव्रं कृतं च ते
त्वया ह्युक्तो विशेषेण गुणवान्स भविष्यति लोके चैव नयादेवि प्रमाणत्वमुपैष्यति ७ स्त्रियश्चैव विशेषेण स्त्रीजनस्य गतिः प
रा गौर्या गच्छति सस्थानि लोके ष्वेषा स्थितिः सदा ८ मम चार्द्धं शरीरस्य मन वचार्द्धेन निर्मितं सुरकार्यकरी च त्वं लोकसंतानका
रिणि १० तवसर्वं सुविदितः स्त्रीधर्मः शाश्वतः शुभं तस्मादशेषतो ब्रूहि स्वधर्मं विस्तरेण मे ११ उमोवाच भगवन्सर्व
भूतेश भूतभव्यभवोद्भव त्वत्प्रभावादियं देववाक्यैव प्रतिभाति मे १२ इमास्तु नद्यो देवेश सर्वतीर्थोदकैर्युताः उपस्पा
र्शनहेतोस्त्वामुपयांति समीपतः १३ एताभिः सह संमंत्र्य प्रवक्ष्याम्यनुपूर्वशः प्रभवन्योनहंवादी सवैपुरुष उच्यते
१४ स्त्री च भूतेश सततं स्त्रियमेवानुधावति मया संमानिताश्चैता भविष्यंति सरिद्वराः १५ ॥ ॥ ॥

राम०
३०५

© Dharmartha Trust J&K. Digitized By eGangotri

एषासरस्वतीपुरपानदीनामुत्तमानदी प्रथमासर्वसरितांनदीसागरगामिनी १६ विपाशाचवितस्ताचचंद्रभागाइरावती शतद्रुर्देवि
कासिंधुःकौशिकीगौतमीतथा १७ तथादेवनदीचेयंसर्वतीर्थाभिसंवृता गगनाद्गांगतादेवीगंगासर्वसरिद्वरा १८ इत्युक्ताहं
देवस्यपत्न्याधर्मभृतांवर स्मितपूर्वमथाभाष्यसर्वास्ताः सरितस्तथा १९ अपृच्छद्देवमहिषीस्त्रीधर्मंधर्मवत्सला स्त्रीधर्मकुश
लास्तावैगंगाद्याः सरितांवराः २० उमोवाच अयंभगवताप्रश्नोदत्तस्त्रीधर्मसंश्रितः तंतुसंमंत्र्ययुष्माभिर्वक्तुमिच्छामिशंकरं
२१ नचैकसाध्यंपश्यामिविज्ञानंभुविकिंचन दिविचासागरगमास्तेनवोमानयाम्यहं २२ एवंसर्वाः सरिच्छ्रेष्ठाः पृष्टाः पुण्य
तमाः शिवाः ततोदेवीनदीगंगानियुक्ताप्रतिपूज्यतां २३ वह्वीभिर्वुद्धिभिः स्फीतास्त्रीधर्मज्ञाशुचिस्मिता शैलराजसुतांदेवींपु
ण्यपापभयापहा २४ बुध्याविनयसंपन्नासर्वज्ञानविशारदा सस्मितंवहुबुध्याढ्यागंगावचनमब्रवीत २६ प्रभवान्स्मथ
तेयोहिसंमानयतिवापुनः नूनंमन्येसधर्मात्मापंडितास्वांसगच्छति २७ ज्ञानविज्ञानसंपन्नानूहापोहविशोधमास्मानुग
हीतास्मिदेविधर्मपरायणयाचसर्वजगन्मातानदीमानयसेहान प्रवक्तृन्पृच्छतेयोन्यान्सवैनापदमृच्छति २८ ॥

वश्यभावेनमंत्रादिनावशीकरणंविना ३९ चंद्रसूर्यौनतरुन्प्रियापुरुषनामतान्निरीक्षतेकिंपुनरपशुंवैतिमायः ४० ॥ ॥ ॥ ॥

अन्यथावहुबुध्याहंयोगासंचरंतिसंसहि अन्येथैवास्महंधारीदुर्बलंवस्तेतवचः २९ दिव्यज्ञानेदिवियेष्टेदिवःपुरोप महेशस्थितेत्वमे
वाहेसितेदेविस्त्रीधर्मानतनुभाषितुं ३० भीष्मउ० ततःसाराधितादेवीगंगायावसुमिर्गुणैः प्राहसर्वमशेषेणस्त्रीधर्मंसुरसुंदरी ३१
उमोवाच स्त्रीधर्मोमांप्रतियथाप्रतिभातियथाविधि तमहंकीर्तयिष्यामितथैवप्रथितामव ३२ स्त्रीधर्मःपूर्वमेवायंविवाहेवंधुभि
ःकृतः सहधर्मचरीभर्तुर्भवत्यग्निसमीपतः ३३ सुस्वभावासुवचनासुवृत्तासुखदर्शना पुत्रवक्त्रमिवाभीक्ष्णंभर्तुर्वदनमीक्ष
ते ३४ यासाध्वीनियताहारासाभवेद्धर्मचारिणी श्रुत्वादंपतिधर्म्मंवैसहधर्म्मकृतंशुभं ३५ याभवेद्धर्मपरमानारीभ
र्तृसमव्रता देववत्सततंसाध्वीभर्त्तारमनुपश्यति ३६ शुश्रूषांपरिचर्यांचदेववत्तुल्यप्रकुर्वती वश्याभावेनसुमनाः सु
व्रतासुखदर्शना ३७ अनन्यचित्तासुमुखीसानारीधर्म्मचारिणी ३८ परुषाण्यपिचोक्तायादृष्टावादुष्टेनचक्षुषा सुप्रस
न्नमुखीभर्तुर्यानारीसापतिव्रता ३९ नचंद्रसूर्यौनतरुंपुन्नाम्नोयानिरीक्षते भर्तृवर्ज्यावरारोहासाभवेद्धर्मचारिणी ४० ॥

२१

© (c) Dhaarmartha Trust J&K. Digitized By eGangotri

[illegible] लिमाव: ४४ सुसंमृष्टक्षयाशोधितगृहा ४९ लघुसलयाशीघ्रमर्योदावर्चोविमघध्या ५०

म ३

[illegible] चारिणी ५० दरिद्रं व्याधितं दीनं स्वध्वनापरिकर्षितं पतिं पुत्रमि
वोपास्ते सा नारी धर्मचारिणी ५१ या नारी प्रयता दक्षा या नारी पुत्रिणी भवेत् पतिव्रता पतिप्राणा सा नारी धर्मभागिनी ५२ सु
श्रूषां परिचर्यां च करोत्यविमनाः सदा सुप्रीता च विनीता च सा नारी धर्मभागिनी ५३ न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा स्पृ
हा यस्या यथा पत्यौ सा नारी धर्मभागिनी ५४ कल्योत्थानरतिर्नित्यं गुरुशुश्रूषणे रता सुसंमृष्टक्षया चैव गोशकृत्कृतलेपना
५५ अग्निकार्यपरा नित्यं सदा पुष्पबलिप्रदा देवतातिथिभृत्यानां निर्वाप्य पतिना सह ५६ शेषान्नमुपभुञ्जाना यथान्याय
यथाविधि तुष्टपुष्टजना नित्यं नारी धर्मेण युज्यते ५७ श्वश्रूश्वशुरयोः पादौ तोषयन्ती गुणान्विता मातापितृपरा नित्यं [illegible] ५८ पानादीपावतिश्रुता ३
[illegible] रणान्दुर्बलानाथान्दीनांधकृपणांस्तथा। बिभर्त्यन्नेन या नारी सा पतिव्रतभागिनी पतिचिन्तापतिहिता सा पति
व्रतभागिनी ५० पुण्यमेतत्तपश्चैव स्वर्ग-- श्चैष सनातनः या नारी भर्तृपरमा भवेद्भर्तृव्रता सती ५१ [illegible]
[illegible] ५२ ॥ ॥ ४९ ॥ ॥

दा०
३०६

५९ अध्यायः पिनाकिनी अस्मिन् ध्यायेयो हि मां रहुमिच्छेते स्तो कहृयेन यत्नविष्णु कद्दगामैकमूर्त्तं दर्शितं यस्मात् पदर्शितं ततदेवान्तो यं सदृतमिति तो ध्यं ५६

पतिर्हि देवो नारीणां पतिर्बंधुः पतिर्गतिः यत्या समा गतिर्नास्ति दैवतं वा यथा पतिः ५२ पतिप्रसादात् स्वर्गो वा तुल्यो नार्या न वा भवे
त् अहं स्वर्गं न हीच्छेयं त्वय्यप्रीते महेश्वर ५३ यद्यकार्यमधर्म्मं वा यदि वा प्राणनाशनं पतिर्ब्रूयाद्दरिद्रो वा व्याधितो वा कथंचन ५४
आपन्नो रिपुसंस्थो वा ब्रह्मशापार्दितोपि वा आपद्धर्मान् अनुप्रेक्ष्य तत्कार्यमविशंकया ५५ एष देव मया प्रोक्तः स्त्रीधर्म्मो वचना
त्तव या त्वेवं भाविनी नारी सा पतिव्रतभागिनी ५६ भीष्म उ० इत्युक्तः स तु देवेशः प्रतिपूज्य गिरेः सुतां लोकान् विसर्जयामास सर्वै
रनुचरैर्वृतान् ५७ ततो ययुर्भूतगणाः सरितश्च यथागतं गंधर्वाप्सरसश्चैव प्रणम्य शिरसा भवं ५८ दानधर्म्मे उमामहेश्वरसंवादे
ऋषय ऊचुः पिनाकिन् भगनेत्रघ्न सर्वलोकनमस्कृत माहात्म्यं वासुदेवस्य श्रोतुमिच्छाम शंकर त्वं हि देवत्वमस्य जानीषे परात्महि
रेहरिं। गुणान् गणितान् मुख्यं सर्वान् यथाविशेषतः महेश्वर उ० पितामहादपि वरः शाश्वतः पुरुषो हरिः कृष्णो जाम्बूनदाभासो व्य
भ्रे सूर्य इवोदितः २ दशबाहुर्महातेजा देवतारिनिषूदनः श्रीवत्सांको हृषीकेशः सर्वदैवतपूजितः ब्रह्मा तस्योदरभवस्तथा
हं च शिरोभवः शिरोरुहेभ्यो ज्योतींषि रोमेभ्यश्च सुरासुराः ४ ऋषयो देहसंभूतास्तस्य लोकाश्च शाश्वताः पितामहगृहं सा
क्षात् सर्वदेवगृहं च सः ५ सोस्याः पृथिव्याः कृत्स्नायाः स्रष्टा त्रिभुवनेश्वरः संहर्त्ता चैव भूतानां स्थावरस्य चरस्य च ६ ॥ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

सहिदेववरः साक्षाद्देवनाथः परंतपः सर्वज्ञः सर्वसंश्लिष्टः सर्वगः सर्वतोमुखः ७ परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः नतस्मात्परमं भू
तं त्रिषु लोकेषु किंचन ८ सनातनो वै मधुहा गोविंद इति विश्रुतः समर्थो मार्थिवान्नंतव्येघातपिष्यति मानवः ९ सुरकार्यार्थमुत्पन्नो मानुषं
वपुरास्थितः नहि देवगणाः शक्तास्त्रिविक्रमविनाकृताः १० भुवने देवकार्याणि कर्तुं नायकवर्जिताः नायकः सर्वभूतानां सर्वैर्नमा ६८३
स्कृतः ११ एतस्य देवनाथस्य देवकार्यपरस्य च ब्रह्मभूतस्य सततं ब्रह्मर्षिशरणस्य च १२ ब्रह्मावसति गर्भस्थः शरीरे सुखसंस्थितः शा
र्वः सुखं संश्रितस्त्वच्छरीरे सुखसंस्थितः १३ सर्वाः सुखं संश्रितास्त्वच्छरीरे तस्य देवताः स देवः पुंडरीकाक्षः श्रीगर्भः श्रीसहोषितः १४ शा
र्ङ्गचक्रायुधः खड्गी सर्वनागरिपुध्वजः उत्तमेन सुशीलेन शौचेन च दमेन च पराक्रमेण वीर्येण वपुषा दर्शनेन च १६ आरोहेण प्रमा
णेन धैर्येणार्जवसंपदा आनृशंस्येन रूपेण बलेन च समन्वितः १७ अस्त्रैः समुदितः सर्वैर्दिव्यैरद्भुतदर्शनैः योगमायासहस्राक्षो नि
रवग्रो महामनाः १८ वीरो मित्रजनश्लाघी ज्ञातिबंधुजनप्रियः क्षमावांश्चानहंवादी ब्रह्मण्यो ब्रह्मनायकः १९ भयहर्त्ता भयार्त्ता
नां मित्राणां नंदिवर्द्धनः शरण्यः सर्वभूतानां दीनानां पालने रतः २० श्रुतवानर्थसंपन्नः सर्वभूतनमस्कृतः समाश्रितानां शत्रू उपि:४
णामपि धर्मवित् २१ नीतिज्ञो नीतिसंपन्नो ब्रह्मवादी जितेंद्रियः भवार्थमिह देवानां बुद्ध्या परमया युतः २२ प्राजापत्ये शुभे मार्गे
मानवे धर्मसंस्कृते समुत्पत्स्यति गोविंदो मनोर्वंशे महात्मनः २३ अंगो नाम मनोः पुत्रो अंतर्द्धामा ततः परं अंतर्द्धाम्नो हविर्द्धा
मा प्रजापतिरनिंदितः २४ प्राचीनबर्हिर्भविता हविर्द्धाम्नः सुतो महान् तस्य प्रचेतःप्रमुखा भविष्यंति दशात्मजाः २५

२१

© Dharmartha Trust J&K. Digitized By eGangotri

हा०
३०७

प्राचेतसस्तथादक्षोभवितेहप्रजापतिः दाक्षायणात्तथादित्योमनुरादित्यतस्तथा २६ मनोश्चवंशजइलासुद्युम्नश्चभविष्यति बुधात्सु
रूरवाश्चापितस्मादायुर्भविष्यति २७ नहुषोभवितातस्माद्ययातिस्तस्यचात्मजः यदुस्तस्मान्महासत्वः क्रोष्टातस्माद्भविष्यति २८
क्रोष्टुश्चैवमहान्पुत्रोवृजिनीवान्भविष्यति वृजिनीवतश्चभवितापराजितः २९ रुषंगोभवितापुत्रस्तस्यचित्ररथस्तथा तस्यत्ववरजंपुत्रः
शूरोनामभविष्यति ३० तेषांविख्यातवीर्याणांचारित्रगुणशालिनां यज्वनांसुविशुद्धानांवंशेब्राह्मणसंमते ३१ सशूरः क्षत्रियश्रेष्ठो
महावीर्योमहायशाः स्ववंशविस्तरकरंजनयिष्यतिमानदः ३२ वसुदेवमितिख्यातंपुत्रमानकदुंदुभिं तस्यपुत्रश्चतुर्बाहुर्वासुदे
वोभविष्यति ३३ दाताब्राह्मणसत्कर्त्ताब्रह्मभूतोद्विजप्रियः राज्ञोमागधसंरुद्धान्मोक्षयिष्यतिमाधवः ३४ जरासंधंतुराजानंनि
र्जित्यगिरिगह्वरे सर्वपार्थिवरत्नाढ्योभविष्यतिसवीर्यवान् ३५ पृथिव्यामप्रतिहतोवीर्येणचभविष्यति विक्रमेणचसंपन्नः स ति२
र्वपार्थिवपार्थिवः ३६ शूरसेनेषुसंभूत्वाद्वारकायांवसन्प्रभुः पालयिष्यतिगांदेवींविजित्यनयवित्सदा ३७ तंवैतंसमासाद्यवा
ग्भैरहतैर्वरैः अर्चयस्वयथान्यायंब्रह्माणमिवशाश्वतं ३८ योहिमांद्रष्टुमिच्छेतब्रह्माणंचपितामहं द्रष्टव्यस्तेनभगवान्वा
सुदेवःप्रतापवान् ३९ दृष्टेतस्मिन्नहंदृष्टोनमे ॥ ॥ ॥ ॥ ॥ ॥

सं२

राम०
३०७

© Dharmarth Trust J&K Digitized By eGangotri

न्नास्तिविचारणा पितामहोवादेवेषु इतितिवित्ततपोधनाः ४० सयस्यपुंडरीकाक्षः प्रीतिपुक्तोभविष्यति तस्यदेवगणाः प्रीताश्च
स्तपूर्वोभविष्यति ४१ पश्चात्तेमानवोलोके संश्रयिष्यतिकेशवं तस्यकीर्तिर्जयश्चैवस्वर्गश्चैवभविष्यति ४२ धर्म्मोपदेशिकः सा
साक्षात्सभविष्यतिधर्म्मभाक् धर्म्मविद्भिः सदेवेशोनमस्कार्यः सदोद्यतैः ४३ धर्म्मएवपरोहिंसात्वस्मिन्नभ्यर्च्चितेविभौ सहिदे
वोमहातेजाः प्रजाहितचिकीर्षया धर्म्मार्थंपुरुषव्याघ्रऋषिकोटीः ससर्ज्जह ४५ ताः सृष्टास्तेनविभुनापर्वतेगंधमादने
सनत्कुमारप्रमुखास्तिष्ठंतितपसान्विताः ४६ तस्मात्सवाग्मीधर्म्मज्ञोनमस्योद्विजपुंगवाः वंदितेहिसवंदेतमानितामानये
त्त्व ४७ ॥ ॥ ॥ ॥ ॥ ॥

द्वा०
३०८

अर्हितः पुष्पधूपादिनार्चितः पूजितः वाचाचमहाकृतः ५४ अभ्यर्चितः मनसाध्यातः ५५ तत्रोऽङ्गः तालद्रुमः ६१ ॥ ॥ ॥ ॥ ॥

९:१

अर्हितस्त्वार्हयेन्नित्यं पूजितः प्रतिपूजयेत् दृष्टः पश्येद्दर्शनाश्रितः प्रतिसंश्रयेत् ४८ अर्चितस्त्वार्चयेन्नित्यं स देवो द्विजसत्तमाः स त
त्वस्यानव्ययस्य विष्णोर्वै परमं व्रतं ४९ अर्हितो देवस्स महतः सज्जनाचरितं सदा भुवनेऽभ्यर्चितो नित्यं देवैरपि सनातनः ५० अभ
येनानुरूपेणापुंज्यंते तमनुव्रताः कर्म्मणा मनसा वाचा स नमस्यो द्विजैः सदा ५१ यत्नवद्भिरुपस्थाय द्रष्टव्यो देवकीसुतः ५१ ए
षवोभिहिता मार्गो मया वै मुनिसत्तमाः तं दृष्ट्वा सर्वशो देवं दृष्टास्युः सुरसत्तमाः ५२ महावराहं तं देवं सर्वलोकपितामहं अहं
चैव नमस्यामि नित्यमेव जगत्पतिं ५३ तत्र च त्रितयं दृश्यं भविष्यति न संशयः समस्ता हि वयं देवाः तस्य देहे वसामहे ५४ तस्यैव
चाग्रजो भ्राता सितांशुनिचयप्रभः हली बल इति ख्यातो भविष्यति धराधरः ५५ त्रिशिरास्तस्य देवस्य शातकुम्भमयो द्रुमः ध्व
जस्त्रिनेत्रो देवस्य भविष्यति रथाश्रितः शिरो नागैर्म्महाभोगैः परिकीर्णो महात्मभिः भविष्यति महावाहोः सर्वलोकेश्वरस्य च
५७ चिंतितानि समेष्यंति शस्त्राण्यस्त्राणि चैव ह अनंतश्च स चाख्यातो भगवान्हरिरव्ययः ५८ समादिष्टश्च विवुधैर्द्रष्टुं
त्वमिति प्रभो सुपर्णो यस्य वीर्येण कश्यपस्यात्मजो बली अंतं नैवाशकद्द्रष्टुं देवस्य परमात्मनः ६० स च शेषो विचरते प ए८०
रया वै मुदा युतः अंतर्वसति भोगेन परिरभ्य वसुंधरां ६१ ६१ ६१ ६१ ६१ ६१ ३०८

© (c) Dharmartha Trust J&K Digitized by eGangotri

६३ अध्यायः आद्यप्रोक्तीतिकथोपसंहारार्थे: स्वर्गार्थोध्यायः ॥ ॥ ॥ ॥ ॥ ॥

यस्यविष्णुः सोनंतोभगवान्वसुधाधरः योरामः सहृषीकेशोयोच्युतः सधराधरः ६२ तावुभौपुरुषव्याघ्रौदिव्यौदिव्यपराक्रमौ द्रष्टव्यौमा
नवीयौचक्रलांगलधारिणौ ६३ एषवोनुग्रहः प्रोक्तोमयापुण्यस्तपोधनाः यत्क्षेत्रंतावपद्येथेयद्भूःशत्रुजयेयुः प्रयत्नतः ६४ शांतोदान
धर्म्मउमामहेश्वरसंवादेपुरुषमाहात्म्य नारदउवाच अथयोसिमहाभावि शब्देपुन्नागनिलयमान् मेघेष्वगगनेनीलंसरुद्दमभवद्द
नैः १ प्रावृषीवचपर्जन्योगवर्षेविनिर्म्मलपयः नभश्चेवाभवद्धोरंदिशश्चनचकाशिरे २ ततोदेवगिरौतस्मिन्रम्येपुण्येसनातने न
वै ४ शईभ्रातसंघर्द्धेहस्मुर्मुनयस्तदा ३ चित्रंचगगनेसघः क्षणेनसमपद्यत तीर्थयात्रांततोविप्राजग्मुस्थान्येयथागतं ४ तदद्भुतम
स्वा ५ ते ५ चित्रंचदृष्ट्वैतेविस्मिताभवन शंकरस्तोमयासार्द्धंसंवादंतत्कथाश्रितं ५ भगवान्पुरुषव्याघ्रोब्रह्मभूतः सनातनयदर्थमनुभूता
स्तोगिरिष्टेष्टमहात्मना द्वितीयस्त्वद्भुतमिदंत्वत्तेजंकृतमघैवोदृष्ट्वाहिविस्मिताः कृत्स्नसाचनस्मृतिरागता ७ एतन्नेदेवसमाह देव
त्म्यंकथितंविभोकपर्दिनोगिरिशस्यमहाबाहोजनार्दन ८ इत्युक्तस्तत्रतान्कृत्स्नान्तपोवननिवासिभिः मानयामासतान्सर्वान्
भीश्वविकिनंदनः ९ अथर्षयः संप्रहृष्टाःपुनस्तेकृष्णमब्रुवन पुनः पुनर्दर्शयास्मानसेदेवमधुसूदनः १० नहिनः सारतिः
स्वर्गेप्यास्त्वद्दर्शनेविभो मद्भुतंचमहाबाहोयद्दाहभगवान्हरः भव ॥ ॥ ॥ ॥ ॥ ॥

१२

रा०
३०९
एतत्तेसर्वमाख्यातंरहस्यमरिकर्शन नमेवस्यथतत्त्वज्ञः पृष्टोस्मिपृच्छसेयदा १२ तदस्माभिरिदंगुह्यंत्वत्प्रियार्थमुदाहृतं नचेतेविदितंकिंचित्त्रि
षुलोकेषुविद्यते १३ जन्मचैवप्रसूतिश्चयच्चान्यत्कारणंविभो वयंतुवैचापल्यादशक्तागुह्यधारणे १४ त्वत्तःस्थितेत्वयिविभोल्लघुला
त्वलयामहे नहिकिंचित्तदाश्चर्यंयदत्रवेत्तिभगवानिह १५ दिविवाभुविवादेवसर्वंहिविदितंतव साधयामवयंक्षेमवृद्धिंपुष्टिमवाप्नुहि
१६ पुत्रस्तेसदृशस्तातविशिष्टोवाभविष्यति महाप्रभावसंयुक्तोदीप्तिकीर्तिकरःप्रभुः १७ भीष्मउ० ततःप्रणम्यदेवेशंयादवंपुरु
षोत्तमं प्रदक्षिणमुपावृत्यप्रजग्मुस्तेमहर्षयः १८ सोयंनारायणःश्रीमान्दीप्त्यापरमयायुतः व्रतंयथावच्चीर्त्वाद्वारकांपुनरागम
त् १९ पूर्णेचदशमेमासिपुत्रोस्यपरमाद्भुतः रुक्मिण्यांसम्मतोजज्ञेशूरोवंशधरःप्रभो २० सकामःसर्वभूतानांसर्वभावगतोनृप
असुराणांसुराणांचचरत्यंतर्गतःसदा २१ सोयंपुरुषशार्दूलोमेघवर्णश्चतुर्भुजः संश्रितःपाण्डवान्प्रेम्णाभवंतश्चैनमाश्रिताः
रा
२२ कीर्तिर्लक्ष्मीर्धृतिश्चैवस्वर्गमार्गस्तथैवच यत्रैषसंस्थितस्तत्रदेवोविष्णुस्त्रिविक्रमः २३ सेंद्रादेवाःत्रयस्त्रिंशदेषनात्रवि
चारणा आदिदेवोमहादेवःसर्वभूतप्रतिश्रयः अनादिनिधनोव्यक्तोमहात्मामधुसूदनः स्वयंजातोमहातेजाःसुराणामर्थसि
द्धये २५ सुदुस्तरार्थतत्त्वस्यवक्ताकर्ताचमाधवः तवपार्थजयःकृत्स्नस्तवकीर्तिस्तथातुला तवेयंपृथिवीकृत्स्नानारायणसमाश्र
यात् २७ अयंनाथस्त्वचाचिंत्योयस्यनारायणोगतिः सभवांस्त्वमुपाध्वर्युरणाग्नौहोतवान्नृपान् कर्मस्रुवेणमहतासुगां राम०
३०९
ताग्निसमनेवै

© Dharmartha Trust J&K Digitized By eGangotri

दुर्योधनस्त्वशोच्योसौ सपुत्रभ्रातृबान्धवः २९ कृतवान्योबुधाः क्रोधाद्धरिगाण्डीवविग्रहं दैवेनापादानैवेद्राश्च महाकायाम हाबलाः वृक्कोग्रोक्षयमापन्ना
दावाग्नेनाशलभा इव ३० प्रतियोद्धुं न शक्यो हि मानुषैरेभसंयुगे विहीनैः पुरुषव्याघ्रसत्वशक्तिबलादिभिः ३१ जपैर्योगैःपुराणैः सव्यसाचीरणाय ता२
जः तेजसा हतवान्सर्वं सुयोधनबलं नृप ३२ यस्तु गौरवृषभांको नसुनिम्बः समुद्रान्ते पुराणं हिमवत्स्थे तेन्द्रनिगदन्तः श्रुतः ३३ यावन्नसोद्र
स४ वीर्यस्ते जोदीप्तिः पराक्रमः प्रभावः सन्नतिर्जन्मकृष्णेन त्रिगुणं विभो ३४ नशक्यमन्यथा कर्तुं न यदि सन्त्रयाम्बृतः यत्र कृष्णो हि भगवांस्त
त्रपुष्टिरनुत्तमा ३५ वयं त्विहाल्पमतयः परं तत्राः सुचित्तकावाः ज्ञानपूर्वं प्रयन्नास्मो मृत्योः पन्थानमव्ययं ३६ वीरम्राप्याज्जवपरः पूर्वकृत्वा
प्रतिश्रयं राजवंतं नलभन्तेप्रतिज्ञापालने रतः ३७ अथैवात्मवधं लोके राजंस्त्वं कुरुषन्यसे नहि कालेन कालज्ञः स्पृष्टः शोचितुमर्हसि कालो
लोलोहितरक्ताक्षः नहि प्रतिज्ञायाद्यज्ञातां प्रहर्तुमरिंदम ३८ कालेनायं जनः सर्वो निहंतारराम्भहेति वयंच कालेनहताः कालो हि परमे
श्वरः ३९ + गौरिका कृष्णोदंडीसनातनः ४० तस्मात्कुंतीसुतज्ञातीन्नेह शोचितुमर्हसि व्यपेतमन्युर्निसंत्वं भवकौरवनंदन ४१ माधवस्य
स्य माहात्म्यं श्रुतं कथितं मया तेद्वताव त्वयोस्यसज्जनस्य निदर्शनं ४२ व्यासस्य वचनं श्रुत्वा नारदस्य च धीमतः गतास्तेषु राज्ञानोने हशो
चितुमर्हसि वासुदेवस्य माहात्म्यं श्रुतं चैतन्मपाघ वैरयेचेव महाराज कृष्णस्यार्हतमस्यवै ४३ प्रभावश्चर्षिपूगस्य कथितः सुमहात्मनो
महेश्वरस्य संवादे शैलपुत्र्याश्च भारत ४४ धारयिष्यतिपश्चैनं महापुरुषर्षभं श्रणुयात्कथयेद्वाय: तेश्रेयो लभतेपरं ४५ भवितारश्च
तस्याश्चसर्वे कामा यथेप्सिताः प्रेत्य स्वर्गं च लभते नरो नास्त्यत्र संशयः ४६ न्यायं श्रेयोनिकामेन प्रतिपत्तुं जनार्दनः एव एवाक्षयो
स२ ता:१ सं२

© (Dharmartha Trust J&K Digitized By eGangotri

दा० ३१०

अ १४ ९२

विप्रैः स्मृतो राजन्जनार्दनः ४७ महेश्वरसुरवोत्तस्थोपे च धर्मगुणाः स्मृताः तेत्वयामनसाधार्याः कुरुराजन्दिवानिशं ४८ एवंतेव
र्त्तमानस्य सम्यक्दंडधरस्य च प्रजापालनदक्षस्य स्वर्गलोकोभविष्यति ४९ धर्म्मेणाहि सदाराजं प्रजा रक्षितुमर्हति न यस्य विपुलोदंडः
सम्यक धर्म्मः स कीर्त्यते ५० यएष कथितो राजन्मयासज्जनसन्निधौ शंकरस्योमयासार्द्धं संवादो धर्म्मसंहृतः ५१ श्रुत्वा वाभ्यर्चतु
कामोवाप्यर्च्चयेद्वृषभध्वजं विशुद्धेनेह भावेन य इच्छेन्भूतिमात्मनः ५२ एषतस्यानवद्यस्य नारदस्य महात्मनः संदेशो देवपूजार्थं तंतथा
कुरुपांडव ५३ एतद्दसम्भुतं वृत्तं पुण्यं यहिमवति प्रभो वासुदेवस्य कौंतेय स्थाणोश्चैव स्वभावजं ५४ ॥ ॥ ॥ ॥

दा० ३१०

६६ अध्यायः श्रीनमस्तारिदै वैशंपायनउवाचेत्यनेनतत्रवाक्यंनिश्चविस्फुरितः प्रारब्धोग्रंथः स्पष्टार्थः नामपदानामन्वयवार्थस्तस्मिन् श्रीशंकराचार्यभगवत्पादैर्विवृतः

दृष्टवर्षसहस्राणिवर्ष्याणिमेकशाश्वतः तपश्चचारविपुलंसहगांगेयधन्वना ५५ त्रियुगेपुंडरीकाक्षोवासुदेवधनंजयो विदितौनारदादे
तोमनस्यासात्वपार्थिव ५६ वालस्यवमहावाहुश्चकारकदनंमहत् कंसस्यपुंडरीकाक्षोज्ञातित्राणार्थकारणात् ५७ कर्मणामस्यकौ
तेयनांतंसंख्यातुमुत्सहे शाश्वतस्यपुराणस्यपुरुषस्ययुधिष्ठिर ५८ भूयश्चश्रेयः परंतानभविष्यतितवोत्तमं यस्यतेपुरुषव्याघ्रः सहा
योयंजनार्दनः ५९ दुर्योधनंतुशोचामिप्रेत्यलोकेपिदुर्मतिं यत्कृतेपृथिवीसर्वाविनष्टासहयद्विपा ६० दुर्योधनापराधेनकर्ण
स्यशकुनेस्तथा दुःशासनचतुर्थानांकुरवोनिधनंगताः ६१ वैशं० एवंसंभाषमाणेतुगांगेयेपुरुषर्षभे तूष्णींबभूवकौरव्यो
मध्येतेषांमहात्मनां ६२ तच्छ्रुत्वाविस्मयंजग्मुर्नराश्चर्यान्नृपाः संपूज्यमनसाकृष्णंसर्वेप्रांजलयोभवन् ६३ अथयश्चापितेतम
वैनारदप्रमुखास्तथा प्रतिगृह्याभ्यनंदंतद्वाक्यंप्रतिपूज्यच ६४ इतितदखिलंसर्वंपांडवोभ्रातृभिःसह श्रुतवान्सुमहाश्चर्यं
पुण्यंभीष्मानुशासनं ६५ युधिष्ठिरस्तुगांगेयंविश्रांतंभूरिदक्षिणं पुनरेवमहाबुद्धिः पप्रच्छन्महीपतिः ६६ दानधर्मे
नुमानेहेश्वरसंवादः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

टी०
३११

श्रीगणेशाय नमः स्वयंप्रकाशतीर्थोऽपि लब्ध्वा वेदांतितत्परः महादेवोर्थमाचष्टे विष्णुनामसहस्रगं आचार्याद्यपि व्याचख्युर्नामसहस्रगं
कायवाक्स्वांतसंशुद्ध्यै पुनः कुर्वे तथाप्यहं मेरोश्च परमाणोश्च यदा स्थैर्यं यथा समं व्याख्यातं तत्तथा श्रीमदाचार्यैः सुचमप्यपि क्व भारतं क्व तद्व्या
ख्याने क्वाहं किंतु गुरोः कृपा मूकं करोति वाचालं पंगुं लंघयते गिरिं स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरः इति भारतव्याख्याने कृपया मुनिना
कृते इत्युक्त्या सर्ववर्णानां श्चानयोपयत्तवो भवेत् तदर्थं च ततो व्याख्या मम सर्वोपकारिणी भाष्यबोधासमर्थानां जनानां हितकार्ययं नोपेक्ष्यः
किंतु सत्कार्ययोग्यो ग्रंथोऽपि लघुना कृतः खलैस्करखलता कार्या न हानिस्तावतास्ति मे कस्तूरी पामरैस्त्यक्ता स्वमहत्त्वं किमुत्सृजति अनेकविधधर्माणां
श्रवणेऽपि न तृप्तिभाक् युधिष्ठिरः शांतनवं यत्पप्रच्छात्मतुष्टये यच्च भीष्मः परोभक्त्या तमसुत्तरं ददौ तत्सर्वं सौतिराचष्टे शौनकादीनृषीन्प्र
ति वैशंपायन इत्यादि अत्र वैशंपायनो जनमेजयं उवाचेति प्रकरणाल्लभ्यते जनमेजयस्यैव वैशंपायनं प्रति प्रष्टृत्वावगमात् एतेनो वाचेति
सामान्यशब्दस्य लक्षणया जनमेजयोद्देश्यकवाक्योच्चारणरूपविशेषपरत्वेन तु जनमेजयमित्यस्याध्याहारः स्थितस्यैव पदस्य संतरमात्र
कल्पनेन लाघवात् इत्यंतरस्य पदांतरस्य च कल्पने गौरवादिति केनचिदुक्तं परास्तं ॥ ॥ ॥ ॥ ॥ ॥

राम०
३११

© (Dharmartha Trust) J&K Digitized By eGangotri

किंच नसामान्यशब्दस्यविशेषपरत्वमात्रेलक्षणाकिंतुविशेषरूपेणाबोधकत्वे यथाहुः शक्यार्थेनरूपेणाज्ञातेभवतिलक्षणेति शक्यात्शक्यतावच्छेदक
रूपात्शक्यतावच्छेदकातिरिक्तरूपेणबोधेलक्षणेतिनिष्कर्षः नहिघटमानयेत्यत्रघटपदस्यघटत्वरूपेणबोधपरत्वेलक्षणाकिंतुपीनपरत्वादिरू
पेणबोधकत्वेइत्या[illegible]स्थमेवेत्यलमप्रस्तुतप्रसंगेन अत्रत्वंशंपाशन्तनुदारामात्युदयनेपत्नंततः विराजते शङ्कतेअय स्मात्वैशंपायनः स्मृतइतियौगिक
निर्वचनवत्तावैशंपायनशब्देनमुनेर्महाप्रभावत्वावगमात्जनमेजयतिकंपयतीतिव्युत्पत्त्यनुसारेणदुष्टनिग्रहकत्वादिमहाप्रभावत्वस्यजनमेजयेप्य
वगमाद्दप्रष्टृप्रत्युत्तरदात्रोस्तुल्ययोग्यतासूचने ततः तस्याः शान्तेरुक्तकारणात् अतिदृष्टिलक्षणार्थिकारणप्रसक्तेयान्तत्वात् कृत्वेति अशेषेणसामस्त्येनानुप

कृत्वाधर्मानशेषेणपावनानिचसर्वशः युधिष्ठिरः शान्तनवंपुनरेवाभ्यभाषत १ १ ॥

यत्लक्षितानसमस्तानितिपावनात् धर्मानस्वर्गादिफलकानिकर्माणिपावनानिप्रायश्चित्तरूपाणिपापक्षयकराणिच सर्वशः सर्वप्रश्नकृत्वाप्यपरितृप्यन
युधिष्ठिरः युधिसंग्रामेस्थिरइतिव्युत्पत्त्यास्वकार्यस्थिरेणनतुचलचित्तस्यवर्गमननंतप्रत्युत्तरदानमतियोग्यमितिसूच्यते सुंसालाघ्वसमासः अलुकगवि
युधिभ्यांस्थिरइत्तिर्त्वं शान्तनवं शन्तनोः पुत्रंभीष्मंअनेनतत्रतत्रप्रसिद्धः पितृभक्त्यतिशयः सूच्यते पुनरेवपूर्वकृतधर्माद्यपेक्षयाविशिष्टमेव पुनर
प्रश्नेमेदइत्यमरकोशेभेदशब्दस्यविशेषपरत्वेपेवमात्रभिर्व्याख्यातत्वात् अभिसंमुखंअनेननशिष्यरीतिः सूच्यते अभाषत पृष्टवान् १

घ ष्वा १

द्वा०
३१२

युधिष्ठिर उवाचेति पुनरुक्तिः स्यात् पुराणेतिहासरीतिमनुसृत्य। उवाचेत्यस्यैव रहस्यत्वानिरूपणार्थः किमेकमित्यादि अत्र षट्प्रश्नाः लोके लोकने हेतुभूते समस्तविद्या
स्थाने एकं मुख्यं एकमुख्यान्यकेवलाश्रमः दैवतं उपास्यं किं मुख्यत्वं च सर्वाण्यमस्तु स्वाराध्यत्वविशिष्टफलदातृत्वादिभिः द्वितीयं प्रश्नमाह किं चेति। वाश
ब्दः प्रश्नसमुच्चये परायणं श्रेयः प्राप्यते स्मपनं वा कुलकालकर्मणि स्तुवन्तः परमुत्कृष्टं प्राप्य एकं मुख्यं किं। ऐहिकफलादि आमुष्मिकफलं वन्दनेन तत्त्वबु
कालस्यापि मानादिना परं तत्रापि मुख्यं स्वप्रकाशनिरूपानंदरूपत्वेन तृतीयचतुर्थप्रश्नावाह कं स्तुवंतः किमानवाः स्वधिकारपुष्पलक्षणाः मनुष्याधिकारं दिशा
स्त्रिणिति मानवाः स्तुतं कस्य स्तुत्साहेतुर्मन्त्रपाठोधिकारिणः शुभं ऐहिकमामुष्मिकं च प्राप्नुयुः एवं कं स्मार्यते नरहेतु भवेदनेनेति चतुर्थः प्रश्नः स्तुवंतः श्रवंतिरस्तुभय
त्रापिलक्षणादेतोः क्रियापाठ इति सत्रोक्तहेतुत्वेबोध कस्यतत्प्रश्नस्पर्शनात् २ पंचमप्रश्नमाह को धर्म इति स्पष्टोर्थः परमं सर्वहिंसारहितत्वमुख्यं किं च

युधिष्ठिर उवाच किमेकं दैवतं लोके किं वाप्येकं परायणं स्तुवंतं कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं २ को धर्मः
सर्वधर्माणां भवतः परमो मतः किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् ३ ॥छ॥ ॥छ॥ ॥छ॥ ॥

नेसंबन्धादिनाषष्ठं प्रश्नमाह। किं जपन्निति किं जपन् जपपरिपाटीशाब्दानुसंधेयशमणरूपप्रतिपाद्यतादृशगुणाश्रयत्वयानुसंदधानः जंतुः जीवाधिकारी जंतु शरी
नजीवमात्रवाचिनानयज्ञाविनानयज्ञाविषनवंतोवल्लवंतोविद्यावंतएवाधिकारीपितुश्चतादृशस्यापिजयेसदितिसूच्यते अत्रापिशतप्रश्नयोर्हेतो किं संबधिगुणा
प्रतिपादकशब्दानुसंधानरूपजपं तद्धेतुस्तेनजन्मसंसारबंधनात् जन्मपदंमृत्योरप्युपलक्षकं यद्वा संसरतिपुनरुत्पद्यते नेनजातस्यहिध्रुवं जन्ममृतस्य च
सुक्तरीत्यासंसारोमृत्युः अस्मिन्पक्षेनैवंधनपदस्यपौनरुक्त्यशंका पि जन्मनस्तु एवं वंधनं आत्मनः सच्चिदानंदताविरोधितत्तोमुच्यते मुच्यतेमुक्तिं प्रा
प्नोतीतियावत्। जन्मपदस्यमृत्युलेयलक्षकत्वेतुजन्मनस्तु एवं संसारस्तस्यहेयत्वार्थं बंधनरूपत्वमुक्तमितिबोध्यं ३ ३ ३ रा०
३१२

© Dharmartha Trust J&K. Digitized By eGangotri

भीष्म इति अत्र विदित्वा भक्तियोगं तु भीष्मः स पुरुषर्षभः सहसोत्थाय संहृष्टो यानेनैवान्वपद्यतेति राजधर्मोक्तेः श्रीकृष्णाकर्षणपर्यन्तस्व मनुशाली भक्तियोगो भीष्मप
देन सूच्यते जगत्प्रभुमिति यद्यपि प्रश्ने संक्रमेणोत्तरस्थं चिंतनं तथापि उपस्थितत्वात् बहुमप्युस्यैवाराधुत्तरमुच्यते जगतां सर्वेषां प्रभुं भीष्मस्येश्वराणां लोकोत्तरत्व क्री
डाशालिनामिंद्रादीनामपि देवं वरिष्ठं यद्वा दिवु धातोः स्तुत्यर्थाद्देवशब्दो तत्र देवं इति स्तुवंतीति देवाः तेषां देवं स्तोतारं यारता हि सर्वे देवता मानितो मानपीतेच
त्ति राजधर्मोक्तेः ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भगवद्गीतोक्तेः सुष्ठु नंतं नाशरहितं पुरुषोत्तमं पुरुषयति भक्तानां कामान् सीदति अवसादयति च भ
क्तविरोधिन इति पुरुषः इत्यरात्मवादेनैव नतो सौ पुरुषोत्तमः तद्योगपर्वणि संजयोक्तेः स चासावुत्तमश्चेतं तस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि

भीष्म उवाच जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ४

लोके वेदे च प्रथितः पुरुषोत्तम इति भगवद्गीतोक्तं वा पुरुषोधिकारी सततोत्थितः निरंतरयुक्तः स नु नामसहस्रेण स्तुवन् पुरुषोत्तमोपनतद्गुणज्ञापकनामस
हस्ररूपया[illegible]नुसंधानं कुर्वन् सर्वदुःखातिगो भवेदित्यन्वयः गुणज्ञापकशब्दानुसंधानमात्ररूप एव हि जपो न तु नामद्वयादिसंकीर्तनपर्यंतस्तस्य चोपांशुमान
सेतित्रैविध्यासंभवात् अत्र नामसहस्रेणेत्युक्तेः अनादिनिधनमित्यत्रानुक्तस्यैतस्य षष्ठप्रश्नोत्तरत्वात् अनादिनिधनमित्यस्य च तृतीयप्रश्नोत्तरत्वोक्त्या अ
वश्यं हि किं जपन्नित्यस्योत्तरेणात्र भाव्यं न चात्रैव जपशब्दोस्तीत्यात उपस्थितिविशेषश्चैतस्यैव षष्ठप्रश्नोत्तरतायुक्ततरा नैवं पुराणायुक्तः सर्वोपि स्तवो ज
पस्यादिति शंक्यं शाखान्तरजपपरिपाटीशालिनः स ॥ ॥

द्वा॰
३१३
ध्यानुसंधानस्य जपत्वात् अतादृशस्य तत्त्वरूपत्वात् किंच एतत्प्राधान्यं जपयोःश्रेयःप्राधान्यं तत्त्ववश्‌इति महान् ॥ अचानेकवित्तव्ययायाससाध्यराजसू
याश्वमेधादिभिरलभ्यस्य मोक्षस्य कथमुक्तया ध्यानुसंधानमात्ररूपेण नामसहस्रजपेन लाभः स्यात् शंकायां जगत्प्रभुमित्यादिना विषयविशेषमुक्तो
भगवद्रूपः तथाच विषयमाहात्म्यात् अल्पायाससाध्येनापि कर्मणा फलविशेषलाभः इति तस्येव तत्त्वं अत एव स्कांदे नारदं प्रति ब्रह्मवाक्यं लोके नैके
नेदृश्वैषं नाममाहात्म्यकस्य यत् पठितेन फलं प्रोक्तं न तत् क्रतुशतैरपि तेचैव शत्री कृत्वा गुनसंवादे तत्त्वं नामसहस्रार्थं येन ज्ञानं तिवैकेलो अर्मतिने
नृणां लोके सर्वधर्मवहिष्कृताः सुकृतानामसहस्रं तु नान्यो धर्मोस्ति कश्चन कलौ प्राप्ते युगे केशवस्य महात्मनः योर्चितं पञ्च दानैस्तपोभिश्च सर्वैः प्रीति
र्भवत्येनेसंतुष्टिस्तु नचान्येन विनानामसहस्रकं किंच यस्यैकैकनामव्याहारोपि सकृदपि येनकेनविधादृशेन तादृशेन तादृशेपनयस्यांकस्यांचिद
वस्थायां पत्रकचिय दाकदाचिन्यथाकथंचित् कृतो सुरदुःपफलं ददातिकिमुतत्स्य नामसहस्रजपइति तथाचपुराणेषु सकृदुच्चरितं येन
हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षायगमनं प्रतिस्वरः पुल्कसको वापि मुच्येरन्‌ यस्य कीर्तनात् ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रांत्य
जादयः यत्र तत्रानुकुर्वंतो विष्णोर्नामानुकीर्तनं सर्वपापविनिर्मुक्तास्तेपि यांति सनातनं अर्थं हिकृतनिर्वेशो जन्मकोटिसहस्रा मपि पद्याज्जहार
विवशो नामसंस्तयनं हरेः अजामिलः स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहंता ये च पापा तकिनोपरे सर्वेषामप्य
घवतामिदमेव सुनिष्कृतं नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः विष्णुधर्मे चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् नाशौचं कीर्तने तस्य ना राम॰
शौचं कीर्तने तस्य स पवित्रकरो यतः स्कांदे न देशकालावस्थासु शुद्ध्यादिकमपेक्षते किंतु स्वतंत्रमेवैतन्नाम कामितकामदं न देशनियमस्तस्मि ३१३
न्न कालनियमस्तथा ॥ ॥

श्री ३

नोद्विग्नो हरेर्निषेधस्य श्रीहरेर्नाम्नि लुब्धक विष्णुधर्मोत्तरे नामानि सर्वाणि जनार्दनस्य कालस्य सर्वः पुरुषप्रवीरः तस्मात्सदा सर्वगतस्य नाम ग्राह्यं यथे
ष्टं वरदस्य राजन् श्रीभागवते प्रथमस्कंधे तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वं
ति गायंति गृणंति साधवः इति अन्यैरपि नाममाहात्म्यप्रतिपादकानि वाक्यानि सहस्रशः संति तत्र कानिचिल्लिख्यंते ब्रह्मपुराणे अनन्यचित्तः
सुहृद्वा यः सदा कीर्तयेद्धरिं सोऽपि दोषक्षयान्मुक्तिं लभेद्धरिपतिर्यथा पद्मपुराणे संसारसर्पसंदष्टनष्टचेष्टैकभेषजं कृष्णेति वैष्णवं म
कृत त्रं श्रुत्वा मुक्तो भवेन्नरः यत्र स्थितो वापि कृष्णेति कीर्तनात् सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिं सर्वधर्मोज्झिता विष्णोर्नाममात्रैक जल्प
काः सुखेन यां गतिं यांति न तां सर्वेऽपि धार्मिकाः विष्णुपुराणे विष्णुसंस्मरणादेव समस्तक्लेशसंक्षयः भयं भयानामपहारिणि स्थिते मनस्यनं
तेऽपि कुत्र तिष्ठति यस्मिन्स्मृते जन्मजरांतकादिभयानि सर्वाण्यपहंति तानि शिवपुराणेपि कृष्णनाम सदा गेयं महादेवं महादेवेति यो वदेत् र महादेव ५
केनैव भवेन्मुक्तिर्दोषाः शंभुस्मरणाद्भवेत् श्रीभागवते एतन्निर्विद्यमानानामिच्छतामकुतोभयं योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं कलेर्दो
षनिधे राजन्नस्ति ह्येको महान्गुणः कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् मात्स्ये परदाररतो वापि परापकृतिकारकः संशुद्धो मुक्तिमाप्नो
ति कृष्णनामानुकीर्तनात् गारुडे यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदं तदादरेण महता कुरु गोविंदकीर्तनं आदित्यपुराणे हरेः संकीर्तनं
पुण्यं महापातकनाशनं। सर्वकामप्रदं लोके स्वर्गापवर्गफलप्रदं इत्यादि अलं बहुना प्रकृतश्लोकव्याख्यानमेवानुसरामः ५ ॥ ॥

स ३

© Dharmartha Trust J&K. Digitized by eGangotri

दा० ३१४

अथैकर्मधर्मइति चतुर्थप्रश्नस्योत्तरमाह तमेवेति तमेव शश्वत्पुरुषं पूर्णं भक्त्या सा परानुरक्तिरीश्वरे इत्युक्तलक्षणया अर्चयन् वाङ्मयार्चनेन पूजयन् ध्यायन्नात्मं
नराधनेन पूजयन् अव्ययं विनाशरहितमिति नित्यशब्दार्थः सैव विशेषणं अर्चनक्रियाया वा अर्थस्यापगमो व्यय इत्यमरोक्तेः व्ययं अपरहितमप्यर्चयन् फलभा
गिति व्याख्येयं जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः परितोषं व्रजत्याशु तृषार्तः सलिलैर्यथेति नारदीयोक्तेः स्तुवन् नमस्यन्निति पूजांगभूतस्तुतिनम
स्कारौ कुर्वन् नराणां मेवत्तु ध्यानाद्यंगभूतावपि स्तुतिनमस्कारौ नान्यविषयाविति कथयति स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि २ स्तुतात्प्रसीद भग
वन्नित्ति चेरेजरं इत्युदितं चेत्नांगभूतस्तुतिनमस्कारयोरेकाद्रमेदक्तेः नित्यपि क्रियाविशेषणमेवा कस्मं कैलयत्राक्षं नाचपिष्यन्ति ये नराः जीवन्मुक्ता
म१

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ५
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्

स्तेते ज्ञेया न संभाष्याः कदाचनेति समाषर्वणि नारदोक्तेः ईदृशोयजमानः पूजकः सर्वदुःखातिगो भवेदिति संबंधः ५ तृतीयप्रश्नस्योत्तरमाह अनादीति जन्मम
रणाभ्यां षड्पिभावविकारोनुपलक्षयति तथाच जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्विकाररहितं विष्णुं व्यापनशीलं सर्वलोकानां
महेश्वरं ब्रह्मादिभ्योप्यधिकः लोकं दृश्यवर्गं स्वरूपबोधेनाध्यक्षयति प्रत्यक्षीकरोतीति लोकाध्यक्षः तं स्तुवन् नित्यं नि २ त्रं सर्वदुःखानि आध्यात्मि ए० ३१४
कादीनि अतीत्य गच्छतीति सर्वदुःखातिगो भवेत् इति जपावेनलवबानां साधारणं फलवचनं ६ ॥ ॥८ ॥ ७ ॥
ए३

स्तत्वंविशिष्टं नहि। ब्रह्मण्यो वेदास्तपसे वा तु सुखाय च हितं ब्रह्मण्यं सर्वेषां साधारणं धर्मं सर्वान्धर्मान्वा जानातीति सर्वधर्मज्ञस्तं। लोकानां भक्तजनानां सद्धरीनां कीर्तिं वर्धयतीति कीर्तिवर्धनस्तं लोकैर्नाथ्यते याच्यते लोकनाथस्तं। महत् व्यापकं भूतं परमार्थसत्यं सर्वेषां भूतानां भवस्य संसारस्य उद्भवो यस्मात्तं ८ पंचमप्रश्नस्योत्तरमाह एष मे इति स्तवैर्गुणसंकीर्तनलक्षणैः अर्चयेन्नरः एष सर्वेषां धर्माणामधिकतमो धर्म इति संबंधः जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति मनुवचनं जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अहिंसया च भूतानां जपयज्ञः प्रवर्तते इति व्यासवचनं च पुरुषान्तरस्य

हि सर्वयज्ञानां भोक्तेति भगवद्वचनात् अथवा हवी रूपलाञ्छनः तद्वान्सो हरिः सर्वपापहरत्वात् हरिः सर्वैर्लक्षणैः प्रमाणैर्ज्ञायमानैर्लक्षणं ज्ञानं तत्र सा
धुः सर्वलक्षणलक्षण्यः सर्वेषां लक्षणानां पर्यवसायित्वात् लक्ष्मीर्नित्यमस्यास्तीति लक्ष्मीवान् नित्ययोगे मतुप् समितिं संग्रामं जयतीति समितिंजयः विगतः क्षरो

अतुलः शरभो भीमः समयज्ञो हविर्हरिः सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ५२ विक्षरो रोहितो
मार्गो हेतुर्दामोदरः सहः महीधरो महाभागो वेगवानमिताशनः ५३ ॥ ॥ ॥ ॥

नाशोस्माद्विक्षरः रोहितो मत्स्यवपुर्धरत्वात् मार्ग्यते अन्विष्यते मार्गः हेतुः निमित्तोपादानोभयरूपः दमेन प्राप्या दामा उदराणि अकष्टानतिर्यग्विषया दामो
दरः दामोदरो हरिः दमाद्दामोदरं विदुरिति महाभारते तपोभिः प्रागतं वत्व दाम्ना गायंत पादरे ततश्च दामोदरं नामत्व पो दामं वधनादिति ब्रह्मपुराणोक्तेः स
र्वान्सर्वान्सहते अभिभवतीति सहः महीं गिरिरूपेण धरतीति पुनर्महीधरः महान्भागो भाग्यमस्य महाभागः वेगवान् अनेजदेकं मनसो
जवीय इति श्रुतेः अमितमशनमस्य सर्वसंहर्तृत्वात् अमिताशनः ५३ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

६२

रा० उद्भूतो भवात्संसारात् उद्भवः क्षोभयतीति क्षोभणः प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः क्षोभयामास भगवान्सर्वकाले व्यपेक्षयेति विष्णुपुराणे दीव्यति
३३० क्रीडादिं करोतीति देवः श्रीर्विभूतिर्जगद्रूपा उदरेऽस्य स श्रीगर्भः परमश्चासावीशनशीलश्चेति परमेश्वरः साधकतमं करणं अनन्यथासिद्धनियतपूर्वकं कारणं
णं धातुः स्वातंत्र्याद्व्यापाराश्रयः कर्ता विकरोतीति विकर्ता दुर्विज्ञेयत्वाद्गहनः गूहति संहरति निस्वरूपं गुहः ५४ संविद्रूपत्वाद्व्यवसायः भवति व्यवतिष्ठते जगदस्मिन्निति व्यव
मं स्थानः संतिष्ठन्ते समोऽभवन्नस्मिन्निति संस्थानः स्थानं वैकुण्ठादि भक्तेभ्यो ददातीति स्थानदः नानाकर्मकर्तृत्वेऽपि स्वरूपत्वं ध्रुवः परा ऋद्धिरस्येति परर्द्धिः स्वप्रकाशज्ञान
रूपत्वात्परमस्पष्टः परमानंदत्वात्तुष्टः पूर्णत्वात् [illegible] शुभं सर्वेषां सर्वार्थदं दर्शनं ईक्षणं यस्य शुभेक्षणः ५५ रमंते योगिनोऽस्मिन्निति रा

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः करणं कारणं कर्ता विकर्ता गहनो गुहः ५४ व्यवसायो व्यवस्थानः
संस्थानः स्थानदो ध्रुवः परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ५५ रामो विरामो विरजो मार्गो नेयो नयोऽनयः
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ५६

मः रमंते योगिनोऽनंते सत्यानंदे चिदात्मनि इति रामपदेनासौ परं ब्रह्माभिधीयते इति पुराणे विरमति जगदस्मिन्निति विरामः विगतं रजोऽस्मात् विरजः ब्रह्मविद्भिरन्वेष्य मा
र्गः यं ध्यात्वा न मार्गेत पुनर्मार्गः भक्तैः स्वहृदये नेतुं शक्यो नेयः नयति भक्तोपहृतमल्पमपि नयः पत्रं पुष्पं फलं तोयमिति भगवद्वचनात् न नयति वञ्चकप्रभक्तोपहृतं रा०
मनयः अर्पितमप्यभक्तोपहृतं न मे तोषाय कल्पत इति वचनात् चतुर्थेऽन्ते विष्णुनाम्ना वीरः सुदृढानसमरधामु शक्तिमतां मध्ये श्रेष्ठः शक्तिमतां श्रेष्ठः ३३०
धर्मात्मकं करोति वा धर्मः धर्मवित्सु उत्तमः धर्मविदुत्तमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
म्१

© Dhanvantari Trust & K Digitized By eGangotri

विगताकुंठागतिर्बोधोयस्मात्तेषांभक्तानामयंवैकुंठः पुरणात्सदनाद्वापिवनेतोसौपुरुषोमनःस्यादेग्रपर्वणि पुरुषः प्राणः प्राणोत्मेदरूपोस्यप्राणः प्राणान्वै द
ददातीत्यथप्राणदःपुनः प्राणदः योप्राणानांविरधातिप्रवर्वणोवैवेदशास्त्रः प्रतिष्ठितानितस्मादितिश्रुतेः प्रकर्षेणनूयतेस्तूयतेप्रणवः वाच्यवाचकयोरभेदात्प्रणव
एवावाप्रणामतीहयेवैवासल्तस्मात्प्रणवउच्यतइतिसनत्कुमारवचनानुसारेतुष्टयापृथुरूपेणः पृथुदीपकः पृथुराजरूपोवाहिरण्यशब्देनस्वर्णवाविनाशशस्तो
लक्ष्यतेतस्यचासौगर्भोअर्भकःपुनर्हिरण्यगर्भः गर्भोभ्रूणोअर्भकेकक्षावितिविश्वः शत्रूनन्तीतिशत्रुघ्नः व्याप्नोतिव्याप्तः कर्तेरिक्तः वातिसर्वत्रवायुः अधः प्रकाशना
समर्थेअक्षजमिंद्रियजज्ञानमस्मिन्नधोक्षजः ५७ ऋतुर्वसंतः ऋतूनांकुसुमाकरइत्युक्तेः [illegible] नंदर्शनमस्यसुदर्शनः कालः कालः क कलयति।

हे२ शो१

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ५७ ऋतुः सुदर्शनः
कालः परमेष्ठी परिग्रहः उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ५८ ॥ ॥ ॥

त्वयज्ञामहमितिभगवद्वचनं परमेस्वेवोत्कृष्टेस्थानेतिष्ठतिपरमेष्ठीतत्सुरुषेपकृतौ सल्लुक् अंवावेतिपदं परिगृह्यतेस्वीक्रियतेमुमुक्षुभिरस्मेदवा ता
त्यागेनपरिग्रहः उतउत्कृष्टंयथातथाग्रसतेसर्वंउग्रः सदाशिवरूपः सदाशिवनामावाशिवपर्यायेषुभीदृष्यवचनामिवपातनामानितवगोविंदेत्युक्त
वचनाच्च सम्यक्वसतिजंतुक्रमेसुनेत्रे कालरूपेणसंवत्सरः देशः कालस्तथाद्रव्यमितिसाधुकेलान्नतुधर्मेस्वयन्मपरस्तुतेः दक्षः अनलसः स
त्कर्मसुविश्रामयतिजगतविश्रामः विश्वस्मिन्दक्षिणः विश्वदक्षिणांदक्षिणःसरलोदारपरछंदानुवर्तिष्वितिविश्वः ५८ ॥ ॥ ॥

नव२ ग२ ड२ य२

रा० विस्तार्यते जगदस्मिन्निति विस्तारः सर्वत्र स्थितिशील स्थावरः आकाशादिवत् स्थावरार्थस्तत्रापि स्थाणुः स्थिरः सङ्क्षेपेण स्थाणुरविसर्गसध्यः अत एव स्थावरः स्थाणुरेव
२२१ इति चतुर्थ्यन्ते अस्ति भानीत्या अभियुक्तोक्तेः प्रमाणं प्रमाता सम्वादो वा प्रमाणं ज्ञानं सम्यग्यो द्रष्टाऽऽत्मा ते श्रुतिविभ्यः बीजमव्ययमित्येकं नाम बीजापार्व
पाचेति चतुर्थ्यन्तः अर्थ्यन्त इत्यर्थः नास्ति अर्थः परमार्थः तस्मात् अनर्थः प्रपंचस्या वस्तुत्वेनास्यैव परमार्थत्वात् महानकोशो यस्य महाकोशः महान् कोशस्या
नंदमय इति वा महान्तः कोशा अस्मिन्न वा बलराः सर्वाधिष्ठानत्वात्सुपगमात् महान् भोगः सुखं महाभोगः स्वस्वेत्यादिश्रुतिभ्य इत्युक्तेः महान् धना
यस्य महाधनः निष्किंचनजनप्रिय इति तत्रैवोक्तेः ५९ नभिर्विचिन्त्य मत्वा भक्तकार्येषु निर्विस्मः अतिशयेन स्थूलः स्थविष्ठः भूः सन्ज्ञारूपः न भवतीत्यभूः इति वा धर्मे

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ५९ अनिर्वि
ण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ६० ॥ ॥

स्तूपरूपधर्मरूपः रूपेषु पशुर्बध्यते यथा तथा भगवति धर्म इत्यर्थः भगवद्धीनोऽधर्म इति यावत् अनितिस्मृतीनामेवात्रेदस्युक्तेः भगवतः सर्वान्तर्यामित्वाच्च म
हान् सर्वमखापेक्षया अधिकफलदो मखो यस्य महामखः नक्षत्राणि नेमिर्यस्य स नक्षत्रनेमिः शीतांशाविति विभ्यः सरत्वा ह्लादकः प्रशस्तं नक्षत्रं जन्मकाले
स्याऽस्ति नक्षत्री धर्मप्रधानो गुणाः सुशीलः प्रियंवदः शास्त्ररतः सखा स्याद्रोहिणीप्रभवः कुलस्य पुमान् विवेकी रतः लालस इत्युक्तेः जैमिनीयसमतेस्व
ल्पेनार्चनेनापराधानां क्षमः अपराधसहस्राणि अपराधशतानि च यैर्मे नैकेन दे वेशः क्षमी पुराणपार्वितं इति स्मृतेः क्षामः क्षयो भक्तः क्षेत्रपाशस्थितो भक्तवत्सलात् राम०
ते अवमर्षणत्वात् अरणमेतत्समहं मे हृदयान्नापसर्पति यत् इति विदेहिनि बुक्कोस कृष्णामां दूरवासिनमित्युद्योगपर्वणि सम्यगीहते नैवेत्यस्य समीहनः ६० २२१

मि३ ५२ न८३ सै२

© Dharmartha Trust J&K. Digitized by eGangotri

यज्ञोयज्ञरूपः यज्ञोवैविष्णुरितिश्रुतेः क्रतुर्धर्मेष्वयन्नमपइतिश्रीभागवतात् ॥ इज्यतेइज्यतेइज्यः मह्यश्चासौइज्यश्चेकंनामेतिमहेज्यः यज्ञोराजसूयेश्वमइतिनद्यर्थः महतीइज्या
स्यमहेज्यः करोतिनानाक्रियाः क्रतुः सततस्थापितेसत्रं सत्रयागरूपोवासतांसज्जनानांगतिप्राप्यः सतांगतिः सर्वंपश्यतितच्छीलः सर्वदर्शी विशेषेणमुक्तोदोषैः
आत्माविमुक्तात्मासर्वंजानातिविशेषेणसर्वज्ञः ज्ञानमुत्तममिसेकंनामेतिभाष्येद्वित्रिभिन्नज्ञानिरूपइतितदर्थः ६१ शोभनंव्रतमस्यसुव्रतः सकृदेवप्रपन्ना
यतवास्मीतिचयाचते अभयंसर्वभूतेभ्योददाम्येतद्व्रतंममेतिश्रीरामायणे शोभनंमुखमानंमस्य ... सुमुखः सूक्ष्मः दुर्विज्ञेयः शोभनोघोषा
वेदोनेनसुघोषः सुखंददातिभक्तेभ्यः सुखदः सुहृत्प्रत्युपकारमनपेक्ष्योपकर्त्ता मोहनमपिस्त्रीणांमनोहरतिमनोहरः जितः क्रोधोनेनजितक्रो

यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्तमं ६१ सुव्रतःसुमुखःसूक्ष्मः
सुघोषःसुखदःसुहृत् मनोहरोजितक्रोधोवीरबाहुर्विदारणः ६२ स्वापनःस्ववशोव्यापीनैकात्मानैक
कर्मकृत् वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ६३ ॥ ॥ ॥ ॥ ॥

धः वीरः तत्तत्कर्मेसमर्थो बाहवोस्यवीरबाहुः विदारयतिरिपुवक्षो नृसिंहावतारेविदारणः ६२ स्वमाययापतिप्रापयतिभक्तान्स्वापनः सुषुप्त्यन
शः अपराधीनः स्ववशः इतिवाव्याप्नोतिव्यापीनैकः आत्मानैकात्मासकलजीवविविधरूपत्वात् नैकानिकर्माणि करोति नैककर्मकृत् वत्सा
नरणितरक्षतिगोपीभ्यः वत्सरः वत्साहरणलीलायांतथादर्शनात् वत्सलः स्नेहोभक्तेष्वस्य वत्सलः वत्साः संतिचारणाय अस्यवत्सीरत्नानि
उत्कृष्टानिवस्तूनिगर्भेस्यरत्नगर्भः धनेश्वरोधनेश्वरः अग्नादौवसुदान इतिश्रुतेः ६३ ॥ ॥ ॥ ॥ ॥ ॥

स्प१

(c) Dharmartha Trust J&K. Digitized by eGangotri

द्वा० धर्मं गोपायतीति धर्मगुप् धर्मगुप् इति चतुर्थ्यन्तं धर्मं करोतीति धर्मकृत् प्रशस्तो धर्मोऽस्यास्तीति धर्मी सत् स्थूलं असत् सूक्ष्मं क्षरं विनाशी अक्षरं अविनाशि न विज्ञातस्वरूपः किं
वृत्तानरूपः अविज्ञाता अवीनामविरूपः पत्नानां गोपानां ज्ञातेतिवा तस्य तत्कर्मविज्ञायेति दृश्यमोक्तं सहस्रांशिरंशवः किरणा अस्य सूर्यरूपस्य सहस्रां
३३२ शुः विशेषेणाधत्ते धारयतीति यो वपतिवा जगत् विधाता कृतानि पर्याप्तानि लक्षणानि यस्य कृतलक्षणः युगपद्योगप्रयोगः कृतः गुरोः प्रतीतिकृतलक्षणः हे
तलक्षणाविति चामरः ६४ गभस्तयोरश्मयो नेमय इवास्य गभस्तिनेमिः ध्यायेत्सदा सवितृमण्डलमध्यवर्ती सुकेः सत्त्वेति सत्त्वस्थः उपमस्थासदा लक्ष्मीरि
ति वा सत्त्वगुणेनमाप्य इत्यर्थेन शब्दलोपेनासत्स्वभावोऽमतिवल्लसिंहशब्देनोच्यत इति भाष्ये सिंहइहनविक्रमो वा भूतानां महत्त्वात्तस्य ईश्वरः भूतमहेश्वरः

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरं अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ६४ गभस्तिनेमिः सत्त्वस्थः सिं
हो भूतमहेश्वरः आदिदेवो महादेवो देवेशो देवभृद्गुरुः ६५ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ६६ ॥ ॥ ॥

आदिः कारणम्भूतो देवः सकलदिंवुध्यालयोऽश्रयः आदिदेवः अत एव महान् देवः महादेवः देवानामीशः देवेशः देवान् बिभर्तीति देवभृत् इ गुरुणाति राम०
तत्त्वं गुरुः देवभर्तागुरुः देवभृद्गुरुः पुराणे देवनाशकः शकस्यापि जनार्दन इति हानधर्मे ६५ उत्तरः सर्वोत्कृष्टः गवाम्पतिः स्वामी गोपतिः गोप्ता पाति
गोप्ता ज्ञानेन गम्यो न कर्मणा ज्ञानगम्यः न कर्मणेति श्रुतेः पुरापि भवत्वात् पुरातनः शरीरभूतरूपाणि भूतानि बिभर्तीति शरीरभृत् तेजापसपृथिवीशरीर ३३२
मित्यादिश्रुतेः भोक्ता पालयिता इति पंचमंमाते कपिः सुग्रीवस्तदीनेन कपीन्द्रः भूरिर्भूयो दक्षिणा भूरिदक्षिणः ६६ ८१ ॥ ॥ श्री

सोमंपिबतिसोमपः ॥पुष्पार्थादिरूपेणवानानापद्मकर्तृत्वात् अमृतान्देवानयतिअमृतपः सोमः चंद्रः यान्हादकः उमानसीहैमवतीहरिद्राकीर्तिकांतिस्थिति
विश्वोक्तेः कीर्तियुक्त इतिवापुरून्बहून्जयतिपुरुजित् पुरुषोवरवः सत्तमोपेन पुरुसत्तमः वीतरागभयक्रोधामन्मयामामुपाश्रिताः बहवोज्ञानतपसा
पूतामद्भावमागता इतिभगवद्वचनं विशिष्टोनयो स्यविनयः योवनकामाश्रमयान्नक्रोधा लार्थकारणात् अन्यायम मनुवर्त्ततेस्थिरबुद्धिर
लोलुपस्सुधोगपर्वशीजयतिक्रोधादीन्जयः सत्यासंधाप्रतिज्ञास्यसत्यसंधः नान्यंतहिवचोविप्र प्रोक्तपूर्वमयानघ मत्तायप्रतिज्ञेपयिलोकानां
समवोभवेदितिहरिवंशे विप्रतिनारदसंबोधनं दाशोदानेदाश्यदानइतिधातोः तत्त्वीहीयोदाशः दाशार्हः स्व पात्रतरः कोन्यस्त्रिभुलोकेषुविधेत कला
कमलपत्राक्षाद्देवरवाजनार्दनादितितद्वृष्णेर्वंशेदाशार्हवंशोद्भवत्वाद्दाशार्हः सात्वतनामवे वंशस्य सात्वतंपोक्त्वनेववंतंत्रेदृपोवदत्तिकेरतिब्रलाउपु म०५

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः विनयो जयः सत्यसंधोदाशार्हः सात्वतांपतिः ६७ जीवोविनयितासाक्षी
मुकुंदोमितविक्रमः अंभोनिधिरनंतात्मामहोदधिशयोंतकः ६८ ॥ ॥ ॥ ॥ ॥

दारणत्ततदा वक्षेतसात्वतानारदाद्याः शिजंतातक्विप्प्रतेषांपतियोगक्षेमनिर्वाहकः सात्वतांपादवविशेषाणांपतिर्वापतिर्गतिस्वाधकंहृष्टिसात्वतंमि
तिप्रथमेमुकोक्तेः सातिः सुखार्थः सोत्रोहेतुमत्पंपतः तस्मातश: सानयः वासरूप न्यायेनक्विपिसात्वपरमात्मासात्वतंकोभक्ता इतित्वनुपसर्गेस्विपति
स्तेन अभियुक्ताः तसोमुलर्थेइतिभस्वाज्ञस्तेन ६७ जीवपतिजीवः विनय तिविनयितातस्मा : साक्षीविनयितासाक्षीमेकंमुक्तिं ददातिमुकुं
दः प्रबोधरादिः अमितविक्रमात्रयोमि तविक्रमः तानिहवारतानिचूलायंमांसिदेवामरुव्याः पितरोसुराइतिश्रुतेरभसंदिवादीतनिधिरिवोपादेयः
अंभोनिधिः अनंतेत्रीमतिवलमइत्यात्माविक्रमस्यानंतात्मा महोदधौशेतेमहोदधिशयः अंतकः ६८ ॥ ॥ ॥ ॥

© Dhamartha Trust & Digitized By eGangotri

पापा ३ जैर जि

दृ० नजायतेप्राउर्भवतिस्वयमु इत्थंहृदये अजः महः पूजानर्हरि महार्हः इतिभाष्ये महानर्होवा सेयं अर्के भो अर्घ्यतनीयः सएवस्वाभाव्यः जिता अमित्रा अनेनेतिजितामित्रः
३३३ प्रकर्षेणामोदते मोदयतिवाप्रमोदनः आनंदः सुखरूपतस्यैवानंदस्य मात्रामुपजीवंतीतिश्रुतेः नंदयतिसमर्धयति नानंदनः स्वयंचसमृद्धो
तिस्यातोनंदः सत्योधर्मोस्यसत्यधर्मा रिरहितः त्रिषुलोकेषुविक्रमोगमनमस्यत्रिविक्रमः ६९ महर्षिः कपिलाचार्यः इत्येकंनामेतिभाष्यकृतः महान्
ऋषिः कृत्स्नदृष्टिपदर्शीमहर्षिः कपिलाख्यासावाचार्यश्चकपिलाचार्यः सिद्धानांकपिलोमुनिरितिगीतासु आचिनोतिच शास्त्रार्थमाचारेस्थापयत्यपि स्व द ४
प१

श्रीमहार्हः स्वाभाव्यो जितामित्रः प्रमोदनः आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ६९ महर्षिः क
पिलाचार्यः कृतज्ञो मेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ७० ॥ ॥ ॥

यमाचरतेयस्मात्सआचार्यउदाहृतइतिस्मृतेः कृतंजानातीतिकृतज्ञः मेदिन्याः पतिर्मेदिनीपतिः युधिष्ठिरेणयुगेसनंयोरूपभगवद्धीनत्वात् यमावृत्ता
रेष्टथिवीपतित्वाच्चत्रीणिपदान्यस्यत्रिपदः त्रिदशानांदेवानामध्यक्षः त्रिदशाध्यक्षः महत्शृंगमभुलसुक्तं येविषाणांवामत्स्यावतारस्यमहाशृंगः शृंगं राम०
प्रमुखेशिखरेचिह्नेक्रोडावुपत्रके विषाणांत्कर्षयोश्चापीतिविश्वः कृतांतसिद्धांतंकरोतीतिकृत् यमंवाकुशलकर्मवाकृंततीतितथापाकृतांतो ३३३
इतिश्रीपरमसिद्धांतेदेवाकुशलकर्मस्वित्समरः ७० ॥ ॥ ॥ ॥
कृतांमर

महान्लोकोऽन्नेश्वराहः महावराहः गाः विंदतिलब्ध्वा धारयितुं गोविंदः ग्राह्यत्वात्सारत्वं तस्त्वं गोविंदो वेदनाद्भवमित्युद्योगपर्वणि सेनयासुष्ठु पातिसुषेणः ... यतिशि शि ज्ञेनात्परावापरश्च उपसर्गात्स्तुनोतीतिषत्वम् शोभनासेनास्य वा कनकाङ्गदस्वर्णमयं चंपकमयं वा केयूरं तदस्यास्तिकनकाङ्गदी कनकं चंपकस्वर्णयोरितिविश्वः गुहितं संवृणोतिगोप्यः गुह्यः परमरहस्यरूपत्वात् श्रुतिसु हितगुहितम्यः ... इतिकाव्य दुरभिप्रायत्वाद्गभीरः नव्यस्यकहिंचिदितिप्रथमस्कंधोक्तेः गहनोदुष्प्र वेशः ... भक्तैः अवस्थात्रयभावसाक्षित्वाद्गहनो इंद्रियैरग्राह्यत्वाद्गुप्तः मायाह्येषामयासृष्टायन्मां पश्यसिनारदेत्युक्तेः चक्रंदसुदर्शनं कौमोदकींगदांधरतीतिचक्र
कगदाधरः ७१ विदधन्नेभक्तानांहितंवेधाः इतिभाष्यकृत्तरदंचार्थिकं नसत्तद्भक्तोरूपं पश्यादरादित्वकल्पनापन्नेः रूपंतुविधविधानेरस्पारसुनिवोध्यं संभक्त्या
ः स्वंगानिवासस्यांगाः शत्रुभिर्नजितः अजितोभक्तैर्जितोवा कृष्णोवर्णाः श्यामयस्मात्तस्मात्कृष्णोऽहमर्जुनेतिमोक्षधर्मोक्तेः पुनः कृष्णः समर्थत्वात्दृढः दृढः स्थूले
नश्शक्तिप्रगाढे पिदृढोमतइति अजिताभक्तैर्जितावविश्वः संकर्षणोनुकुर्वन्स्वसंकर्षणः नच्यवंते प्रियभक्ताः महत्सांप्रलयायादिअत्तोऽच्युतः स्मृतोलोके

महावराहोगोविंदः सुषेणः कनकांगदी गुह्योगभीरोगहनोगुप्तश्चक्रगदाधरः ७२ वेधाः स्वांगोजितः कृष्णोदृ
ढः संकर्षणोच्युतः वरुणोवारुणोवृक्षः पुष्कराक्षोमहामनाः ७२ ॥ ॥ ॥ ॥ ॥

सएकः सर्वगोव्याप इतिकाशीखंडे संकर्षणोच्युतरूत्येकं नामेतिभाष्ये स्वगुणैस्त्वंप्रापयितुं वरुणः नायमात्माप्रवचनेनलभ्योनचेस्ययानवहनाश्रुतेन
यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूं स्वामितिश्रुतेः वरुणापरेन वरुणालोकोलक्ष्येतेतत्र आगतः वारुणः एवं प्रसारितः कृष्णोभगवा
स्वयं नीश्वरः आद्यापागात्त्वपितरं वंधनोत्तावरुणसुरभिमतिवरुणालोकंगत्वानंदमाहायततआगमनस्पर्शमिश्चक्तेः वृश्चतिसंसारंवृक्षः भक्तकल्पवृक्षोवा
यानपुष्करमंवरमितिश्लोकेपुंश्चजलेरणतिदंदातिपुष्करमितिक्षीरस्वाम्युक्तेः पुष्कराक्ष्यस्मिन्जलवाचित्वावगमेप्रकृतेः पिपुष्करेपुष्कंजलंनपातिउत्पन्नेते
इतिमुक्तास्जलेसाक्षरणाइतियावत् ताइशश्रक्षिणीयस्यपुनः पुष्कराक्षः गोप्यादेरलपिकृतागसिदामतावयातेरशाम्भक्तलितात्तनसंकुराक्षः व
क्रानापभावनपास्थितस्य सांप्रं विमोहयतिमें ... यद्विभेनीतिर्भुक्त्युक्तेः एवमपिमहदुन्नतंमनोऽस्यमहामनाः ७२ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना भगोऽनिस्योऽस्य भगवान् उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां
च स वाच्यो भगवानिति पुराणे ऐश्वर्यं संहारकाले हन्तीति भगहा स्वरूपसुखं नित्यमस्यास्तीत्यानन्दी भक्तास्तु भगं हरिरित्यविशेषेणैव हरिं नन्दं हन्तीति सम्पत्तिमहारस्वस्त्वा
नन्द इव जिभगहा नन्दी पाण्ड्‌: कदम्ब कुसुमोऽस्य सिवनमालाविराजितः इत्युक्ते वनमालीवीत्यादि वाक्य इति हारवरे आदिस्या इपि उज्योति आदित्यो ज्योतिः कोदिस्यू
र्याधिकज्योतिः कोऽपि चेदधिकद्युतिः कोटिकन्दर्पलावण्यः प्राणकोऽप्यधिकप्रिय इति पुराणादिति तु भक्ताः शिशुपालस्यापराधान् सहत इति सहिष्णुः पुनः अ
पराधशतं क्षाम्यं मया ह्यस्य पितृष्वसः पुत्रस्यैव वधार्हस्य मा त्वं शोके मनः कृथा इति सभापर्वणि गतिमुख्याश्रयरूपेषु सत्तमः गतिसत्तमः ७३ शोभ

भगवान्भगहानंदी वनमाली हलायुधः आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ७३ सुधन्वा खंडपर
शुर्दारुणो द्रविणप्रदः । दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ७४ ॥ ॥ ॥ ॥

नं धनुः शा र्ङ्ग मस्य सुधन्वा खंडः सपरशुरस्य जामदग्न्याकृतेः खंडपरशुः अखंडपरशुरिति वा आस मन्तात् खंडपरशुर्म द्रोहेवास्येश्वर्यमाधुर्यवशत्वा
त् इति तु भक्ताः महानामपराणि रित्यायुक्तेर्भक्तानां सौम्यापि विरोधिनां दारुणः द्रविणं प्रहरति भक्तेभ्योऽद्रविणप्रदः द्रविणं कांचनेविंत्त द्रविणं चपराक्रम इति
विश्वः दिवं स्पृशतीति दिवस्पृक् वामनावतारे तथादर्शनात् सर्वं दृशि वेद्यास स्पताः सर्वदृग् व्यासः कृष्णद्वैपायने व्यासं विद्धि नारायणं प्रभुं कोह्यन्यः पुं
डरीकाक्षान्महाभारतकृद्भवेदित्युक्तेः वाचस्पतिरयोनिज इत्येकं चलोमेति भीष्म वाचो विद्यायाः पतिः जननं योनिजायत इति च ७४ ॥ ॥ राम०
३३४

© Dhamartha Trust J&K. Digitized By eGangotri

धर्द्वतसमाख्यातानि त्रीणि सामानि प्रतिपादकान्यस्य त्रिसामा गायति वृहद्रथंतरादिना साम्ना प्रीत्यर्थमिति सामगः स्तुत्यत्वात् सामवेदः सामवेदोस्मीति वचनात् सामः परमानंदरूपत्वान्निर्वाणं भवरोगनिवर्तकत्वाद्भेषजं संसारनाशकविद्योपदेशित्वाद्भिषक् सन्यासकृत् मोक्षार्थं कर्तृत्वाच्चतुर्थाश्रमं संन्यासकृत्‌ शमयतीति शमः यतीनां प्रधानं शमं करोति शमः। शान्तो विषयसुखेष्वसक्तत्वात् शान्तः प्रलये यस्मिन् भूतानि तिष्ठंतीति सर्वाणि निष्ठा शान्तिरविद्यानिवृत्तिः तस्माद्ब्रह्मरूपत्वव्यवस्थापनात् परं पुनरावृत्तिरहितं स्थानं परायणं पुंलिङ्गपाठे बहुव्रीहिः ७५ शुभान्यंगान्यस्य शुभाङ्गः शान्तिं ददातीति शान्तिदः स्रष्टा सृजति सकलं स्रष्टा कौ मोदते कुमुदः कौ पृथिव्यां वलते चलते कुवलं जलं तत्र शेते

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्। संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणं ७५ शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः। गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ७६ अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ७७

कुवलेशयः शयवासवासिवित्स्त्व कुक्षिणोह्यहि तो गो हितः गोर्भूम्याः पतिः गोपापतिमत्त्वान्‌ गोप्ता नि। वृषभो धर्मः सरवा क्षिस्य वृषभाक्षः धर्मानुसारेणैव विषमस्त्वशानानत्‌ वृषो धर्मः प्रियो यस्य वृषप्रियः ७६ न निवर्तते कर्मणो लोकसंग्रहार्थो अनिवर्ती विषयेभ्यो निवृत्त आत्मा चित्तमस्य निवृत्तात्मा संक्षिपति विस्तार्थं जनानां क्षमास्वेष्वसुसंपादनाल्लोकंकरोति क्षेमकृत् स्मृतिमात्रेणाय पावनत्वात्पुनः शिवः श्रीवत्साख्यं चिह्नं वक्षस्यस्य श्रीवत्सवक्षाः श्रीर्वसत्यस्मिन् श्रीवासः श्रियः पतिः श्रीपतिः श्रीमतां विरिंच्यादीनां प्रवरः श्रीमतां वरः ७७ ॥ ॥

स॰ ०
३३५

स्मचः सामानियन्तृत्वंप्रसिद्धंहि श्रीरमन्नासन्नामितिश्रुतेः श्रियंता श्रियंरद्धाति श्रीदः तस्मात् ॥ शः श्रीशः श्रियः शोभायानिवासः श्रीनिवासः पुनः श्रियानिधीयंते
स्मिन् श्रीनिधिः श्रियः कर्मानुरूपेणविभावयतिदद्धातिश्रीविभावनः श्रियोलक्ष्म्याः धरः श्रीधरः सातामपिश्रियः करः श्रीकरः श्रुतिस्मृतिप्रशस्तंनिरुपाधिपरमैश्व
र्यं ग्यस्वस्वानमुस्वंतवपरमात्मैवेतिसिद्धंतात्तश्रेयः उपकरणंवेषरचनाविधास्तच श्रीरितिप्रथिता श्रीरस्यास्तिपुनः श्रीमान् लोकत्रयस्याश्रयो लोकत्रयाश्रयः
७८ सोभनानिस्वक्षाणि ॥ शीयाण्यस्यस्वक्षः स्वंगः शतमपरिमितान्यानंदान्यस्यशतानंदः नंदपतिर्नंदिः सर्वधातुस्वरः ज्योतिर्गणानामीश्वरः ज्योतिर्गणेश्व
रः विजितः आत्मामनोयेनविजितात्मानकेनापिविधेयः कार्यः आत्माविग्रहोऽस्येत्यविधेयात्मा विधेयोविनयग्राही सम्परः विधेयः आत्माचित्तंदेहोवास्यविधेयात्मावास

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः ७८ स्वक्षः स्वंगः श
तानंदो नंदिर्ज्योतिर्गणेश्वरः विजितात्माविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ७९ उदीर्णः सर्वतश्चक्षुरनीशः शा
श्वा१ श्वतस्थिरः भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ८० ॥ ॥

तीकीर्तिरस्यसत्कीर्तिः छिन्नाः संशयाअस्यछिन्नसंशयः ७९ उदीर्णः सर्वतोधिकः सर्वतश्चक्षुरस्यसर्वतश्चक्षुः नास्तिईशोऽस्य अनीशः नतस्येशेकश्च राम॰ ०
नेतिश्रुतेः शाश्वतस्थिरइत्येकंनामेतिभाष्ये सकलकालेइत्यायीनित्यस्थायी शाश्वतेस्थिरापेतिचतुर्थ्यातंशाश्वतायस्थिरायेति वासविसर्गपाठेता
पैरेसुरितिवैकल्पिकविसर्गलोपविधानान्नानुचरममेव भूविशेतेसीतान्वेषणेसागरतीरेभूशयः क्वचित्सल्लवनतल्पेषुनिसुद्धनमकर्णितः स्वभूषणलाश्रयः ३३५
शोभितेऽपात्तंगापवर्हेण इतिदृष्टमोक्तेः श्रीलक्ष्मावत्माऐवैरंनामतिनुभक्ताः भूषयंतिसंवेभूषणः नेषादिः भूतिः सत्ताविगतः शोकोऽस्माद्विशोकः ना
शोकः शोकनाशनः स्पष्टः ८० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्य १

र्चींषि संतीत्यस्यार्होऽपि विद्यमानानि स्यार्चिष्मान् पद्मादितगतं तेजस्त्वादि भगवद्वचनात् अर्चितः पूजितः सर्वैः कुंभवदस्मिन् सर्वं प्रतिष्ठितमितिभाष्य
बुराणस्मसंति कुंभो सन्मादि कविद्भिर्ल्वैः कचित्कुंभैः कचामलकमुष्टिभिरिस्तु कुलाक्रीडनिश्चरतुर्वनरतिस्मा मोक्ताः इतिभक्ताः विशुद्धात्मात्मा स्ववि
शुद्धात्मा विशेषगुणशोधयतियापं विशोधनः न निरुद्धः क्वचित् पुनरनिरुद्धः नास्ति प्रतिरथः प्रतियोद्धास्य अप्रतिरथः पुनः प्रतिमानेन त्रीन्लोकान
तिरिच्यतेतं हास्यपुण्डरीकाक्षं कोनुयुध्येत बुद्धिमानिति तु योग पर्वति प्रकृष्टं द्युम्नं धनमस्य प्रद्युम्नः अमितः विक्रमोस्यामितविक्रमः ८१ कालनेमिनामान
मसुरं निहतवान् कालनेमिहा कालनेमिरहं कंसस्तरवतारत्वादिति त्रिभक्तः विंगरुडं रण तिपुनर्वीरः शौर्ययुक्तत्वात् शूरस्य वसुदेवस्यापत्यं शौरिः पुनः

प्रतिरथः १

अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोऽप्रद्युम्नो — — मितविक्रमः ८२
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ८२ ॥ ॥

त्मा

शूराणामपि जनानामिष्टः शूरजनेश्वरः अव्ययो लोकस्त्रिलोकस्तस्यात्मा अंतर्यामित्वात् त्रिलोकात्मा एवं त्रिलोकस्य शास्त्रेलोकेशः प्रशस्ताः केशाः
स्योहि सक्तानात्र्यंशौवास्य केशवः केशाद्योन्यतरस्यामिति वः अंशवो ये प्रकाशते केशसंज्ञिताः सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमा इतिम
हाभारते केशवेति समाख्यानं ईशोहं सर्वदेहिनां अंशवो ये तवांशसंभूतौ तस्मात्केशनामया निहरि वंशे केशोवा तोगच्छ त्वोस्मात्सर्वे धातुभ्यो वा ऊलकार
पारिने केशिनं हतवान् केशिहा हरतिकैरपिस्मृतः पापानि हरिः ८२ ८२ ८२ ८२

काम्यत इति कामः सर्वासौ देवश्च कामदेवः कामान् भक्तानां पालयति कामपालः एवमपि कामो अभिलाषोऽस्यास्य कामीत रंह भक्त्युपपन्नमित्याद्युक्तेः कस्य
रा० ब्रह्मणोऽप्यंतोऽस्मात् कांतः कृत आगमो वेदो येन कृतागमः अनिर्देश्यं जात्यादिरहितत्वात् इदं तदिति शक्यकथनं वपुः स्वरूपमस्य अनिर्देश्यवपुः पंतो
वाचस्साद्दिश्रुतेः वे ष्टि कांसाद्यावाशक्तिव्योपुनर्विष्णुः व्याप्य मे रोदसी पार्थ कांतिरभ्यधिका स्थिता क्रमणाद्वाप्यहं पार्थ विष्णुरित्स सिं संहित इति म
३३६ हाभारते पुनर्वीरोत्सेः शुभेटायीवीर्थ्वसुभटेत्सेः इति विश्वं गंधर्वाप्सरसो यक्षाः किन्नरोरगचारणाः नांतं गुणानां गच्छंति तेनानंतोऽयमुच्यत इति विष्णुपुराणे
धनं जयति धनंजयः पार्थोऽर्जुनः स एवाहमिति तथा पांडवानां धनंजय इत्युक्तेः ८३ ब्रह्मणोऽत्तपः मंमत्तयेऽहितो ब्रह्मण्यः ब्रह्माणं वेदं करोतीति ब्रह्मकृत् तद्ब्रह्मास्र

कामदेवः कामपालः कामी कांतः कृतागमः अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ८३ ब्रह्मण्यो ब्रह्म
कृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ८४ ॥ ॥ ॥

म
दृ
ह्रि समपेस्तस्याद्रिय हरिविरिंचिहरेति संज्ञा धत्त इत्युक्तेः सर्वेपि ब्रह्मप्रसक्तमिति मे रूपत्वं नामाप्रमगोचरः वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमिति पुराणो
ब्रह्म तपो विवर्धयतीति ब्रह्मविवर्धनः सोऽत्तप्यतेत्युक्तेः ब्रह्म वेदं तत्त्वं वा वेत्ति ब्रह्मवित् ब्रह्मणो वेदस्य प्रवक्ता ब्राह्मणः शोभेताः स्वाध्यायप्रवचनेनएवेति रा०
नाकोमाद्रुत्य इत्यादिश्रुतिवचनेन वेदप्रवक्तृत्वावगमात् ब्रह्मतत्त्वमस्यास्ति ब्रह्मी व्री त्यादित्वादिनिः ब्रह्मज्ञो जीवरूपेण जनहात्मानेमवावेदा ३३६
हं ब्रह्मास्मीति श्रुतेः ब्राह्मणाः प्रिया अस्य ब्राह्मणप्रियः घ्नंतं शपंतं परुषं वदंतं यो ब्राह्मणं न प्रणमे यथाहं स यायद्धद्ध दावाग्निदग्धो वधश्चवश्चश्च
म्य
न चास्मदीय इत्युक्तेः ८४ ॥

महांतः क्रमाः पादविक्षेपा अस्य महाक्रमः महांति कर्माण्यस्य महाकर्मा महत्तेजोऽस्य महातेजाः येन सूर्यस्तपतीति श्रुतेः महांश्चासावुरगश्च महोरगः सर्पाणाम
स्मि वासुकिरिति गीतासु यथाश्वमेधः क्रतुराडिति स्तुत्योऽश्वमेधोपि सर्वेऽवेति महाक्रतुः क्रतुर्धर्मेऽश्वयन्मपदं स्तुत्येः महान् यज्वा यागान् कृतवान् लोकसंग्रहार्थं महा
यज्वा महान् यज्ञो जपयज्ञः महायज्ञः यज्ञानां जपयज्ञोऽस्मीति भगवदुक्तेः महत्तद्धविः ब्रह्मार्पणमिति साधूक्तेः ८५ स्तव्यः स्तुतियोग्यः स्तवप्रियः स्तवप्रि
यः स्तूयतेऽनेनेति स्तोत्रं गुणप्रतिपादकं शास्त्रं स्तूयतेऽसौ स्तुतिः गुणकीर्तनक्रिया स्तोता स्तुतिकर्ता त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वं
चसि त्वं जातो भवसि विश्वतोमुख इति श्रुतेः रणं प्रियोऽस्य कौरवपांडवानां न तु संधिकरणप्रियः दुर्योधनं सौवलं च कर्णो दुःशासनं तथा अपातयिलाया

महाक्रमो महाकर्मा महातेजा महोरगः महाक्रतुर्महायज्वा महायज्ञो महाहविः ८५ स्तव्यः स्तवप्रियः स्तोत्रं
स्तुतिः स्तोता रणप्रियः पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ८६ मनोजवस्तीर्थकरो वसुरेता वसुप्रदः॥

चाल्लिनरसांतिर्विवर्जितममेति श्रीकृष्णोक्तेः अनंतकल्याणगुणात्मा पूर्णः भक्तानां कामपूरणशीलत्वात् पूरयिता पुण्यः चारुः पुण्यं तु चार्वपीसमरः पुण्या
कीर्तिरस्य पुण्यकीर्तिः आंतरबाह्याभ्यामामयाभ्यां संत्यक्तः अनामयः ८६ मनसो जव इव जवोऽस्य मनोजवः अनेजदेकं मनसो जवीय इति श्रुतेः तीर्थं
स्वस्पर्शनकरोतीति तीर्थकरः सुदूतमज्ञातिमनन्यदैवतदोष्णीयाह्यपरिरक्ष्येतेन मा आत्माहितो यः क्रियते तैर्देवमेवेधश्च कर्मात्मकाउक्तोऽस्ति तद्र
तिरश्मेव वसु सुवर्णं रेतोऽस्येति वसुरेताः अपएव ससर्जादौ तासु वीर्यमवासृजत् तदंडमभवद्धैमं सहस्रांशुसमप्रभमिति व्यासः ॥ ॥ ॥ ॥ ॥।

श्रीरामाय नमः

© Dharmartha Trust J&K. Digitized by eGangotri

हा०
३३७

वस्तूनि प्रकर्षेण ददातीति वसुप्रदः प्रदस्याहमनुरक्तः॥ स्मि हरिर्भक्तिरदूनं प्रोवाचेति स्मरणो। वस्तूनि धनानि प्रकर्षेण ददातीति पुनर्वसुप्रदः। वसु देवस्यापत्यं वासुदेवः मायया आत्मन
: स्वरूपं छादयतीति पुनर्वसुः वसत्यविशेषेण सर्वत्र वसुर्नोस्य स्मरः नास्य पुनर्वसुना: अहमन्नमहमन्नादोऽपराणि ब्रह्म हविरित्युक्ते हविः ८७ सत्ता अस्तीत्येवोपलब्धव्य इति वेदे सत्तमे
नन्तरतो विद्वद्भिर्स्तुतानां गतिः प्रायः सद्गतिः सत्ता कृतिरस्य सत्कृतिः सममं शोभते विद्यन्त सत्ता सर्वत्र प्रतीयमानः। धिष्ठान रूपा सत्ता भूतिरस्मात् सद्भूतिः सन्तो भक्ता
: परायणमभीष्टमस्य स सत्परायणः परपराभन भीष्टस्यामेसेराश्रमयोरयीति विश्वरूपस्य: नास्य हनुमत्प्रमुखाः शूरसेनः यदु श्रेष्ठः [illegible]
दुश्रेष्ठो यदुश्रेष्ठः सतां निवासं सन्निवासः शोभनाः पाण्डुनाय मुनात्र राज्ञो गोपालाः पर्यवेष्टारो स्मसुपाण्डुन इति भाष्यकृतः यमुनायाश्च दूरभवो रक्षो

वसुप्रदो वासुदेवो वसुर्वसुमना हविः ८७ सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः शूरसेनो यदुश्रेष्ठः स
न्निवासः सुयामुनः ८८ भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ॥ ॥

वृन्दावनादिरूपः सशोभनेनानेन यामुनं जलं शोभनमनेन वेत्ति भक्ताः ८८ भूतान्यावसंत्यस्मिन्निति भूतावासः वसुदेवे विशुद्धसत्त्वे ईयते न वासुदेवः पुनः शेषेणास
त्वविशुद्धं वसुदेव शब्देन परीप्सित तत्र पुमानयाहतः सत्वे च तस्मिन्भगवान्वासुदेवाधोक्षजो मे मनसा विधीयत इति चतुर्थे शिवोक्तेः सर्वे सर्वः प्रा
णापाधिका जीवास्तेषां निलयः सर्वासुनिलयः सत्तासो स्यानदासंपन्नो भवतीति श्रुतेः अलंपर्याप्तिः शक्तिः संपदा नास्य विद्यते इत्यनल इति भाष्ये राम०
एवं तु अनलमिति भवेन्न त्वनल इति तेन च तत्सर्वं भाष्यकारो नैवमभिप्रायत्वात् अग्रणाद्यापि नियातोः पुंसि संज्ञायां घ इति येऽनलस्य न विद्यते स्य ३३७
ति अले मित्यव्यय ग्रहणात्तु विग्रह तांतु विग्रहप्रसिद्धत्वात् इति ॥ ॥ ॥

भक्तानां क्वानल इति छित्वानलति पारिजातादि पुष्पैः स्वभावेन च सौगंध्यं बिभर्त्तीति नलः नल गंधन इति धातुपाठात् सपारिजात पुष्पस्पर्शसंसर्गाद्दन वासितः व भारम
गवान्गंधं दिव्यमानुषदुर्लभमिति हरिवंशोक्तेः अत्रानुवासित इत्युक्त्या पूर्वमेव वासितापीस्यथान्वाभाविकमपि सौगंध्यमुक्तमिति विरोधिनार्द्य इति दये
हा भक्तानां दर्पं ददातीति दर्पदः निजानंदानुभवविलासात् दृप्तः स्वेन हृदये धार्यते शुद्धरूपः दुर्धरः तेन शोधितुं करस्तेषामशक्तानां सक्तचेतसामित्युक्तेः अपराजितमथ
मध्येमंगलं अपराजितः स्फुटः ८९ विश्वमूर्त्तिरस्य विश्वमूर्त्तिः महतामस्थिरानंदलक्षणापि मूर्त्तिरस्य म[हा]मूर्त्तिः दीप्ता ज्ञानमयी मूर्त्तिरस्य दीप्तमूर्त्तिः
ःस्वमयपि न मूर्त्तिमान् अमूर्त्तिमान् न रूपमस्येहत्यथ प्रमाण्यत इति श्रुतेः अनेकाः भक्तानुग्रहार्थमूर्त्तयोः यस्य सः अनेकमूर्त्तिः एवं सोपीस्यमघमिति जिज्ञासु

दर्पहा दर्पदो दृप्तो दुर्धरोथापराजितः ८९ विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान् अनेकमूर्त्ति
रव्य- क्तः शतमूर्त्तिः शताननः ९० एकोनैकः सवः कः किं ॥ ॥ ॥

मशक्यत्वादव्यक्तः शतमसंख्याताः मूर्त्तयोस्य शतमूर्त्तिः अत एव शताननः ९० परमार्थतः सजातीयविजातीयस्वगतभेदरहितत्वादेक एवमपि
मायया बहुरूपत्वादनेकः अत एकोप्यनेकोयमिति चतुर्थ्यं तं सूयते सोमो अत्रेति सवः अहं धर्मं अध्ययनं परस्तुतेः कशब्दः सुखवाचकस्तेन स्तूयते कः इति कं
ब्रह्मेति श्रुतेरिति भाष्यकृतः एवं तु वा मिस्वापयोतीति च अशेष आदिसंसीकृतमकथंचित्कमाधेयकः स्याद्ब्रह्मानिलोके स्थिति विश्वोक्तेः ब्रह्मा
दिरूप इति तुच्छ तु पथ्याः विचार्यत्वात् किं अत्र ब्रह्मेति विशेष्यकाय किमेद्रिति चतुर्थ्यं तं बोध्यं ॥ ॥ ॥ ॥ ॥

रा० यद्धेहेन तत्तच्छेदेन वविशिष्यानिर्देष्टुं वाचिना ब्रह्माभिधीयते तत्पदं ३० नेरद्ध इति चतुर्थ्यंतं यत्तदोर्नित्यसंबंधात् श्रुतः प्रभसोद्भि रिसधिकोरक्षजितनिपजिम्पोउदित्त्वात्
३३८ भक्तानां लक्ष्यति गच्छति तत्र तत्त्वमक्तहितसाधनायेति पतत्तनोति विविधा लीलाः इति तत् इत्यादुः तन्मेते पतेत्ततेरति पतेत्तद् इतिवा चतुर्थ्यंतं वोध्यं यत्पदमनुत्तमं
मितिसंकनामेति भीष्म लोकानां बंधुर्हितः हितेनापदेष्टा कोलोकबंधुं लोकैर्नाथ्यते याच्यते लोकनाथः मापाः लक्ष्म्याः धवोमाधवः तुलसीदलमात्रेण त
स्मै तुलुकेन वा विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः सुक्ते भक्तवत्सलः ८१ सुवर्णवर्णो सम्यग्वर्णो हिरण्यवर्णो वर्णः पुरुषः सम्यक् शलाकनात सुव
र्णस्य दर्शनात् सवमपि हेमत्वंगेस्यं हेमांग अक्षपाणिपादं वदितिमक्ताः नवचक्रपाणिपादेः प्रहरणाद्यैर्भः यंशनिष्ठा सप्तंभ्यो वक्षवा विसनुशासनसंभ्दा

यत्तत्पदमनुत्तमं लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ८१ सुवर्णव
र्णो हेमांगो वरांगश्चंदनांगदी वीरहा विषमः शून्यो घृताशीरचलश्चलः ८२

वाः स्तुं तानि विषमः तस्मात्सुहेमसदृशं हेमैव वरांग मस्य संधेर्थोवोध्यः पर्याप्ततरागि स्विसिरण्मयः पुरुषः इति श्रुतेर्वरं श्रेष्ठं अंगमस्य वरांगः चंदनं चांगदे च वदंत्यस्य सः
चंदनांगदी चंदनमिवाह्लादकं केयूरं नंदनं तस्यास्ति इति तेनाविलनकर्मधारयान्मत्वर्थीय इति सुक्ते असुरवीरान् हंतीति धर्मत्राणाय वीरहा विगतः समोऽस्मात् वि रा०
षमः सुविनिर्दुष्टप्रेरितविबलननसमो स्वम्पधिकः कुतोन्यः इति भागवद्गीता सर्वधर्मशून्यत्वात् शून्यः घृताः विगलिताः आशिषोऽस्मात् घृता ३३८
शीः आप्तकामत्वात् नचलतीति स्वरूपात् अचलः चलतीति तत्तत्प्रयाणिरूपेणाचलः ८२ ॥ ॥ ॥ ॥ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

९१

नमानो देहादौ तादात्म्याभिमानवान् अमानी मानं भक्तानामपि देहाद्यभिमानं दः मान्यते पूज्यते सर्वैः मान्यः लोकानां त्रयाणां स्वामी स्वामी त्रिषु लोकेषु धृ स्वा
मी प्रगल्भते त्रिलोकधृक् त्रीन् लोकान् धारयतीति भाष्यं तु प्रागल्भस्यैव धारणारूपतया कथयिष्यते पंत्रिलोकधषे इति चतुर्थ्यतं पिनाकधृष इति
वत् नतु त्रिलोकधृते इति कातरतायाः स्पकुत्साप्यद्रनात् रभसौरपि त्रीन् श्रीमद्वारकामथुराव्रजाख्यान् लोकान् अमानुषानि भुवनानि धारया
तीत्युक्तत्वात् त्रिलोकधक् इति नाम्न एव धृत्वात् किं च त्रीन् लोकानित्यपि आर्थिकाभिमायेणानत्वं विग्रहः दिक्संख्ये संज्ञायामित्यादिना त्रिसेव सं
ख्यासमासस्य नियतत्वात् न च समाहारः स्यात् त्रिभुवनमेतिवत् यदि त्रिलोकी गणनापराः स्यात् इति त्रिलोकीत्यापत्तेः तस्मात् अवयवो लोकस्त्रिलो

मानदो १

अमानी मान्यो लोकस्वामी त्रिलोकधृक् सुमेधा
मेधजो धन्यः सत्यमेधा धराधरः ९३ ॥ ७ ॥

कं धक इति विग्रहः त्रिलोकनाथेन सतां मखद्विषइत्यादिप्रयोगानुरोधेन द्रशाक्तांशाकपार्थिवादित्वस्यावश्यकत्वात् इत्यमेवं वक्ष्यिकाकं पूजयेद्देवी
मित्यादिष्वपि निर्वाहः इत्यलं शोभना मेधा यस्य सः सुमेधा अस्य सातः न जरुः सुप्यदत्यन कौ नित्यमसिच् प्रत्यजामेधयोरित्यासिच सुमेधसे इति चतुर्थ्यतं मे
धे शाक्कसखे निरक्तसमवर्त्तिने ति रियहेन्न कृतमो स्कृतेन प्रादुर्भूतो मेघजः धन्यः सुकृती पुण्यवान् धन्यः इति कोशः धन्यापितमुलाकन्याधन्यो मा
तस्तुखः सुत इति सामुद्रिके सत्या मेधा यस्य सत्यमेधाः इति भाष्ये अत्रासिचविसः मृत्ये लतुदेवताविशेष्यामाद्यपसत्यमेधसावेतत्स्वरूपवीहिकर्मधा
रयान्यतररूपा अपपाठेन सुयोजं सत्यमेधसे इति चतुर्थ्यतं भाष्यकृताते युक्तं तु सत्यमेधाये इति शोषरूपेणाधरायाः धरः धराधरः ९३ ॥ ७ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

तेजसादित्यरूपेण वर्षतीति तेजोवृषः आदित्याज्जायते वृष्टिरिति स्मृतेः भक्तानां तेज इति पृथक् छित्वा सर्वभक्षः श्रेष्ठत्वाद्वृषशब्दः तत्र मनोहरंस्वरूपपदे
दा० ३३९ व्याघ्रपुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः उत्तरपदस्थ ता नामेवैषां श्रेष्ठपर्यायत्वोक्तेः व्याघ्रशार्दूलपुंगवऋषभयोपादा उ
नेन पर्यायान्तराणां ग्रहणात् आद्यशब्दात् मुखचंद्रपादपद्मा इति स्त्रीरत्नाद्यादि आद्यातेन ततोपि हि वृषशब्दस्य श्रेष्ठवाचकत्वान्नाभावश्च तत्र अन्योपि
विशेषः मल्लिनाथान्तटीकायां देपश्च ते धीरो द्युतिधरः सर्वशस्त्रभृतां वरः स्पष्टः भक्तैः सुपहृतान् सपर्याः प्रकर्षेण गृह्णातीति प्रग्रहः पापमक्तैः संप्रयुक्तान् च ए
काग्रगतबुद्धिमिताः सर्वाः शिष्यादेवः प्रतिगृह्णातीति वैशंपायनमित्युक्तेः निगृह्णातीति निग्रहः व्यग्रः इति छेदः विगतमग्रं नाशो यस्येत्यर्थः भक्तानुग्रहे व्यग्र

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः प्रग्रहो निग्रहो व्यग्रो नै
कशृंगो गदाग्रजः ९५

इति वा भक्तानां व्यग्रोऽनाकुलः तत्पाकः चत्वारि शृंगा इति मंत्रवर्णात् नैकशृंगः निगदेन मंत्रेणाग्रे जायत इति गदाग्रजः निशब्दलोप आर्षः उक्तं हि बृहद्देवतायां व
र्णस्यावर्णयोलोपो वद्नां व्यंजनस्य वा आत्राणीति कपिर्निभाद्नो यामायास्तु चेति अत्राणपरस्मैपदिः संभरंति अम आणीत्यपेक्षिते प्रियान्तच्छान्निमेक
पि वृषाकपिरित्यपेक्षिते अयं नाभावदतिवन्नुवोगहे दन्तो विशारदं प्रथ्रवाचः नाभा नेदिष्ठः इति दानमसइतिचापेक्षिते तत्वायामि आयास्तु हन्यंते रम० ३३९
गावः याचामागि मयाविति चापेक्षिते इदं च सर्वं श्रीमदाचार्यकृतव्याख्यानबलादुन्नीयते उक्तं च व्यासोदितः शंकरेणोविधिन श्वेयः शंकरो सोस विनोदः इति स्थि
पद्मानाभो नाम श्रीकृष्णस्यावरजः तस्यावरजः तस्याग्रज इति ९५

चतस्रो मूर्त्तयो विराट्सूत्रहिरण्यगर्भशतुरीयाख्या अस्यचतुर्मूर्त्तिः चत्वारो बाहवोऽस्य चतुर्बाहुः चतुर्भुजं शंखगदाद्यायुधमिति दशमे चतुर्बाहुर्नाम वासुना
म वासुदेवे रूढमिति विद्वद्भाष्यकृत् नाम्ना शांपंतनवित्यः चत्वारो व्यूहाः शरीरपुरुषछंदः पुरुषो वेदपुरुषो महापुरुषश्चेत्यैतरेयकोपनिषदुक्ता अस्य चतुर्व्यूह
चतुर्णां वेदानां तात्पर्यविषयाच्चतुर्गतिः चतुरः आत्मा स्रनोः अस्य चतुरात्मा चत्वारो मनोबुध्यहंकारचित्ताख्याः आत्मानो ऽन्तःकरणान्यस्यैवातन्मतोः सजतीति श्रुतेः चतुर्णामा
श्रमाणां भावः प्रेमास्मिन चतुर्भावः चतुरो वेदान्वेत्ति चतुर्वेदवित् चतुर्वेदस्त्रिलोकवत् एकः पादो सा जगत् एकपात् ९५ समावर्त्तयति संसारचक्रं समावर्त्तः स

चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ९५
समावर्त्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ९६

र्वर्त्तमानत्वादनिवृत्त आत्मास्य अतिवृत्तात्मेति भाष्ये निवृत्तो विषयेभ्य आत्मास्येति निवृत्तात्मा वा दुःखेन जेयो दुर्जयः दुरतिक्रमः भीषास्मादिति श्रुतेः
दुर् भयाभक्त्यैव लभ्यत्वात् दुर्लभः जन्मांतरसहस्रेषु तपोज्ञानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते इति व्यासः भक्त्या लभ्यस्त्वनन्यये
ति भगवाक्यं दुःखेन गम्यते दुर्गमः अंतरायप्रतिहतैः स्मृ अतिदुःखेन गम्यते दुर्गाः अधिगतोऽपि दुःखेन हृदये आवास्यते दुरावासः दुष्टं पथ्यात् तया
दुपतितच्छीलान् दुरारिणः आ धातोर्णिनीः तान् हंति दुरारिहा ९६ स्तेनातिक्रमणीयः ३

शुभान्यंगान्यस्य शुभांगः पुनः अंगान्याद्देवताः स्तत्तदुपासने षु लोके सारं गोप्यमरः वृ लोकसारंगः शोभनस्तं तस्त्यमानः प्रपंचो यस्य सु तंतुः तमेव तंत वर्धयतिति वर्ध
८० नः इंद्रः कर्मास्य इंद्रकर्मा पूर्वपदस्यां इंद्रकर्मा सहशील ऋणायोचितार्थलाभसु धर्मा कर्म्म तेयेन पारित्रात्तो मरा धिपः आनीय भुज्यते सो सोन किंत्वा ध्यासु नाहिता
३४० इतिदशमे सा कृतश्रीवलदेवो क्रमहो त्यपि भृतानि कर्मा णि का र्यापि यस्य महाकर्मा कृतमेव कर्मास्य कृतकर्मा कृतमेवास्य ज्ञानं तोति विदुरो केः कृतं र्यापि प्रश्च त ५७
र्विधपुरुषार्थ प्रायेण आगमो यस्य कृतागमः युगापर्यायियोः कृतमिति कोशः ८७ उद्भवत्यस्माज्जागत पुनः उद्भवः विश्वातिशायि सो दर्पिता सुंदरः सत्सु उंदनिसं [illegible]

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ८७
उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी ८८

दः आर्द्रीवाचकेनानेनक रुणाकोमलस्वांत इति भाष्य कृतः पररूपं पृषोदरादित्वादिति च तरत्नभक्ताश्च सुदि शोभायामित्यस्य कल्पद्रुम पठितस्या विरूपं
तेन शोभावानित्यर्थ इत्याहुः रत्नवन्नाभिरस्य रत्ननाभः शोभनकः नेत्रे रूपमस्य सलोचनः अर्च्य तेर्कः वाजमन्नं सनोति द [illegible] दाति वाजसन इ ८५०
ति भाष्ये भक्ता स्तवाजं यतेपियद्दो न्नं इति विश्वको शात वाजं दातिगोपेभ्यो वा नरेभ्यो वेत्यर्थ माफः चतुर्विधं नाशापित्यास्वयं सवृभुजे प्रभुरितिदशा ३४०
[illegible] मेककपिकायं दत्तमिति च शृंगमस्यातिमत्स्यावतारे शृंगी जतिजयंतः सर्वविदतिलभते सर्ववित् जयर्थं माफः चतुर्विधेनाशी लो जयी निरहसीतीतिः
[illegible] सर्वविच्चासौ जयी च सर्वविजयीत्येकं नामेति भाष्ये सर्वज्ञपिने इति चतुर्थ्यंतं ८८ ॥ [illegible] ॥ [illegible]

© Dharmarth Trust J&K Digitized By eGangotri

श्रुतिः ३

सुवर्णः शोभनवर्णो विंदवोऽवयवा अस्य सुवर्णो विंदुः विंदुर्लवेष्ववयवेष्विति मेदिनी सुवर्णाः सुवर्णसदृशा इति भाष्यं शोभनवर्णत्वेनैव सुवर्णसदृशत्वाभानत्वाद्वे
यनत्पर्वपदस्य सदृशलक्षणायां लिंगायगमः लिंगस्य शब्दधर्मत्वाद्वृत्तिविदितमेव सुधियां सुवर्णो कनकं सुवर्णमिति सुवर्णशस्य नपुंसकत्वेव आप्रत्ता
त्सवेव सुवर्णः इतिः अक्षसंशतेक्षोभक्तैरपि न क्षोभ्यते अक्षोभ्यः सर्ववागीश्वरेश्वरः स्याच्च महानतीर्थरूपो ह्रदः कालिपस्यानेन महाह्रदः कालिपह्रदं प्र हु
त्वाउपोष्य मास्मरन्त्वं स्वसर्वपापैः प्रमुच्यते इति दशमो गतः गर्तशब्दो नैरुक्तैः रथपर्यायउक्तः तेन महारथ इत्युक्तं भवतीति भाष्ये एकादशसहस्राणि योध धये

सुवर्णविंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः महाह्रदो महागर्तो महाभूतो म
हानिधिः ९९ कुमुदः कुंदरः कुंदः पर्जन्यः पवनोऽनिलः अमृतांशोऽमृ
तवपुः सर्वज्ञः सर्वतोमुखः १००

न्धन्विनां अस्त्रशस्त्रप्रवीणः स महारथ इति स्मृत इति भारते महानगो वर्धनादिसंबंधो गर्तोऽस्येति तु भक्तः तथा निविदि भुगर्तेभिति दशमे महान् भूतः
सत्यः परमार्थसत्यः महाभूतः तेषामेव सत्यमिति श्रुतेः महत्त्वेन निधिरिवो यादेवो गंमहानिधिः ९९ कौ मोदते कुमुदं तं तर्भावितरपर्थ माश्रित्य
कुं मोदयतीत्यर्थ इति भाष्ये कुंदरवत् स्वच्छानि कर्मफलानि राति ददाति कुंदरः कुदान्यस्य संति कुंदः कुंदरामस्कृते कौतुकवेषइत्युक्तेः पर्जन्यः वायुवेगवान्पु
नः पवनः इलति इलः प्रेरकः सनात्मस्य अनिलः पुनः अमृतं देवभोग्यमाशयतीति देवान् अमृतांशनः अमृते मरणरहितं वपुरस्य अमृतवपुः सर्वज्ञः अ
स्य पुनः सर्वज्ञः सर्वतो मुखान्यस्य सर्वतोमुखः १००

स्य ३ पर्जन्यइवतापनाशनः २

© Dharmartha Trust J&K Digitized By eGangotri

सैवं २

नामगानन्तस्यादिमात्रादपि सुखेन लभ्यते सुलभः गीतायां मम नामानि नरः पतिमम संनिधौ तेषाम संपरिक्रीतो धनंजयेत्यादि पुराणो पत्रेषु पुष्पेषु फलेषु
दा० तोयेष्वक्रीत लभ्येषु सत्सु भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ कथं न क्रियते प्रयत्न इति महाभारते शोभनं व्रतं प्रति सुकं सुव्रतः स्वसिद्धेश्चान्यानपेक्षत्वात् सिद्ध
३४१ शत्रून् कामादीन् जयति शत्रुजित् शत्रून् तापयति शत्रुतापनः न्यग्रोधः सर्वाणि भूतानि रुणद्धि अर्हणेति न्यग्रोधः उदुंबरमन्नाद्यं तदात्मनापो
षयन्नुदुंबर उद्गतश्चांबरात् इति भाष्ये न्यग्रोधो दुंबर इत्यत्र संधिरार्षः नश्वोपि स्थातेत्यश्वत्थः चाणूरादिः तादृक्रूरमपंचरूपं इत्यर्थः ऊर्ध्वमूलमधः शाखम

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः १
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः अमूर्तिरनघोचिंत्यो भयकृद्भयनाशनः १०२

अंशौविधि

श्वत्थमिति भगवद्गीतावाणूरनामानमांध्रदेशोद्भवं कंसहस्तकस्थमल्लं निषूदयति चाणूरांध्रनिषूदनः १ सहस्राणि अस्य सहस्रार्चिः तप्तकाली
करालीच मनोजवा च सुलोहिता या च सुधूम्रवर्णा स्फुलिंगिनी विश्वरुचीति त्याख्याना जिह्वा अस्याग्निरूपस्य सप्तजिह्वः एवं सप्तैधांसि स दा० ३४१
मिधोस्य तद्रूपस्यैव सप्तैधाः सप्तते अग्ने समिधः सप्तजिह्वा इति श्रुतेः सप्तवाहनान्यस्य सूर्यरूपस्यास्य सप्तवाहनः सप्ताश्वरथसंयुक्तोधि
मुजः स्यात् सदारविरित्युक्तेः नास्ति मूर्तिर्घनरूपस्यामूर्तिः पुनरनघः अनघोऽपापहतं पयोऽस्ति विधारणाकोशेऽस्य भयमिति शवययिंतन
त्वादचिंत्यः भयकृत् अभक्तानां भयनाशनो भक्तानां १०२

तरति ३

ऐघोरगुरात्माचेतसावेदितव्यइतिश्रुतेरणुः स्थूलः वृहन्निर्धतिवृहत् अत्र व्रह्मविशेषणं कृशः अविपादशायां स्थूलो पितत्वं स्त्री त्वं कुमारइ
तिश्रुतेः गुणात्मकस्यापाणानविभर्ति गुणभृत परमार्थतो निर्गुणः महान सर्वधर्मोऽस्मिन्नाविष्मोर्नाममात्रैकजन्यकासुखेनयांगतियांतिनतो
सर्वेपिधार्मिकाइतिनाममात्रेणजगदुद्धारकत्वात नकेनापितः अधृतः किंतर्हिस्वधृतः स्वेमहिम्निप्रतिष्ठितश्रुतेः शोभनं नेवेदनिश्वसित
त्वात्तयाआस्यमस्यस्वास्यः प्रागेववंशोऽस्यप्राग्वंशः व्रह्मादिरूपो हि भगवद्वंशस्तत्तदवतारेप्राप्नोतीतिप्रसिद्धं वंशंपांडवानांपरीक्षिद
रूपेणवर्धयतीतिवंशवर्धनः ३ अनंतादिरूपेणभुवोभारंविभर्तीतिभारभृत कथितः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरितिश्रुत्याता

अणुर्वृहत्कृशः स्थूलोगुणभृन्निर्गुणोमहान् अधृतः स्वधृतः स्वास्यः प्राग्वंशोवंश
वर्द्धनः ३ भारभृत्कथितोयोगीयोगीशः सर्वकामदः आश्रमः श्रमणः क्षामः सुपर्णो
वायुवाहनः ४

त्पर्यविषयीकृतः योगाश्चित्तवृत्तिनिरोधः सोऽस्यास्तीति योगी अन्येतुयोगिनोतंरार्येविहन्यंतेभगवांस्तुनतथेतियोगीशः सर्वान्का
मानदातीतिसर्वकामदः संसाराख्येऽध्वनामांविश्रमस्थानत्वादाश्रमः श्रमयतिखेदयतिभक्तविरोधिनः श्रमणः अनुतपमि
र्वदेवेतिपाठात् क्षामांकरोतिप्रजाः प्रलयकालेक्षामः तत्कोटीतितिणिजंतादच् शोभनानिछंदोरूपाणिपर्णान्यस्यसंसारत
रूपस्यसुपर्णः छंदांसियस्यपर्णानीतिश्रुतेः वायुंवाहयतिचलयतिवायुवाहनः १०४ ॥ ७ ॥ ८ ॥ ९ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

धनषो धरः साधारणेन धरः श्रीरामावतारे धनुर्वेदं नितकृत्स्नं दोषान जानाति धनुर्वेदः दंडो दमयतामस्मि इति च मातम त्वादिरूपेणादर्शयति प्रजांदमपि
तारं दंडस्य फलं दस्य निषोदस्मः सोपि स एवं निदमः अपराभिर्जितान्यादिभिरतुल्यावाभिर्मोपी भिर्जितः पुनराजितः सर्वानशत्रूनसहते सर्वसहः अ
यंत्र रणोन वा रूरः सर्वान स्व स्वकृत्ये पु नितरूछा लोनियंतानविपते नियमो नियंतो स्या नियमः नास्ति यमो मृत्यूरस्यायमः नियमो यम स्वयो गां रा० ३५२
तेतरूपत्वात्रियमः यमश्चेति च भाष्ये ५ सत्वमाद्यगुणास्तत्प्रशस्तमस्यास्ति सत्ववान् सत्वप्राधान्येन स्थितः सात्विक इति भाष्ये सरूमाधुः स
त्यः सत्ये धर्मे च तत्परः सत्यधर्मपरायणः [illegible] अभि अभिप्रयन्ते सर्वपुरुषार्थकांक्षिभिः अभिप्रायः प्रियाणि अर्ह

धनुर्द्धरो धनुर्वेदो दंडो दमयिता दमः अपराजितः सर्वसहो नियंता नियमो यमः ५ सत्ववान्सात्वि
कः सत्यः सत्यधर्मपरायणः अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः ६ विहायसगतिर्ज्योतिः सु
रुचिर्हुतभुग्विभुः

ति प्रियार्हः पयदिष्टतमं लोके पत्न्याः स्पदपि तं गृहीत्वा कृतः प्रवर्तेयपते जससूत्र पमिछाते जिस्मरणा तत्यागतासन पाद्यादिपूजामर्हतीति अर्हः प्रियं स्तवं क
रोति भक्तेनां प्रियकृत प्रीतिविषये प्रभक्तानां सस्मिन्प्राणिदानेन वर्धयति छैदयतिवर्धनः ६ विहायसे आकाशे गतिरस्य विहायसगतिः आ स
कारंतो पि विहायशब्दोऽत एवास्तीति गम्यते द्योतते ज्योतिः सुष्ठु रुचिः कांतिरस्य सुरुचिः समस्तदेवतोद्देशेन हुतं स्वयं भुंक्ते हुतभुक् अहर्निश राम० ३५२
र्वं पदार्थानां भोक्ता च प्रभुरेवचेति भगवतीता विभुः विभुः शिवे प्रभो नित्य इति विश्वः ॥ ५ ॥ ४ ॥ ७ ॥ ६ ॥

श्रीः

© Dharmartha Trust J&K. Digitized By eGangotri

रसमादत्ते रविरादित्यात्मेति भाष्ये रसानां च तथादानात् रविरित्यभिधीयत इति विरसधर्मोक्तिरेव रसं स्वं गृह्णाति इमा इत्येष इति तद्भक्ताः सर्वेषामपि दर्शनीयत्वाद्वि
रोचत इति रविः अथवा ब्रह्मणो वेदाध्यायकः इत्यर्थः स एव परं त्वं अपि पंक्तिस्त्वमग्निः संगतो न सूर्यो हि यातव्यमस्य वहन्ति रश्मयः काकोपदेशात् यत्र अश्नाति नष्टवाराणप
कमरुत्पदादित्याद्यव्ययवानिति तत्र रूपविः इत्यत्र योगः आश्रयणीयो यातिगो तानीत्युक्तेः विशेषेण रोचते विरोचनः सरत्याकाशे तत्पश्चात् सूर्यः आत्मा जगत
स्तस्थुषश्चेति श्रुतेः स तेजगतस्सविता प्रजानां च प्रसवमात्मपितेति निगद्यत इति विरसधर्मोक्तिः रविलोचनमस्य रविलोचनः अग्निर्मूर्धा चक्षुषी चंद्रसू

रविर्विरोचनः सूर्यः सविता रविलोचनः ७ अनंतो हुतभुग्भोक्ता सुखदो नै।
कजोग्रजः अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ८ ॥ ५ ॥

र्याविति श्रुतेः ७ नास्ति अंतः परिच्छेदोऽस्येत्यनंतः अनंतः नयंतो यद्धि मतीमा सोनंत इति गायत इति वचनात् हुतं भुनक्ति अग्निरूपेण पुनर्हुतभुक् भो
क्ता पुनः प्रकृतेः श्रीलक्ष्म्यावतारेणैव नानादेवीसुखात्व भक्तानां घति पुनः सुखदः अनेकेषु देशेषु कालेषु वा अनेकेष्वेव भक्तेष्वेव जायते नैकजः
नैकज इति पाठे प्यय मेवार्थः अग्रे जायते हिरण्यगर्भरूपेणाग्रजः हिरण्यगर्भः समवर्त्तताग्र इति श्रुतेः न निर्विण्णः शिथिलप्रयत्नः अनिर्विण्ण
अनिर्वेदः श्रियो मूलमिति विदुरोक्तेः सतः साधून् आभिमुख्येन मृष्यते क्षमते तस्मात् सदामर्षी लोकानां अधिष्ठानं आश्रयत्वेन सनकाराणां लोकानामधिष्ठानं
अनेकशक्तित्वादद्भुतः १०८

© (c) Dharmartha Trust J&K. Digitized By eGangotri

सनादिति निपातश्चिरकालार्थः कालश्च भगवत एव रूपमतः सनात परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथाप
रमिति विष्णुपुराणे सनोति सर्वं भगवनेऽपर्यति सनात्तानं तनिस्मातन्येन गच्छति सनात इति भक्ताः आद्ये सनात इति भक्ताः आ चतुर्थ्यन्त अन्त्येन्तु सनाते
टी० ३५३ इति षण दाने अत सातत्यगमने इति धातुः ब्रह्मादीनामपि कारणत्वात्सनातनतमः वहुवानस्य कपिलो वर्ण इति तद्रूपात्कपिल इति भाष्ये कर्दमप्रजाप
पतेर्देवहूत्यां प्रादुर्भूतः कपिलो वा कं जलं रश्मिभिः पिवन् कपिरिति भाष्यात् कपिर्वराहो वेति च कपिर्वराहः श्रेष्ठः स्वेति वचनात् अप्येति जगदस्मिन्नित्यप्य
यः इति नव मं शतं विवृतं स्वस्तिदः तिभक्तेभ्यः स्वस्तिदः स्वस्तिकृत् अत्र भक्तानां स्वस्तिकृत् कल्याणरूपत्वात् स्वस्तिः स्वस्मात्येव चतुर्थ्यन्तः स्वस्तिरिति सविसर्ग
पाठो प्रामाणिकः यद्वा स्वस्तये वा पुनःपुनः वामहे इत्यादिप्रयोगात् मंगलार्थोऽव्ययमपि स्वस्तिशब्दोऽस्ति प्रयुक्तश्च खंडप्रशस्तौ अश्चेः कुंडलाचक्रा [illegible] काविक

सनात्सनातनतमः कपिलः कपिरप्ययः स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्ति
दक्षिणः १०९

स्यूर्जितशासनः स्तोः समस्तनिगमस्कन्नो न हरिरस्कन्नः स्वस्त्यप इति अस्मिन्पद्ये सविसर्गपाठो ऽपि प्रामाणिकः स्वस्त्ययनम इति चतुर्थ्यन्तं च वोध्यः स्व
स्तिभक्तानां मंगलं भुनक्ति पालयति स्वस्तिभुक् स्वस्ति कल्याणविषये दक्षिणः शीघ्रकारी स्वस्तिदक्षिणः स्मृते सकलकल्याणभाजनं यत्र पज्जाते
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिमित्यादिवचनेभ्यः १०९ रौद्रं भयानकं कर्म तन्नास्त्यस्य अरौद्रः कुंडली स्यषः चक्रोपादवगणाः सोऽस्यास्ति च
क्री चक्रो गणो चक्रवापे चक्रं सैन्यं रथांगयोरिति विश्वः विक्रमी सम्यक् ऊर्जितः तं शासनमस्योर्जितशासनः अस्मच्चः चक्रोपादवगणाः सोऽस्यात्याकम मू० ३५३
चास्ति नं तेषां कर्माणि कुर्वन्ति अम घयो भागवत्पराहत्यादि पुराणे शासनं तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जाय
त इति श्री भागवते न मे भक्तः प्रणश्यतीति भगवद्गीतापा ॥

© (In) Dharmartha Trust J&K. Digitized by eGangotri

शब्दानतीत्य गच्छति शब्दातिगः यतो वाचो निवर्त्तंत इति श्रुतेः शब्दान् सहते सैकतात्पर्यान्करोति शब्दसहः वेदैश्च सर्वैरहमेव वेद्य इति वचनात् शिशिरः संसारता
पनाशकत्वात् शर्वरी संसारिणामात्मा हानि नां संसारः या निशा सर्वभूतानामित्युक्तेः तां करोति शर्वरीकरः भुक्तिमुक्तिप्रद इत्यर्थः १० अक्रूरः स्पष्टः
कर्मणा मनसा वाचा वपुषा च रुचिरत्वात् पेशलः पेशलो रुचिरे दक्षे इति विश्वः दक्षः शीघ्रकारी दक्षिणः सरलादिः दक्षिणः सरलोदारपरच्छंदानुवर्ति
षु क्षमिणां वरः स्पष्टः अतिशयेन विद्वान् विद्वत्तमः वीतं भयमस्मात् वीतभयः पुण्यश्रवणकीर्त्तनः स्पष्टः ११ संसारादुत्तारयति उत्तारणः दुष्कृति

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः १० अक्रूरः पेशलो दक्षः
दक्षिणः क्षमिणां वरः विद्वत्तमो वीतभयः पुण्यश्रवणकीर्त्तनः ११ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्न
नाशनः वीरहा रक्षणः संतो जीवनः पर्यवस्थितः १२

हंति दुष्कृतिहा पुण्यं करोत्याचष्टे वा पुण्यः दुःस्वप्नान्नाशयति स्मृतमात्र दुःस्वप्ननाशनः विविधान्दर्शान संसारगतीः हंति वीरहा ईरगतौ कं
पनेच १ रक्षति रक्षणः सन्मार्गवर्त्तिनः संतस्तद्रूपेण विद्याविनयवृद्धये वर्त्तते संतः अत्र सप्तसु नमस्यंति त्येव चतद्युक्तं नमो ब्रह्मण्यो हरिकेशोप
इतित्यादिवत भक्ता अन्येपि साधुत्वात् प्रशस्तत्वाच्च संतः व उवचनमासक्तपूजार्थं इत्युक्ते च संतोति इति ददाति आत्मपर्यंतं भक्तेभ्यः संतः प्राणादिके
तप्रत्ययात्तोपमग्नो नो बेत्या उः जीवयति जीवनः परितो विश्वं व्याप्यावस्थितः पर्यवस्थितः ११२ ॥ ७ ॥ ७ ॥ ७ ॥

अनंतानिरूपाणियस्यानंतरूपः अनंताः श्रियोस्यानंतश्रीः समासांतविधेरनित्यत्वान्नकप् अनंतश्रीरूपोवाजितोमन्युरनेनजितमन्युः भयमपहंतीतिभ
पापहः न्यायसमवेतश्चतुरस्रः कर्मानुरूपेणफलदानात् इतिभाष्येभक्तानांचतुर्णां अश्रमनेनेतिचतुरस्रः दुर्योधनस्यकर्णस्यशकुनेः सौबल
रा० ३५५ स्य च दुःशासनचतुर्णां मतिः पाशयतिशोणितमितिवृष्ट्या द्रौपदीसमाश्वासनपरः श्रीकृष्णवाक्यात इत्याहुः गंभीरआत्मामनोस्य गभीरात्मा वि
विधानिफलानिदिशतीतिमक्रेम्मः [illegible] विदिशः विशेषेण आदिशतीत्यादिशः दिशतीत्युपदिशतीति वेदरूपेणकर्माणिफलानिवादिशः १३ न
आदिः कारणं अनादिः न तस्यकार्यकरणं च विद्यत इति श्रुतेः भूरिव सर्वाश्रयः भूर्भुवोलक्ष्मीः शोभावेति ऋजुः पंथाः भक्ता अथर्वभाष्ये भूराधारः
ना६ सर्वभूतानामाश्रयत्वेनप्रसिद्धायाभुवोभूस्याआपातिभूस्यात् आपातिभू भवन्नकेवलमसौभूः भुव्यः लक्ष्मीः शोभाचेतिभूपोलक्ष्म्यां रिस्तु कैश्चत्भुवः

अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः चतुरस्रोगभीरात्माविदिशोव्यादिशोदिश १३ अनादिर्भूर्भुवोलक्ष्मीः

पदस्यमध्यस्थस्यानुषंगेणभूर्भुवइतिभुवोलक्ष्मीरितिचनामद्वयेनानुपूर्वीभाष्यतोपिप्रेतानन्तुभुवोभूरितिलक्ष्मीर्भुवइतियाभुवंदत्तस्योभयत्रसंबंधे
धापिपूर्वपिद्धपोक्तिणत्वस्यउत्तरपदेरूपात्पूर्वत्वस्यपाठवगतस्याबाधेनोपपत्तेर्वाधापेगातन्यथाइतिभुवोभूवोभूः न केवलमसौभुवोभूः लक्ष्मीशोभा
वेतिलक्ष्मीर्भुवइतिभाष्यकारेणोपेतः एवंस्थितेभिन्नविभक्तिकनामद्वयात्मकनामद्वयात्मकुनाम्निविशेष्यबोधकात्प्रथमोपलहितान्नान्न
[illegible]चतुर्थीप्रयोज्योतेभुवेभुवोनमः भुवोलक्ष्मीनमइतिप्रयोगः न तु भुवोभुवेनम इतिवापिभुवेनमोभुवइतिचतुर्थ्यापिजनेष्यान्नातश्चमस्यता
गायोगातापेननाव्यवधानन्यायेनचतुर्थीश्रेणाव्यवधानस्योचितत्वात् नमः सकलव्याणभाजनमापपिनाकिनेनमोलक्ष्मीनिवासाय देवता
पेगिरांनमइतिवतव्यवहितनमःशब्दयोपिचतुर्थ्यनुशासनाच्च क्वचित्रामावत्योभुवोभुवेनमइतिदृश्यते एकंतुसंधिपोविचारंपंतहमर्षौ रामं० ३५५
कः भुवः भवःभवलोकस्तयोः शोभेतिवा लक्ष्मीरित्येकनामत्वपक्षेपिभाष्योक्तः सतुनवकममाणासंख्याविभागसेयाही ० ॥ ८८ ॥ ८८ ॥

गे२ मा३

© Dharmartha Trust J&K. Digitized by eGangotri

अं२

शोभनावीराः पुत्राश्च अस्य सुवीरः रुचिरे अंगदे अस्य रुचिरांगदः जनयति प्रादुर्भावयति प्रजाः इति जननः जनस्य जन्तुमात्रस्य जन्म उत्पत्तिः तस्यादिः कां
रणं जनजन्मादिः भीमो भयहेतुः भीमपराक्रमः स्पष्टं ७४ आधाराणां भौतिकानां पृथिव्यादीनां महाभूतानां निलयः आधारः आधारनिलयः नास्ति धाता धा
रको ऽस्य अकारणत्वात् स्वेनैव नित्यसंस्थानं विधिरनित्यत्वात् धयति जगत् पिबति संहारसमये धाता विरूपान् इति भाष्ये पुष्पवद्विकसत्को हासो ऽस्य पुष्पहासः प्र
वेद्यं वेदसमितिपार्थ वेद्यं ज्ञेयं ३८ अनिरुद्धमहंकारं ३९ पंचधा पंचप्रकारं देवासुरमानुषश्वापदतिर्यग्रूपेण पंचजनाः पंचभूतानि देहरूपपत्रीविश्वं सिसृक्षुणा सा यस्ती

चंद्रादित्यौ ग्रहनक्षत्रताराः सर्वाणि दर्शान्यथपौर्णमासं नक्षत्रयोगा ऋतवश्च पार्थ विष्वक्सेनात्सर्वमेतत्प्रसूतं ३२ रुद्रादित्या वसवो
थाश्विनौ च साध्याश्च विश्वे मरुतां गणाश्च प्रजापतिर्देवमाता दितिश्च सर्वे कस्मादृषयश्चैव सप्त ३३ वायुर्भूत्वा विक्षिपते च वि
श्वमग्निर्भूत्वा दहते विश्वरूपः आपो भूत्वा मज्जयते च सर्वं ब्रह्मा भूत्वा सृजते सर्वसंघान् ३५ वेद्यं च यद्वेदयते च वेद्यं विधिश्च
यं चाश्रयते विधेयं धर्मे च वेदे च बले च सर्वं चराचरं केशवं त्वं प्रतीहि ३६ ज्योतिर्भूत्वा परमोसौ पुरस्तात्प्रकाशयन्प्रभया विश्वरूपः
अपः सृष्ट्वा सर्वभूतात्मयोनिः पुराकरोत्सर्वमेवाथ विश्वं ३७ ऋतूनुत्पातान्विविधान्यद्भुतानि मेघान्विद्युत्सर्वमैरावतं च सर्वं कृ
त्स्नं स्थावरजंगमं च विश्वात्मानं विष्णुमेनं प्रतीहि ३८ विश्वावासं निर्गुणं वासुदेवं संकर्षणं जीवभूतं वदंति ततोनिरुद्धं सनयाच
तुर्थमाश्रयं यत्नात्मयोनिर्महात्मा ३९ स पंचधा पंचजनोपपन्नं संचोदयन्विश्वमिदं सिसृक्षुः ततश्चकारावनिमारुतौ च खं ज्योति
रंतश्च तथैव पार्थ ४० स स्थावरं जंगमं चैवमेतच्चतुर्विधं लोकमिमं च कृत्वा ततो भूमिं व्यदधात्पंचबीजां द्यौः पृथिव्यां धास्यति भूरि
वारि ४१ तेन विश्वं कृतमेतद्धि राजन्स जीवयत्यात्मनैवात्मयोनिः ततो देवानसुरान्मानवांश्च लोकानृषींश्चापि पितॄन्प्रजाश्च ४२
समासेन विविधान्प्राणिलोकान्सर्वान्सदा भूतपतिः सिसृक्षुः शुभाशुभं स्थावरजंगमं च विष्वक्सेनात्सर्वमेतत्प्रतीहि ४२ ॥ ॥ रा०

निसर्गेणान्वयः ४० चतुर्विधं जरायुजादि पंचबीजं चतुर्विधभूतग्रामः कर्म चेति पंचबीजभूतां ४१ ॥ मे१ ३६१

अतःकेशवात्परतरंकल्पयेतत्तद्विपरीतंअसन्मार्गइत्यर्थः ७६ अध्यायः ब्रूहिः १७ सौम्यंकल्याणं १८ ॥

यद्वृत्तंतत्रयच्चभविष्यतीहसर्वंह्येतत्केशवंत्वंप्रतीहि मृत्युश्चैवप्राणिनामंतकालेसाक्षात्कृष्णःशाश्वतोधर्म्मनाथः ७४ भूतंचयच्चेहन
विप्रकिंचिद्विश्वक्सेनात्सर्वमेतत्प्रतीहि यत्प्रशस्तंचलोकेषुपुण्यंयच्चशुभाशुभंतत्सर्वंकेशवोऽचिंत्योविपरीतमतःपरं ७५ एतादृ
शःकेशवोऽतश्चभूयोनारायणःपरमश्चाव्ययश्च मध्यांतस्यजगतस्तस्थुषश्चबुभूषतांप्रभवश्चाव्ययश्च ७६ इतिदानधर्म्मे
पुरुषमाहात्म्यं युधिष्ठिरउ० ब्रूहिब्राह्मणपूजायांव्युष्टिंत्वंमधुसूदन वेत्ताभवान्हिसर्वस्यवेदत्वांहिपितामहः १ वासुदेवउ० शृणुष्वा
वहितोराजन्द्विजानांभरतर्षभ यथातत्त्वेनवदतोगुणान्मेकुरुसत्तम २ द्वारवत्यांसमासीनंपुरामांकुरुनंदनः प्रद्युम्नःपरिपप्रच्छ
ब्राह्मणैःपरिकोपितः ३ किंफलंब्राह्मणेष्वस्तिपूजायांमधुसूदन ईश्वरत्वंकुतस्तेषामिहचैवपरत्रच ४ सदाद्विजातीन्सं
पूज्यकिंफलंतत्रमानद एतद्ब्रूहिस्फुटंसर्वंसुमहान्संशयोत्रमे ५ इत्युक्तेवचनेतस्मिन्प्रद्युम्नेनतदात्वहं प्रत्यब्रुवंमहाराजय
त्तच्छृणुसमाहितः ६ व्युष्टिंब्राह्मणपूजायांरौक्मिणेयनिबोधमे त्रिवर्गेचापवर्गेचयशःश्रीरोगशांतिषु देवतापितृपूजासुसंतोष्या
श्चैवनोद्विजाः एतेहिसोमराजानईश्वराःसुखदुःखयोः अस्मिँल्लोकेरौक्मिणेयतथामुष्मिन्सदापुत्रक ७ ब्राह्मणप्रमुखंसौम्यंन
मेऽत्रास्तिविचारणा ब्राह्मणप्रतिपूजायामायुःकीर्तिर्यशोबलं ८ लोकालोकेश्वराश्चैवसर्वेब्राह्मणपूर्वकाः तत्कथंवै
नाद्रियेयमीश्वरोऽस्मीतिपुत्रक ९ मातेमन्युर्महाबाहोभवतुत्वद्विजान्प्रति ब्राह्मणाहिमहद्भूतमस्मिँल्लोकेपरत्रच १०

(c) Dharmartha Trust J&K. Digitized By eGangotri

दा०
३६२

भस्मकुर्युर्जगदिदं क्रुद्धाः सत्यस्य दर्शिनः अन्यानपि सृजेयुश्च लोकान्लोकेश्वरांस्तथा ११ कथंतेषुनवर्त्तेरन्येसमकृज्ञाननेसुत
अवसन्मेगृहेतातब्राह्मणोहरिपिंगलः १२ चीरवासाबिल्वदंडीदीर्घश्मश्रुःकृशोमहान् दीर्घेभ्यश्चमनुष्येभ्यःप्रमाणादधिकोभुवि
१३ सस्मसंचरतेलोकान्येदिव्यायेचमानुषाः इमांगाथांगायमानश्चत्वरेषुसभासुच १४ दुर्वाससंवासयेत्कोब्राह्मणंसत्कृतं
गृहे परिभाषांचमेश्रुत्वाकोनुदद्यात्प्रतिश्रयं १५ योमांकश्चिद्वासयीतनसमांकोपयेदिति यस्मान्नाद्रियतेकश्चित्ततोहंतमवासयं
१६ सस्मभुंक्तेसहस्राणांबहूनामन्नमेकदा एकदास्वाल्पकंभुंक्तेनचैवेतिपुनर्गृहान् १७ अकस्माच्चप्रहसतितथाकस्मात्प्ररोदिति
नचास्यवयसातुल्यःपृथिव्यामभवत्तदा १८ अथास्वावसथंगत्वासशय्यास्तरणानिच कन्याश्चालंकृतादग्ध्वा ततोहमशयंस्व
यं अथमामब्रवीद्भूयःसमुनिःसंशितव्रतः कृष्णपायसमिच्छामिभोक्तुमित्येवसत्वरः सदैवतुमयातस्यचित्तज्ञेनगृहेजनः सर्वा
ण्यन्नानिपानानिभक्ष्याश्चोच्चावचास्तथा २१ भवंतुसत्कृतानीतिपूर्वमेवप्रचोदितः ततोहंज्वलमानंवैपायसंप्रत्यवेदयं तं
भुंक्त्वैवतुसक्षिप्रंततोवचनमब्रवीत् क्षिप्रमंगानिलिंपस्वपायसेनेतिसस्मितं अविमृश्यैववततःकृतवानस्मितत्तथा २३ तेनोच्छि
ष्टेनगात्राणिशिरश्चैवाभ्यमृर्षयं सदद्दर्शतदाभ्याशेमातरंतेशुभाननां तामपिस्मयमानस्सपायसेनाभ्यलेपयत् २४ मुनिःपायस
दिग्धांगीरथेतूर्णमयोजयत् तमारुह्यरथंचैवनिर्ययौसगृहान्मम २५ अग्निवर्णोज्वलन्धीमानसद्विजोरथधुर्यवत् प्रतोदेनात्
दहालांरुक्मिणीममपश्यतः २६ नचमेस्तोकमप्यासीद्दुःखमीर्ष्याकृतंतदा तथासराजमार्गेणमहतानिर्ययौबहिः २७ दृष्ट्वातुम

हदास्त्वंपर्यदाशार्हाज्जातमन्यवः ततोऽज्वलन्निमाःकेचित्स
माभाष्यपरमारं २८ ब्राह्मणात्समजायेरन्नानावर्णाःकथं

एमं०
३६२

चन कोह्येतांरुक्मिणीमास्यापजीवेदन्यःपुमानिह २९ आशीविषविषंतीक्ष्णंततस्तीक्ष्णतरोद्विजः ब्रह्माशीविषदग्धस्यनास्तिकश्चिच्चि
कित्सकः ३० तस्मिन्व्रजतिदुर्धर्षेप्रास्खलद्रुक्मिणीपथि तन्नामर्षयतश्रीमांस्ततस्तूर्णमचोदयत ३१ ततःपरमसंक्रुद्धोरथात्प्रस्कं
द्यसद्विजः पदातिरुत्पथेनैवप्राद्रवद्दक्षिणामुखः ३२ तमुत्पथेनधावंतमन्वधावंद्विजोत्तमं तथैवपायसादिग्धःप्रसीदभगवन्निति
३३ ततोविलोक्यतेजस्वीब्राह्मणोमामुवाचह जितःक्रोधस्त्वयाकृष्णप्रकृत्यैवमहाभुज ३४ नतेपराधमिहवैदृष्टवानस्मिसुव्रत
प्रीतोस्मितवगोविंदवृणुकामान्यथेप्सितान् ३५ प्रसन्नस्यचमेतातपश्यव्युष्टिंयथाविधि यावदेवमनुष्याणामन्नेभावोभविष्य
ति ३६ यथैवान्नेतथातेषांत्वयिभावोभविष्यति यावच्चपुण्यालोकेषुत्वयिकीर्तिर्भविष्यति ३७ त्रिषुलोकेषुतावच्चवैशिष्ट्यं
प्रतिपत्स्यते सुप्रियःसर्वलोकस्यभविष्यसिजनार्दन ३८ यत्तेभिन्नंचदग्धंचयच्चकिंचित्प्रणाशितं सर्वंतथैवद्रष्टासिविशिष्टं
वाजनार्दन ३९ यावदेतत्प्रलिप्तंतेगात्रेषुमधुसूदन अतोमृत्युभयंनास्तियावदिच्छसिवाच्युत ४० नतुपादतलेलिप्तंकस्मा
त्तेपुत्रकाद्यवैनैतत्तेप्रियमित्येवसमांप्रीतोब्रवीत्तदा ४१ इत्युक्तोहंशरीरंस्वंददर्शश्रीसमायुतं रुक्मिणींचाब्रवीत्प्रीतःसर्व
स्त्रीणांवरंयशः ४२ कीर्तिंचानुत्तमांलोकेसमवाप्स्यसिशोभने नत्वांजरावारोगोवावैवर्ण्यंचापिभामिनि ४३ स्प्रक्ष्यंतिपु
ण्यगंधाच्चकृष्णमाराधयिष्यसिषोडशानांसहस्राणांवधूनांकेशवस्यह ४४ वरिष्ठासहलोक्याचकेशवस्यभविष्यसि तवमात
रमित्युक्त्वाततोमांपुनरब्रवीत ४५ ४५

© Dhamartha Trust J&K Digitized By eGangotri

दा॰ ३६३ प्रस्थितः स महातेजा दुर्वासाग्निरिव ज्वलन् एषैव ते बुद्धिरस्तु ब्राह्मणे लो परिकेशव ४६ इत्युक्त्वा स तदा पुत्र तत्रैवां
तरधीयत तस्मिन्नंतर्हिते चाहमुपांशुव्रतमाचरं ४७ यत्किंचिद्ब्राह्मणा ब्रूयुः सर्वं कुर्यामितो द्विजः एतद्व्रतमहं कृत्वा
मात्रा ते सह पुत्रक ततः परमहृष्टात्मा प्राविशं गृहमेव हि प्रविष्टमात्रश्च गृहे सर्वं पश्यामि तत्र च यन्मिन्नंपच्च वै दग्धं
तेन विप्रेण पुत्रक ४८ ततो हं विस्मयं प्राप्तः सर्वं दृष्ट्वा नवं दृढं अपूजयं च मनसा रौक्मिणेय सदा द्विजान् ५० इ
महं रौक्मिणेय प्रपृच्छतो भरतर्षभ माहात्म्यं द्विजमुख्यस्य सर्वमाख्यातवांस्तदा ५१ ५१ छ छ
गन॰ ३६३

५३ अध्यायः दुर्वासाश्च त्रिपुरदाहः अहङ्कारसहितानां निदर्शनार्थं उपासकानां स्थूलसूक्ष्मकारणादिरूपरूपाणां तिसृणां पुरां दाहेन संसारानर्थनिवृत्तिर्म

तथात्वमपिकौंतेयब्राह्मणान्सततंप्रभो पूजयस्वमहाभागान्वाग्भिर्दानैश्चनित्यदा ५२ एवंवृष्टिमहंप्राप्तोब्राह्मणस्यप्रसादजं
पश्यमामाहभीष्मोयंतत्त्वंभरतर्षभ ५३ इतिदानधर्मेदुर्वाससोभिक्षा युधिष्ठिरउवाच दुर्वाससःप्रसादात्तेयत्तदामधुसूदन अ
वाप्तमिहविज्ञानंतन्मेव्याख्यातुमर्हसि १ महाभाग्यंचयत्तस्यनामानिचमहात्मनः तत्त्वतोज्ञातुमिच्छामिसर्वंमतिमतांवर २ वासु
देवउ० हंततेकीर्तयिष्यामिनमस्कृत्वाकपर्दिने यदवाप्तंमयाराजञ्श्रेयोयच्चार्जितंयशः ३ प्रयतःप्रातरुत्थाययदधीतेविशांपते
प्रांजलिश्शतरुद्रीयंतन्मेनिगदतःशृणु ४ प्रजापतिस्तत्ससर्जतपसोंतेमहातपाः शंकरस्त्वसृजत्तातप्रजाःस्थावरजंगमाः ५
नास्तिकिंचित्परंभूतंमहादेवाद्विशांपते इहत्रिष्वपिलोकेषुभूतानांप्रभवोहिसः ६ नचैवोत्सहतेस्थातुंकश्चिदग्रेमहात्मनः नहि
भूतंसमंतेनत्रिषुलोकेषुविद्यते ७ गंधेनापिहिसंग्रामेतस्यक्रुद्धस्यशत्रवः विसंज्ञाहतभूयिष्ठावेपंतेचपतंतिच ८ घोरंचनि
नदंतस्यपर्जन्यनिनदोपमं श्रुत्वाविशीर्येद्धृदयंदेवानामपिसंयुगे ९ यांश्चघोरेणरूपेणपश्येत्क्रुद्धःपिनाकधृक् नसुरा
नासुरालोकेनगंधर्वानपन्नगाः १०

हादेवस्यत्रिपुरहंतुःप्रसादादेवभवतीतिप्रदर्शनार्थं १० १० १० ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

द्रो० कुपितेसुरवमेधंतेनतस्मिन्नपिगुहामताः प्रजापतेश्चदक्षस्ययजतेवितितेक्रतौ ११ विव्याधकुपितोयज्ञंनिर्भयस्तुभवस्तदा धनुषाबा
३६७ णमुत्सृज्यसघोषंविननादच १२ तेनशर्म्मकुतःशांतिंविषादंलेभिरेसुराः विद्धेचसहसायज्ञेकुपितेचमहेश्वरे १३ तेनज्यातलघोषे
णासर्व्वेलोकाःसमाकुलाः बभुवुरवशाःपार्थविषेदुश्चसुरासुराः १४ आपश्चुक्षुभिरेचैवचकंपेचवसुंधरा व्यद्रवनगिरयश्चापिद्यौः
पफालचसर्व्वशः १५ अंधेनतमसालोकाःप्रावृतानचकाशिरे प्रनष्टाज्योतिषांभाश्चसहसूर्येणभारत १६ भृशंभीतास्ततःशांतिं
चक्रुःस्वस्त्ययनानिच ऋषयःसर्व्वभूतानामात्मनश्चहितैषिणः १७ ततःसोभ्यद्रवदेवान्रुद्रोरौद्रपराक्रमः भगस्यनयनेक्रु
द्धःप्रहारेणव्यशातयत् १८ पूषणंचाभिदुद्रावपादेनचरुषान्वितः पुरोडाशंभक्षयतोदशनान्वैव्यशातयत् १९ ततःप्रणे
मुर्द्देवास्तेवेपमानाःस्मशंकरं पुनश्चसंदधेरुद्रोदीप्तंसुनिशितंशरं २० रुद्रस्यविक्रमंदृष्ट्वाभीतादेवाःसहर्षिभिः ततःप्रसा
दयामासुःसर्व्वंतेविबुधोत्तमाः २१ जप्यंचशतरुद्रीयंदेवाःकृत्वांजलिंततः संस्तूयमानस्त्रिदशैःप्रससादमहेश्वरः २२
रुद्रस्यभागंयज्ञेचविशिष्टंतेत्वकल्पयन् भयेनत्रिदशाराजन्शरणंचप्रपेदिरे २३ तेनचैवहितुष्टेनसयज्ञःसंधितोभवत् यद्य
च्चापहृतंतत्रतत्तथैवान्वजीवयत् २४ असुराणांपुराण्यासंस्त्रीणिवीर्य्यवतांदिवि आयसंराजतंचैवसौवर्णमपिचापरं २५ द्रो०
३६७

३० तंचैवेति एतन्मध्यात्तं त्रिपुरदाहेऽपि संस्कारात्मकः सूक्ष्मः स्वपं चोपाव देहयातं वधिता नुवृत्त्या नुवर्त्तत एव गंवालं हिरण्यगर्भोस्य सूक्ष्मसमष्टिरूपं पुरंधरघुरं केनं जीवन्मुक्तपती

नाशकन्नानिमिषवामेनं सवीर्यैरपि अथ सर्वे महात्मानं देवं जग्मुः शरणमर्दिताः २६ तत ऊचुर्महात्मानो देवाः सर्वे समागताः रुद्र रौद्र भविष्यं
ति पशवः सर्व एव मे २७ जहि दैत्यान्महेश त्वं लोकान्त्रायस्व मानद स तथोक्तस्तथेत्युक्त्वा कृत्वा विष्णुं शरोत्तमं शल्यमग्निं तथा कृत्वा पुंखे
७ वैवस्वतं यमं २८ वेदान्कृत्वा धनुः सर्वान्ज्यां च सावित्रिमुत्तमं ब्रह्माणं सारथिं कृत्वा विनियुज्य च सर्वशः त्रिपर्वणा त्रिशल्येन कालेनानिविमे
दसः ––– ३० शरेणादित्यवर्णेन कालाग्निसमतेजसा तेऽसुराः सपुरास्तत्र दग्धा रुद्रेण भारत ३१ तं चैवांकगतं दृष्ट्वा बालं पंचशिखं पुनः
उमा जिज्ञासमाना वै को यमित्यब्रवीत्तदा ३२ असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः स वज्रं स्तंभयामास तं बाहुं परिघोपमं ३३ न संबुबुधि
रे चैव देवास्तं भुवनेश्वरं सप्रजापतयः सर्वे तस्मिन्महतीश्वरे ३४ ततो ध्यात्वाथ भगवान्ब्रह्मा तममितौजसं अयं श्रेष्ठ इति ज्ञात्वा ववंदे तमुमाप
तिं ३५ ततः प्रसादयामासुरुमां रुद्रं च ते सुराः बभूव स तदा बाहुर्बलहंतुर्यथापुरा ३६ स चापि ब्राह्मणो भूत्वा दुर्वासा नाम वीर्यवान् द्वारवत्यां मम
मम गेहे चिरकालमुपावसत् ३७ विप्रकारान्प्रयुंक्ते स्म सबहून्मम वेश्मनि तानुदारतया चाहं चक्षमे चातिदुःसहान् ३८ ॥ ॥ ॥

ति गौरं जिज्ञासमाना उमा ब्रह्मविद्यामया कृत्स्नबोधकत्वेपि अयं को वसिष्ठ इत्यब्रवीत् एष एवती ३३ ३८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दा०
३६५

४० एकधाब्रह्मरूपेण द्विधाजीवब्रह्मभेदेन बहुधेत्यादित्रिपंचरूपेण ४४ अध्यायः युधि ७

सवैदक्षः सचशिवः सोग्निः सर्वः ससर्वजित् सचैवेन्द्रश्च वायुश्चसोश्विनौचसविद्युतः ३९ सचंद्रमाः सचेशानः ससूर्योवरुणश्च
सः सकालः सोन्तकोमृत्युः सयमोरात्र्यहानिच ४० मासार्द्धमासाऋतवः संध्येसंवत्सरश्चसः सधातासविधाताचविश्वकर्मासर्ववित् ४१ वि२
नक्षत्राणिग्रहाश्चैवदिशोथविदिशस्तथा विश्वमूर्त्तिरमेयात्माभगवानमरद्युतिः ४२ एकधाचद्विधाचैवबहुधाचसएवहि शतधासहस्र
धाचैवतथाशतसहस्रशः ४३ ईदृशः समहादेवोभूयश्चभगवानतः नहिशक्यागुणावक्तुमपिवर्षशतैरपि ४४ इतिदानधर्म्मेईश्वर
प्रशंसा वासुदेव उ० युधिष्ठिरमहाबाहोमहाभाग्यंमहात्मनः रुद्रायबहुरूपायबहुनाम्नेनिबोधमे १ वदन्त्यग्निमहादेवंतथास्थाणुंमहे
श्वरं एकाक्षंत्र्यंबकंचैवविश्वरूपंशिवंतथा २ द्वेतनूतस्यदेवस्यवेदज्ञाब्राह्मणाविदुः घोरामन्यांशिवामन्यांतेतनूबहुधापुनः ३
उग्राघोरातनुर्यास्यसोग्निर्विद्युत्सभास्करः शिवासौम्याचयात्वस्यधर्म्मस्त्वापोथचंद्रमाः ४ आत्मनोर्द्धंतस्याग्निः सोमार्द्धंपुनरुच्य
ते ब्रह्मचर्यंचरत्येकाशिवायास्यतनुस्तथा ५ यास्यघोरतमामूर्त्तिर्जगत्संहरतेतथा ईश्वरत्वान्महत्वाच्चमहेश्वरइतिस्मृतः ६ यन्निर्द
हतियत्तीक्ष्णोयदुग्रोयत्प्रतापवान् मांसशोणितमज्जादोयत्ततोरुद्रउच्यते ७ ॥ ॥ ॥

म०
३६५

देवानांचमहान्यच्चयच्चास्यविषयोमहान् यच्चविश्वंमहत्पातिमहादेवस्ततस्मृतः ८ धूम्ररूपंचयत्तस्यधूर्जटीत्यतउच्यते समेधयतियन्नित्यंसर्वान्वैसर्वकर्मभिः
मनुष्यान्शिवमन्विच्छंस्तस्मादेवशिवः स्मृतः ९ दहत्यूर्द्ध्वंस्थितोयच्चप्राणा णांस्थिरश्चयत् स्थिरलिंगश्चयन्नित्यंतस्मात्स्थाणुरितिस्मृतः १०
यदस्यबहुधारूपंभूतंभव्यंभवत्तथा स्थावरंजंगमंचैवबहुरूपस्ततः स्मृतः ११ सहस्राक्षोयुताक्षोवासर्वतोक्षिमयोपिवा चक्षुषः प्रभवस्तेजोनास्यंतोय
स्यचक्षुषां १२ सर्वथायत्पशून्पातितैश्चयद्रमतेसह तेषामधिपतिर्यच्चतस्मात्पशुपतिः स्मृतः नित्येनब्रह्मचर्येणलिंगमस्ययदास्थितं महयंत्यस्यलोका
श्चपियंत्येनन्महात्मनः १४ विग्रहंपूजयेद्योवैलिंगंचापिमहात्मनः लिंगपूजयितानित्यंमहतींश्रियमश्नुते १५ ऋषयश्चापिदेवाश्चगंधर्वाप्सरसस्तथा
लिंगमेवार्चयंतिस्मयत्तदूर्द्ध्वंसमास्थितं १६ पूज्यमानेततस्तस्मिन्मोदतेसमहेश्वरः सुखंददातिप्रीतात्माभक्तानांभक्तवत्सलः १७ एषएवश्मशाने
षुदेवोवसतिनिर्दहन् यजंतेतंजनास्तत्रवीरस्थाननिषेविणः १८ विषयस्थः शरीरेषुसमृत्युःप्राणिनामिह सचवायुः शरीरेषुप्राणापानः शरीरिणां
१९ तस्यघोराणिरूपाणिदीप्तानिचबहूनिच लोकेयान्यस्यपूज्यंतेविप्रास्तानिविदुर्बुधाः २० नामधेयानिवेदेषुबहून्यस्ययथार्थवत् निरुच्यंतेमह
त्वा[illegible]कर्मे---भिश्चरितैस्तथा २१ ॥

हा०
३३६

२२ २३ २४ २५ २८ अध्यायः इत्युक्तवति १ १ १ ॥ ॥ ४

वेदे चास्य विदुर्विप्राः शतरुद्रियमुत्तमं व्यासादनंततं यच्चाप्युपस्थानं महात्मनः २२ प्रदाता सर्व्वलोकानां विश्वं चाप्युच्यते महत् ज्येष्ठभू
तं वदंत्येनं ब्राह्मणा ऋषयोपरे २३ प्रथमो ह्येष देवानां मुखादग्निमजीजनत् ग्रहैर्बहुविधैः प्राणान्संरुद्धानुत्सृजत्यपि २४ विमुंचति न
पुण्यात्मा शरण्यं शरणागतान् आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् २५ स ददाति मनुष्येभ्यः स एवाक्षिपते पुनः शक्रादिषु च
देवेषु तस्यैश्वर्यमिहोच्यते २६ स एव व्याहृतो नित्यं त्रैलोक्यस्य शुभाशुभे ऐश्वर्याच्चैव कामानामीश्वरः पुनरुच्यते २७ महेश्वरश्च
लोकानां महतामीश्वरश्च यः बहुभिर्विविधै रूपैर्विश्वं व्याप्तमिदं जगत् तस्य देवस्य यद्वक्त्रं समुद्रे वडवामुखे २८ इति दानधर्मे वैशं०
रणुक्तावति वाक्यं तु कृष्णे देवकिनंदने भीष्मं शांतनवं भूयः पर्य्यपृच्छद्युधिष्ठिरः १ निर्णये वा महाबुद्धे सर्व्वधर्मविदांवर प्रत्यक्षमा
गमो वेति किं तयोः कारणं भवेत् २ भीष्म उवाच नास्त्यत्र संशयः कश्चिदिति मे वर्त्तते मतिः शृणु वक्ष्यामि ते प्राज्ञ सम्यक् त्वं मेनुपृच्छ
सि ३ संशयः सुगमस्तत्र दुर्गमस्तस्य निर्णयः दृष्टं श्रुतमनंतं हि यत्र संशयदर्शनं ४ प्रत्यक्षं कारणं दृष्ट्वा हैतुकाः प्राज्ञमानिनः नास्ती
त्येवं व्यवस्यंति सत्यं संशयमेव च ५ तदयुक्तं व्यवस्यंति [illegible] बालाः पंडितमानिनः अथ चेन्मन्यसे चैकं कारणं किं भवेदिति शक्यं दीर्घे
णा कालेन युक्तेनातंद्रितेन च ६ ॥ ॥ ॥ ॥ ॥ राम०
३३६

तत्रमहद्देवस्यप्रत्यागनम्यत्वाद्न्ततरमेवोत्तरत्वेनोदितत्वाद्देदएवप्रत्यक्षप्रमाणं प्रत्यक्षानुमानयोर्व्यभिचारित्वेनाविश्वसनीयत्वादित्याहधर्मस्येत्यादिना ११ वृत्तंशिष्टाचारः १२ भिंदि
ति वृत्तंतेषुप्रत्यक्षानुगमनाचारेषु १३ अतृप्यंतः नित्यसोत्कंठाः आगमज्ञमाः बुद्धयोयेषांतएवपरंश्रेष्ठंप्रमाणमितिमन्वयः १५ नेतिदृष्टंतंप्रत्यक्षंदृष्टशीलं आचारः शौचादिः कारणं

आगमापात्रामनेकांचतुल्यमानेनभारत ततारेणेवनान्येनशक्यंस्थातंस्पर्शनं ७ हेतुनामंतमासाद्यविपुलंज्ञानमुत्तमं ज्योतिः सर्वस्यलोकस्य
विपुलंप्रतिपद्यते ८ नत्वेवगमनंराजन्नहेतुतोगमनंतथा अग्राह्यमनिबद्धंवाचासंपरिवर्जयेत ९ युधिष्ठिरउवाच प्रत्यक्षंलोकतःसि
द्धिर्लोकश्चागमपूर्वकः शिष्टाचारोबहुविधस्तन्मेब्रूहिपितामह १० भीष्मउ० धर्म्मस्यक्रियमाणस्यबलवद्भिर्दुरात्मभिः संस्थायत्नैरपिकृता
कालेनपरिभिद्यते ११ अधर्म्मोधर्म्मरूपेणतृणैःकूपइवावृतः ततस्तैर्भिद्यतेवृत्तंशृणुचैवयुधिष्ठिर १२ अवृत्यायेतुभिंदंतिश्रुतित्यागपराय
णाः धर्म्मविद्वेषिणोमंदाइत्युक्तस्तेषुसंशयः १३ अतृप्यंतस्तुसाधूनांयएवागमबुद्धयः परमित्येवसंतुष्टास्तानुपास्स्वचपृच्छच १४ कामार्थौ
पृष्ठतः कृत्वालोभमोहानुसारिणौ धर्म्मइत्येवसंबुद्धास्तानुपास्स्वचपृच्छच १५ नतेषांभिद्यतेवृत्तंयज्ञःस्वाध्यायकर्म्मच आचारःकारणं
चैवधर्म्मश्चैकस्त्रयंपुनः १६ युधिष्ठिरउ० नरेवहमेबुद्धिः संशयेपरिमुह्यति अपारेमार्गमाणस्यपरंतीरमपश्यतः १७ ॥ ॥ ॥
उवाच

वेदः त्रयंमिलित्वाएकोधर्मस्तद्धर्मः साधनीयइत्यर्थः वेदस्वाध्यायकर्मवेदज्ञार्थमाचारांतर्गतिमेवज्ञेयं १६ १७ १० ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दा०
३६७

वेदइति प्रमाणमेतत्त्रयमेवधर्मेपरिच्छित्तिर्भवितव्यं १८ कथमेकोऽधर्मोभिन्नपद्धतिपाद्यइत्याशंकायामाहधर्मस्येति हेराजन्यदिएवंधर्मेत्रयंमन्यसेतन्नेतिशेषः किंतुह्रियमाणस्यै
वधर्मस्यत्रिधाविप्रकाराविचारणाएकएवप्रमाणत्रयसंवादेनपरीक्षणीयइत्यर्थः १९ त्रिधेत्यस्यव्याख्यानंएकएवेति त्रयाणांप्रमाणानांपृथक्त्वेप्रत्येकंस्वातंत्र्येनधर्म

ष्टि २

वेदः प्रत्यक्षमाचारः प्रमाणंतुत्रयंयदि पृथक्त्वंलभ्यतेचैषांधर्मश्चैकस्त्रयंकथं १८ भीष्म उ० धर्म
स्यह्रियमाणस्यबलवद्भिर्दुरात्मभिः यद्येवंमन्यसेराजंस्त्रिधाधर्मविचारणा १९ एकएवेतिजानीहित्रिधाधर्मस्य
दर्शनं पृथक्त्वेनचमेबुद्धिस्त्रयाणामपिवैतथा २० उक्तोमार्गस्त्रयाणांवातत्तथैवसमाचर जिज्ञासानतु
कर्त्तव्याधर्मस्यपरितर्कणात् २१ सदैवंभरतश्रेष्ठमातेभूदत्रसंशयः अन्धोजडइवाशंकीयद्ब्रवीमितदाच
र २२ अहिंसासत्यमक्रोधोदानमेतच्चतुष्टयं अजातशत्रोसेवस्वधर्मएषसनातनः २३ ब्राह्मणेषुचवृ
त्तिर्यापितृपैतामहोचिता तामन्वेहिमहाबाहोधर्मस्यैतेहिदेशकाः २४ प्रमाणमप्रमाणंवैयः कुर्यादबु
द्धिजन नसप्रमाणतामर्हेद्विवादजननोहिसः २५ ब्राह्मणानेवसेवस्वसत्कृत्यबहुमन्यच एतेष्वेवत्विमेलो
काः कृत्स्नाइतिनिबोधतान् २६ युधिष्ठिर उ० येचधर्ममसूयंतेयेचैनंपर्युपासते ब्रवीतुमेभवानेतत्क्वतेगच्छन्तिता
दृशाः भीष्म उ० रजसातमसाचैवसमवस्तीर्णचेतसः नरकंप्रतियद्यंतेधर्मविद्वेषिणोजनाः २८ ॥ ॥

णपे २

प्रतिपादकत्वेममबुद्धिर्नच २० उक्तइतिप्रत्यक्षस्मृतीद्विविधेप्रमाणाभावात् आचारस्यचप्रध्वंसातीतत्वात्त्रयाणांनामध्येपरिशेषात् पत्रक्तः वेदेसएवमार्गः तत्प्रतीतकीर्णात्

प्रमाणं १

धर्मस्यविचारः कर्त्तव्यइत्यर्थः २१ अत्रवेदेऽप्रामाण्यशंकांकोशंकायामः २२

एम०
३६७

© (D) Dhaarnta Trust & KOD Digitized By eGangotri

अशयोमोक्षुर्मनः ३२ कीदृशाः किंलक्षणाः किंकर्माणश्च ३४ सर्गोत्सर्गं ३५ पंचानां देवपितृभूतातिथिकुटुंबानां ३७ वक्रधरस्य वहृया माधियन्ते वीभवेत्वक्रधरे विसोमुजंगेयाम

येतु धर्म्मं महाराज सततं पर्युपासते सम्यान्विपराः संत्यते वै स्वर्गभुजो नराः २९ धर्म्म एव गतिस्तेषामाचार्योपासनाद्भवेत् देवलोकं प्रपद्यन्ते येव
र्म्मं पर्युपासते ३० मनुष्यापदि वा देवाश्शरीरमुपतापयवै धर्म्मिणाः सततमेधंते लोभद्वेषविवर्जिताः ३१ प्रथमं ब्रह्मणाः प्रत्रं धर्म्ममाहुर्मनीषि
णाः धर्म्मिणाः पर्युपासंते फलं पक्वमिवाशयः ३२ युधिष्ठिर उ० असतां कीदृशं रूपं माधवः किंच कुर्वते ब्रवीतुमे भवानेतत्संतो संतश्च की
दृशाः ३३ भीष्म उ० दुराचाराश्च दुर्द्धर्षा दुर्मुखाश्चाप्यमाधवः साधवः शीलसंपन्नाः शिष्टाचारस्य लक्षणं ३४ राजमार्गे गवां मध्ये धान्यम
ध्ये च धर्म्मिणः नोपसेवंति राजेंद्र सर्गं मूत्रपुरीषयोः ३५ पंचानामशनं दत्त्वा शेषमश्नंति साधवः नजल्पंति च भुंजाना न निद्रांत्यार्द्रपाणयः ३६
चित्रभानुमनड्वाहं देवं गोष्ठं चतुःपथं ब्राह्मणं धार्मिकं चैत्यं ये कुर्वंति प्रदक्षिणं ३७ वृद्धानां भारतप्तानां स्त्रीणां च चक्रधरस्य च ब्राह्मणानां गवां
राज्ञां पंथानं ददते च ये ३८ अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च तथा शरणकामानां गोप्तास्याद्वागतप्रदः ३९ सायंप्रातर्मनुष्याणाम
शनं देवनिर्मितं नांतरा भोजनं दृष्टमुपवासविधिर्हि सः ४० होमकाले यथा वह्निः कालमेव प्रतीक्षते ऋतुकाले तथा नारी ऋतमेव प्रतीक्षते ४१

ज्वालिनीतितिविश्वलोचनः ३८ ३९ ४० ४१ ॥ ॥ ॥ ॥ ॥ ७ ॥

© (Dharmartha Trust J&K) Digitized By eGangotri

श्रा०
३६८

कर्मण्यध्यापनं भक्तिपादयेन दक्षिणामिति शेषः ४९ दक्षिणां पाणिमुद्धरेत यज्ञोपवीती नमवेत ५० अतिरुजनं पायसादिभिः मंगल्यं मंगलवचनं अभिनंदनं शतं जीवेति

६३ प्रक्रमांकः २ ५१

नाम्नदृगच्छेतयत्कब्रह्मचर्येणतत्स्मृतं अमृतं ब्राह्मणागावस्तेनतत्त्रयमेकतः ४२ तस्माद्ब्राह्मणान्नित्यं अर्चयेत यथाविधिं पञ्चषा संस्कृतं मांस
मुपभुंजन्तुष्यति ४३ दृष्टमांसं वृथामांसं उत्तमं स्वदेशे परदेशे वा अतिथिर्नोपवासयेत ४४ कर्माणि वै सफलं कृत्वा गुरूणां प्रतिपादयेत गुरुस्य
आत्मनं यम भिवाद्याभिरज्य च ४५ गुरुमर्च्य वर्द्धन्ते आयुषा यशसा श्रिया वृद्धान्नातिभवेजातु न च संप्रेषयेदपि नासीनः स्यात्तस्थिते ष्वेवमायुरस
नरिष्यते ४६ ननग्नामीक्षयेन्नारीं न सिद्धान्मनुष्यानपि मैथुनं सततं गुप्तमाहारं च समाचरेत ४७ तीर्थानां गुरवस्तीर्थं चोक्षाणां हृदयं शुचि
दर्शनानां परं ज्ञानं संतोषः परमं सुखं ४८ सायं प्रातश्च वृद्धानां शृणुयात्पुष्कलागिरः श्रुतमाप्नोति हि नरः सततं वृद्धसेवया ४९ स्वाध्या
ये भोजने चैव दक्षिणां पाणिमुद्धरेत यच्छेत वाङ्मनसा नित्यमिंद्रियाणि तथैव च ५० संस्कृतं पायसं नित्यं यवागूं कृशरं हविः अष्टकाः पित
देवतार्थं गत्वाणामभिपूजनं ५१ श्मश्रुकर्मणि मंगल्यं क्षुतानामभिनंदनं व्याधितानां च सर्वेषामायुषः प्रतिनंदनं ५२ ॥

६२

च चनेन सर्वोत्साहनं च कुर्यादिति शेष ५२ ५२ ॥ ॥

श्रा०
३६८

© (Oh) Dhaantari Trust, & Digitized By eGangotri

नेषां १

समाचरेद्भिनं स्तंयं ५४ पापकर्म्मिणः स्वल्दस्यं पापिष्टमित्याचक्षतेकर्म्मणोर्वस्त्रस्यंतायतेस्पर्द्धि: ६१ धर्म्मध्वजिकः तत्प्रकाशकः ६२ पारंतत्रंपरलोकहितं ६३ अध्यापनाम १

पि १

नजातत्वमितिब्रूयादापन्नो महत्तरं लंकारोवावचोवेतिविद्वन्स्तनविशिष्यते ५३ अधराणां समानानां शिष्याणांच समाचरेत पापमाचक्षते
निरपेक्षस्येपापकर्म्मिणः ५४ ज्ञानपूर्वं विनश्यंतिगर्हमानामहाजने ज्ञानपूर्वंकृतंकर्म्मछादयंतेह्यसाधवः ५५ नमांमनुष्याः पश्यंतिनमांपश्यं
तिदेवताः पापेनाभिहितः पापः पापमेवाभिजायते ५६ यथावार्द्धुषिकावृद्धिंदेहमेदेप्रतीक्षते धर्म्मेणाभिहितंपापंधर्म्ममेवाभिवर्द्धयेत ५७ यथा
लवणमंभोभिराप्लुतंप्रविलीयते प्रायश्चित्तहतंपापंतथासद्यः प्रणश्यति ५८ तस्मात्पापंनगूहेतगूहमानं---- विवर्द्धते कृत्वातसाधुवाख्ये
यंतेनतत्प्रशमयंत्युत ५९ आशयासंचितंद्रव्यंयत्कालेनोपभुज्यते अन्येचैवप्रयद्यंतेवियोगेतस्यदेहिनः ६० मानसंसर्वभूतानांधर्म्ममाहुर्म्मने
षिणः तस्मात्सर्वाणिभूतानिधर्म्ममेवसमासते ६१ एकएवचरेद्धर्म्मन्नधर्म्मध्वजिकोभवेत धर्म्मवाणिजकाह्येतेयेधर्म्ममुपभुंजते ६२ अ
र्चेद्देवानदंभेनसेवेतामाययागुरुं निधिंनिदध्यात्पारत्र्यंयात्रार्थंदानशब्दितं ६३ दानधर्म्मं युधिष्ठिरः नाभौधेयः प्राप्नोतिधनंसबलवानपि भा
गधेयान्वितस्त्वार्थान्कृशोबालश्चविंदति १ ॥

८१

१ कृतोपक्रमेः फलोयेषांनेकृतपक्रमाफला: ३ भवेतसमर्थःस्यात ५ अपायशतै: उपायशतैः सर्वाधनेन १० ॥ ॥ ॥ ॥ ॥ ॥ ॥

नालाभकालेलभतेप्रयत्नेपिकृतेसति लाभकालेप्रयत्नेनलभतेविपुलंधनं २ कृतयत्नाफलाश्चैवदृश्यंतेशतशोनराः अयत्नेनैवमानाश्चदृश्यं
तेवहवोजनाः ३ यदिपन्नोभवेन्मर्त्यःसद्यःफलमवाप्नुयात नविद्वानविद्ययाहीनंकृतार्थमुपसंश्रयेत् ४ नाफलंचोपलभ्यंतेनराणांभरतर्षभ
त्तम प्रयत्नंकृतवंतोपिदृश्यंतेत्वफलानराः ५ मार्गैरपायशतैरर्थानमार्गैश्चापरःसवी अकार्यसमकृत्कृत्वादृश्यंतेह्यधनानराः धनयु ५३
क्ताः स्वकर्मस्थाः दृश्यंतेचापरेधनाः ७ अधीत्यनीतिशास्त्राणिनीतियुक्तोनदृश्यते अनभिज्ञाश्चमात्रविदांगमितः केनहेतुना ८ वि
द्यायुक्तोत्यविद्यश्चधनवानदृश्यते तथा यदिविद्यामुपाश्रुसलाः सत्वमवाप्नुयुः नविद्वान्विद्ययाहीनंनकृतार्थमुपसंश्रयेत ९ तथापिपा
सांजयतेश्रद्धः प्राप्यवैजलं तुष्टार्थीविद्ययात्वेवनविद्यांप्रजहेन्नरः १० नाप्राप्तकालोम्रियतेविद्धःशरशतैरपि तृणाग्रेणापिसंस्पृष्टः प्राप्त
कालोनजीवति ११ भीष्म उ० ईहमानःसमारंभान्यदिनासादयेद्धनं उग्रंतपःसमारोहेन्नह्यनुप्तंप्ररोहति १२ दानेनभोगीभवतिमेधावीवृ
द्धसेवया अहिंसयाचदीर्घायुरितिप्राहुर्मनीषिणः १३ तस्माद्दद्यात्पात्रेनप्रजयेद्धार्मिकानपि सुभाषीप्रियकृच्छुद्धः सर्वसत्वाविहिंसकः

© Dharmartha Trust J&K. Digitized By eGangotri

प्रभवः प्रभवकारणं कर्म्म वदंशादीनां स्वभावो यथा सो प्रमाणं नियामकं एवं स्वस्यापि ज्ञात्वा स्थिरोऽचंचलो भव १५ अध्यायः कार्येति १ प्रवर्त्तते प्रवर्त्तयते २ धर्मोऽर्थस्य धर्मफलस्य दर्शनोदास्य ध
मे एव श्रेयस्कर इति बुद्धिर्भवेत तदायं धर्मात्माधर्मचित्तः धर्मे आश्वसीत विश्वासं कुर्वीत अदृढबुद्धिस्तु न विश्वसेत धर्मफले ३ एतावत धर्मे विश्वासस्य बलेऽभयविनकार्त्याकं तीयवित ४ राजसा

यदा प्रमाणं प्रभवः स्वभावश्च शुभाशुभे दंशकीटपिपीलानां स्थिरो भव युधिष्ठिर १५ राजधर्म्मे भीष्म ३० कार्प्येन यत्र क्षिपते तत्र स्वाश्च
सन्ताकृतं तत्राश्वसीत सत्कृत्य वा असत्कृत्य वा न विश्वसेत १ काल एव सर्व्वकाले निग्रहानुग्रहौ ददत् बुद्धिमाविश्य भूतानां धर्म्माधर्म्मे प्रव
र्त्तते २ यदास्य भवेत बुद्धिर्धर्म्मार्थस्य प्रदर्शनात् तदाश्वसीत धर्म्मात्मा दृढबुद्धिर्न विश्वसेत ३ एतावन्मात्रमेतद्धि भूतानां प्राज्ञलक्ष
णं कालयुक्तोऽप्युभयविच्छेषयुक्तं समाचरेत ४ यथा ह्युपस्थितैश्वर्याः पूजायन्ते नरा जनैः एवमेवात्मनात्मानं पूजयन्तीह धार्मिकाः ५
नत्यधर्म्मेन पाधर्म्मे रक्षां कालः कथंचन तस्माद्धि शुद्धमात्मानं जानीयाद्धर्म्मचारिणं ६ स्प्रष्टुमप्यसमर्थो हि ज्वलंतमिव पावकः अध
र्म्मः संततो धर्म्मं कालेन परिरक्षितं ७ कार्य्यावेतौ हि धर्म्मेण धर्म्मो हि विजयावहः त्रयाणामपि लोकानामालोकः कारणं भवेत ८ ॥

मलिनाः ५ धर्मः कदाप्यधर्म्मो न भवेदिस्याह न हानि अधर्मतया तु स्वहेतनया ७ एतौ विशुद्धताधर्मौ स्पर्शौ ८ ॥

रा०
३१०

नयेन पापयेन धर्मेणेति शेषः धर्मेणाधर्मानुष्ठानार्थं इतरैरुच्यमानं वेर्यमाणाः सन्तः सर्वलोकभयप्रद्ले तेषां प्रतारणो यवर्तते यदा स्वनिस्तारं स्वविस्तारं स्वयं मे वाचरेदित्याह नत्विति नये
नर्जुर्ध्वमिति शेषः किंतु धर्मभयलोकभयप्रद्ले तेनिहन्ति निमित्तं धर्मेणाहेतुनाऽर्थात्साङ्गेन उच्यमानएव नरः ऊर्ध्वं गच्छतीति शेषः अत्र आह मित्वा स्विवदन्ति तियोज्यं त्र

न तु कश्चिन्नयेत्प्राज्ञो गृहीत्वैव करेण तं उह्यमानः स्वधर्मेण सर्वलोकभयप्रद्ले ९ शूद्रोऽहं नाधिकारो मे चातुराश्रम्यसेवने
इति विज्ञानमपरेणात्मन्युपदध्यात् १० विशेषेणाचवस्थाभिचाहवर्णास्तत्वतः पंचभूतशरीराणां सर्वेषां सदृशात्मनां ११
लोकधर्मं च धर्मं च विशेषकरणं कृतं यथैकत्वं पुनर्यान्ति प्राणिनस्तत्र विस्तरः १२ १३

अपरे साधवः न उपदध्यतिन छलं कुर्वीति यथाधिकारं धर्ममेव प्रकुर्वन्ति न छलमिमर्थः तस्मात्स्ववर्णं नामसर्वविधर्थैवेति भावः १० विशेषेणेति पुनः सर्वेषां प्राणिनां प्रत्याणांवा
पांचभौतिकत्वेऽपि विशेषकरणं इदं पवित्र[illegible]मिदमपवित्रमिति व्यवस्थापनं लोकधर्मं शास्त्रीयधर्मं वा निमित्तेन प्रतिकृतं यस्मात्मरणं दिनानां यथा पुनर्विहितेनैतैः एक
त्वप्राकृतं गच्छन्ति प्राणिनिशास्त्रेणाधर्मनियमः कृत इत्यर्थः १२ ॥

राम०
३१०

अत्र शोकेतेध्रुवइति लोकस्यधर्मस्यकार्यकारणाभावात्कार्यस्याध्रुवत्वं कारणास्याध्रुवत्वं युक्तं तंतनाशमंतरेणापदनाशायोगादित्यर्थः युगरमामाहकालेसंकस्यः निष्कामधर्मएवतन्का
लेननवसकामइत्यर्थः १३ सर्वेषामितिधर्मएवउक्तः संकल्पविशेषः शिष्यतेनान्यस्म चकथमुद्देष्यतीत्यत्राह स्वयंगुरुरितिधर्मवलात्स्वयमेवसतर्देतिनशिक्षयेत्यर्थः १४ एवमिति यदाभूता

अध्रुवोहि कथंलोकः स्मृतोधर्म्मः कथंध्रुवः यत्रकालोध्रुवस्तातत्तत्रधर्म्मः सनातनः १३ सर्वेषांतस्यदेहानांसर्वेषांसदृशा
त्मनां कालोधर्म्मेणसंयुक्तः शेषएवस्वयंगुरुः १४ एवंसतिनदोषोस्तिभूतानांधर्मसेवने तिर्य्यग्योनावपिसतांलोकएवमतो
गुरुः १५ इतिदानधर्म्मे वैशं० शरतल्पगतंभीष्मंपांडवोथकुरूद्वह युधिष्ठिरोहितंप्रेप्सुरपृच्छत्कल्मषापहं १ युधिष्ठिर किं
श्रेयः पुरुषस्येह किंकुर्वन्सुखमेधते विपाप्मासभवेत्केन किंवाकल्मषनाशनं २ वैशं० तस्मैशुश्रूषमाणायनृप शांतनवस्तदा देव
वंशंयथान्यायमाचष्टपुरुषर्षभ ३ भीष्म० अयंदैवतवंशोवैऋषिवंशसमन्वितः त्रिसंध्यंपठितःपुत्रकल्मषापहरःपरः ४
यदह्नाकुरुतेपापमिंद्रियैःपुरुषश्चरन् बुद्धिपूर्वमबुद्धिर्वारात्रौयच्चापिसंध्ययोः ५ मुच्यतेसर्व्वपापेभ्यः कीर्त्तयन्वैशुचिः सदा
नांधोनबधिरः कालेकुरुतेस्वस्तिमान्सदा ६ ॥

स१ मधु२ हे१

नांधत्वादिकर्मैवतत्तत्रसाधकः स्वभावेनप्रवर्त्तकं अतोधर्मफलभोगेस्वर्गंजंतोपिभूतानांदोषोनास्तियतः तिर्यग्योनावपिसतांविद्यमानानांभूतानांसदृसत्वहज्ञोएवंकर्मानुसारात्लोकएवगुरु
रिष्टः विधिनियंत्रितोलोकदृष्टांतेनैवसाधुमसाधुंवाकर्माणिप्रवर्ततेइत्यर्थः १५ अध्यायः शरतल्पगतमित्यध्यायत्रयंस्पष्टार्थः १ ॥ ४ . ४ ॥ ॥

हा०
३२१

शाकः 3

तिर्य्यग्योनिंनगच्छेच्चनरकंसंकराणिच नचदुःखभयंतस्यमरणेनसमुद्भवेत् ७ देवाम्हाशुक्लदेवः सर्वभूतनमस्कृतः त्रिविंशोथाप्यनिर्द्देश्यः सर्व्वप्राणोल्वयो
निजः ८ पितामहोजगन्नाथः सावित्रीब्रह्मणाः सती वेदभूतस्थकर्त्ताचविष्णुर्नारायणः प्रभुः ९ त्रुमापतिर्विरूपाक्षः स्कंदः सेनापतिस्तथा विशाखो
हुतभुग्वायुश्चंद्रादित्यौप्रभाकरः १० शचीपतिर्देवोयमोधूमोर्णयासह वरुणस्सहगौर्याचसहर्ध्याचवैश्वरः ११ सौम्यागौः सुरभिर्देवीविश्रवाश्चमहा
नृषिः संकल्पः सागरोगंगास्त्रवंत्योथमरुद्गणाः १२ वालखिल्यास्तपः सिद्धाकृष्णद्वैपायनस्तथा नारदः पर्वतश्चैवविश्वावसुर्हहाहूः १३ तंवुरुश्चि
त्रसेनश्चदेवदूतश्चविश्रुतः देवकन्यामहाभागादिव्याश्चाप्सरसांगणाः १४ उर्वशीमेनकारंभामिश्रकेशीत्वलंवुषा विश्वाचीचपंचचूडातिलोत्तमा १५ घृताचीच ४
आदित्यावसवोरुद्राः साश्विनः पितरोपिच धर्म्मः श्रुतंतपोदीक्षाव्यवसायः पितामहः १६ शर्वर्योदिवसाश्चैवमारीचः कश्यपस्तथा शुक्रोबृहस्प
तिर्भौमोवुधोराहुः शनैश्चरः १७ नक्षत्राण्यृतवश्चैवमासाः पक्षाः सवत्सराः वैनतेयः समुद्राश्चकद्रुजाः पन्नगास्तथा १८ शतद्रुश्चविपाशा
चचंद्रभागासरस्वती सिंधुश्चदेविकाचैवप्रभासंपुष्कराणिच १९ गंगामहानदीवेणाकावेरीनर्म्मदातथा कुलंपुना विशल्याचकरतोयांवुवाहिनी २०

52

हा०
३२१

सरयूर्गंडकीचैवलोहित्यश्चमहानदः ताम्रारुणावेत्रवतीपर्णाशागोतमीतथा २२ गोदावरीचवेण्णाचकृष्णवेणातथाद्रिजा दृषद्वतीचकावेरीच
कुमैदाकिनीतथा २२ प्रयागंचप्रभासंचपुण्यंनैमिषमेवच तच्चविश्वेश्वरंस्थानंयत्रवृद्धि विमलंसरः २३ पुण्यतीर्थंशुकलिलंकुरुक्षेत्रंप्रकीर्त्ति
तं सिंधूत्तमस्तपोदानंजंबूमार्गमथापिच २४ हिरण्वतीवितस्ताचतथामस्रावतीनदी वेदस्मृतिर्वेदवतीमलवाथावत्यपि २५ भूमिभागास्तथापुण्या
गंगाद्वारमथापिच ऋषिकुल्यास्तथामेध्यानदीचित्रवहातथा २६ चर्मण्वतीनदीपुण्याकौशिकीयमुनातथा नदीभीमरथीचैवबाहुदाचमहानदी २७
माहेंद्रवाणीत्रिदिवानालिकाचसरस्वती नंदाचापरनंदाचतथातीर्थंमहाहृदः २८ गयाचफल्गुतीर्थंचधर्मारण्यंसदैवतं तथादेवनदीपुण्यासरश्चब्रह्मनि
र्मितं २९ पुण्यंत्रिलोकविख्यातंसर्वपापहरंशिवं हिमवान्पर्वतश्चैवदिव्यौषधिसमन्वितः ३० विंध्योधातुविचित्रांगस्तीर्थवानौषधान्वितः मेरुर्महेंद्रो
मलयः श्वेतश्चरजतावृतः ३१ शृंगवान्मंदरोनीलोनिषधोदर्दुरस्तथा चित्रकूटोंजनाभश्चपर्वतोगंधमादनः ३२ पुण्यःसोमगिरिश्चैवतथैवान्येमहीधराः
दिशश्चविदिशश्चैवक्षितिः सर्वेमहीरुहाः ३३ विश्वेदेवानभश्चैवनक्षत्राणिग्रहास्तथा पांतुनः सततंदेवाः कीर्त्तिताकीर्त्तितामया ३४ कीर्त्तयानोनरो
त्येतान्मुच्यतेसर्वकिल्बिषैः स्तुवंश्चप्रतिनंदंश्चमुच्यतेसर्वतोभयात ३५ सर्वसंकरपापेभ्योदेवतास्तवनंदकः देवतानंतरंविप्रास्तपःसिद्धांस्तपोधिकान्
३६ कीर्त्तितान्कीर्त्तैपि ॥ ॥ ॥ ॥ ॥ मर ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

द्वा२ ॥२ श्री६

द्रा० ष्यामि सर्वपापप्रमोचनान् यवक्रीतोथ रैभ्यश्च कक्षीवानौशिजस्तथा ३७ भृग्वंगिरास्तथा कण्वो मेधातिथिरथ प्रभुः बर्हीच गुणसंपन्नः प्राचीं दिशमुपाश्रि-
३७२ ताः ३८ भद्रां दिशं महाभागा उल्मुचुः प्रमुचुस्तथा मुमुचुश्च महाभागः स्वस्त्यात्रेयश्च वीर्यवान् ३९ मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् दृढायुश्चोर्ध्वबाहु-
श्च विश्रुतावृषिसत्तमौ ४० पश्चिमां दिशमाश्रित्य य एधंते निबोधतान् उषंगुः सह सोदर्यैः परिव्याधश्च वीर्यवान् ४१ ऋषिर्दीर्घतमाश्चैव गौतमः काश्यपस्तथा
एकतश्च द्वितश्चैव त्रितश्चैव महानृषिः ४२ अत्रेः पुत्रश्च धर्मात्मा तथा सारस्वतः प्रभुः उत्तरां दिशमाश्रित्य य एधंते निबोधतान् ४३ अत्रिर्वसिष्ठः शक्तिश्च पा-
राशर्यश्च वीर्यवान् विश्वामित्रो भरद्वाजो जमदग्निस्तथैव च ४४ ऋचीकपुत्रो रामश्च ऋषिरौद्दालकिस्तथा श्वेतकेतुः कोहलश्च विपुलो देवलस्तथा ४५
देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च लोमशो नाचिकेतश्च लोमहर्षण एव च ४६ ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा एष वै समवायश्च ऋषिदेवसम-
न्वितः ४७ आद्यः प्रकीर्तितो राजन् सर्वपापप्रमोचनः नृगो ययातिर्नहुषो यदुः पूरुश्च वीर्यवान् सगरो धुंधुमारो दिलीपश्च प्रतापवान् ४८ कृशा-
श्वो यौवनाश्वश्च चित्राश्वः सत्यवांस्तथा दुष्यंतो भरतश्चैव चक्रवर्ती महामनाः ४९ यवनो जनकश्चैव तथा धृष्टरथो नृपः रघुर्नरवरश्चैव तथा दशरथो
नृपः ५० रामो राक्षसहा वीरः शशबिंदुर्भगीरथः [illegible] ५० रोमपादो महा[illegible]
[illegible] हरिश्चंद्रो मरुत्तश्च तथा दृढरथो नृपः ५१ महोदर्यो ह्यलर्कश्च ऐलश्चैव नराधिपः करंधमो नरश्रेष्ठः कुकुरो रैवतश्च महायशाः ५२ कुरुः संवरणश्चैव मांधा-
ता सत्यविक्रमः मुचुकुंदश्च राजर्षिर्जह्नुर्जाह्नविसेवितः ५३ आदिराजः पृथुर्वैण्यो मित्रभानुः प्रि ॥ ॥ ॥ ॥ ॥ ॥ ए०

३७२

© Dharmartha Trust J&K. Digitized By eGangotri

पंकारः नभरश्चतथाराजाश्वेतोराजर्षिसत्तमः ५४ महाभिषश्चविख्यातोनिमीराजातथाष्टकः आयुः क्षुपश्चराजर्षिः कक्षेयुश्चनराधिपः ५५ प्रतर्दनो
दिवोदासः सहासः कोशलेश्वरः ऐलोनलश्चराजर्षिर्मनुश्चैवप्रजापतिः ५६ हविध्रश्चपृषध्रश्चप्रतीपः शंतनुस्तथा अजः प्राचीन वर्हिश्चतथेक्ष्वाकुर्म
हायशाः ५७ अनरण्योनरपतिर्जानुजंघस्तथैवच कक्षसेनश्चराजर्षिर्येचान्येनानुकीर्त्तिताः ५८ कल्यमुत्थायपयोनि त्यंसंध्येद्वेस्तमयोदये पठेच्छुचि
रनावृत्तः सधर्म्मफलभाग्भवेत ५९ देवादेवर्षयश्चैववस्तुताराजर्षयस्तथा पुष्टिमायुर्यशः स्वर्गंविधास्यंतिममेश्वराः ६० माविघ्नंमाचमेपापंमाचमेपरिपंथि
नः ध्रुवोजयोमेनित्यंस्यात्परत्रचशुभागतिः ६२ इतिश्रीनधर्म्मवंशानुकीर्त्तिनं जनमेजय० शरतल्पगतेभीष्मेकौरवाणांधुरंधरे शयानेवीरशयनेपांडवैः
समुपस्थिते १ युधिष्ठिरोमहाप्राज्ञोममश्रवेपितामहः धर्म्माणामागमंश्रुत्वाविदित्वाधर्म्मसंश्रयान २ दानानांचविधिंश्रुत्वाछिन्नधर्माथसंशयः यदस्य
द्वकारोद्विग्नतन्मेकंसितुमर्हसि ३ वैशं० अभून्मुहूर्त्तंस्तिमितंसर्वंतद्राजमंडलंतूष्णींभूतेततस्तस्मिनपटेचित्रमिवार्पितः ४ मुहूर्त्तमिवचध्यात्वाव्या
सः सत्यवतीसुतः नृपंशयानंगांगेयमिदमाहवचस्तदा ५ राजन्प्रकृतिमापन्नःकुरुराजोयुधिष्ठिरः सहितोभ्रातृभिः सर्वैः पार्थिवैश्चानुयायिभिः ६
उपास्तेत्वांनरव्याघ्रसहकृष्णेनधीमता तमिमंपुरयानायसमनुज्ञातुमर्हसि ७ एवमुक्तोभगवताव्यासेनपृथिवीपतिः युधिष्ठिरंसहामात्यमनुजज्ञेनदी
सुतः ८ उवाचचैनंमधुरंनृपंशांतनवोनृपः प्रविशस्वपुरींराजन्व्येतुतेमानसोज्वरः ९ प्रजस्वविविधैर्यज्ञै ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

स्म १

शां० ३७३ धृष्टैश्चासहितोः ययातिरिव राजेंद्र स्वर्गद्वारमपुरः सः १० कृतधर्मरतः पार्थोपि नूनं स्वांश्चानर्थ्यपर श्रेयमायाँसे वैवश्चेतते मानसोज्वरः ११ रंजय
स्वप्रजाः सर्वाः प्रकृतीः परिसांत्वय सुहृदः फलसत्कारैरर्चयस्व यथार्हतः १२ अनुत्वांतात जीवंतु मित्राणि सुहृ दस्तथा चैत्यस्थाने यथा वृक्षं
हं फलवंतमिव द्विजाः १३ आगंतव्यं च भवता समये मम पार्थिव निविर्वर्त्ते दिनकरे प्रवृत्ते चोत्तरायणे १४ तथेत्युक्त्वा स कौंतेयः सोभिवाद्य पितामहं प्रययौ
सपरीवारो नगरं नागसाह्वयं १५ धृतराष्ट्रं पुरस्कृत्य गांधारीं च पतिव्रतां सह तैरृषिभिः सर्वैर्भ्रातृभिः केशवेन च १६ ॥ ॥ ॥ ॥ ॥

रम० ३७३

पौरजानपदैश्चैवमंत्रिवृद्धैश्चपार्थिवः प्रविवेशकुरुश्रेष्ठः पुरंवारणसाह्वयं २७ दानधर्मे वैशं० ततः कुंतीसुतोराजापौरजानपदंजनं पूज
यित्वायथान्यायमनुजज्ञेगृहान्प्रति १ सांत्वयामासनारीश्चहतवीराहतेश्वराः विपुलैरर्थदानैश्चतदापांडुसुतोनृपः २ सोभिषिक्तोमहा
प्राज्ञः प्राप्यराज्यंयुधिष्ठिरः अवस्थाप्यनरश्रेष्ठः सर्वाःस्वप्रकृतीस्तथा ३ द्विजेभ्योबलमुख्येभ्योनैगमेभ्यश्चसर्वशः प्रतिगृह्याशिषोमुख्यास्त
थाधर्मभृतांवरः ४ उषित्वाशर्वरीःश्रीमान्पंचाशन्नगरोत्तमे समयंकौरवाग्र्यस्यसस्मारपुरुषर्षभः ५ सनिर्ययौगजपुराद्याजकैः परिवा
रितः दृष्ट्वानिवृत्तमादित्यंप्रवृत्तंचोत्तरायणं ६ घृतंमाल्यंचगंधांश्चक्षौमाणिचयुधिष्ठिरः चंदनागुरुमुख्यानितथाकालीयकान्यपि ७
प्रस्थाप्यपूर्वंकौंतेयोभीष्मसंस्करणायवै माल्यानिचमहार्हाणिरत्नानिविविधानिच ८ धृतराष्ट्रंपुरस्कृत्यगांधारींचयशस्विनीं मातरंच
पृथांधीमान्भ्रातॄंश्चपुरुषर्षभः ९ जनार्दनेनानुगतोविदुरेणचधीमता युयुत्सुनाचकौरव्योयुयुधानेनवाविभो १० महताराजयोग्येनपरि
वारेणसंवृतः स्तूयमानोमहातेजाभीष्मस्याग्नीननुव्रजन ११ निश्चक्रामपुरात्तस्मात्यथादेवपतिस्तथा आससादकुरुक्षेत्रेततःशांतनवंन्र

पं १२ १२ १२ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

उ०द०
३७४

उपास्यमानं व्यासेन पाराशर्येण धीमता नारदेन च राजर्षे देवलेनासितेन च १३ हतशिष्टैर्नृपैश्चान्यैर्नानादेशसमागतैः रक्षिभिश्च महात्मानं रक्ष्यमाणं समंततः
१४ शयानं वीरशयने ददृशुर्नृपतिं ततः ततो रथादवतीर्याथ भ्रातृभिः सह धर्मराट् १५ अभिवाद्याथ कौंतेयः पितामहमरिंदमं द्वैपायनादीन्विप्रांश्च तैश्च प्र
त्यभिनंदितः १६ ऋत्विग्भिर्ब्रह्मकल्पैश्च भ्रातृभिः सह धर्मजः आसाद्य शरतल्पस्थमृषिभिः परिवारितं १७ अब्रवीद्भरतश्रेष्ठं धर्मराजो युधिष्ठिरः भ्रा
तृभिः सह कौरव्यः शयानं निम्नगासुतं १८ युधिष्ठिरोहं नृपते नमस्ते जाह्नवीसुत शृणोषि चेन्महाबाहो ब्रूहि किं करवाणि ते १९ प्राप्तोस्मि समये राजन्
न्नग्नीनादाय ते विभो आचार्या ब्राह्मणाश्चैव ऋत्विजो भ्रातरश्च मे २० पुत्रश्च ते महातेजा धृतराष्ट्रो जनेश्वरः उपस्थितः सहामात्यो वासुदेवश्च वीर्यवान् २१
हतशिष्टाश्च राजानः सर्वे च कुरुजांगलाः तान्पश्य नरशार्दूल समुन्मीलय लोचने २२ यच्चेह किंचित्कर्तव्यं तत्सर्वं प्रापितं मया यथोक्तं भवता काले सर्वमेव
च तत्कृतं २३ वैशं० एवमुक्तस्तु गांगेयः कुंतीपुत्रेण धीमता ददर्श भारतान्सर्वान्स्थितान्संपरिवार्य तं २४ ततश्चलावानभीष्मः प्रगृह्य विपुलं भुजं
उद्यन्मेघस्वरो वाग्मी काले वचनमब्रवीत् २५ दिष्ट्या प्राप्तोसि कौंतेय सहामात्यो युधिष्ठिर परिवृत्तो हि भगवान्सहस्रांशुर्दिवाकरः २६ ॥ ॥ ॥

रम०
३७५

माघोयमिति सौम्यश्चांद्रः मासस्य चतुर्भागकरणे साई समतिशेषभागत्वात् अष्टमर्धस्यानतीतत्वेन प्रथमभागस्य विद्यमानत्वात् त्रिभागशेषो भवितुमर्हतीत्यर्थः तेनाद्याष्टमीत्यर्थः २० ॥ ॥

अष्टपंचाशतं रात्र्यः शयानस्याद्य मे गताः शरेषु निशिताग्रेषु यथा वर्षशतं तथा २७ माघोयं समनुप्राप्तो मासः सौम्यो युधिष्ठिर त्रिभागशेषः पक्षोयं शु-
क्लो भवितुमर्हति २८ एवमुक्त्वा तु गांगेयो धर्मपुत्रं युधिष्ठिरं धृतराष्ट्रमथामंत्र्य काले वचनमब्रवीत २९ भीष्म उ० राजन् विदितधर्मोसि सुनि-
र्णीतार्थसंशयः बहुश्रुता हि ते विप्रा बहवः पर्युपासिताः ३० वेदशास्त्राणि सूक्ष्माणि धर्मांश्च मनुजेश्वर वेदांश्च चतुरः सर्वान्निखिलेनानुबुध्यसे ३१
भवितव्यं ४ न शोचितव्यं कौरव्यं हि तत्तथा श्रुतं देवरहस्यं ते कृष्णद्वैपायनादपि ३२ यथा पांडोः सुता राजंस्तथैव तव धर्मतः तान्पालय स्थितो धर्मे गुरुशुश्रूषणे
रतान् ३३ धर्मराजो हि शुद्धात्मा निदेशे स्थास्यते तव आनृशंस्यपरं ह्येनं जानामि गुरुवत्सलं ३४ तव पुत्रा दुरात्मानः क्रोधलोभपरायणाः ईर्ष्या-
भिभूता दुर्वृत्तास्तान्न शोचितुमर्हसि ३५ वैशं० एतावदुक्त्वा वचनं धृतराष्ट्रं मनीषिणं वासुदेवं महाबाहुमभ्यभाषत कौरवः ३६ भीष्म उ० भगव-
न्देवदेवेश सुरासुरनमस्कृत त्रिविक्रम नमस्तेस्तु शंखचक्रगदाधर ३७ अनुजानीहि मां कृष्ण वैकुंठ पुरुषोत्तम रक्ष्याः स्युस्ते पांडवेया भवान्येषां
परायणं ३८ उक्तवानस्मि दुर्बुद्धिं मंदं दुर्योधनं तदा यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ३९ वासुदेवेन तीर्थेन पुत्र संशाम्य पांडवैः संधान-
स्य परः कालस्तवेति च पुनः पुनः ४० ॥

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

अध्यायः एवमुक्त्वा १ धारणास्व आधारादिषु स्थानेषु यथाक्रमं मूलाधारात्स्वाधिष्ठानं ततो मणिपूरं ततो नाहतं ततो विशुद्धिं ततः आज्ञामित्येवं क्रमेण मनः सहितं वायुं निरुंधन्

नचमेतद्व्योमूढः कृतवान्सुमंदधीः घातयित्वेह पृथिवीं ततः स निधनं गतः ४१ त्वां तु नानाम्यहं वीर गुणानामृषिसत्तमं नरेशासहितं
देवदर्प्यामि चिरोषितं ४२ तथा मे नारदः प्राह व्यासश्च सुमहातपाः नरनारायणावेतौ संभूतौ मनुजे क्षिति ४३ समां त्वमनुजानीहि कृ
ष्ण मोक्ष्ये कलेवरं त्वयाहं समनुज्ञातो गच्छेयं परमां गतिं ४४ अनुजानामि भीष्म त्वां वसून्नाप्नुहि पार्थिव न तेस्ति वृजिनं किंचिदिह
लोके महाद्युते ४५ पितृभक्तोसि राजर्षे मार्कंडेय इवापरः तेन मृत्युस्तव वशे स्थितो भृत्य इवानतः ४६ वैशं० एवमुक्तस्तु गांगेयः पांड
वानिदमब्रवीत धृतराष्ट्रमुखांश्चापि सर्वांश्च सुहृदस्तथा ४७ प्राणानुत्स्रष्टुमिच्छामि तन्मानुज्ञातुमर्हथ सत्येषु यतितव्यं वः सत्यं हि
परमं बलं ४८ आनृशंस्यपरैर्भाव्यं सदैव नियतात्मभिः ब्रह्मण्यैर्धर्मशीलैश्च तपोनित्यैश्च भारत ४९ इत्युक्त्वा सुहृदः सर्वान्संपरि
ष्वज्य चैव हि पुनरेवाब्रवीद्धीमान्युधिष्ठिरमिदं वचः ५० ब्राह्मणाश्चैव ते नित्यं प्राज्ञाश्चैव विशेषतः आचार्या ऋत्विजश्चैव पूजनीयात
नाधिप ५१ उत्तमानुशासने वैशं० एवमुक्त्वा कुरून्सर्वान्भीष्मः शांतनवस्तदा तूष्णीं बभूव कौरव्यः स मुहूर्तमरिंदम १ धारयामा
स चात्मानं धारणासु यथाक्रमं तस्योर्ध्वमगमन्प्राणाः संनिरुद्धा महात्मनः २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पर्वपर्याणीतावानीतवानित्यर्थः २ २ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यथेति प्राणेन मुक्तं गात्रं च शिथिलावयवं संयोगं मलन्यमपि शिरः धारयीत मक्रममम तस्मान्नत्त दृंगं विशल्यमभद्दिनर्थीः ५ आत्मा प्राणा संप्रयुक्तं मनः १० ॥ ॥ ॥ ॥

२ इमाश्चर्यमासीच्च मध्ये तेषां महात्मनां सहितैर्ऋषिभिः सर्वैस्तथा व्यासादिभिर्नृप ३ यद्यन्मुंचति गात्रं हि स शंतनुसुतस्तदा तत्तद्विश
ल्यं भवति योगयुक्तस्य तस्य वै ४ क्षणेन प्रेक्षतां तेषां विशल्यः सोऽभवत्तदा तद्दृष्ट्वा विस्मिताः सर्वे वासुदेवपुरोगमाः सहितैर्मु
निभिः सर्वैस्तथा व्यासादिभिर्नृप ६ संनिरुद्धस्तु तेनात्मा सर्वेष्वायतनेषु वै जगाम भित्त्वा मूर्धानं दिवमभ्युत्पपात च ७ महोल्के
व च भीष्मस्य मूर्द्धदेशाज्जनाधिपतिः निःसृत्याकाशमाविश्य क्षणेनांतरधीयत ८ एवं स राजशार्दूल नृपः शांतनवस्तदा समयुज्यत
कालेन भरतानां कुलोद्वहः ९ ततस्त्वादाय दारूणि गंधांश्च विविधान्बहून चितां चक्रुर्महात्मानः पांडवा विदुरस्तथा १० युयुत्सु
श्चापि कौरव्यः प्रेक्षकास्त्वितरेऽभवन युधिष्ठिरस्तु गांगेयं विदुरश्च महामतिः ११ छादयामासतुरुभौ क्षौमैर्माल्यैश्च कौरवं धा
रयामास तस्याथ युयुत्सुश्छत्रमुत्तमं १२ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

दा०
३७६

उष्णीषेकिरीटशीर्षवस्त्रे। उष्णीषंतुशिरोवेष्टेकिरीटेलक्षणांतरेइतिमेदिनी १३ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चामरव्यजनेश्चास्यभीमसेनार्जुनावुभौ उष्णीषेपर्यगृह्णीतांमाद्रीपुत्रावुभौतथा १३ स्त्रियःकौरवनाथस्यभीष्मंकुरुकुलोद्वहं तालवृं
न्तान्युपादायपर्यवीजन्तसर्वशः २४ ततोस्यविधिवच्चक्रुःपितृमेधंमहात्मनःयाजकाजुहुवुश्चाग्नींजगुःसामानिसामगाः १५ ततश्चंद
का३ नैश्चतथाकालीयकैरपि कालागुरुप्रभृतिभिर्गंधैश्चोच्चावचैस्तथा १६ समवच्छाद्यगांगेयंसंप्रज्वाल्यहुताशनं अपसव्यमकुर्वंतधृ
तराष्ट्रमुखाश्चितं १७ संस्कृत्यचकुरुश्रेष्टंगांगेयंकुरुसत्तमाः जग्मुर्भागीरथींपुण्यामृषिजुष्टांकुरूद्वहाः १८ अनुगम्यमाना
व्यासेननारदेनासितेनच कृष्णेनभरतस्त्रीभिर्येचपौराःसमागताः १९ उदकंचक्रिरेचैवगांगेयस्यमहात्मनः विधिवत्क्षत्रियश्रे
ष्ठासचसर्वोजनस्तदा २० ततोभागीरथीदेवीतनयस्योदकेकृते उत्थायसलिलात्तस्माद्रुदतीशोकविह्वला २१ परिदेवयती
तत्रकौरवानभ्यभाषत निबोधतयथावृत्तमुच्यमानंमयानघाः २२ राजवृत्तेनसंपन्नःप्रज्ञयाभिजनेनच सत्कर्त्ताकुरुवृद्धानांपितृ
भक्तोमहाव्रतः २३ जामदग्न्येनरामेणयःपुरानपराजितः दिव्यैरस्त्रैर्महावीर्यःसहतोद्यशिखंडिना २४ ॥ ॥ २१ ॥

दान०
३७६

© Dharmartha Trust J&K. Digitized By eGangotri

३० मरणजं शोकमपनयति वसुरेष इति देवसामानुषत्वं नरकतुल्यं अतोयं हि नास्थानादुत्तमं लोकं गतो न शोच्य इत्यर्थः ३१ नीचहस्तेन मरणाज्जातं शोकं दूरीकरोति स एष इति ३२ अ

घ३

अश्मसारमयं नूनं हृदयं मम पार्थिवाः अपश्यन्त्याः प्रियं पुत्रं यन्न दीर्यति मे ध्रुवं २५ समेतं पार्थिवं क्षत्रं काशिपुर्यां स्वयंवरे विजि
त्यैकरथेनैव कन्यास्ता योऽजहार ह २६ यस्य नास्ति बले तुल्यः पृथिव्यामपि कश्चन हतं शिखण्डिना श्रुत्वा न विदीर्यति यन्मनः २७
जामदग्न्यः कुरुक्षेत्रे युधि येन महात्मना पीडितो नातियत्नेन स हतोऽशिखण्डिना २८ एवंविधं बहुतरं विलपन्तीं महानदीं आ
श्वासयामास तदा गंगां दामोदरो विभुः २९ समाश्वसिहि भद्रे त्वं मा शुचः प्रियदर्शने गतः स परमं लोकं तव पुत्रो न संशयः ३०
वसुरेष महातेजाः शापदोषेण शोभने मानुषत्वमनुप्राप्तो नैनं शोचितुमर्हसि ३१ स एष क्षत्रधर्मेण युध्यमानो रणाजिरे धनंजयेन
निहतो नैष देवि शिखण्डिना ३२ भीष्मं हि कुरुशार्दूलमुद्यतेषु महारणे न शक्तः संयुगे हन्तुं साक्षादपि शतक्रतुः ३३ ॥

र्जुनमपि शस्त्रनीतिशंकया तस्य मृत्युभयमेव नास्तीत्याह भीष्मं हीति ३३ ॥ ॥

भा०
३११

शेषं स्पष्टार्थं ३१ गोपालं मूर्त्निवेदे शिवमुपनिषदि ब्रह्मविद्ब्रह्मणा यं तैर्कैर्धीरे समभिध्यानफणिपतिभाणिनौ योलं गंगां धरार्यभावे हृनारायणं यो मुकुलनकृतनेदृहि रागामूर्त्तिपास्तोऽश्रौतेतिविं

स्वच्छंदतस्तव सुतो गतः स्वर्गं शुभानने न शक्या भविनिहंतुं हि राणे तं सर्वैर्देवताः ३४ तस्मान्मा देवि गंगे त्वं शोचस्व कुरु
नंदनं वसुरेष गतो देवि पुत्रस्ते विज्वरा भव ३५ इत्युक्ता सा तु कृष्णेन व्यासेन च सरिद्वरा त्यक्त्वा शोकं महाराजं स्वं वार्यवत
तार ह ३६ सत्कृत्य ते तां सरितं तत्र कृष्णमुखा नृप अनुज्ञातास्तया सर्वे न्यवर्त्तंत जनाधिप २ ३७ इति श्रीमहाभारते
शतसाहस्र्यां संहितायां वैयासिक्यां शांतिपर्वणि उत्तमानुशासने दानधर्मेः समाप्तः आनुशासनिकं समाप्तं ॥ ॥

नाम णिं च व्यभजत्स महाभारते दानधर्मान १ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्य कृतौ भारतभावदीपे आनुशासनिकपर्वार्थप्रका
शः समाप्तिमगमत ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ टीम०
३२

© Dhaata Trust & Digitized By eGangotri

टी०
३७८

अस्यानंतरंचाश्वमेधिकंपर्वभविष्यति यस्यायमादिमश्लोकः वैशं० कृतोदकंतुराजानंधृतराष्ट्रंयुधिष्ठिरः पुरस्कृत्यमहाबाहुरुत्ततारा कुलेंद्रि
यः दानधर्म्मेत्वभीष्टतांताः गौतमीमृत्युसंवादः सुदर्शनोपाख्यानंशुकव्याससंवादः सुदर्शनोपाख्यानंशुकव्याससंवादः दैवपुरुषकारीयं क
र्म्मफलिकंसृगालवानरसंवादः दुष्टपुरुषापदेशः स्त्रीरुक्मिणीसंवादः भंगाश्वोपाख्यानं उपमन्युस्तवः विष्णुनामसहस्रं अष्टवक्रादिसंवा
दः श्येनकपोतीयं स्वर्गनरकवर्णनं अंगिरसतीर्थयात्रागंगामाहात्म्यमगस्तिशक्रसंवादः वीतहव्योपाख्यानंब्रह्मनारदसंवादः श्येनकपो
तीयं ब्रह्मणप्रशंसानारदपंचचूडासंवादः विपुलोपाख्यानंविवाहधर्म्मच्यवनोपाख्यानंच्यवनकुशिकसंवादः आरामतडागवर्णनंबृह
स्पतीन्द्रसंवादः अन्नदानप्रशंसानक्षत्रयोगदानंनृगवासुदेवसंवादः गोप्रदानिकंगोलोकप्रश्नः श्रीगोसंवादः सुवर्णोत्पत्तिः सुवर्णदानं
श्राद्धकल्पः बिसस्तैन्यंपुष्करसैन्यं छत्रोपानहोत्पत्तिः बलिप्रदानं सुवर्णमनुसंवादः अगस्त्यभृगुसंवादः एजानुचांडालसंवादःहस्तिकूटंब्र
ह्मभगीरथसंवादः आपद्धर्माचारः ज्येष्ठकनिष्ठवृत्तिः उपवासविधिः विष्णोर्द्वादशनामकं संसारचक्रंमांसभक्षणंकीटोपाख्यानंमैत्रेयभिक्षा शां
डिलीसुमनासंवादः देवरहस्येभोज्याभोज्यानीनुकीर्त्तनंप्रायश्चित्तं एतेवृत्तांताः समासमिति ॥ ॥ ॥ ॥ ॥ ॥

राम०
३७८

© (O) Dhanvantari Trust, J&K Digitized By eGangotri

दानप्रवर्पत्रे
२६८

य. ... त्रिका ३१८.

© (c) Dharmartha Trust J&K. Digitized By eGangotri

© Dharmartha Trust J&K. Digitized By eGangotri

शान्तिपर्वणि

दानधर्म आनुशासनिकम्

© Dharmartha Trust J&K. Digitized By eGangotri

© (c) Dharmartha Trust J&K. Digitized by eGangotri